“स्वातन्त्र्योत्तरप्रमुखवैयाकरणानां व्यक्तित्वकृतित्वयोरध्ययनम् ”

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य व्याकरणशाखाऽन्तर्गताय
विद्यावारिधि-उपाधये प्रस्तुतः

शोधप्रबन्धः – The Thesis

"A Study of the Personality and Works of Post-Independence Prominent Grammarians"

Submitted to Shree Somnath Sanskrit University, Veraval for the Award of Degree of Doctor of Philosophy (Ph.D.)

मार्गदर्शकः
प्रो. विनोद कुमार झा
व्याकरणविभागाध्यक्षः
निदेशकः पी.जी. डिपार्टमेंट
श्रीसोमनाथसंस्कृतविश्वविद्यालयः
वेरावलम्

अनुसन्धानकर्ता
विजेन्द्र कुमार शर्मा
सहायकाचार्यः
सेठरंगलालकोठारीराजकीयमहाविद्यालयः
राजसमंद - राजस्थानम्

श्री सोमनाथ संस्कृत युनिवर्सिटी
(NAAC द्वारा A+ श्रेण्या प्रत्यायितः)
राजेन्द्रभुवनमार्गः, बिरलामन्दिरसमीपम्, वेरावल-गुजरातम् (भारतम्) – 362265
www.sssu.ac.in

पञ्जीकरणदिनाङ्कः – 07/07/2020 पञ्जीकरणसङ्ख्या – 183

वर्षम् -2026

प्रमाणपत्रम्

"स्वातन्त्र्योत्तरप्रमुखवैयाकरणानां व्यक्तित्वकृतित्वयोरध्ययनम्" इत्याख्योऽयं विषयः श्रीमता विजेन्द्र कुमार शर्मा इति नामाक्षरं धृतवता अनुसन्धानकर्त्रा मदीये मार्गदर्शने निर्मितो विद्यते। अनेन अस्मिन् शोधग्रन्थे अपेक्षिताः आवश्यकाः सर्वेऽपि अंशाः यथाविधि स्वप्रयत्नानुगुणं संशोधिताः सन्ति। अस्य महाशोधप्रबन्धस्य निष्कर्षः अस्य एव अनुसन्धातुः परिश्रमफलम् अस्ति। निर्दिष्टे काले अनेन असौ महाशोधप्रबन्धः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य विद्यावारिधिः (Ph.D.) इति उपाधिप्राप्त्यै समर्प्यते इति अहं प्रमाणीकरोमि।

स्थलम् – वेरावलम् **मार्गदर्शकः**

दिनाङ्कः -

प्रो. विनोद कुमार झा

Certificate of guide

This is certified that Mr Vijendra Kumar Sharma of Shree Somnath Sanskrit university, Veraval has carried out his research work under my guidance and supervision. The title of his thesis is "A Study of the Personality and Works of Post-Independence Prominent Grammarians'' The thesis submitted is a record of original research work done by the student and it represents independent Ph.D. research work on the part of the student.

No part of the thesis was submitted for the award of any degree or diploma prior to this date.

Place – Veraval **Research Guide**

Date -

Prof. Vinod Kumar Jha

प्रतिज्ञापत्रम्

अहं **विजेन्द्र कुमार शर्मा,** श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य व्याकरण-विभागे विद्यावारिधिः (Ph.D) इति उपाधये प्रो. विनोद कुमार झा-महोदयानां मार्गदर्शनेन **"स्वातन्त्र्योत्तरप्रमुखवैयाकरणानां व्यक्तित्वकृतित्वयोरध्ययनम्"** इति शीर्षकेण स्वप्रयत्नेन महाशोधप्रबन्धम् अलिखम्। अस्य महाशोधप्रबन्धस्य कृते सर्वाः सामग्र्यः मया मार्गदर्शकाणां निर्देशानुसारं तथा संशोधननियमानां पालनपूर्वकं सङ्कलिताः सन्ति। अहं प्रतिज्ञां करोमि यदस्मिन् विषये पूर्वं कुत्रापि संशोधनं जातं नास्ति तथा कस्मैचिदपि उपाधये एषः शोधप्रबन्धः प्रदत्तः नास्ति।

स्थलम् – वेरावलम् **एवं विनीतः**

दिनाङ्कः -

विजेन्द्र कुमार शर्मा

Ph.D. Candidate

I Vijendra Kumar Sharma here with declare that research work presented in the thesis entitled as **''A Study of the Personality and Works of Post-Independence Prominent Grammarians''** has been carried out by me under the guidance of Prof. Vinod Kumar Jha, Shree Somnath Sanskrit University, Veraval.

I agree to allow the University to upload the electronic version of my Ph.D. Thesis on a public access website.

The thesis being submitted by me, is a record of original research work and it represents independent research work on my part. No part of the thesis was submitted by me for the award of any degree or diploma prior to this date.

Place – Veraval **Declarations by**

Date -

Vijendra Kumar Sharma

Shree Somnath Sanskrit University
(Estd. by Government of Gujarat)
Rajendra Bhuvan Road, **Veraval - 362 266.** District : Gir -Somnath. (Gujarat)
Ph. : 02876-244532 Fax : 02876-244417, E-mail : sssu.veraval@gmail.com
Website : www.sssu.ac.in

Ref No. Date :

Ph.D.Registration Certificate

Ph.D.Registration No :-183

Ph.D.Registration Date :-07/07/2020

This is to certify that **VIJENDRA KUMAR SHARMA** has remained present before Research Discussion Committee (R.D.C.) of this University on 30/01/2020. He has been allotted Prof.Vinodkumar Jha of this University as his Research Supervior (Ph.D.Guide). The Title of Research finalized in R.D.C. and allotted to him is **स्वातन्त्र्योत्तरप्रमुखवैयाकरणानां व्यक्तित्वकृतीनामध्ययनम्**

Tentative date of completion of her Ph.D. is 06/07/2023

(Dr.Dashrath Jadav)
Registrar

Shree Somnath Sanskrit University
(Estd. by Government of Gujarat)
Rajendra Bhuvan Road, **Veraval - 362 266.** District : Gir -Somnath. (Gujarat)
Ph. : 02876-244532 Fax : 02876-244417, E-mail : sssu.veraval@gmail.com
Website : www.sssu.ac.in

Ref No. SSU/Ph.D/Certi/2521/2020 Date: -30/01/2020

CERTIFICATE

This is to certify that Mr./Ms. **VIJENDRA KUMAR SHARMA** has passed Ph.D. Entrance Test and he/she has successfully completed Ph.D. Course Work organized by Shree Somnath Sanskrit University, Veraval (As per UGC Minimum Standards and Procedure for the award of Ph.D. Degree Regulations, 2009,2016,2018) from 20th January, 2020 to 29th January, 2020. He/She has successfully completed this Ph.D. Course Work.

(Dr. Dashrath Jadav)
Registrar

कृतज्ञतापत्रम्

"कृते च प्रति कर्तव्यम् एषः धर्मः सनातनः" शास्त्रपङ्क्तिमिमां संस्मृत्य कृतज्ञताभावं समर्प्यते। स्वाभाविकं विद्यते यत्, महाशोधप्रबन्धग्रन्थस्य लेखनकार्यं सरलं न भवति। शोधयात्रायामस्यां नैकाः कठिनाः समस्याः समुपस्थिताः अभूवन्। ताः निराकृत्य एव शोधोपाधिः प्राप्यते। एतस्यां शोधयात्रायां बहुभिः आचार्यैः बहुधा मार्गदर्शितोऽहम्। अवसरेऽस्मिन् तेभ्यः सर्वेभ्यः कृतज्ञतापुष्पाणि समर्पयामि।

"स्वातन्त्र्योत्तरप्रमुखवैयाकरणानां व्यक्तित्वकृतित्वयोरध्ययनम्" इति शीर्षकेण भगवतः कृपया समारब्धं महाशोधप्रबन्धकार्यं मम पितामहीपितामहानाम् शुभाशीर्वादेन" च मम जीवनमार्गदर्शकानां पूज्यानां गुरूणां प्रो. शिवकान्त झा महोदयानाञ्च आशीर्वादैः, प्रेरणया, मार्गदर्शनेन च सुसम्पन्नम् अभवत्। तदर्थं तेषां सर्वेषां चरणकमलेषु प्रणामाञ्जलिपुरस्सरं कृतज्ञतां व्याहरामि।

विशेषतः मार्गदर्शकाः प्रो. विनोद कुमार झा गुरवः संशोधनस्य विषयचयनादारभ्य महाशोधप्रबन्धस्य लेखनकार्यसमाप्तिं यावत् समपेक्षितं सर्वं मां बोधितवन्तः, तदर्थं पुनस्तेषां धन्यवादाः। मम जीवने भवतां सदैव आशीर्वादाः प्रेरणाश्च निश्चप्रचं भविष्यन्ति।

अथ च कार्येऽस्मिन् येषामवर्णनीयं साहाय्यं विशेषमन्तव्यानि च प्राप्तानि, संशोधनकार्यसम्पन्नतायां मह्यं सर्वदा प्रोत्साहनं प्रदत्तवत्यै मम जीवनसङ्गिन्यै श्रीमती वंदना शर्मा-देव्यै साधुवादाः समर्प्यन्ते। एवञ्च कार्येऽस्मिन् प्रत्यक्षाप्रत्यक्षरूपेण साहाय्यं कृतवद्भ्यः सर्वेभ्यः सुज्ञेभ्यः कृतज्ञतां प्रयच्छामि।

संशोधनसम्बन्धिनि प्राशासनिककार्ये च श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य सर्वेऽपि गुरवः कर्मचारिणः प्रतिपदं मार्गदर्शनं प्रदत्तवन्तः, तदर्थं तेषां समेषां चरणयोः सणति कृतज्ञतां विनिवेदयामि। तथा च आवश्यकानां ग्रन्थानां प्राप्तिः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य ग्रन्थालयतः सरलतया अभवत्, तदर्थं ग्रन्थालय-कर्मचारिणां कृते कृतज्ञतावचांसि समर्पयामि।

(विजेन्द्र कुमार शर्मा)

DrillBit

The Report is Generated by DrillBit Plagiarism Detection Software

Selected Language Sanskrit

Submission Information

Author Name	Vijendra Kumar Sharma
Title	A Study of the Personality and Works of Post-Independence Prominent Gr ammarians
Paper/Submission ID	7267413
Submitted by	kaleravi001@gmail.com
Submission Date	2026-10-16 16:00:26
Document type	Thesis

Result Information

Similarity	**0%**

A Unique QR Code use to View/Download/Share Pdf File



प्रस्तावना

या देवी स्तूयते नित्यं विबुधैर्वेदपारगैः।

सा मे भवतु जिह्वाग्रे ब्रह्मरूपा सरस्वती।।

भारतीयसंस्कृतेः मूले ज्ञानस्य यः अक्षयः स्रोतः वर्तते तत्र व्याकरणशास्त्रस्य स्थानमद्वितीयमस्ति। वेदाङ्गवाङ्मये व्याकरणस्य 'मुखम्' इति सर्वप्रधानं स्थानं प्रदत्तमस्ति यतः विना व्याकरणेन वेदार्थानां यथार्थज्ञानमशक्यमेव। भारतीयपरम्परायां व्याकरणशास्त्रस्य उत्पत्तिः प्राचीनतमकाले वेदानां काल एव संवृत्ता यतः ऋग्वेदस्य पदपाठे प्रातिशाख्यग्रन्थेषु च प्रकृति-प्रत्यय-विभागाः स्वरप्रक्रियाः च स्पष्टतया दृश्यन्ते। वेदानां संरक्षणमुच्चारणाशुद्धिनिवारणं शब्दस्वरूपाणाञ्च परिष्करणमस्य शास्त्रस्य मुख्यमुद्देश्यमासीत्।

प्राचीनकालादारभ्य महर्षिणा पाणिनीना प्रणीतं 'अष्टाध्यायी' इति विश्वविश्रुतं व्याकरणशास्त्रं भारतीयचिन्तनस्य आधारशिला अस्ति। पाणिनेः प्राक् शौनक-शाकटायन-आपिशलि-प्रमुखाः आचार्याः आसन्। तदनन्तरं कात्यायनेन वार्तिकानि रचितानि पतञ्जलिना च महाभाष्यं प्रणीतम्। एषा त्रयी 'मुनित्रयम्' इति नाम्ना प्रख्याता अस्ति यस्याः प्रभावेण संस्कृतवाङ्मये व्याकरणस्य अमोघा मूलं रचिता जाता यस्य च उपरि सम्पूर्णं भारतीयदर्शनशास्त्रं प्रतिष्ठितमस्ति।

शोधकार्यस्य औचित्यं पृष्ठभूमिः च

यद्यपि प्राचीनकाले पाणिनि-कात्यायन-पतञ्जलि-भर्तृहरि-नागेशभट्टाद्यैः आचार्याः व्याकरणशास्त्रस्य महती सेवा कृता तथापि स्वातन्त्र्योत्तरकाले (independence era) संस्कृते व्याकरणशास्त्रस्य क्षेत्रे विदुषां योगदानं मौलिकग्रन्थानां रचना अध्ययन-अध्यापनपद्धतीनां परिवर्तनञ्च अतीव

महत्त्वपूर्णमासीत्। अस्मिन् काले मिथिला-काशी-गुजरात-राजस्थानप्रदेशेषु व्याकरणशास्त्रस्य विकासः अभूतपूर्वः जातः। पाणिनीयव्याकरणं, महाभाष्यं वाक्यपदीयं वैयाकरणभूषणसारश्चेत्यादीन् ग्रन्थानाधारीकृत्य नवीनाः ग्रन्थाः प्रणीताः येन पारम्परिकव्याकरणस्य आधुनिकीकरणं सुबोधशिक्षणञ्च सुकरमभवत्।

अस्मिन् शोधप्रबन्धे स्वातन्त्र्योत्तरकालीनस्य संस्कृतव्याकरणशास्त्रस्य विविधपक्षाणां – यथा मौलिकग्रन्थाःटीकापरम्परा शोधप्रबन्धानां योगदानं व्याकरणाचार्याणां जीवनवृत्तमभिनवसिद्धान्ताश्च गभीरं वैज्ञानिकञ्च अध्ययनं प्रस्तुतमस्ति।

शोधप्रबन्धन्यासाः (Chapter Outline me अध्यायानां परिचयः)

अयं शोधप्रबन्धः षट्सु अध्यायेषु विभक्तः अस्ति:

प्रथमोध्यायः - व्याकरणशास्त्रस्य ऐतिहासिक-दार्शनिकपार्श्वभूमिः

अस्मिन् अध्याये व्याकरणशास्त्रस्य उद्भवो विकासश्च ऐतिहासिकाधारैः दार्शनिकदृष्टिकोणैश्च सम्यक् प्रतिपादितः अस्ति। वैदिककालादारभ्य मुनित्रयस्य योगदानं, नागेशोत्तरव्याकरणशास्त्रे पद-पदार्थ-परिष्कारस्य सातत्यं नव्यन्यायशैल्याः प्रयोगः ऊनविंशतिशतकस्य विंशशतकस्य च प्रमुखवैयाकरणानां योगदानं च सविस्तरं वर्णितमस्ति।

द्वितीयोध्यायः - स्वातन्त्र्योत्तरकाले संस्कृतव्याकरणशास्त्रस्य मौलिकग्रन्थाः

अस्मिन् अध्याये स्वातन्त्र्योत्तरकाले प्रणीतानां प्रमुखानां ग्रन्थानां ग्रन्थकाराणाञ्च विवेचनं कृतम् अस्ति। यथा – दीनबन्धुझा महोदयस्य 'पाणिनीयव्याकरणतत्त्वप्रदीपः'अमृतलाल शास्त्रीमहोदयस्य 'परिभाषेन्दुप्रभा' पण्डितगोपालशास्त्रिणः 'पाणिनीयप्रबोधः' पण्डितरामाज्ञापाण्डेयस्य 'व्याकरणदर्शन-

भूमिका' तथा बालकृष्ण व्यासशास्त्री सुरेशज्ञा डॉ. पुष्पा दीक्षिता इत्यादीनां कृतयः। एते ग्रन्थाः पारम्परिकव्याकरणस्य सुबोधशिक्षणाय अतीव सहायकबभूवुः।

तृतीयोध्यायः - स्वातन्त्र्योत्तरकालीनव्याकरणशास्त्रस्य टीकाग्रन्थपरम्पराः

अस्मिन् अध्याये टीकाशब्दस्य व्युत्पत्तिः टीकाग्रन्थलेखनस्य परम्परा टीकानां महत्त्वं च प्रतिपादितमस्ति। स्वातन्त्र्योत्तरकाले पण्डितसभापति उपाध्याय महामहोपाध्यायतातासुब्बरायशास्त्री, पण्डितब्रह्मदत्तजिज्ञासु पण्डितगोपालशास्त्री नेने पण्डितरघुनाथशर्मा ('अम्बाकर्त्री' संस्कृतटीकायाः प्रणेता) प्रमुखानां संस्कृते संस्कृतेतरासु भाषासु च विरचितानां टीकाग्रन्थानां विस्तृतपरिचयः प्रदत्तः अस्ति।

चतुर्थोध्यायः - व्याकरणशास्त्रस्य विकासे शोधप्रबन्धानां योगदानम्

अस्मिन् अध्याये शोधशब्दस्य व्युत्पत्तिः टीकाग्रन्थेषु शोधप्रबन्धेषु च मूलभूतो भेदः तथा च स्वातन्त्र्योत्तरकालस्य प्रमुखानां शोधप्रबन्धकाराणां (यथा पं. गौरीनाथशास्त्री, पं. युधिष्ठिरमीमांसकः पं. श्रीरामप्रसादत्रिपाठी पं. मणिनाथ झा पं. भागीरथप्रसादत्रिपाठी डॉ. सत्यव्रतशास्त्री) जीवनपरिचयः कृतयश्च वर्णिताः सन्ति।

पञ्चमोऽध्यायः - व्याकरणाचार्याणां संस्कृतविदुषां च जीवनवृत्तं योगदानञ्च

अस्मिन् अध्याये संस्कृतव्याकरणस्य संरक्षणे प्रसारे अध्यापने च निरतानां प्राज्ञानां (यथा श्रीकृष्णचन्द्रशर्मा, शशिनाथ झा, शिवकान्त झा, दयानाथ झा, बोधकुमार झा, विष्णुकान्त पाण्डेय, ब्रजभूषण ओझा प्रमुखानाम्) शैक्षिकयोग्यता, अध्यापनानुभवः, ग्रन्थप्रकाशनं पुरस्काराश्च सम्यक् रूपेण विवेचिताः सन्ति।

षष्ठोऽध्यायः - पाणिनीयव्याकरणे चर्चितानाम् अभिनवसिद्धान्तानां गहनं समीक्षणम्:

अस्मिन् अध्याये पाणिनीयव्याकरणे प्रमाणव्यवस्था (शब्दस्य प्राधान्यम्), स्फोटसिद्धान्तस्य विकासः (षोडश तथा द्वात्रिंशत् भेदाः), मोक्षनिरूपणम् (वाक्-

साधनाद्वारा मोक्षप्राप्तिः), तथा च आधुनिकभाषासिद्धान्तानां पाणिनीयव्याकरणेन सह सम्बन्धः इत्येते प्रमुखास्तवाः विमर्शिताः सन्ति।

शोधकार्यस्योद्देश्यानि (Objectives of the Research)

स्वातन्त्र्योत्तरकाले संस्कृतव्याकरणशास्त्रे विदुषां मौलिकयोगदानस्य सम्यक् मूल्याङ्कनम्।

पारम्परिकसंस्कृतव्याकरणस्य टीकाग्रन्थानां शोधप्रबन्धानाञ्च ऐतिहासिकं दार्शनिकञ्च विश्लेषणम्।

व्याकरणशास्त्रस्य दार्शनिकतत्त्वाणां (यथा स्फोटसिद्धान्तः प्रमाणव्यवस्था मोक्षतत्वम्) आधुनिकसन्दर्भे उपादेयतायाः प्रतिपादनम्।

नवीनपीढ्याः कृते सुबोधशिक्षणपद्धतीनां तथा च व्याकरणशास्त्रस्य नवीनदिशायाः प्रबोधनम्।

शोधपद्धतिः (Research Methodology)

अस्मिन् शोधप्रबन्धे ऐतिहासिक-विश्लेषणात्मक-तुलनात्मक-दार्शनिकपद्धतीनां प्रयोगः कृतः अस्ति। मूलसंस्कृतग्रन्थानाम्, टीकाग्रन्थानाम्, स्वातन्त्र्योत्तरकालीन-शोधपत्राणां च प्रामाणिकमथनं कृत्वा तार्किकशैल्या विषयाणां प्रतिपादनं विहितम् अस्ति।

उपसंहारः

संक्षेपेषु इदं वक्तुं शक्यते यत् व्याकरणशास्त्रं केवलं शब्दरूपाणां साधनमात्रं नास्ति, अपितु मानवीयचिन्तनस्य, तर्कशास्त्रस्य, दर्शनस्य च प्रकृष्टं रूपम् अस्ति। स्वातन्त्र्योत्तरकाले विद्वांसैः कृतानि गवेषणात्मकानि कार्याणि व्याकरणशास्त्रस्य क्षितिजे नवीनक्रान्तिम् अजनयन्। एषः शोधप्रबन्धः संस्कृतव्याकरणशास्त्रस्य प्राचीनपरम्परायाः आधुनिकविकासस्य च सुदृढं संयोजनं प्रस्तुतयन् शोधकर्तृणां कृते नवीनदिशायाः प्रबोधकं भविष्यति।

विषयानुक्रमणिका

प्रस्तावना **ix-xii**

प्रथमोऽध्यायः **1-57**

1. **व्याकरणशास्त्रस्योद्भवविकासश्च-** **2-5**

   (i) व्याकरणशास्त्रस्योद्भवः प्राचीनत्वञ्च

   (ii) व्याकरणस्यादि सस्कर्ता इन्द्रः

2. **नागेशोत्तरव्याकरणशास्त्रे पदपदार्थपरिष्कारे सातत्यम्** **5-13**

   (i) परिष्कारकालः

   (ii) प्रतिष्ठाकालः

   (iii) नागेशोत्तरकालीनवैयाकरणानां कालक्रमेण प्रणीता सूची

3. ऊनविंशशत्तकस्य केषाञ्चिद् विशिष्टवैयाकरणानां संक्षिप्तपरिचयः- 13-22

   (i) काशीनाथ शास्त्री

   (ii) श्रीबालशास्त्री (1839 तः 1882 ख्रिस्ताब्दपर्यन्तम्)

   (iii) वैयाकरण केसरी पं. यागेश्वरशास्त्री (1828 तः 1899 ख्रिस्ताब्दपर्यन्तम्), हैमवती-टीकाया वैशिष्ट्यम्

   (iv) ऊनविंशशतकस्य प्रमुखवैयाकरणानां कालक्रमेण प्रणीता सूची

4. विंशशतकस्य केचन मूर्धन्याः शाब्दिकाः- 23-59

ग्रन्थकाराः	**कालः**	**कृतयः**	**क्र.सं.**
1. श्रीतात्याशास्त्री (रामकृष्णशास्त्री)	1845 ख्रिस्ताब्दतः 1919 ख्रिस्ताब्दपर्यन्तम्	1. भूतिटीका-परिभाषेन्दुशेखरस्य	23-27
2. प. उमापति द्विवेदी प्रसिद्धनाम पं. नकछेदराम दूबे	1853 ख्रिस्ताब्दतः 1913 ख्रिस्ताब्दपर्यन्तम्	- - - - -	28-29
3. श्रीगंगाधरशास्त्री तैलङ्ग मानवस्ते	1853 ख्रिस्ताब्दतः 1913 ख्रिस्ताब्दपर्यन्तम्	1. वाक्यपदीय-रसगंगाधरादिग्रन्थान् टिप्पणी परिष्कारेण चालङ्कृतवान्	30-34
4. पण्डित काशीनाथशास्त्री	1853 ख्रिस्ताब्दतः 1938 ख्रिस्ताब्दपर्यन्तम्		34-37
5. पं. श्रीजयदेव मिश्रः	1854-1936 ख्रिस्ताब्दपर्यन्तम् (1901 वै. 1983 वैकमाब्दपर्यन्तम्)	1. विजयानाम्नी परिभाषेन्दुशेखरस्य टीका 2. शास्त्रार्थरत्नावली सपरिष्कारः पाणिनीय सूत्रार्थरूपोग्रन्थः	37-42

6. म. म. शशिनाथ झा	1859 ख्रिस्ताब्दतः 1931 ख्रिस्ताब्दपर्यन्तम्	1. विभक्त्यर्थप्रकाशिका टीका 2. 'सरला' परमलघुमञ्जूषायाः टीका	42-44
7. वसन्त त्र्यम्बकशेवडेमहाशयः	1856 त. 1941 ख्रिस्ताब्दपर्यन्तम्	1. 'तत्वप्रकाशिका' स्फोटवत्वनिरुपणस्य टीका	44-45
8. श्रीवासुदेवशास्त्री अभ्यंकरः	1863 ख्रिस्ताब्दतः 1942 ख्रिस्ताब्दपर्यन्तम्	2. तत्वादर्शः-परिभाषेन्दुशेखरस्य टीका 3. 'गूढार्थप्रकाशः लघुशब्देन्दुशेखरटीका	45-46
9. मैथिलोमधुसूदन ओझा	1866 ख्रिस्ताब्दतः 1940 ख्रिस्ताब्दपर्यन्तम्	1. 'वाक्तत्त्वस्य' विवेचनम्	47-52
10. पं. देवनारायण त्रिपाठी 'तिवारी' प्रसिद्धनाम् पं. हरिनारायण 'तिवारी'	1866 ख्रिस्ताब्दतः 1941 ख्रिस्ताब्दपर्यन्तम्		52-54
11. श्रीनित्यानन्द पर्वतीयः	1867 ख्रिस्ताब्दतः 1931	1. दीपकटीकालघुशब्देन्दुशेखरस्य	55-57

	ख्रिस्ताब्दपर्यन्तम्	अव्ययीभावप्रकरणा न्तस्य 2. 'टिप्पणी' तत्त्व-प्रकाशिका,	

द्वित्तीयोऽध्यायः 58-106

1. कालक्रमेणमूलग्रन्थकाराणां परिचयः

मूलग्रन्थकाराः	तत्समयः	तत्कृतयः	क्र.सं.
1. महावैयाकरणदीनबन्धु झाः	1878 ख्रिस्ताब्दतः 26-11-1955 ख्रिस्ताब्दपर्यन्तम्	1. लिङ्गवचन-विचारः प्रकाशन-कालः 1954 ख्रि. 2. पाणिनीयव्याकर-णतत्वप्रदीप' (मूलग्रन्थ) प्रकाशन-कालः 1988 ख्रि. 3. कौमुदीमूलार्थ विद्योतिनी-प्रकाशन-कालः 1985 ख्रि. 4. समासशक्ति-दीपिका-	69-63

		प्रकाशनकालः 1977 ख्रि. 5. उपसृष्टधात्वर्थ-संग्रहः रचनाकालः 1936 प्रकाशनकालः 1981	
2. श्रीमदमृतलालशास्त्रिणः	1889 तः स्वातन्त्र्योत्तरकालपर्यन्तम्	1. पद्यानुवादः-परिभाषेन्दुशेखरस्य	63-65
3. पं. गोपालशास्त्री 'दर्शनकेसरी'	1892 तः विंशशतकस्योतरार्द्धपर्यन्तम्	1. पाणिनीयप्रबोधः (मूलग्रन्थः) 2. ऋजुपाणिनीयम् 3. पाणिनीयप्रदीपः 4. पाणिनीय-प्रशस्तिः	65-69
4. पं. रामाज्ञापाण्डेयः	1900 तः 1978 ख्रिस्ताब्दपर्यन्तम्	1. व्याकरणदर्शन-भूमिका 2. व्याकरणदर्शन-पीठिका 3. व्याकरणदर्शन-प्रतिमा	69-75

5. पं, बालकृष्णव्यास शास्त्री	1906 तः विंशशतकपर्यन्तम्	1. पद्यसिद्धान्त-कौमुदी	76-77
6. श्री सुरेशझा शिक्षाशास्त्री	5.12.1920 तः विंशशतकपर्यन्तम्	1. श्लोकसिद्धान्त-कौमुदी सिद्धान्त-कौमुदीग्रन्थस्य पद्यानुवादः प्रकाशनवर्षः 1982 ख्रिस्ताब्दे	77-78
7. डॉ. पुष्पादीक्षिता	12.6.1942 तः संस्कृतसेवारता अस्ति	1. अष्टाध्यायी सहज बोध कौमुदीग्रन्थस्य पद्यानुवादः, वाराणसी 2. श्लोकलघुसि-द्धान्तकौमुदी (अप्रकाशिता)	78-80

2. स्वातन्त्र्योत्तरकाले प्रणीतानां मूलग्रन्थानां कालक्रमेण परिचयो वैशिष्ट्यञ्च-

मूलग्रन्थाः	**रचना कालः**	**प्रकाशन कालः**	**प्रकाशकः**	**प्रणेता/प्रणेत्री**	
1. पाणिनीय-व्याकरणतत्वप्रदीपः अस्यान्याः कृतयः-	1952 ख्रि.	1988 ख्रि.	का. सि. द. सं. वि. वि.	महावै दीनबंधु झा	80-85

कौमुदी मूलार्थ विद्योगिनी समाराशक्तिदीपिका उपसृष्टधात्वर्व संग्रहः लिङ्गवचनविचारः	1918 ख्रि. 1928 ख्रि. 1928 ख्रि. 1950 ख्रि.	1977 ख्रि. 1977 ख्रि. 1981 ख्रि. 1954 ख्रि.	दरभंगा का. सि. द. सं. वि. वि. दरभंगा का. सि. द. सं. वि. वि. दरभंगा का. सि. द. सं. वि. वि. दरभंगा का. सि. द. सं. वि. वि.	महावै दीनबंधु झा महावै दीनबंधु झा महावै दीनबंधु झा महावै दीनबंधु झा	
2. परिभाषेन्दुप्रभाः भावप्रकाशिका च	1963 ख्रि.		सौराष्ट्रतः	श्रीमदमृतला लशास्त्रिणः	85
3. पाणिनीयप्रबोधः		1970	सं.सं.वि.	पं.	86

		ख्रि.	वि. वाराणसी	गोपालशास्त्री 'दर्शनकेसरी (1892)	
4. व्याकरणदर्शन-भूमिका		1954 ख्रि.	सं.सं.वि. वि. वाराणसी	श्रीरामाज्ञापाण्डेयः	86-90
5. व्याकरणदर्शन-पीठिका		1965 ख्रि.	सं.सं.वि. वि. वाराणसी	श्रीरामाज्ञापाण्डेयः	90-93
6. व्याकरणदर्शन-प्रतिमा		1976 ख्रि.	सं.सं.वि. वि. वाराणसी	श्रीरामाज्ञा-पाण्डेयः	94-98
7. श्लोकसिद्धान्त-कौमुदी (सिद्धान्तकौमुद्याः पद्यानुवादः)		1982 ख्रि.		सुरेश झा महाभागः	98-101
8. पद्मसिद्धान्त-कौमुदी		1990 ख्रि.	राजस्थानम्	पं बालकृष्णव्यास शास्त्री	101-103
9. अष्टाध्यायी-सहजबोधः		2004 ख्रि.	प्रतिभा प्रकाशन दिल्ली	डॉ. पुष्पा दीक्षिता	103-104

3. स्वातन्त्र्योत्तरकालस्य मूलग्रन्थकाराणामकारादिक्रमेण ग्रन्थैः सह प्रणीता सूची। 105-106

तृतीयोऽध्यायः 107-184

1. स्वातन्त्र्यात्परं टीकाग्रन्थानां विकासनिरूपणं महत्त्वञ्च 108-112

(i) व्याकरणशास्त्रे टीकाग्रन्थानां प्रादुर्भावो विकाराश्च

(ii) स्वातन्त्र्योत्तरकाले टीकाग्रन्थानां विकासक्रमः

(iii) टीकाग्रन्थानां महत्वम्

2. स्वातन्त्र्योत्तरकालस्य संस्कृतटीकाकाराणां कालक्रमेण परिचयो वैशिष्ट्यञ्च-

टीकाकाराः	**कालः**	**टीकाग्रन्थाः**	**क्र.सं.**
1. पं. सभापतिः, उपाध्यायः	1882 तः- 1966 ख्रिस्ताब्दपर्यन्तम्	1. रत्नप्रभा लघुमंजूषायाः टीका 2. प्रभा' शब्दरत्नेन सहिता प्रौढमनोरमायाः टीका 3. 'लक्ष्मी' सिद्धान्तकौमुद्या व्याख्या 4. वैदिकधर्मरहस्य	113-116
2. महामहोपाध्यायः ताता सुब्बरायशास्त्रिणः	19 शतकात् स्वातन्त्र्योत्तर-पर्यन्तम्	1. गुरुप्रसादम् लघुशब्देन्दुशेखरव्याख्या	116-117
3. ब्रह्मदत्तजिज्ञासुमहोदयः	1890 तः 1964 ख्रिस्ताब्दपर्यन्तम्	1. पाणिनीयाष्टाध्याय्यां प्रथमावृत्तिभाष्यम्	117-120

4. पं. गोपालशास्त्री 'नेने'	1892 तः 1967 ख्रिस्ताब्दपर्यन्तम्	1. सरला वैयाकरणभूषणसारस्य टीका 2. भैरवी लघुशब्देन्दुशेखरस्य 3. टिप्पणी - वैयाकरणसिद्धान्तकौमुद्याम्	120-122
5. महामोपाध्यायः पं. माधवशास्त्री भण्डारी	19 शतकाद्-विंशशतकस्योत्तरार्द्धपर्यन्तम्	1. 'स्फोटविमर्शिनी' व्याख्या महाभाष्यस्य 2. व्याकरणसिद्धान्त-सुधानिधि प्रन्धम् प्रौढमनोरमायाः	122-124
6. पं. चारुदेव शास्त्री	1876 तः 09.4.1987 ख्रिताब्दपर्यन्तम्	1. महाभाष्यस्य (नवाह्निकभागस्य) हिन्दीभाष्यम् 2. वाक्यपदीय ब्रह्मकाण्डस्य सम्पादनम्	125-129
7. पं. गुरुप्रसाद-शास्त्री	1900 तः -1972 ख्रिस्ताब्दपर्यन्तम्	1. वरवर्णिनी -(टिप्पणी) सम्प्रदायसिद्धान्तानां महाकोष 2. षट्टीकाविभूषितः - लघुशब्देन्दुशेखर	129-130

		3. 'राजलक्ष्मी संवलितं सम्पूर्णमहाभाष्यम् 4. लघुशब्देन्दुशेखरसंहिता सिद्धान्तकौमुद्याः	
8. पं. नृसिंह त्रिपाठी	19 शतकात्-स्वातन्त्र्योत्तरपर्यन्तम्	1. प्रकाशटीका वाक्यपदीय-ब्रह्मकाण्डस्य	130-132
9. पं. रघुनाथ शर्मा	1897 तः स्वतन्त्र्योतरकालपर्यन्तम्	1. अम्बाकर्त्री टीका वाक्यपदीयस्य 2. 'महाभाष्य टिप्पणी-नवाह्निकमहाभाष्ये	132-133
10. पेरि वेङ्कटेश्वर-शास्त्री	विंशशतकस्योतरार्द्धपर्यन्तम्	1. गुरुप्रसादशेष व्याख्या लघुशब्देन्दुशेखरस्य 2. नागेशगूढार्थ दीपिका व्याख्या परिभाष्येन्दुशेखरस्य	133-134
11. पेरि सूर्य-नारायणशास्त्री	20.8.1910 तः 24.9.1995 ख्रिस्ताब्दपर्यन्तम्	1. तत्त्वदर्शिनी भूषणसारस्य व्याख्या 2. नागेशभावप्रकाशः लघुमञ्जूषाया व्याख्या 3. वृतिविचारम्,	134-147

		तेलुगूभाषायां कृत्तद्धितादीनां विचारः	
12. पं. अनन्त-शास्त्री फडके	विंशशतकस्योत्तरार्द्धपर्यन्तम्	1. दर्पणटीकायुत-काशिकाया वैयाकरणभूषणसारस्य च सम्पादनङ्कृतम् 2. विमर्श-विपुला आनन्दा नाम्नी सं. टीका	147-148
13. डॉ. वेदानन्द झाः	1926 विंशशतकपर्यन्तम्	1. प्राभाकरी व्याख्या संस्कृतटीका हिन्दीटीकाश्च सिद्धान्तकौमुद्या, म.सि.कौ. ल. सि. कौमुद्याश्च सन्ति	148-150
14. पं. प्रभाकर मिश्रः	1936 विंशशतकोत्तरपर्यन्तम्		150-151
15. डॉ. प्रज्ञादेवी	1937 तः विंशशतकोत्तरपर्यन्तम्	1. प्रथमावृतिः' भाष्यस्य प्रणयने सहयोगः प्रकाशनञ्च	151-153
16. पञ्चोली बालकृष्णः		1. प्रभा भूषणसारस्य टीका	153
17. कालिका-प्रसादशुक्लः		1. ज्योत्स्ना वै. सि. मञ्जूषायाष्टीका	154-155

3. स्वातन्त्र्योत्तरकालस्य संस्कृतेतरटीकाकाराणां कालक्रमेण परिचयः

ग्रन्थकाराः	कालः	कृतयः	क्र. सं.
1. पं. देवदत्तशर्मोपाध्यायः	1905 तः-1971 ख्रिस्ताब्दपर्यन्तम्	1. वैयाकरणभूषणसारस्य हिन्दीभाष्यम्	155-156
2. ब्रह्मदत्त द्विवेदी (विद्यावाचस्पतिः)	1906 तः- 1987 ख्रिस्ताब्दपर्यन्तम्	1. राधिका लघुशब्देन्दुशेखरस्य हिन्दी टीका	156-158
3. पण्डित गोपालदत्त पाण्डेयः	1915 तः विंशशतकख्रिस्ताब्द पर्यन्तम्	1. 'दीपिका' हिन्दी व्याख्या- वैयाकरणसिद्धान्तकौमुद्याः	158-159
4. डॉ. चन्द्रिकाप्रसाद द्विवेदी		1. 'सुबोधिनी' हिन्दी - व्याख्या	159
5. प्रो. महादेव दामोदर साठे		1. पाणिनि एवं पाणिनीय सम्प्रदायः 2. लघुकौमुद्याः सविस्तरमनुवादः 3. वैया. सि. कौमुद्याः षट्त्सु भागेषु मराठीभाषायां टीकां टिप्पणीञ्च	159-161

6. आ. विश्वनाथ मिश्रः	1931 तः सं. सेवारतोऽस्ति	1. सुबोधिनी परिभा-षेन्दुलघुशब्देन्दुशेखर योः हिन्दीटीका 2. प्रौढ़-निबन्ध-सौरभम् व्याकरण-वेदादि विषयान-धिकृत्य विरचितो निबन्धग्रन्थम्	**161-165**

4. स्वातन्त्र्योत्तरकाले प्रणीतानां संस्कृतटीकाग्रन्थानां संस्कृतेतरभाषाप्रणीतानाञ्च टीकाग्रन्थानामकारादिक्रमेण परिचयो वैशिष्ट्यञ्च

टीकाः	**प्रकाशनम्**	**प्रकाशकः/संस्था**	**टीकाकाराः**	**क्र. सं.**
1. ज्योतिष्मती (काशिकाया हिन्दी व्याख्या)	1997 ख्रिस्ताब्दे	प्राच्यविद्या प्रति, दिल्ली	डॉ. रघुवीर वेदालङ्कार	165-166
2. तत्त्वदर्शिनी (भूषणसारस्य)	-	पाणिनीय प्रका., तिरूपतिः	पेरि सूर्यनारायण शास्त्री	166-167
3. 'नागेशभाव-प्रकाशः' (लघुमञ्जूषाया)	2004 ख्रिस्ताब्दे	पाणिनीय प्रका, तिरुपतिः	पेरि सूर्यनारायण शास्त्री	167-169
4. 'रत्नप्रभा'	1.4.1969 ख्रिस्ताब्दे	चौ. सं. संस्थान, वाराणसी	बालकृष्ण पञ्चोली	169-170

5. 'राधिका' (लघुशब्देन्दुशेखरस्य)	1988 ख्रिस्ताब्दे	सुशील प्रकाशकः	श्रीब्रह्मदत द्विवेदी	170-171
6. विद्यानिधि व्याख्या (महा-भाष्यस्य हिन्द्यां)	1988 ख्रिस्ताब्दे		भीमसेन वेदालङ्कारः	171-172
7. दीपिका वैयाकरणभूषणसारस्य	2002 ख्रिस्ताब्दे	दरभंगा, बिहार	महावै. पं. दीनबन्धु झा	172-175
8. 'शाङ्करी' (भूषणसारस्य)	1957 ख्रिस्ताब्दे	आनन्दाश्रम, पटना	श्रीशङ्करशास्त्री	175-176
9. ज्ञापकसङ्ग्रहस्य व्याख्या	1972 ख्रिस्ताब्दे	सं. वि. पी, तिरुपति	श्रीरामानुज तातार्यः	176-

5. स्वातन्त्र्योत्तरकालस्य संस्कृतटीकाकाराणां संरकृतेतरटीकाकाराणाञ्च टीकया सह अकारादिक्रमेण विरचिता सूची। 176-184

चतुर्थोऽध्यायः 185-261

1. व्याकरणशास्त्रस्य विकारो शोधप्रबन्धानां योगदानं महत्वञ्च 186-189

(i) शोधप्रबन्धानामुद्भवो विकासश्च

(ii) टीकाग्रन्थेषु शोधप्रबन्धेषु च भेदः

(iii) शोधप्रबन्धानां योगदानं महत्वञ्च

2. स्वातन्त्र्योत्तरकालस्य संस्कृतभाषायाः शोधप्रबन्धकाराणां संस्कृतेतराणां शोधप्रवन्धकाराणाञ्च कालक्रमेण निरुपणम्-

शोधप्रबन्धकाराः	समयः	शोधप्रबन्धाः	क्र. सं.
1. पं. गौरीनाथशास्त्री	2.2.1909 तः 1991 ख्रिस्ताब्दपर्यन्तम्	1. फिलोसॉफी ऑफ वर्ड एण्ड मिनिंग 2. द फिलोसॉफी ऑफ भर्तृहरिः	190-193
2. पं. युधिष्ठिर मीमांसकः (हिन्दी भाष्यकारः)	1909 तः 1995 ख्रिस्ताब्दपर्यन्तम्	1. संस्कृतव्याकरण शास्त्रस्येतिहासः 2. काशकृत्स्न-धातुव्याख्यानम् 3. महाभाष्यस्य हिन्दी-व्याख्या	193-196
3. पं. रामप्रसादत्रिपाठी	1920 तः विंशशतकख्रिस्ताब्दपर्यन्तम्	1. पाणिनीयव्याकरणे प्रमाणसमीक्षा 2. 'सुबोधिनीटीका-वैयाकरणभूषणसारस्य 3. कलाकुञ्जिकाटीकया सहिता हिन्दी टीका-तात्पर्यनिरूपणान्ता वै. सि. ल. मञ्जूषायाः	196-199
4. पं. मणिनाथ	1928 तः 1988	1. ज्ञापकादर्शः (डी.	200-

झा	ख्रिस्ताब्दपर्यन्तम्	लिट् उपाधये) 2. बहवः निबन्धाश्च विरचिताः	203
5. पं. भागीरथप्रसादत्रिपाठी	1934 तः	1. धात्वर्थविज्ञानम् 2. पाणिनीयधातुपाठस मीक्षा 3. तद्धितान्तः केचन् शब्दाः 4. अनुसन्धानपद्धतिः 5. संस्कृतवाङ्मयमन्थन श्च	204-207
6. डॉ. सत्यव्रत शास्त्री आंग्लभाषाविद्	29.9.1930 तः सं. सेवारतोऽस्ति	1. कॉन्सेप्ट ऑफ टाइम एण्ड स्पश इन वाक्यपदीय	207-212

3. स्वातन्त्र्यात्परं संस्कृतभाषायां संस्कृतेतरभाषायाश्च प्रणीतानां प्रमुखानां शोधप्रबन्धानामकारादिक्रमेण विकासनिरुपणम् (परिचयो वैशिष्ट्यश्च)

शोधप्रबन्धाः	**प्रकाशनम्**	**शोधप्रबन्धकाराः**	**क्र. सं.**
1. 'कॉन्सेप्ट ऑफ टाइम एण्ड स्पेस इन वाक्यपदीय आङ्गलभाषायां	1950 ख्रिस्ताब्दे	डॉ. सत्यव्रत शास्त्री	212-213

2. दि फिलासफी ऑफ वर्ड एण्ड मीनिंग (शब्दार्थ-मीमांसा)	दि.सं. 1992 ख्रिस्ताब्दे.	डॉ. गौरीनाथ शास्त्री	213-216
3. धात्वर्थ-विज्ञानम्	1980 ख्रिस्ताब्दे	डॉ. भागीरथप्रसाद त्रिपाठी	217-218
4. निपातार्थनिर्णयः	1990 ख्रिस्ताब्दे	डॉ. हरिश्चन्द्रमणि त्रिपाठी	218-221
5. पदपदार्थ-विभाग-परिशीलनम्	1980 ख्रिस्ताब्दे	श्री जगदीश चतुर्वेदी	221-222
6. पाणिनीव्याकरणे प्रमाणसमीक्षा	1979 ख्रिस्ताब्दे	आचार्य श्रीरामप्रसादत्रिपाठी	223-227
7. 'पाणिनीय और सारस्वतीय पारि-भाषिक संज्ञाओं का तुलनातमक अध्ययन (हिन्दी भाषायाम्)	1999 खिस्ताब्दे	डॉ. कमलाप्रसादपाण्डेयः	227-228
8. 'भूषणसार-परम-लघुमञ्जूषयोः सिद्धान्तानां समीक्षा	1983 ख्रिस्ताब्दे	डॉ. राममनोहरमिश्रः	228-232
9. 'वाक्यपदीया-नुसारेण दर्शनान्तरीय तत्त्वानां तुलनात्मकं	-	डॉ. सुशील चन्द्रो मिश्रः	232-234

समीक्षणम्			
10. 'वैयाकरणा-नामन्येषां च मतेन शब्दस्वरूपच्छक्तिविचारः'	1979 ख्रिस्ताब्दे	डॉ. कालिकाप्रसाद शुक्लः	234-235
11. शाब्दबोध-मीमांसाः	2005,06,07,08 ख्रि.	श्रीरामानुजताताचार्यः	235-236
12. सिद्धान्त-चिन्तामणिः	1987 ख्रिस्ताब्दे	आ. श्रीरामप्रसाद त्रिपाठी	236-238

4. अकारादिक्रमेण प्रमुखशोधप्रबन्धकर्तृणां शोधप्रबन्धैः सह प्रणीता सूची **238-260**

5. अकारादिक्रमेण प्रमुखशोधप्रबन्धकर्तृणां लघुशोधप्रबन्धैः सह प्रणीता सूची **261**

पञ्चमोध्यायः 262-322

1. भारतस्य स्वातन्त्र्यलाभात् परं ये प्रमुखाः वैयाकरणाचार्याः समुद्भूताः, तेषां जीवनचरितं रचनावैभवञ्च ।

	वैयाकरणाचार्याः	**जन्मसमयः**
1.	श्रीकृष्णचन्द्र शर्मा	1952
2.	डॉ. शशिनाथ झा	1954
3.	प्रो. शिवकान्त झा	1959

4.	प्रो. दयानाथ झा	1964
5.	प्रो. श्रीधर मिश्रः	1964
6.	प्रो. बोधकुमार झा	1968
7.	प्रो. विनोद कुमार झा	1973
8.	डॉ. दयाराम दासः	1974
9.	प्रो. विष्णुकान्त पाण्डेयः	1977
10.	प्रो. ब्रजभूषण ओझा	1978

2. **सम्पूर्णशोधप्रबन्धस्य सम्पूर्णसामग्री वेब्-साइट् (Website) निर्माय अन्तर्जालस्य उपरि प्रकाशनम् ।**

3. **जीवितैः वैयाकरणाचार्यैः सह साक्षात्करान् विधाय तेषां विवरणं वेब्-जालके प्रकाशितम् ।**

षष्ठोऽध्यायः **323-388**

1. **स्वातन्त्र्योत्तरकाले चर्चितनामभिनवसिद्धान्तानां समीक्षणम्** **324-370**

(i) स्वातन्त्र्योत्तरकाले पाणिनीयव्याकरणे प्रमाणसमीक्षणम्

(ii) स्फोटसिद्धान्तस्य विकारो स्वातन्त्र्योत्तरकालीनशाब्दि-कमतानां विमर्शः

(iii) स्वातन्त्र्यात्परं व्याकरणशास्त्रदृष्ट्या मोक्षनिरूपणम्

(iv) पाणिनीयव्याकरणदृष्ट्या आधुनिकभाषासिद्धान्ताम् उत स्वातन्त्र्यात्परं भाषाविषयकसिद्धान्तानां व्याकरण-गम्यता न वेति पर्यालोचनम्

2. स्वातन्त्र्यात्परं व्याकरणशास्त्रमधिकृत्य संस्कृतभाषायां या संस्कृतेतरभाषायां विरचितानां प्रमुखग्रन्थानाम् (धातु-शिक्षा-उणादि-सूत्र-समास-लिङ्गग्रन्थानाम्) अकारादिक्रमेण संक्षिप्तपरिचयो वैशिष्ट्यञ्च ।

ग्रन्थाः	**प्रकाशनकालः**	**प्रणेताः**	**क्र. सं.**
1. 'अष्टाध्यायी पदानुक्रमकोशः'	प्र. सं. 2003 ख्रि.	अवनीन्द्र कुमारः	370-371
2. 'अष्टाध्यायी सूत्रार्थप्रकाशिकाः' (अष्टाध्यायीमाश्रित्य विरचितो ग्रन्थः)	2004 ख्रि.	डॉ. सुरेश्वर झाः	371-373
3. त्रिनयनभाष्यम्		आ. बच्चूलाल अवस्थी 'ज्ञान'	374-377
4. 'वृहद्धातुकुसुमाकरः' (टिप्पण्यादिविभूषित ण्यन्त-सन्नत-यङन्त-यङ्लुगन्त-भावकर्म-नूतनोऽस्ति)		मिश्र. पं. हरेकान्तः	377-378

3. स्वातन्त्र्यात्परं व्याकरणशास्त्रमधिकृत्य प्रमुखानां संस्कृतग्रन्थप्रणेतॄणां ग्रन्थैः सह अकारादिक्रमेण प्रणीता सूची 379-388

4. उपसंहारः **389-391**

शोधसहायकग्रन्थानां सूची 392-397

कोषग्रन्थानां सूचिः 398

पत्र-पत्रिका 398-399

अन्तर्जालसूचिः 400-401

सङ्केताक्षरसूचिः 402-403

निष्कर्षः 404-405

प्रथमोऽध्यायः

1. व्याकरणशास्त्रस्योद्भवो विकासश्च।

2. नागेशोत्तरव्याकरणशास्त्रे पदपदार्थपरिष्कारे सातत्यम्।

3. ऊनविंशशतकस्य केषाञ्चिद् विशिष्टवैयाकरणानां संक्षिप्तपरिचयः।

4. विंशशतकस्य केचन मूर्धन्याः शाब्दिकाः।

।।श्रीः।।

।।श्रीगणेशाय नमः।।

अथ प्रथमोऽध्यायः

1. व्याकरणशास्त्रयोद्भवो विकासश्च

(i) व्याकरणशास्त्रस्योद्भवः प्राचीनत्वञ्च

शब्दार्थसम्वन्धनियामकं यद् वाचां स्वरूपप्रतिबोधकं स्यात्।

वाक्यार्थबोधे च निमित्तकं यत् तच्छब्दशास्त्रं प्रवदन्ति धीराः ।।

व्याकरणशास्त्रस्योत्पत्तिः कदाऽभवदस्य समाधानं नियद् निधिरूपेण न दातुं शक्यते। समुपलब्धवैदिकपदपाठनां (3200 वि. पू.) समीक्षया ज्ञायते यत् ताभ्यः रचनाभ्यः पूर्व प्रकृति-प्रत्ययानां, धातु-उपसर्गानां समासयुक्तपूर्वोत्तर-पदानां च विभागः पूर्णतया निर्धारितोऽभवत्। ऋग्वेदस्य पदपाठे एतेषां स्वरूपं स्पष्टतया दृश्यते।

वाल्मीकीयरामायणे हनुमतः वाक्पटुता 'नूनं' व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्। बहु व्याहरतानेन न किञ्चिदपभाषितम् ।। किष्किन्धाकाण्डे अनेन श्लोकरूपेण प्रतिपादितम्। उपर्युक्तश्लोकेन ज्ञायते यत् श्रीरामचन्द्रस्यकाले व्याकरणशास्त्रस्य सुव्यस्थितं पठनं-पाठनं चाभवत्। यास्क स्वीयनिरुक्तेऽनेकेषां वैयाकरणानामुल्लेखमकरोत् । शाकटायनव्याकरणमपि यास्कमहोदयात् पूर्व निर्मितम्। महाभाष्यीय 'पुराकल्प एतदासीत्, संस्कारोत्तरकालं ब्राह्मणा व्याकरणं

समाधीयते' इति वचनानुसारं प्राचीनतमे काले व्याकरणस्य पठनं पाठनं प्रचलितमासीत् ।

एभिः प्रमाणैः निस्सन्देहमिदं वक्तुं शक्यते यद् व्याकरणशास्त्रस्योत्पत्तिः प्राचीनतमकालेऽभवत्। त्रेतायुगस्यारम्भे तद्ग्रन्थरूपे सुव्यवस्थितमभवत् ।

व्याकरणशास्त्रस्य कृते व्याकरणशब्दस्य प्रयोगो रामायणे (किष्कि. 3/21), गोपथब्राह्मणे (पूर्वगोपथ 1/24), मुण्डकोपनिषदि (1/1), महाभारते (उद्योग 43/61) चादिग्रन्थेषु मिलति। शिक्षा-व्याकरण-निरुक्त-छन्द-कल्प-ज्योतिषां षड्वेदाङ्गानां षडङ्गशब्देन निर्देशः गोपथब्राह्मणे, बौधायनधर्म-शास्त्रे, गौतमधर्मशास्त्रे, रामायणादिषु च प्रायः मिलति। महाभाष्येऽपि ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च इति उद्घृतागमवचने षडङ्गशब्देन वेदाङ्गानां निर्देशोस्ति।

सम्प्रति उपलब्धवेदान् अतिरिच्य वैदिकवाङ्मये व्याकरण-शास्त्रस्योल्लेखः तस्य प्राचीनतां सिद्धयति।

व्याकरणं कथमाविर्भूतम् ?

उच्यते-व्याकरणशास्त्रस्य प्रथम प्रवक्ता ब्रह्मा- 'ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः ऋषयो ब्राह्मणेभ्यः[1] ।

अस्मिन् विषये युवान् चांग (ह्यूनसांग) महोदयेन स्वीय भारतविवरणग्रन्थे[2] पाणिनिप्रकरणे ब्रह्मदेवकृत् व्याकरणस्य निर्देशमकरोत्। ब्रह्मणाकृतं सकलविद्यानां विस्तृतं प्रवचनं शास्त्रं शासनं या नाम्ना प्रसिद्धिं भजते। ब्राह्मणः परवर्ती प्रवचनाः तस्यादि प्रवचनवत् आसीत्, तथापि चोत्तरोत्तर संक्षिप्तकरणवशाद् अनुशास्त्रम्

---

1 (ऋक्तन्त्र 1/4)

2 पृष्ठ-1062 इण्डियन प्रेस प्रयाग, मुद्रितवर्षः 1926

अनुतन्त्रम् अनुशासने वा नाम्ना प्रोच्यते। गौणवृत्त्या एभ्यः कृते शास्त्रं वा तन्त्र शब्दस्य प्रयोग क्रियते।

व्याकरणशास्त्रस्य द्वितीयप्रवक्ता बृहस्पतिः-

'ब्रह्मा बृहस्पतये प्रोवाच..... इति वचनात् व्याकरणशास्त्रस्य द्वितीय-प्रवक्ता-बृहस्पतिरस्ति। अस्य पुष्टि ब्रह्मवैवर्त प्रकृतिखण्डे (अ. 8/28) लभ्यमानेन व्याकरणशास्त्रस्यास्य प्रवचनस्योल्लेखेनापि भवति। ब्राह्मणग्रन्थेषु तं देवानां पुरोहितं गदितम्। तद्यथा बृहस्पतिर्वै देवानां पुरोहितः[3]। पतञ्जलिना स्वीये भाष्ये लिखितम् यद् 'बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच। नान्त जगाम। (1.1.1) अर्थाद् बृहस्पतिश्च वक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रम् अध्ययनकालः न चान्तं जगाम, इति महाभाष्यवचनात्। महाभाष्योक्तस्य वचनस्यास्य व्याख्यायां भर्तृहरिणा लिखितम्- 'शब्दपारायणं' रूढिशब्दोऽयं कस्यचिद् ग्रन्थस्य। व्याकरणमति-रिच्यान्यवेदाङ्गस्यार्थशास्त्रस्य सामगानस्येतिह्यस्य पुराणस्य, वास्तोः अगढतन्त्रस्य चादि बहूनां ग्रन्थानां बृहस्पतिः प्रवचनमकरोत् । एतादृशः निर्देशो विभिन्नप्राचीनग्रन्थेषु मिलति।

(ii) व्याकरणस्यादि संस्कर्ता-इन्द्रः-

महाभाष्योक्तवचनेन सुस्पष्टं यद् बृहस्पतिरिन्द्राय प्रतिपदपाठेन शब्दोपदेशमकरोत् । तावत् प्रकृति-प्रत्यय-विभागं नाभवत्। देवानां प्रार्थनायां इन्द्रः प्रतिपद्पाठरूपीदुरूहप्रक्रियायाः स्थाने प्रकृक्तिविभागेन शब्दोपदेशस्यैका सरलप्रक्रियायाः सर्वप्रथमं कल्पनामकरोत्। तैत्तिरीयसंहितायां लिखितम् (6.4.7) वाग्वै पराच्य व्याकृतावदत् । ते देवा इन्द्रमब्रुवन्, इमां नो वाचं व्याकुर्विति तमिन्द्रो मध्यतोऽचक्रम्य व्याकरोत्। सायणाचार्योऽस्यां व्याख्यायामलिखत्-तामखण्डां वाचं मध्ये विच्छिद्य प्रकृतिप्रत्यय विभाग सर्वत्राकरोद्

---

3 ऐतरेय ब्राह्मण (8।28)

इत्थं शब्दपरायणनाम्ना प्रसिद्धं व्याकरणम् इन्द्रः ज्ञात्वा भरद्वाजमहर्षिणा ऋषिभ्य उपदिदेशः। तथा व्याकरणं लोके व्याप्तमभवद् इति ज्ञायते। अनन्तरं बहवः महर्षयः व्याकरणग्रन्थान् रचितवन्तः बहूनि व्याकरणानि लोके व्याप्तानि। इदानीं के के व्याकरणशास्त्राणि रचितवन्त इति पश्यामः।

व्याकरणशास्त्रे द्वौ प्रसिद्धौ सम्प्रदायौ स्तः ऐन्द्रः माहेश्वरश्च (शैव)। कातन्त्रव्याकरणमेन्द्रसम्प्रदायस्य मन्यते पाणिनीय व्याकरणं तु शैव-सम्प्रदायस्य च। ऐन्द्रतन्त्राधारेण व्याकरणशास्त्रस्य बहवः प्रवचनकर्ताऽभवन्। प्रवचनभेदेन बहवो व्याकरणग्रन्था विरचिताः।

पाणिनिमहर्षिः स्वीयव्याकरणग्रन्थे आपिशलि-काश्यप-गार्ग्य-गालव-चाक्रवर्मण-भारद्वाज-शाकटायन-शाकल्य-सेनक-स्फोटाययननानां दशानां व्याकरणशास्त्रपण्डितानां नामानि उट्टङ्कित्तवान् । अस्यातिरिच्य पाणिनेः पूर्वाणां षोडशानामाचार्याणामुल्लेख प्राचीनविभिन्नग्रन्थेषु मिलति तद्यथा-शिव (माहेश्वर), बृहस्पति, इन्द्र, वायु, भरद्वाज, भागुरि, पौष्करसादि, चाद्रायण, काशकृत्स्न्, माध्यन्दिनि रौढ्रि, शौनकि, गौतम चादयः। समुपलब्धेषु प्रातिशाख्येषु अन्यवैदिकव्याकरणेषु च (59) एकोनषष्टिप्राचीनाचार्याण-मुल्लेखो मिलति। एतेषु पुनरुक्त-नामानि विभज्य पश्यते चेत् (85) पञ्चाशीति प्राचीनानां व्याकरणप्रवक्तानामाचार्याणां नामानि ज्ञायन्ते।[4]

2. नागेशोत्तरव्याकरणशास्त्रे पदपदार्थपरिष्कारे सातत्यम्

नागेशोत्तरव्याकरणशास्त्रे पदसाधुत्वासाधुत्वविचारापेक्षया पद-पदार्थयोः सम्बन्धविचारो प्राधान्यं भजते नास्त्यस्मिन् विषये वैमत्यं धीमताम्।

---

4 सकृत व्याकरणशास्त्र का इतिहास-आ श्री. युधिष्ठिर मीमांसकः

श्रीमद्भिर्भट्टोजिदीक्षितैः समारब्धा शब्दशक्तिप्रातिपदिकार्थ-कारकार्थ-समासार्थादिविषयविवेचनपरम्परा नागेशादिभिस्तत्परवर्तिभिः परां काष्ठां प्रापिता। सा चेयमाधुनिकैः बालशास्त्रिदामोदरशास्त्रिजयदेवमिश्र-रामप्रसादत्रिपाठिप्रभूतिभिः शब्दतत्वविद्भिः भृशं पल्लविता। परिष्कारपद्ध-तेराश्रयणाद् नागेशोत्तरकाले शब्दशास्त्रं न पदशास्त्रत्वेन अपितु पदार्थशास्त्र-त्वेन प्रतिष्ठापितम्।

लक्ष्यैकचक्षुष्काः, प्राचीना वैयाकरणा वस्तुतः पदानां साधुत्वासाधुत्व-विवेचने व्याप्ताः दृश्यन्ते। यद्यपि तेषां ग्रन्थेष्वपि दार्शनिका विचारा लभ्यन्ते, किन्तु ते सर्वे प्रसंगप्राप्ता एवेति तेषां परिष्कारे न तथा प्रयासः प्राचीनानाम्। नव्यानां पुनर्लक्षणैक-चक्षुष्काणां स्फोटसिद्धान्तसंरक्षणाय पूर्वपक्षिणां मतनिरासाय च पदविवेचनापेक्षया पदार्थविवेचन एवं महती प्रीतिरासीत्। अष्टादशशतकोद्भवेन गङ्गारामत्रिपाठीति नाम्ना विश्रुतेन मनीषिणा केनचित् वैयाकरणसिद्धान्तानामनुशीलने नव्यन्यायशैलीं प्रयुज्य व्याख्यायाः काचन अपूर्वा पद्धतिराविष्कृता शब्दशास्त्रे प्रतियोगिता अनुयोगिता-अवच्छेदकता-विषयता-विषयिता-प्रकारता-विशेष्यता-संसर्गता-प्रकारता-विशेष्यता-संसर्गता-आधेयताऽधिकरणता-निरुपकता-निरुप्यता-कारणता-कार्यता-व्यापकता-व्याप्यता-प्रतिबध्यता-प्रतिबन्धकता-घटकता-घटिततेत्यादिन-व्यन्यायशास्त्रीयासाधारणपदावली परिपुष्टा शेखरादिग्रन्थानां व्याख्या-व्याजेनेति।

विंशशतकस्यास्य पूर्वार्द्धे तात्याशास्त्रि-बालशास्त्रि-जयदेवमिश्र गुरु-प्रसादशास्त्रि प्रभृतिमनीषिभिः शैलीमिमामाश्रित्य शेखरादिग्रन्थेषु कश्चन अपूर्वोऽन्यतमश्च परिष्कारः प्रदर्शितः। उत्तरार्द्धे पुना रामाज्ञापाण्डेय-रामप्रसादत्रिपाठिश्रयेण तत्तत्तत्वानां परिष्कारेण सहैव भाष्याब्धिनिर्मथ्य प्रमाणादिविषयका अभिनवा, केचन सिद्धान्ताः प्रादुर्भाविता इति प्राधान्येन हि

व्यपदेशा भवन्तीति न्यायेन शतवर्षात्मकोऽयं कालो द्विधा भेत्तुं शक्यते परिष्कारकालः प्रतिष्ठाकालश्चेति भेदात्।

1. परिष्कारकालः

परिष्कारकाले यद्यपि महाभाष्य-वाक्यपदीयादिग्रन्थानां व्याख्यानेऽपि कैश्चित् प्रयासः कृतः। किन्तु शेखर-परिभाषेन्दुशेखरयोः परिष्कार एव दृश्यते कालखण्डस्यास्य साफल्यम्। अथेह केचन टीकाग्रन्थाः कालेऽस्मिन् निबद्धाः वर्ण्यन्ते। तद्यथा-

(क) दण्डिभट्टकृताऽभिनवचन्द्रिकाः-

वाग्देवतावताराणां श्रीबालशास्त्रिणाम् अन्तेवासिना विश्वनाथ-दण्डिभट्टेन शेखरग्रन्थे विरचिता अभिनव-चन्द्रिकाख्येयं टीका[5] विद्वन्मण्डली-ष्वद्याप्यभिनन्द्यते। नागेशवाक्यानां परिष्कारे टीकाया अस्या उपयोगित्वं कः खलु शाब्दिकः न्यक्कर्तुं शक्नोति। तत्तद्विषयाणां सम्प्रदायानुरूपव्याख्याने टीकाकर्तुरस्य प्रतिभाऽधिकतरमेव प्रसरति। बहुत्र नागेशेनाऽस्य मतेभेदोऽप्य-वलोक्यते। तथा हि शेखरग्रन्थादावेव नागेशमतं निरसन्नाह दण्डिभट्टः-वैयाकरण-सिद्धान्तविषया इतिचिन्त्यमिदं, प्रवृत्तौ सिद्धान्तज्ञानस्योद्देश्यत्वेन प्रवृत्यु-द्देश्यस्यस्यैव च विषयरूपानुबन्धत्वौचित्येन वैयाकरणसिद्धान्तज्ञानं विषय इति लेखनस्योचितत्वात्। तज्ज्ञानं प्रयोजनमिति इदमपि चिन्त्यम्-अन्यस्य प्रयोजनज्ञानेऽन्यत्र प्रवृत्तेरसभवात्, वैयाकरणसिद्धान्त-ज्ञानस्य कौमुदीकरणप्रयोजनत्वेन वैयाकरणसिद्धान्तज्ञानरूपविषयस्य प्रयोजनज्ञान-मन्तराऽध्येतृ-प्रवृत्यसम्भवात्, अनुबन्धचतुष्टयज्ञानस्यैव अध्ययनप्रवृत्ति प्रयोजनकत्वाच्च। तस्माद्रक्षोहा-गमेत्यादिभाष्योक्तप्रयोजनमेव वक्तव्यम्।

---

5 संस्कृत-वाडमय का बृहद इतिहास (पञ्चदशखण्ड-व्या.) ब. उपा. पू. 280-281 उत्तरप्रदेश स. लखनऊ, 2001

तज्जिज्ञासुरधिकारीति-इदमपि चिन्त्यम्, तजिज्ञासा-याश्चाण्डालादेरपि सम्भवेन तस्याप्यधिकारित्वापत्तेः, तस्मादधीतकाव्यकोशादिद्विजातिरधि-कारीति वक्तव्यम्।

(ख) वरवर्णिनी-

पण्डितप्रवरगुरुप्रसादशास्त्रिविरचितेयं टीका[6] सम्प्रदायसिद्धान्तानां महाकोश इति कथने न काप्यऽनुपपत्तिः, टीकाकृता विषयाणां सर्वेषामिह सर्वतोभावेन विवेचितत्वात्। केचित्तु, परे तु इत्यादि रूपेणेह शास्त्रिवर्यैः नैकषां मतान्युद्धृतानि सन्ति तथापि बालशास्त्रिणं मताविष्कारे ग्रन्थकृतोऽस्य महान् समादरः ।

वाग्देवतावतारास्तु 'श्रीबालशास्त्रिचरणास्तु' इत्यादिरूपेण तन्मत-मुपस्थाप्य टीकाकार-स्तमेव मार्गमनुसरति । यथा च 'र' प्रत्याहारव्याख्याने श्रीबालशास्त्रिचरणास्तु 'रषाभ्यां' 'रदाभ्याम्' इत्यादौ रेफोतराकारस्या-ऽनुनासिकत्वाभावादेव न प्रत्याहार इत्यस्य वक्तुं शक्यतया 'र' प्रत्याहारा-नित्यफलाभावात् अतो लेत्यत्र लकारोच्चारणवैयर्थ्यरूपो दोषो रप्रत्याहार-स्वीकारे वज्रलेपायमान एव नारुचिग्रस्त इत्याहुः।

परिष्कारपद्धतेः कश्चन अपूर्व एव चमत्कार इह टीकायां दृग्गोचरीभवति।

(ग) अभिनवराजलक्ष्मी

श्रीगुरुप्रसादशास्त्रिणैव कृतेयं सप्रदीयोद्योत महाभाष्यस्य नवाह्निक-भागे शतकेऽस्मिन् प्रणीता टीका।

अस्या विषयमर्यादां वदन्त आहुः शास्त्रिचरणाः -

महाभाष्यप्रदीपादित्रिवलीग्रन्थिभेदिनी।

राजलक्ष्मीः परं टीका विद्वज्जनमनोहरा ।।

---

6 संस्कृत-वाडमय का बृहद् इतिहास (पञ्चदशखण्ड-व्या.) ब. उपा. पृ. 287 उत्तरप्रदेश स. लखनऊ, 2001

श्रीमद्भिः शास्त्रिचरणैरत्र शब्दकौस्तुभस्य प्रामाण्यं पदे पदे स्वीकृतम्। परवर्तिभिर्मनी-षिभिः टीकेयं भृशं सम्मानिता। मैथिलशाब्दिकमहेशझा-महाशयेनापि विमलाख्या टीका महाभाष्ये प्रणीता प्रकाशिता च सा दरभङ्गात् इति श्रूयते। एताष्टिप्पण्यो भाष्यं प्रदीपमुद्योतञ्च विषयीकृत्य अभीष्टार्थप्रतिपादने प्रभवन्ति। शब्देन्दुशेखरग्रन्थेऽपि गुरुप्रसादशास्त्रिणा अभिनव-राजलक्ष्मीः प्रणीतेति वरवर्णिन्यां तदुल्लेखात् ज्ञायते ।

(घ) शेखरदीपकः -

नित्यानन्दपर्वतीयकृतोऽयं लघुशन्देन्दुशेखरव्याख्याग्रन्थः शेखरदीपकः[7] श्रीमद्दण्डिभट्टता-मभिनवचन्द्रिकां छायेवानुसरति क्वचित् सैवोद्धृता दृष्टिपथमायाति। शेखरदीपकोऽयं यद्यपि पूर्वेषां टीकाग्रन्थानामेव सरलानुवाद-स्तथापि क्वचिद् ग्रन्थग्रन्थिविमोचनेऽयं सर्वान् अतिशय्य वर्तते। प्रातिपदि-कार्थादि सूत्रेषु पण्डितप्रवरश्रीनेनेमहोदयस्य परिष्कारपटुत्वमपि मनोहारि।

(ङ) नागेशोक्तिप्रकाशः -

शेखरग्रन्थस्य न पदान्तसूत्रान्तभागे प्रकाशितेयं टीका तत्कृतो झोपाह-वखुदीशर्मणो न केवलं शाब्दे न्यायेऽपि वैदुष्यं पिशुनयति। परिष्कारप्रियोऽयं पण्डितः नागेशसिद्धान्तान् नैकधा नवीनप्राचीनमतभेद-प्रदर्शनपुरस्सरमुपस्था-पयति। अधुना समग्रेऽपि शेखरग्रन्थे टीकेयं प्राप्तेति।

(च) तिङर्थवादसारः -

भूषणसारस्य धात्वर्थप्रकरणस्य व्याख्यारूपोऽयं ग्रन्थः तार्किकमीमांसा-कयोर्मतनिरासाय शाब्दिकानुसारि च तदर्थ प्रकाशनाय प्रणीतः श्रीखुद्दी-झाशर्मणा यथा चोक्तां ग्रन्थादौ-

---

7 संस्कृत-वाडमय का बृहद इतिहास (पञ्चदशखण्ड-व्या.) ब. उपा. पृ. 289 उत्तरप्रदेश स. लखनऊ, 2001

वाणी प्रणम्य शिरसि प्रणिधाय पाणी,

श्रीपाणिनिप्रमुखमुख्यवचो विचिन्त्य।

आक्षिप्य तार्किकमतं च सजैमिनीयम्,

आख्यातवाच्यमनुवच्मि यथामनीषम् ।।

(छ) विजया -

शाब्दिकशिरोमणेर्जयदेवमिश्रस्य परिभाषेन्दुशेखरग्रन्थव्याख्यारूपेयं विजया-टीका विद्वत्समुदायेऽद्यापि प्रतिष्ठिता वर्तते। परिभाषेन्दुशेखरस्य प्रकाशितासु विंशतिप्रायासु टीकासु विजयतेतरां विजयेयं स्वपरिष्कार-वैशिष्ट्यादिति हि मनीषिणामभिमतिः ।

(ज) शास्त्रार्थकला -

विजयामुपजीव्य तत्कृदन्तेवासिना श्रीवेणीमाधवशुक्लशास्त्रिणा शास्त्रार्थ-कलेत्यन्वर्धाभिधाना परिभाषेन्दुशेखरटीका प्रणीता। विजयायां केवलं परिष्कार-चमत्कारोऽत्र पुनः प्रक्रिया-परिष्कारयोरुभयोरपीति विशेषः । परेषां मतनिरासे स विजयां प्रमाणतयाङ्गीकृत्य प्रवर्तत इति गुरुभक्तिरपि श्री शुक्लस्येह बहुत्र दृष्टिपथमायाति। स्वमतं तु इति सरयूपारीणशुक्ला इत्यादिरूपेणोपस्थापयति ग्रन्थकृदिति।

कालखण्डेऽस्मिन् केचन शाब्दिकसिद्धान्तविवेचनपरा मौलिका ग्रन्था अपि प्रणीताः। तेषु शुक्लसूर्यनारायणस्य **"पाणिनिव्याकरणे वादरत्नम्"** शास्त्रिणो वेणीमाधवस्य **'न्यासकल्पलता'** परिष्कारदर्पणश्च सुब्रह्मण्य-शास्त्रिणश्च **'शाब्द-तरङ्गिणी'** चादय इति ग्रन्थाः प्रमुखा सन्ति। एतेषु शब्दतरङ्गिणी अन्यतमा अस्ति।

वी. सुब्रह्मण्यशास्त्रिणा विरचितेयं शाब्दतरङ्गिणी षड्भिस्तरङ्गै शाब्दबोधस्य विविधपक्षान् पुरस्करोति ।

2. प्रतिष्ठाकालः

प्रतिष्ठाकाले रामाज्ञापाण्डेय-रामप्रसादत्रिपाठिरघुनाथशर्माणश्चेति त्रिमुनि-कल्पास्त्रयो मनीषिणो प्रमुखा आसन्। रामाज्ञापाण्डेयो व्याकरणदर्शनभूमिकां विरच्य शब्दशास्त्रीयप्रमाणव्यवस्थायाः संकेतं कृतवान्। विदुषाऽनेन शब्दशास्त्राध्ययनेन मोक्षप्राप्तिमार्गस्तत्र तत्स्वरूपं चेत्यादयो नैके विषया व्याकरणदर्शनभूमिकाग्रन्थ-प्रणयनव्याजेन निर्दिष्टाः। तत एव प्राप्तप्रेरणः पण्डितप्रवरो रामप्रसादत्रिपाठी 'पाणिनीयव्याकरणे प्रमाणसमीक्षा' इत्याख्यं ग्रन्थरत्नं विरचितवान्। शब्दशास्त्रीय-मोक्षव्यवस्थामधिकृत्य गोस्वामिनो महाप्रभुलालस्य शास्त्रिणो गौरीनाथस्य च लेखौ सारस्वतीसुषमायां प्रकाशितौ। तत्राऽपि श्रीपाण्डेयमतस्यैवोपजीव्यत्वम्।

किञ्च नैके विद्वासः कालेऽस्मिन् प्रक्रियास्वरूपव्याख्यानेऽनुसन्धान-प्रबन्धप्रणयने विविधग्रन्थानां परिष्कारे टीकादिप्रणयने च संलग्ना दृश्यन्ते। अस्मिन् काले शब्दशास्त्रस्य विषये किञ्चित् नूतनसिद्धान्ता अपि चर्चिताः। प्रक्रियाकौमुद्याः समर्थत्वात् पं. योगेश्वरशास्त्रिमहोदयः पाणिनीयव्याकरणे परिष्कारविधिमनिवार्य न मन्यतेस्म। तस्य दृढविश्वास आसीत् यत् प्रक्रियाविधिरेव महर्षिपाणिनेः सिद्धान्तानां सहजरीत्या प्रकटने समर्था आसीत्

नागेशोत्तरकालीन-वैयाकरणानामकारादिक्रमेण सूची

	कर्ता	समयः	रचना
1.	उदयशंकरः	1720	(i) ज्योत्स्ना-लघुशब्देन्दुशेखरस्य व्याख्या (ii) कल्पलता-मनोरमायाटीका (iii) कुञ्जिका-लघुमंजूषा-टीका

2.	जयकृष्णमौनि (कृष्णमौनि)	1700	(i) लघुकौमुदी-व्याख्या (ii) मध्यकौमुदी-व्याख्या (iii) सुबोधिनी-सिद्धान्तकौमुदी- व्याख्या
3.	नागेशः	1714	(i) उद्योत प्रदीपस्य टीकाः (ii) विषमी' शब्दकौस्तुभस्य व्याख्या (iii) लघुशब्देन्दुशेखरः, बृहदच्छब्देन्दुशेखरः (iv) परिभाषेन्दुशेखरः (v) वैयाकरणसिद्धान्त-वृहद, लघु-परम-लघुमञ्जूषा च
4.	पाठकः	1795	(i) लघुशब्देन्दुशेखरस्य व्याख्या (ii) परिभाषेन्दुशेखरस्य व्याख्या
5.	बालं भट्टः (वैद्यनाथ पायगुडे)	1750	(i) 'छाया' उद्योतस्य टीका (ii) 'उद्योत-शब्दकौस्तुभस्य व्याख्या (iii) 'भावप्रकाश- शब्दरत्नस्य व्याख्या (iv) 'चिदस्थिमाला-लघुशब्देन्दुशेखरस्य व्याख्या

			(v) गदा-परिभाषेन्दुशेखरस्य टीका (vi) 'कला' लघुमञ्जूषायाष्टीका
6.	भैरव मिश्रः	1780	(i) 'चन्द्रकला लघुशब्देदुशेखरस्य व्याख्या (ii) 'भैरवी' परिभाषेन्दुशेखरस्य टीका (iii) 'परीक्षा' वैयाकरणभूषणसारस्य टीका
7.	मन्तुदेवः	1760	(i) 'लघु-वृहद्दर्पणा च वैयाकरणभूषणसार टीका
8.	दीक्षित राजारामः	1760	(i) 'लघुमञ्जूषायाः टीका
9.	हरिनाथद्विवेदी	1780	(i) अकाण्डताण्डवः परिभाषेन्दुशेखरस्य टीका
10.	हरिवल्लभ	1700	(i) शब्दकौस्तुभस्य व्याख्या (ii) वैयाकरणभूषणसारस्य टीका

3. ऊनविंशशतकस्य केषाञ्चिद् विशिष्टवैयाकरणानां संक्षिप्तपरिचयः-

1. काशीनाथशास्त्री

जीवनपरिचयः-

महाराष्ट्रस्य 'बाई' इत्याख्ये प्रसिद्धे नगरे अविकसन् पण्डित-घराना इत्याख्येषु काशीनाथशास्त्रिणः पिता गोविन्दाचार्यः अष्टपुत्रे विशेषोल्लेख आसीत्।

अध्ययनकालः

तेन पितुः सकाशाद् विधिवदमधीतम्। व्याकरणशास्त्रस्य वैशिष्ट्याय तस्य पिता तं सतारा इत्याख्यस्य नगरस्य सुप्रसिद्ध विदुषः भास्करशास्त्रिणः अभ्यंकरस्य पार्श्वेऽध्ययनाय प्रैषयत्। तत्राधीत्य स्वयोग्यतायां सातिशय प्रौढिं प्राप्त्यर्थ स काशीं प्रत्यागच्छत्। तस्मिन् काले काश्यां व्याकरणस्य परिष्कारपद्धतेरुदयोऽभवत् ।

यदा काशीनाथशास्त्री काश्यामागच्छत् तदा स गंगारामत्रिपाठिनः अन्तिमसमयस्य छात्र आसीत्। त्रिपाठिनः प्रमुखशिष्यस्य पण्डित-जगन्नाथशास्त्रिणः (गाडगिलस्य इत्याख्यस्य) सुयोगोऽपि तेन प्राप्तः। स गुरुचरणेषु उपविश्य अस्यैव परिष्कारपद्धत्या शेखरद्वयस्य गम्भीरमध्ययन-मकरोत् ।

अध्यापनकार्यम् -

अध्ययनात्परं स काशिराजकीय - पाठशालायाम् व्याकरणशास्त्रस्याध्यापकपदं सुशोभितवान्। अस्य कार्यकालोनुमानतः 1820, ख्रिस्ताब्दतः 1850 ख्रिस्ताब्दतपर्यन्तं मन्यते । 7.5.1844 ख्रिस्ताब्दे संस्कृतकॉलेजेन प्रकाशितसूचनापत्रे काशीनाथशास्त्रिणः सर्वप्रथमे हस्ताक्षरं मिलति। अस्मिन् सूचनापत्रे छात्राणामध्ययनक्रमस्याध्येयविषयाणं च निर्धारणम् अस्ति यत् को विषयः कस्य पार्श्वे गत्वा पठितव्यः। तेन सूचनापत्रेण ज्ञायते यत् महाभाष्याध्येतॄन् छात्रान् महाभाष्याध्ययनाय काशीनाथशास्त्रिणः समीपे गन्तव्यम्। तद्यथा-

'काशीनाथशास्त्रिणश्च समीपेऽपि 'महाभाष्याध्ययनेच्छवो महाभाष्यं पठितुं शक्नुवन्ति।[8]

वैशिष्ट्यम् -

काश्यामेकः काशिनाथः इत्युक्तिस्तस्य कृते प्रसिद्धा आसीत्। पण्डित अम्बिकादत्तव्यासः संरकृतकॉलेजस्यैव छात्र आसीत् तथा च स तस्य युगस्य

---

8 काशी को पाण्डित्य परम्परा – आ. बलदेव उपाध्यायः पृष्ठ-154-56-प्र. सं. 1983

पण्डितानां वैदुष्येण सुपरिचित आसीत्। स स्वनिबन्धे-काशीनाथशास्त्रिण तस्मिन् काले काश्यां व्याकरणस्य 'राज्याभिषेकप्रदाता' इत्यलिखत्।

काशीनाथशास्त्रिणः, पट्टशिष्येण पण्डित् राजारामशास्त्रिणा स्वविश्रुत-धार्मिकनिबन्धे विधवोद्वाहशङ्कासमाधि इत्यस्यैकस्मिन् पद्ये गुरुवरपण्डित-काशीनाथशास्त्रिणः, चरणसेवया स्वप्रखरबुद्धेः प्राप्ति इत्यलिखत् । तद्यथा-

गुरुवर-बुध-काशीनाथ-शास्त्र्यङ्घ्रिसेवा,

प्रबलधिषण-राजाराम शास्त्री करोति।

मुनिवचन-सुदृष्ट्या लब्धवर्ण्येति विद्व-

दभिनव-विधवीद्वाहशङ्का-समाधिम्।।[9]

काशीनाथस्यैव अन्यतमः पंडितयागेश्वर ओझा इत्याख्येन परिभाषेन्दु-शेखरस्य एवं हैमवती टीकायां काशीनाथशास्त्री समस्तविदुषां धुर्यं सुधीनां इत्युक्त्वा स्वपाण्डित्यं प्रदर्शितम्। तद्यथा-

श्रीविष्णुं विधि-नारद-प्रभृतिभिः संसेविताङ्घ्रिद्वयं,

काशीनाथ-गुरुं समस्त विदुषां धुर्य सुधीना वरम्।

शिष्याः

तस्य त्रयः प्रमुखा शिष्या 1. पण्डितराजारामशास्त्री (कार्लेकरः) 2. पण्डित बालशास्त्री (रानाडे) 3. पण्डित यागेश्वरशास्त्री (ओझा) चासन्। एतेषां पाण्डित्यस्य शिष्य-परम्परा काश्यां सातिशय पल्लविता पुष्पिता चाभवत्। यैषां प्रयासैः

---

9 काशी को पाण्डित्य परम्परा – आ. बलदेव उपाध्यायः पृष्ठ-156-प्र. सं. 1983

पाणिनिव्याकरणस्य परिष्कारग्रन्थानां रचना शास्त्रार्थस्य मौखिकप्रवचनैः चाग्रेऽग्रे पल्लविता विकसिता चाभवत्।

2. बालशास्त्री

(कालः 1839 ख्रिस्ताब्दतः 1882 ख्रिस्ताब्दपर्यन्तम्)

जीवनपरिचयः -

पण्डितप्रवरबालशास्त्रि स्वयुगस्य एक विचक्षणो विद्वान् आसीत्। स चित्तपावनजातीय महाराष्ट्रिय कोंकणस्थ ब्राह्मणकुले भारद्वाजगोत्रे (रानाडे) उत्पन्नोऽभवत्। बालशास्त्रे पिता गोविन्दभट्टस्य मूलग्राम कोंकणे अञ्जनवेली पार्श्वे 'भारतगांव आसीत्। ततः काश्यामागत्य अस्सीघट्टे न्यवसत्। काश्यामेव 1839 ख्रिस्ताब्दे (1886 वैक्रमाब्दे) पौषकृष्णदशम्यां सोमवासरे महापुरुषबालशास्त्रिणो जन्म अभवत्। अस्य मातुः नाम 'काशीबाई आसीत्। ग्वालियरस्य बच्याशास्त्रिणः कन्यया सह तस्य पाणिग्रहणसंस्कारः 1845 ख्रिस्ताब्देऽभवत्। पुत्रोत्पत्तेरभावात्स विष्णुदीक्षितनामकं एकं बालकं पुत्रत्वेन स्वीकृतवान् । 1882 ख्रिस्ताब्दे (1939 वैक्रमाब्दे) स स्वर्गलोकमगच्छत्।

अध्ययनकालः -

बालशास्त्रिणं तृतीये वयसि पिता गोविन्दभट्टः महती तपस्यया प्राप्तं स्वीयं शिशु विद्वांसं मित्रं श्रीरामकृष्णदीक्षितं (धारय उपनामधारीं) समर्प्य दिवंगतः। तत्र पञ्चमे वर्षे उपनयनसंस्कारात्परं तेन दीक्षितमहाभागेन तैत्तिरीय शाखानुसिरिणो कृष्णयजुर्वेदस्या-ध्ययनमकरोत्। ततश्च स ग्वालियरनगरस्य बाबाशास्त्रिणः बापटमहोदयात् षड्मासनन्तरमेव समस्तां सिद्धान्तकौमुदीम् अध्यैत। अनन्तरं कुप्पाशास्त्रिणोऽन्तेवासीछात्रो भूत्वा पूर्वमीमांसाम-धीतवान्। पुणेनिवासिनो

मोरशास्त्रिणः ग्वालियरनगरे एव न्यायशास्त्रस्याध्ययनम-करोत्। ग्वालियरतः प्राथमिकविद्यां संप्राप्य पत्न्या सह वाराणसीं प्रत्यागच्छात्। स काशीनाथशास्त्रिणः (अष्टपुत्रे इत्याख्यात्) व्याकरणशास्त्रस्य किञ्चिद् अधीत्य तदाज्ञया पण्डित राजारामशास्त्रि-चरणेष्वुपविश्य समग्रस्य व्याकरणमहाभाष्यस्य गभीरमध्ययन-मकरोत्। तस्मिन् काले काशीनाथशास्त्री 'अपर पाणिनिः' इति नाम्ना प्रथित आसीत् ।

अध्यापनकार्यम् -

ग्रिफिथमहोदयेन तस्य नियुक्तिः राजकीय पाठशालायां 1864 ख्रिस्ताब्दे (स. 1921 वैक्रमाब्दे) सांख्यशास्त्रस्याध्यापकपदे कृता। तस्मिन् काले शास्त्रिणः पञ्चविंशतिः वयस आसीत्।

कृतिपरिचयः -

'व्याकरणमहाभाष्यटिप्पणं' 'परिभाषेन्दुशेखरस्य- **'सारासार विवेक'** नाम्नी टिप्पणी **बृहज्ज्योतिष्टोमपद्धतिः** चेत्यादयः प्रमुखाः कृतयः सन्ति। स्वगुरो पं. राजारामशास्त्रिणः **'विधवोद्वाहशंका समाधि'** नामके ग्रन्थे । **'दोषभास-निरास'** नामक तिलकं विलिखितवान्।

प्रमुखाः शिष्याः -

प्रमुखेषु शिष्येषु महामहोपाध्याय इति पदव्या मण्डिताः चत्वारः शिष्याः सर्वसम्मत्या प्रथमश्रेण्या गण्यन्ते। ते च महामहोपाध्याय पं. शिवकुमारशास्त्री म. म. गंगाधरशास्त्री, म. म. दामोदरशास्त्री, म. म. रामकृष्णशास्त्री सन्ति ।

3. 'वैयाकरण केसरी' पं. यागेश्वरशास्त्री आस्पद- 'ओझा'

(कालः 1828 ख्रिस्ताब्दतः 1899 ख्रिस्ताब्दापर्यन्तम्)

जीवनपरिचयः -

विद्वान् अयं बालशास्त्रिणः सतीर्थ्य आसीत्। बालशास्त्रिणा व्याकरणशास्त्रे परिष्कार पद्धतिः प्राथम्येन प्रस्तुता परन्तु यागेश्वरमहोदयः प्रक्रियापद्धतिं

पाणिनीव्याकरणस्य गूढार्थानां (रहस्यानां) प्रकाशनाय समीचीनाममन्यत्। वस्तुतः प्रक्रियापरिष्कारौ उभावन्योऽन्यस्य पोषकौ स्तः। तस्य जन्म उत्तरप्रदेशस्य बलिया जनपदस्य चोल्हनचक्र (रूद्रपुर) ग्रामे 1828 ख्रिस्ताब्देऽभवत्। तस्य पितुर्नाम श्री ओंकार ओझा आसीत्। तस्य चतुर्षु पुत्रेषु तृतीयः पुत्रः यागेश्वरशास्त्री आसीत्। तस्य प्रथम पत्न्याः एकः पुत्रोऽभवत् यस्य नाम पं. देवकृष्ण ओझा आसीत्। प्रथमपत्न्या निधनात्परं स पुनर्विवाहमकरोत्। द्वितीयपत्न्या एका पुत्री जन्मलब्धवती यस्या नाम गौरी आसीत्। देवकृष्णस्यैकः पुत्र (रामनाथ ओझा) एका पुत्री (शिवमुनी देवी) स्तः। शिवमुनीदेव्याः विवाह आचार्यबलदेव उपाध्यायेन'[10] सहाभवत्।

अध्ययनकालः -

बाल्यावस्थाया एवं प्रतिभासम्पन्नस्य स्वाध्यायप्रियस्य च शास्त्रिणः पिता स्वदारिद्र्यात्काश्यादिषु विद्यास्थलेष्वध्ययनाय प्रेषयितुमसमर्था आसीत्। तस्मात् स कतिपयानि वर्षाणि ग्रामपाठशालायामेव शिक्षां प्राप्नोत्। तथापि स्वाध्यायस्योत्कृष्टाभिलाषात् मातापित्रोः परिवारजनानां चानुमतिं विना स गृहात् पलायनमकरोत्। स्वग्रामं निकषां महाराजा विजयगारम् आसीत्, यस्यौदार्याद् आर्थिकसहाय्यत्वादैव स स्वाध्यायमकरोत्। स पदभ्यामेव गोरखपुरं[11] प्रत्याध्यनाय निरगच्छत्। कतिचिद्वर्षाणि गोरखपुरेऽधीत्य काशीमगच्छत्। तत्र काशीनाथशास्त्री कार्लेकरमहोदयस्य समीपे व्याकरणशास्त्रम् अध्यैत।

अध्यापनकार्यम् -

पं. यागेश्वरशास्त्री निस्पृहताया मूर्तिः पाण्डित्यस्य स्थावरोऽवतार आसीत्। स वेतनमस्वीकृत्य प्राचीनानादर्शनानुसृत्य छात्रान् व्याकरणमध्यैत। स भृतिमूलकमध्यापनं कथमपि न स्वीकृतवान्। पं. राजारामशास्त्रिणः रुग्णकाले यागेश्वरशास्त्रिणे कॉलेजाध्यापनाकार्यमयच्छत्। परन्तु स तस्मिन्नध्यापनावसरे

---

10 काशी की पाण्डित्य परम्परा- आ. बलदेव उपाध्याय, पृष्ठ – 195, प्रं. सं. 1983

11 काशी की पाण्डित्य परम्परा- आ. बलदेव उपाध्याय, पृष्ठ – 196, प्रं. सं. 1983

वेतनस्य प्राप्तसम्पूर्णराशिं स्वयं न स्वीकृत्य पं. राजारामशास्त्रिण पुत्रेभ्योऽयच्छत् 1875 ख्रिस्ताब्दे गुरो देहावसानात्परं कॉलेजस्य तात्कालीनाध्यक्षो ग्रीफिथमहाभागः तस्य गृहमागत्याध्यापनाय विशेषाग्रहमकरोत् परन्तु स भृत्तिमूलकं वृत्तिं न स्वीकृतवान्।

कृतिपरिचयः -

श्री यागेश्वरशास्त्रिण एकमात्ररचना परिभाषेन्दुशेखर विद्वत्तापूर्णा व्याख्या **'हैमवती'** टीका अस्ति। अस्य पाण्डुलिपि यागेश्वरशास्त्रिणा विरचिता। कृतिरियम् सस्कृत-विश्वविद्यालयात् 1975 ख्रिस्ताब्दे प्रकाशिता। हैमवती-टिकायाः प्रारम्भे यागेश्वरेण स्वीयपूज्यगुरुदेवस्य स्मरणः इत्थं प्रकारेण कृतम्।

श्री विष्णुं विधिनारदप्रभृतिभिः संसेविताङ्घ्रिद्वयं,

काशीनाथगुरुं समस्तविदुषां पूर्व सुधीनां वरम्।

ध्यात्वा टिप्पणकृत्प्रसारित-महामोहान्धकारं मया,

सद्यः तर्कमयूखराजिभिरपाकर्तु पराक्रम्यते।।[12]**"**

परिभाषेन्दुशेखरस्य 'गदा' नाम्नी टीकाया रचयिता वैद्यनाथोऽनेकासु परिभाषासु पाठस्य निर्देशमकरोत्। यागेश्वरशास्त्रिणा स्वीकृतपाठः तस्मात्सर्वथाभिन्नोऽस्ति। स नागेशग्रन्थे परिभाषेन्दुशेखरे बहुस्थलान् स्वप्रतिभया चिन्त्य इत्युक्त्या स्वीयोत्कृष्टपाण्डित्यस्य परिचयमयच्छत्। व्यपदेशिवदेकस्मिन् (परिषाभा-30) स्थले नागेशकथनं यागेश्वरशास्त्रिणा वस्तुतश्चिन्त्यमिदम् इति विलिख्य स्वारूचिं प्रदर्शितम्।

इत्थमेवानन्तरङ्गानपि विधीन् बहिरङ्गो लुग् बाधते (परिभाषा-52) इति व्याख्यावसरे हैमवतीकारो नागेशकथनं चिन्त्यैवामन्यत् । इत्थं हैमवत्यां टीकायां

---

12 काशी की पाण्डित्य परम्परा आ. बलदेव उपाध्याय, पृष्ठ 202- प्र. सं. 1983

विपुलप्रसंगाः सन्ति येषु यागेश्वरशास्त्रिणः व्याकरणागमस्य विशिष्ट-वैदुष्यमुदघाटितं भवति।

शिष्याः -

तस्य प्रमुखेषु शिष्येषु तद्देशीय काशीमण्डलस्य गोरखपुरमण्डलस्य च छात्राणां बाहुल्येन सह दाक्षिणात्य छात्राणां (तमिल-तेलुगू) महाराष्ट्राप्रान्तीय छात्राणां च बाहुल्यमासीत्। ते शिष्या अध्ययनकाले शास्त्रिण हैमवतीटीकायाः प्रतिलिपीं स्वीयाभ्यां हस्ताभ्यां निर्माय स्वदेशेऽनयन्। तस्मादेव हैमवतीटीकायाः हस्तलेखाः मद्रासपुस्तकालये विशेषेण लभ्यन्ते ।

शास्त्रिणः स्वीयभ्रातुष्पुत्र ठाकुर प्रसाद ओझा तस्य प्रमुखः शिष्यः आसीत्। वीरेश्वरशास्त्री द्राविड पटुशिष्येषु अन्यतम आसीत्।

तस्य रामायणे दृढास्था -

यागेश्वरशास्त्रिणः रामायणेऽगाधश्रद्धा दृढनिष्ठा चासीत्। स न केवल शुष्कवैयाकरण आसीत् प्रत्युतः रसिक हृदयवान् भगवद्भक्त आसीत्। यदा पुत्रवध्वा अनुपस्थित्यां स स्वयमेव भोजनमपाचयत् तस्मिन् समयेऽपि तस्यमुखाद् विष्णुसहस्रनामस्तोत्रस्याजस्रपाठ प्रचलतिस्म। स क्षणमपि व्यर्थ न नाशयति। इमं श्लोकं स्वीयजीवनस्यादर्शवाक्यं मन्यतेस्म। तद्यथा-

आयुषः क्षण एकोऽपि न लभ्यः शतकोटिभिः।

स चेन्नु, व्यर्थतां नीतःका नु हानिस्ततः परा।।[13]

---

13 संस्कृत वाङ्मय का वृहद् इतिहास-सम्पा. आ. बलदेव उपाध्याय, उत्तर प्रदेश सं. सस्थान् पृ. सं. 271, प्र. सन् 2001

हैमवतीटीका

रचनाकालः ऊनविंशशतकम् (1980)

प्रणेता – पं. यागेश्वर शास्त्री, 'वैयाकरण कैसरी'

महामहोपाध्याय तात्याशास्त्रिणा परिभाषेन्दुशेखरस्य स्वीयभूत्या-ख्यायां व्याख्यायां हैमवतीटीकाया बह्वाश्रयणम् (अनुकरणम्) अकरोत्। तथापि उभयोर्भेदोऽस्ति। भूत्यां परिष्कारशैल्यायाः प्राधान्यमस्ति चेत् हैमवत्यां प्रक्रिया-शैल्यायाः, तथाप्यनेनेदं वक्तुं न शक्यते यत् यागेश्वरमहोदय परिष्कारपद्धतेः सर्वथा तिरस्कारमकरोत्।

अन्तराङ्गादप्यपवादो बलीयान्[14] (परिभाषा-57) अस्या व्याख्यावसरे नव्यपरिष्कार-पद्धतेरव-लम्बनं कर्त्री तस्य भाषा दर्शनीया अरित।[15]

तात्पर्यमिदमस्ति यत् यागेश्वरशास्त्री परिष्कारपद्धतेः पूर्णपरिचय-मजानन्नपि स्वीयां व्याख्यायां तस्योपयोगं नाकरोत् ।

हैमवत्या महती विशिष्टताऽस्ति यत् सा नागेशकथनस्य प्रत्यक्षरस्य व्याख्यानं कृत्वाऽन्तेविद्यमानान् गूढस्थलान् विशदयति येन परिभाषेन्दु-शेखरस्य तात्पर्य सद्य स्फुरितं भवेत्। हैमवतीटीका सरलसुबोधशब्दैः नागेशाशयं प्रदर्श्य जिज्ञासुजनानां महदुपकारं करोति।

हैमवत्याः प्रभायोऽन्येषु व्याख्यातृषु दृश्यते। भूतिकारस्तात्याशास्त्री 'असिद्धं बहिरङ्गमन्तरङ्गे परिभाषायाव्याख्यावसरे केचित्तु शब्देन हैमवतीकारस्य

---

14 परिभाषेन्दुशेखर-व्याख्याकारः- आ. विश्वनाथ मिश्रः चौ. सुर. प्रका, वाराणसी, पृष्ठ-268

15 दृष्टव्य 233 पृष्ठतः 219 पृष्ठपर्यन्तम् एवमेव लेखन शैली अपि 240 पृष्ठेऽवलोकनीया अस्ति-हैमवतीटीका

स्मरणमकरोत्। भूत्याः टीकाकारः गणपतिशास्त्री तु स्पष्टमलिखत् यत् किचित्तु इति हैमवतीकाराः[16] अत्र तु टीकाकारो हैमवतीकर्तुः मतम् उपन्यासयति ।

परिभाषेन्दुशेखरस्य व्याकर्तृषु यागेश्वरशास्त्रिणो नाम नवीन-कल्पनाकर्तृरूपे, प्रक्रिया-शैल्यामेव मूलग्रन्थस्य परिनिष्ठितव्याख्यातरिरूपे च सर्वदा अविस्मरणीयं भविष्यति। पण्डितयागेश्वरेण स्वीयनम्रतासुष्ठु-शब्दैरभिव्यक्ता ।

तद्यथा-

सभ्यान् प्रणम्य विहिताञ्जलिरस्मि भक्त्या,

यागेश्वरोऽनधिगतार्थसुशब्दशास्त्रः।

सत्यं, तथापि पुरूषोत्तमपादपद्म,

ध्यानेन लब्धसुमतिर्वितनोमि किञ्चित् ।।[17]

ऊनविंशशतकस्य प्रमुखवैयाकरणानां कालक्रमेण प्रणीता सूची

	वैयाकरणाः	**कालः**	**कृत्तयः**
1.	शास्त्री भास्करः	1810	लघुशब्देन्दुशेखरस्य व्याख्या
2.	महानन्दः	1820	वैयाकरणभूषणसारस्य टीका
3.	आचार्य राघवः	1820	1. 'प्रभा' शब्दकौस्तुभव्याख्या 2. 'विषमी' लघुशब्देन्दुशेखरस्य व्याख्या
4.	ब्रह्मानन्दसरस्वती	1859	चित्प्रभाटीका-परिभाषेन्दुशेखरस्य

16 तत्वप्रकाशिका (भूतेः टीका)-गणपति शास्त्री मोकाटे पृष्ठ 180

17 काशी की पाण्डित्य परम्परा – आ. बलदेव उपाध्याय पृ. 204, सं. 1983

4. विंशशतकस्य केचन मूर्धन्याः शाब्दिकाः

1. तात्याशास्त्री (रामकृष्णशास्त्री)

(कालः 1845 ख्रिस्ताब्दतः 1919 ख्रिस्ताब्दपर्यन्तम्)

जीवनपरिचयः-

पं. रामकृष्णशास्त्री यत् तात्याशास्त्रीति नाम्ना प्रथितः महाराष्ट्रीय-कोंकणस्थ ब्राह्मण आसीत्। एतेषां पूर्वजानां मूलस्थानं कोंकणप्रदेश आसीत्। अस्य पितुर्नाम पं. महादेवभट्टः अपरनाम बालमभट्ट आसीत्। पितामहस्तु पं. भट्टनारायणशास्त्री आसीत्। पितुः द्वितीयपुत्रस्यास्य जन्म 1845 ख्रिस्ताब्देः (1902 वैक्रमाब्दे) नागपुरेऽभवत् । सार्द्धद्वय वर्षानन्तरमस्य पितरौ दिवंगतौ ततश्च पितृव्येण पं. नागेश्वरभट्ट एवास्य पालनं पोषणञ्च कृतम्।

तस्य परिवारे लक्ष्मीसरस्वत्योः निवास आसीत्। तस्य चत्वारः पुत्रा आसन् येषु ज्येष्ठ पुत्रः व्याकरणसाहित्यवेदान्तविशेषज्ञः पं. नारायणशास्त्री पटवर्धन आसीत्। यस्य 1903 ख्रिस्ताब्देः मृत्युरभवत्। तस्य द्वितीयपुत्रः राजेश्वरीमुद्रालयस्य नियन्त्रकः पं. बालशास्त्रीपटवर्धन आसीत्। तस्य मृत्यु 1916 ख्रिस्ताब्देऽभवत्। तस्य तृतीयपुत्रः दुण्डिराजशास्त्री चतुर्थश्च वीरेश्वर आसीत्। उभयोर्मृत्युः शास्त्रिणर्निधनात्परमभवत्। 1919 ख्रिस्ताब्देः (फाल्गुनशुक्लतृतीया 1976 वैक्रमाब्दे) प्रातः काले चतुस्सप्ततितमे वयसि स पञ्चभौतिकदेहमत्यजत्।[18]

अध्ययनकालः -

पञ्चवर्षपर्यन्तम् मराठीमातृभाषायामध्ययनमकरोत् । ततश्च पितृव्येण नागेश्वरभट्टेन स्वेन सह काशीमानीतः । चतुर्दशवर्षात्परं स कर्मकाण्डस्य वेदांश्चाध्यैत। विभिन्नशास्त्राणां विशिष्टाध्ययनेच्छया बालशास्त्रिणः शिष्यत्वमङ्गिकृतवान् । गुरोः

---

18 काशी की पाण्डित्य परम्परा- आ. बलदेव उपाध्यायः, पृष्ठ-280, प्र.सं. 1983

कृपया स्वीयबुद्धिबलेन द्वादशवर्षस्याध्ययनं षड्वर्षकाले एक समाप्य सर्वान् आश्चर्यचकितानकरोत् ।

अध्यापनकार्यम् -

सकलशास्त्रपारङ्गतस्य नियुक्तिर्महाराजादरभंगापाठशालायां वाराण-स्यामभवत्। 1980 ख्रिस्ताब्दे गवर्नमेन्ट संस्कृत कॉलेजस्य तात्कालिकप्राचार्यः डॉ. थीवीममहोदयो व्याकरणाध्यक्षपदे नियुक्तवान्। तत्र स अनवरतं 36 षडत्रिंशद् वर्षाणि 1880 तः 1916 ख्रिस्ताब्दपर्यन्तम् अध्यापयत्। अध्यापनसंकल्पेनैव वृद्धावस्थायामपि पालक्यामारूहा महाविद्यालयेऽध्या-पनायागच्छत् शास्त्रिमहोदयः।

कृतिपरिचयः -

पं. तात्याशास्त्रिणः रचनासु परिभाषेन्दुशेखरस्य सुप्रसिद्धा भूति टीका अस्ति। यत्रमूलग्रन्थस्य भावानाम् विवेचनं मार्मिकरीत्या सरलशब्दैः च कृतम् येन परिष्कारपद्धतेः स्वरूपं स्पष्टयति। भूतिविषये अद्योलिखिता संस्तुतिः शोभना ज्ञायते-

शम्भोर्नागेशनाम्नो गहनतरगिरां मर्म सम्यक् प्रकाश्यः,

प्रौढ्या सत्सम्प्रदायागतमखिलमलं ख्यापयत्यर्थजातम्।

विद्यार्थिव्रातमात्ता कठिनतमपरीक्षाब्धिपोतायमानाः,

तात्याशास्त्रीन्द्रकीर्तिः जगति विजयतां भासते यावदर्कः ।।

स शब्देन्दुशेखरस्यापि टीकां प्रणीतवान् इति श्रूयते तथापि इदानीं पर्यन्तं सा न प्रकाशिता। अतोऽस्य विषये किञ्चिदधिकं वक्तुं शक्नोमि।

सम्पादनकार्यम् -

भर्तृहरेर्वाक्यपदीयस्य बनारस संस्कृतसीरीजतः संशोधनेन सह प्रथमप्रकाशनम् तात्याशास्त्रिणः सम्पादकत्वेऽभवत्। 1884 ख्रिस्ताब्देऽस्य प्रथमं द्वितीयं च काण्डं

सम्पादितवान्। स कार्यवशात् तृतीयकाण्डस्य संशोधनं नाकरोत् यस्य गंगाधरशास्त्रिणः मार्गदर्शने संशोधनेन सह 1887 ख्रिस्ताब्दे प्रकाशनमभवत्। अनेन सम्पादितोऽपरग्रन्थः विज्ञानभिक्षुविरचितं योगवार्तिकमस्ति। अस्मिन् कार्ये महामहोपाध्याय केशवशास्त्रिणः सहयोग आसीत्।[19]

उपाधिः-

उभयोः टीकयोः रचनानन्तरं गवर्नमेण्ट संस्कृतकॉलेजबनारसस्य प्राचार्यस्य संस्तुत्या ब्रिटिशसर्वकार सन् 1909 ख्रिस्ताब्दे महामहोपाध्याय इति महनीयोपाधिनाऽलंकृतवान् । तस्योपाधिं प्राप्तेरुल्लेखोऽस्मिन् श्लोके कृतः-

सम्राट् प्रदत्तदुरवाप महामहोपा-

ध्यायेति मान्यपदीं समवाप्य धीमान्।

विद्योतते स्म विदुषां सदसि प्रसिद्धः,

तात्यापराख्यपटवर्धनरामकृष्णः।।[20]

उभयचातुर्यम् -

शास्त्रिमहोदयः शास्त्रलोकयोरुभयोरत्यन्तो निपुण आसीत्। म.म.पं. बालशास्त्रि तस्य व्याकरणस्य गुरुरासीत्। तस्मात् व्याकरणाध्ययनेन सहैव वेदान्तस्य धर्मशास्त्रस्य, सांख्यस्य योगस्य चाध्ययनं कृतवान्। शास्त्रीयज्ञानेन सह लोकव्यवहारेऽपि कुशल आसीत्। तस्मिन् युगे यदा मुद्रणालयस्याभाव वर्तते तदा संस्कृतसाहित्यस्य प्रचार-प्रसाराय स्वीये गृहे एव राजेश्वरी नामकं मुद्रणालयं स्थापितवान्। अतः बहवो ग्रन्थाः प्रकाशिताः। पं. बालशास्त्रिण विरचिताभिः व्याकरणसम्बन्धिटीकाभिः सह स्वेन विरचितान् ग्रन्थान् अपि प्रकाशितवान् ।

---

19 काशी की पाण्डित्य परम्परा – आ. बलदेव उध्याय पृ. 284 प्र. सं. 1983

20 काशी की पाण्डित्य परम्परा – आ. बलदेव उध्याय पृ. 282. प्र. सं. 1983

शिष्यमण्डली-

तस्य बहवः शिष्या आसन्। ते त्रिषु वर्णेषु विभक्तुं शक्यन्ते।[21]

1. **मैथिलेयाः-** मैथिलेषु प्रधानशिष्य पं. शशिनाथ झा आसीत्। चान्येषु पं. द्रव्येश झा, श्रीधरझा, महावीर झा, कालिका झा, नन्दन आ. किशोरी झा, जयकिशोर झा, गुनोर झादयः आसन्।

2. **महाराष्ट्रीयशिष्येषु-** पं. रामशास्त्रि परांजपे, दामोदरशास्त्रिसहस्रबुद्धे, रामशास्त्रि, कोटिभास्कर-प्रभृतयः प्रसिद्धाः।

3. **एतद्देशीयशिष्येषु-** तस्यप्रधानशिष्य पं. रामयशत्रिपाठी महाशयजी आसीत्। अन्ये पं. विद्याविलासशुक्ल...पं. रामदेव द्विवेदी, पं. राजनीति पाण्डेय, पं. मोतीराम पाण्डेय, पं. रामउदित उपाध्याय प्रभृतयः। महामहोपाध्यायस्य तात्याशास्त्रिमहोदयस्य कीर्तिः भूति टीकयैवास्ति नात्र लेशमात्रस्य सन्देहस्य स्थानम् तथापि तस्य प्रशंसाया पं. नारायणशास्त्रिणः प्रशस्तिरियम् सर्वथा उचिताऽस्ति-

विदत्कुलस्यांलकारो, वैयाकरणधूर्धरः ।

तात्याशास्त्री विजयते, रामकृष्णापराभिधः।।[22]

भूतिटीकाया वैशिष्ट्यम् -

श्रीतात्याशास्त्रिमहोदयेन विरचितेयं टीका परिभाषेन्दुशेखरस्य गूढार्थ सरसरीत्या स्पष्टयति। गदावदस्या अपि नामकरणेन टीकाकारस्य शैवत्वम-

---

21 काशी की पाण्डित्य परम्परा – आ. बलदेव उध्याय पृ. 283. प्र. सं. 1983

22 काशी की पाण्डित्य परम्परा – आ. बलदेव उध्याय पृ. 285. प्र. सं. 1983

भिव्यज्यते। भूतनाथस्य-श्रीशङ्करस्य, भूति-समुद्धूलनं सकलपापविनाशन-मिति कल्याणाभिलाषुकानां तिरोहितं नास्ति। टीकाया अपि यथानुगुण्यमनेन विलसति । एतन्नामकरणेन दोषनिवारणपूर्वकं कल्याणोपपादनं स्पष्टमेव। मङ्गलाचरणे भूतिकारेण लिखितम्- प्राचीनवैयाकरणाना-मिन्द्रादीनाम् शास्त्रे वचनरूपाणि ज्ञापकन्याभ्यां प्रमितानि भाष्यवार्तिक कारयोरभिप्रेतानि यानि परिभाषारूपाणि तानि अत्र ग्रन्थे व्याख्यायन्ते।[23]

भूतिकारस्य प्रतिपादनशैली गदाकारवत्प्राञ्जलतावगहिनी नास्ति प्रत्युतः नैयायिकानां लम्बसरणिमाश्रयते । अनेन विदुषा सीरदेव-नीलकण्ठदीक्षितादयोवि-द्वांसो विशिष्य विश्लेषिताः प्रत्यालोचिताश्च। पक्षपोषणं तु आत्यन्तिकनिर्णयेन नागेशभट्टोक्तस्यैव विहितम्।

भूतिटीकाया एषा महती विशेषता वर्तते यदस्यां टीकाकारेण प्रसङ्गवशाद् बहूनां लक्षणां संस्काराय स्पष्टाय च प्रयत्नं कृतम्। साम्यमावध्यान्यत्राप्यन्वयनं तावदस्याष्टीकाया अनुपमो गुणो विद्यते। मूलोक्तार्थविशदीकरणं तावट्टीकायाः प्रथमं लक्ष्यम्भवति, विश्लेषणं तु नान्तरीयकता-नुगमेव स्यात्किन्तु दुरुतार्थकं न स्यादिति तत्र प्रथमापेक्षा भवति। मघवामूलमिति न्यायेन प्रवर्तनं यत्रैकतो वैदुष्यं प्रदर्शनमात्रोदद्देश्यत्तां व्यनक्ति तत्रैवाऽपरत उपयोज्यत्वाहानमप्यभिव्यनक्ति। बौद्धिकाव्यायामाऽऽया-मपरायणानां कृते तु टीकाऽनपेक्षितेव भवति, स्वयमवबुद्धार्थत्वादिति । अत. सद्योऽर्थसर्म्पकतया भाष्यदृगादर्शदिशमुद्दद्देश्य-तावच्छेकतया भूतिकारेण विदुषा यत्प्रयासो विहितः तच्छात्रकल्याणाय मङ्गलाय वा भवतीति ध्यातव्यम्।

---

23 संस्कृत वाङ्मय का वृहद् इतिहास (पञ्चदशखण्ड-व्या.) आ. बलदेव उपाध्यायः, पृ. 275, प्र. सं. 2001

2. पण्डित उमापत्ति द्विवेदी

प्रसिद्धनाम पं. नकछेदराम दूबे

(1853 ख्रिस्ताब्दतः 1911 ख्रिस्ताब्दपर्यन्तम्)

जीवनपरिचयः -

पण्डितप्रवर उमापतिद्विवेदीमहोदयो बालशास्त्रियुगस्यैकालौकिक विद्वान् आसीत्। स गोरखपुरमण्डलस्य बांसगांव उपखण्डस्य पार्श्वे 'सहु आपार' ग्रामस्यासीत्। ततस्तस्य परिवारो गोरखपुरनगरस्य आर्यनगर (अलीनगर) वसतावऽगच्छत् । तस्य कुलम् गोरखपुरस्य प्रतिष्ठितः परिवारः गौतमगोत्रीय-काश्वनीगुरुदुबान-सरयुपारीणब्राह्मणस्यासीत्। तस्य जन्म 1853 ख्रिस्ताब्दे (चैत्रशुक्ल द्वितीया वि. स. 1910) गोरखपुरेऽभवत् । तस्य पितुर्नाम हरिनाथद्विवेदी आसीद् यत् तस्मिन्नकाले व्याकरणन्यायवेदान्तानां मूर्धाभिषिक्तो विद्वान् अमन्यत्। स पितरं पं. हरिनाथद्विवेदमहोदयम् काशीवासार्थ परिवारेण सह 1897 ख्रिस्ताब्दे तत्र गत्य निवासमकरोत्। अष्टपञ्चाशद् वयसि 1911 ख्रिस्ताब्दे (आषाढशुक्लाष्टम्यां तिथौ 1968 वैक्रमाब्दे) निर्वाणमवाप्तवान् ।'[24]

अध्ययनकालः -

हरिनाथद्विवेदीमहोदयात् स सकलशास्त्राण्यधीत्य तेषां तलस्पर्शि वैदुष्यं प्राप्तवान्।

अध्यापनकार्यम् -

स प्रारम्भकाले गोरखपुरस्य पाठशालास्वेवाध्यापनमकरोत्। ततश्चायोध्यामहाभागस्य विशिष्टपाठशालायाम् उच्चश्रेणी छात्रान् अध्याप्य

---

24 काशी की पाण्डित्य परम्परा – आ. बलदेव उपाध्यायः, पृ. 357-73, प्र. सं. 1983

वैदुष्यकीर्तिमवाप्तवान्। स चतुरस्रपाण्डित्यस्य विशिष्ट विद्वान् आसीत्। तथापि तस्य न्यायशास्त्रस्योभयोः तन्त्रयोः प्राचीननव्ययोः वैदुष्यमलौकिकमासीत् ।

कृतिपरिषयः

द्विवेदी उमापतिर्बहून् ग्रन्थान् प्रणीतवान् तथापि मुख्यतया स वैयाकरण आसीत्। स नागेशभट्टविरचितस्य शब्देन्दुशेखरस्य परिभाषेन्दु-शेखरस्य च जटा नाम्नी टीका विरचितवान्। तस्य तृतीया कृतिः 'नारायण काव्यम्' अस्ति। तस्याअन्तिमो ग्रन्थः सनातनधर्मोद्धारोऽस्ति यत्तस्य कीर्ति स्थायिनी कर्तुं सर्वथा योग्यम्। चतुर्षु खण्डेषु विभक्तोऽयं विशालकायग्रन्थ मूलरुपे संस्कृते विरचितः। तस्य हिन्द्यामनुवादोऽपि द्विवेदिनैव कृतः। अस्य पूर्वार्द्धस्य खण्डद्वयस्य प्रकाशनं लेखकस्य प्रकाशन लेखकस्य जीवनकालेऽभवत्। उतरार्द्धखण्डद्वे मदनमोहनमालवीय-महाभागेन हिन्दुविश्वविद्यालयात् प्रकाशितौ।

वैशिष्टयम् -

व्यवहारपटुता शास्त्रीय पाण्डित्येन सह व्यावहारिकपटुताया संगमो मणिकाञ्चनसंयोगवदाश्चर्यकारी आसीत्। तस्य गृहे बहुसम्पदाऽऽसीत् न्यायालये प्रायः वादः (केस) प्रचलितस्म। तदा वादविवादकाले तस्य चातुर्यमवलोक्य विधिवेतारोऽपि आश्चर्यचकितोऽभवन्। शास्त्रज्ञानेन सह मल्लेयोद्धा अप्यासीत्। महाराजा नेपालस्य राजसभाया पूर्व सभायाः पण्डितान् पराजित्य ततश्च मल्ल-शालायां सर्वान् मल्लान् विजित्य संस्कृतविद्या-विशारदस्य, मल्लविद्याविचक्षणस्य च ख्यातिमर्जितवान्। तस्य वैदुष्यस्य प्रशस्तिरियं यथार्थैवास्ति। तद्यथा-

न्यायाम्भोरूह-मध्यगग्रहपतिर्योगे यतीनां पतिः,

वेदान्तार्णवकर्णधारनृपतिः साहित्यवाचस्पतिः।

चाणक्योऽखिलकूटनीतिनृपतिः सांख्याम्बराहर्पतिः,

शब्दे कश्चिदुमापतिर्विजयते मल्लेषु सेनापतिः ।।[25]

3. श्रीगंगाधरशास्त्री तैलङ्ग

(कालः 1853 ख्रिस्ताब्दतः 1913 ख्रिस्ताब्दपर्यन्तम्)

जीवनपरिचयः

गंगाधरशास्त्रिणः जन्म काश्यामेवाभवत् परन्तु तस्य मूलस्थानं कर्नाटकराज्यस्य बंगलोरमण्डलस्य यस्सरगट्टा नामको ग्राम आसीत्। तत्रैव गौतमगोत्रः श्रौतस्मात् कर्मधुरन्धरो सुब्रह्मण्यशास्त्री 'मानवल्ली नामको विज्ञो ब्राह्मणो निवसति स्म। तस्यैव पुत्र नृसिंहशास्त्री बाल्यकाले पितरौ देहावसानात्परम् अनाथावस्थायां बंगलोरस्थ मातुलाश्रये आगत्य न्यवसत् नृसिंहशास्त्रिणः ज्येष्ठपुत्रस्य जन्म 1853 ख्रिस्ताब्दे (1910 वैक्रमाब्दे) गंगादशहरायां पवित्रदिवसेऽभवत् । तस्मात् तस्य मातामही गंगाधर इति नाम कृतवती। दैवदुर्विपाकेन तस्य माता तृतीये वयसि दुग्धं पिबन्तं बालकं त्यक्त्वा कालकवलिता अभवत् ।

गंगाधरशास्त्रिणो द्वौ पुत्रौ स्तः 1. पं. दुण्ढिराज शास्त्री 2. पं. भालचन्द्रशास्त्री च। दैवदुर्विपाकेन 1904 ख्रिस्ताब्दे सकलशास्त्रपारङ्गतस्य ज्येष्ठपुत्रस्य निधनमभवत्। तेन शास्त्रिण हृदये वज्रपातोऽभवत्। भीषणं दुःख विस्मृत्य शास्त्रिमहोदयोऽखिलभारते तीर्थयात्रामकरोत्। ततश्च 'अलि विलापि संलाप' इति महनीयदार्शनिककाव्यम् व्यरचयत्। तस्य पुत्र पण्डितभालचन्दशास्त्रिमहोदयो गवर्नमेण्टसंस्कृतकालेज वारणस्यां साहित्यविभागस्य प्राध्यापक आसीत्। 1913 ख्रिस्ताब्दे (1970 वैक्रमान्दे ज्येष्ठशुक्ल प्रतिपदायां) स्वीयपांचभौतिकं शरीरं त्यक्त्वा शिवत्वं प्राप्नोत्।

---

25 हरि हरचरितः पृ. 2-30

अध्ययनकालः-

पिता बालकस्य बाल्यसंस्कारात्परं स्वयमेव प्रारम्भिकीं शिक्षा-मयच्छत्। बालकस्य एतावती बुद्धिः आसीत् यदष्टवर्षे स पञ्चकाव्येषु व्युत्पतिं प्राप्तवान् ।

उपनयनसंस्कारात्परं तात्कालीन महान् वैदिकपण्डितबालकृष्ण-भट्टस्य[26] पाठशालायां प्रविश्य स स्वीयं वैदिकशाखायां आपस्तम्बशाखायाः साङ्गकृष्णयजुर्वेदस्य च विधिवदध्ययन-मकरोत्। ततश्च पितुराज्ञया बनारस संस्कृतकॉलेजे दशवर्षाणियावदध्यनमकरोत्। तत्रैव पं. राजारामशास्त्री आसीत्। य व्याकरणशास्त्रस्य पतञ्जलेर्नूतनावतारो मन्यते स्म। तस्मात् व्याकरण-धर्मशास्त्र-सांख्य-योग-वेदान्त दर्शनस्य च विधिवद्शिक्षां प्राप्तवान्। संन्यासग्रहणस्य कतिचिद् वर्षात्पर 1875 ख्रिस्ताब्दे (संवत 1932 वैक्रमाब्दे) राजारामशास्त्री कैलासवासी अभवत्। गुरोर्निधनं श्रुत्वा शोकातुरोऽभवत्। यतो हि तस्मिन्नकाले गुरोर्मुखाद् व्यासभाष्यस्याध्य-यनमकरोत् । एकदा रात्रौ रूदन् एवास्वपत्। स्वप्ने स्वीय दुर्दशां स्थितिं गुरुं न्यवेदयत्। गुरू स्वप्ने दर्शनं दत्त्वा व्यासभाष्यस्यावशिष्टानामं-शानामध्यापनं स्वीकृतवान्। फलतः दिवङ्गतगुरोः व्यासभाष्यस्याध्ययनस्य स्वीयेच्छामपूरयत्।[27]

अध्यापनकार्यम्-

1879 ख्रिस्ताब्दे तात्कालीन संस्कृत कॉलेजस्याध्यक्ष डॉ. थीवीमहोदयो साहित्य-दर्शनशास्त्रस्य चाध्यापकपदाय शास्त्रिमहोदयं न्ययोजयत्। अस्मिन्नकाले एव तस्य शास्त्रार्थः प्रसिद्धविद्वान्- पं. गट्टूलाल महोदयेनऽभवत्। यस्मिन् सोऽजयत्। गट्टूलालमहोदयः स्वीय आपाततोऽ-समाधेयसमस्यामकथयत् यस्या अक्षरक्रमेणपूर्त्रिरपेक्ष्यते। तद्यथा- बभौ मयूरो लवशेषसिंहः।

---

26 काशी की पाण्डित्य परम्परा – आ. बलदेव उपाध्यायः, पृ. 238, 239, प्र. सं. 1983

27 का. की पा. परम्परा – आ. बलदेव उपाध्यायृ- पृष्ठ-238

काश्य पण्डितो गंगाधरशास्त्री भारतमार्तण्डमुखेन समस्याया निःसरणस्योत्तराङ्केऽस्याः पूर्तिमकरोत् ।

अनेक-वर्णक्रमरीतियुक्तः

कखागघाङ्च्छजझोञटौठः ।

अडंढणस्तोऽथ दधौ न पम्फुल्,

बभौ मयूरो लवशेषसिंहः ।।[28]

अन्वयः- अथ अनेकवर्णक्रमरीतियुक्त कखागघाङ् अच्छजझः ञटौठः अडण्ढणः लवशेषसिंहः मयूरः बभौ।

संस्कृतभावार्थः -

अथ ग्रीष्मकालानन्तरं वर्षायाम्-अनेकवर्णानां क्रमरीत्यायुक्तः विविधवर्णविभूषितः कखागघाङ्कखेन हासेन अंका वक्रगामिनां सर्पाणाम् अघं भक्षणम् अश्नति आद्रियते इति कखागघाङ्। अच्छजझः-अच्छं शोभनं जातः झः भूषणरूपो यस्य स. ञानां पक्षिणां गायकानां या टं ध्वनिं औठति तिरस्करोति इति ञटौठः। अडण्ढणः अचपलः लवौ न्यूनौ शेषसिंहौ यस्मात् स लेवशेष सिंह मयूरः तं खेदं न दधौ किन्तु पम्फुल सन् प्रसन्नौभूत्वा बभौ ।

शास्त्रार्थः विजयात्परं तस्य प्रतिभया प्रसिद्ध्या चाकृष्ट्य गवर्नमेन्ट संस्कृत कॉलेज, कलकातानगरस्य प्राचार्य म. म. महेशचन्द्र न्यायरत्न सी. आई. ई. महोदयः पं. गंगाधरस्य गृहं गत्वा स्वीय महाविद्यालयेऽध्यापनाय प्रार्थयत्। स अध्यापनकार्याय पञ्चसहस्रमुद्राः दातुमुद्यत आसीत्। परन्तु शास्त्री प्रथमतः पितुराज्ञया द्वितीयतः काशीवासस्य लोभात् चेदं प्रस्तावमस्वीकृतवान् । तद्यथा

---

28 का. की पा. परम्परा – आ. बलदेव उपाध्यायृ- पृष्ठ-237

चत्वारिंशत् मुद्रिकाः मात्रवृत्तिः,

काले तस्मिन् शास्त्रिवर्यः कुटुम्बी।

काशीवासैकाग्राहस्त्यक्तवान् तां,

वृत्तिं चान्यामर्द्धसाहसमुद्राम्।।[29]

कृतिपरिचयः

सन् 1882 ख्रिस्ताब्दे बालशास्त्रिणः कैलासवासात्परं गंगाधरशास्त्री स्वीय द्वितीयगुरोरपि जीवनचरितं गद्यपद्यमयीं संस्कृतवाणीं विलिख्य पण्डितपत्रे प्रकशितवान् । ततश्च डॉ. थीबी महोदयस्याग्रहेण पदमञ्जरीर-सगंगाधर-वाक्यपदीय-तन्त्रवार्तिकादीः[30] दुरुहग्रन्थान् टिप्पण्या परिष्कारेण चालंकृत्य पण्डितपत्रे विजयानगरं संस्कृत सीरीजे च प्रकाशितवान्।

उपाधिः -

महारानी विक्टोरियायाः प्रथम जुबिलीमहोत्सवस्यावसरे दिल्लीस्थ केन्द्रियशासकाः तं महामहोपाध्यायेति पदव्या 1887 ख्रिस्ताब्दे विभूषितवन्तः। उपाधिरियं शास्त्रिमहोदयश्च-तुत्रिंशत् वयसि प्राप्तवान्। काशीनरेशेनापि अनेकानि क्षौमवस्त्राणि परिधानानि च प्रदायशास्त्रिणः सम्मानकृतः। 1903 ख्रिस्ताब्दे लार्ड कर्जन वारणस्यामागच्छत् । लार्डमहोदयस्य सम्मानार्थमायोजिते सम्मेलने स शास्त्रिणं सी. आई. ई. इति पदव्या सुशोभितवान्।

यज्ञानुष्ठानम् -

पं. गंगाधरशास्त्रिणो जीवनकार्यस्यैकाऽपरा दिशाऽस्ति। श्रौतयज्ञानां विधिवद् परम्परया सम्पादनम्। यज्ञस्यास्य सम्यक्सम्पादनेनाकृष्टस्य नेपालनरेशस्य

---

29 का. की पा. परम्परा – आ. बलदेव उपाध्यायृ- पृष्ठ-241

30 का. की पा. परम्परा – आ. बलदेव उपाध्यायृ- पृष्ठ-242, प्र. सं. 1983

राजपण्डित आचार्यशिरोमणिशर्ममहोदयोऽपि सोमधानपुरस्सरत्रेताग्नियज्ञस्य सम्पादनाय शास्त्रिणं प्रार्थयत्। शास्त्रिणास्य यज्ञस्य सम्पादनकृतम्।

शिष्याः -

तस्य शिष्येषु त्रयः विद्वांसः स्वीयविषयस्य महान्तः प्रतिभाशालिन्यः मनीषिण आसन्। म. म. पण्डित रामावतार शर्मा म. म. पण्डित नित्यानन्द पर्वतीयः पंडितः दामोदरलाल गोस्वामी च।

अन्यशिष्येषु

पं. हेमराज शर्मा (नेपालमहायज्ञ राजगुरु) पं बालबोधमित्र, पं. दिवाकरमट्ट, पं. नागेश्वर धर्माधिकारी, पञ्चनदीय पण्डित सुदर्शनाचार्य, महाराजा प्रभुनारायणसिंह, पं. रामचन्द्रशास्त्री काले च प्रमुखाः सन्ति।

स्वीय श्रद्धेयगुरोर्स्तुत्यां पं. रामावतारशर्मणः श्लोकोऽयं सर्वदा श्लाघनीयो भविष्यति-

'गताऽर्थोघ जगन्नाथो नापेक्ष्यतेऽप्पयदीक्षितः।

कटुवाग् वेंकटार्योऽपि, सति गंगाधरे गुरौ।।[31]

4. पण्डित काशीनाथशास्त्री

(कालः 1853 ईशवीयतः 1938 ईशवीयपर्यन्तम्)

जीवनपरिचयः -

त्यागस्य तपस्यायाश्च मूर्त्तेः अन्तर्मुखस्यापि बहिर्मुखस्य पण्डितस्यास्य काशीनाथशास्त्रिमहोदयस्य जन्म बलिया मण्डले 'छाता' नामके एकस्मिन्

---

31 का. की पा. परम्परा – आ. बलदेव उपाध्यायृ- पृष्ठ-245, प्र. सं. 1983

ग्रामेऽभवत्। तत्रैव पाराशरगोत्रीबाह्मणवंशे चित्रधरनामक एक विद्वान् अभवत् । तस्य षट्पुत्रेषु व्याकरणशास्त्रनिपुणस्य ज्येष्ठपुत्रस्य 'रामटहल' पण्डितस्य एक एव पुत्रोऽभवत् यस्य नाम काशीनाथ इति विहितः। बाल्येकाले एव तस्य पिता पञ्चत्वं गतः तस्मात् गृहस्थव्ययभारं तस्य माता सोढ्वा पालनं पोषणञ्च कृतवती।

तस्य पं. हरिनाथशर्म पं. रघुनाथशर्म च द्वौ पुत्रौ आस्ताम्। ययोः हरिनाथशर्मा दर्शनव्याकरणयोः विद्वान् आसीत् । स काश्यामेव एकस्मिन् विद्यालयेऽध्यापनमकरोत्। हिन्दीभाषाया विशेषज्ञ आसीत् हरिनाथशर्मा महोदयः। अस्य द्वितीय पुत्र पं. रघुनाथशर्ममहोदय गवर्नमेण्ट संस्कृतकॉलेजे प्राध्यापक आसीत् यत् सेवानिवृत्तेरनन्तरं स्वीय छाताग्रामे वासमकरोत् ।

अध्ययनकालः -

अष्टवर्षस्यास्य यज्ञोपवीतसंस्कारानन्तर स्वग्रामात् किञ्चित् दूरे स्थिते 'सहतवार' नामकग्रामस्य पाठशालाया गत्वा गुरोः सारस्वतव्याकरणमपठत्। स छाता ग्रामस्य पश्चिमदिशि क्रोशद्वयस्य सुरहनामकं तालस्थ मन्दिरे निवसतः परमेश्वरदत्तमिश्र-नामकादविदुषः सिद्धान्तकौमुदीं मनोरमां परिभाषेन्दुशेखरञ्च अधीतवान्। ततश्च गुरोरादेशात् उच्चशिक्षायै काशीमागत्य अस्सीक्षेत्रेस्थिते गूदडदास अखाडा नामाख्ये स्थलेऽवसत्। अस्यैव अस्सीघट्टस्थ द्वारकाधीशदेवालये निवसतः पं. माधवाचार्यात् सम्पूर्णान् व्याकरणग्रन्थान् अधीतवान् ।

काशीस्थ हनुमद्घट्टस्थ पं. सीतारामशास्त्रिद्राविडमहोदयाद् नव्यन्यायं ब्रह्मानन्दस्वामिनो वेदान्तशास्त्रम्, पं. नित्यानन्दशास्त्रिणः पूर्वमीमांसाञ्च विधिवदधीतवान् ।

अध्यापनकार्यम् -

स काश्यामेव जगतगञ्जनामके स्थाने स्थितेन दर्शनानन्दस्वामिना स्थापितायामेकस्यां पाठशालायामध्यापयत्। ततश्च स दुर्गाकुण्डसमीपे एकस्मिन्नविद्यालये कानिचिद्दिनानि कार्यमकरोत्। काशीनाथः स्वयोग्य छात्रस्य गंगादत्तोपाध्यायस्य विशेषाग्रहेण हरिद्वारसमीपस्थे गुरूकुल कांगडी विद्यालये द्वादशवर्षपर्यन्तम् आर्य समाजीय छात्रान् अध्यापयत् । तदनन्तरं स कांगडीतः रूडकीगमनकाले मार्गे नरदेवशास्त्रिमहोदयस्य विशेषनिवेदनेन स ज्वालापुर महाविद्यालयेऽपि द्वादशवर्षाणि यावत् अध्यापयत्। ततः परं पं. कृष्णानन्दस्वामिन आग्रहेण काश्यामागत्य उदासीन विद्यालयेऽध्यापनम-करोत्। अत्र द्वित्राणि वर्षाण्याध्याप्य अवकाशं स्वीकृत्य काश्यामेव ईश्वरभजनमकरोत् ।

वैशिष्ट्यम् -

काश्यामेव भगवानदासश्रेष्ठिना तस्मै यावज्जीवनं शतं रूप्यकाणि मासिकवृतिं दत्त्वा विश्वनाथमंदिर निकषा कालिकावीथ्यां निवासव्यवस्था कृता। महामनामालवीयमहोदयेन स्वसंस्कृतमहाविद्यालयेऽध्यक्षपदस्वीकाराय प्रार्थना कृता परन्तु वृद्धावस्थावशात् शास्त्रिणा एनं सम्मानः न स्वीकृतः। मालवीयमहोदयः 1931 ख्रिस्ताब्दे गोलमेजसम्मेलनार्थ इग्लैण्डगमनवेलायां शास्त्रिणा परामर्शमकरोद विदेश यात्रायाश्चागत्य किञ्चित् प्रायश्चितमप्य-करोत्। शास्त्रिमहोदयस्य स्वमातृभाषां भोजपुरीं प्रति बहुशोऽनुराग आसीत्।

कृति-परिचयः -

1. **अनुभूतिप्रकाश व्याख्या** - विद्यारण्यस्वामिना उपनिषत्सार-भूतसिद्धान्तानां संग्रहोऽद्वैतवेदान्तस्य विद्वत्सु अत्यन्तसमादारणीये मन्यते। तस्यैवानुभूति-प्रकाशस्य व्याख्या शास्त्रिणा कृता।

2. **महावाक्य रत्नावली व्याख्या** - तैलङ्गस्वामिना विरचितमूलग्रन्थस्य व्याख्या।

3. **चित्सुखी**- इत्याख्यं वेदान्तग्रन्थं सम्पाद्य शोभनं संस्करणं प्रकाशितवान्। यस्मिन् शास्त्रिमहोदयः स्व टिप्पणीमालिखत् ।

4. **पञ्चदशी व्याख्या**- अप्रकाशितोऽयं ग्रन्थः यस्य हस्तलिखितपाण्डुलिपिः काशीस्थ सरस्वतीभवन पुस्तकालये सुरक्षितास्ति।

प्रमुखशिष्याः -

तस्य शिष्या[32] काशी, कांगडी (हरिद्वार) ज्वालापुर महाविद्यालये च सर्वत्र व्याप्ता आसन्। काशीस्था प्रधानशिष्या-राधाप्रसादशास्त्री, पं. रमापति मिश्र, वामदेव पण्डित, पं. नरसिह त्रिपाठी चासन्। कांगडीस्था शिष्या - पं. शालिग्रामशास्त्री (साहित्यदर्पणस्य विमलाटीका हिन्द्या निर्मितवान्) हरिश्चन्द्रः इन्द्रचन्द्रः जयचन्द्र (चन्द्रत्रयी) चापि प्रधानशिष्या आसन्।

ज्वालापुर महाविद्यालयस्य-पं. नरदेवशास्त्री वेदतीर्थ, पं. पद्मसिंह शर्मा (हिन्दीभाषाया विद्वान्-बिहारी सतसई ग्रन्थस्य व्याख्याकार.) बाबाराघवदास, डॉ. सूर्यकान्तशास्त्री च आसन् ।

5. पं. श्रीजयदेवमिश्रः

(कालः 1854 ख्रिस्ताब्दतः 1936 ख्रिस्ताब्दपर्यन्तम्)

जीवनपरिचयः -

स्वनामधन्यो महामहोपाध्यायस्य प्रातः स्मरणीयस्य श्री जयदेव-मिश्रशर्मणः जन्म मिथिलाप्रदेशान्तर्गतगजहराग्रामेऽभवत्। स रूद्राङ्कशशि-सम्मिते 1901 वैक्रमाब्दे कार्तिकशुक्ल-पूर्णिमायां सुप्रतिष्ठते सोदरपुरश्रोत्रिय-मैथिलब्राह्मण-

---

32 काशी की पाण्डित्य परम्परा - आ. बलदेव उपाध्याय पृष्ठ 473-476. प्र.सं. 1983

कुलेऽभवत्[33] तस्य पितृचरणाः चित्रनाथ-शर्माणश्चतुर्षु सोदरेषु ज्येष्ठाः। तेऽपि चत्वारः सोदरा चित्रनाथपोषणभगवान्दत्तगणेशशर्म्माण नानाशास्त्रेषु पण्डिता आसन्। तेषु पोषणशर्मा व्याकरणन्याय (शब्दखण्ड) धर्मशास्त्रादिष्वति निपुणो बृहतकुटुम्बभार-पोषक आसीत्। माता च शचीनाम्नी सर्वगृहकार्येष्वति पट्वी आसीत्। मिश्रमहोदयस्य मातामहः कुलमणिशर्मा मातुलौ च श्रीमणिरत्नमणिशर्माणौ तदानीन्तनमिथिलाधीश-प्रवर्तितपाण्डित्य-परिचायकधौतपरीक्षायां तत्तच्छात्रेषु लब्ध प्रतिष्ठा आसन्।

मिश्रमहाभागः षट्सु सोदरेषु ज्येष्ठः ते च वासुदेव केशवः जनार्दनः मुकुन्दशर्म्मः मधुसूदनश्चेति । मिश्रमहोदयस्य क्रमशस्त्रिस्रो भार्या आसन्। तासु प्रथम सन्ताना नष्टा। द्वितीयाऽप्यचिरेणैव परलोकं गता। तस्या पुत्रद्वयं कन्यारत्नञ्च। कन्यात्वचिरेणैव पञ्चत्वमगच्छत्। तृतीयाभार्याया एकः पुत्र कन्याद्वयञ्चाभूत्।

कर्णमूलकसन्निपातज्वराभिभूतः मिश्रमहोदयो मरणात् प्राक् चत्वारि दिनानि मणिकर्णिकायाश्चक्रपुष्करणीतीर्थगङ्गाप्रवाहयोमध्ये स्थित्या- 'उत्क्षिप्य बाहू त्वसकृद् ब्रवीमि, त्रयीमयेऽस्मिंस्त्रयमेव सारम्। विश्वेशलिङ्ग-म्मणिकर्णिकाम्बु, काशीपुरी सत्यमिदं त्रिसत्यम्।।' इति पद्यमुच्चैर्घाषयन् मध्याह्नवेलायामात्मीयजनानां समक्षं मणिकर्णिकागङ्गप्रवाहे निमग्नार्द्ध-शरीरः 1983 परिमिते वैक्रमाब्दे फाल्गुनशुक्लसप्तम्यां गुरौ विश्वेश्वरसायुज्य-मगच्छत् ।

अध्ययनकालः -

बहुकुटम्बपरिपूर्णेऽस्मिन् कुले तदानीमुचितलौकिककार्यसम्पादनार्थमपि परिपूर्णधनं नासीदतो जयदेवमिश्रः ब्राह्मणोचित सरकारसम्पादनानन्तरमेव स्वग्रामे विद्याव्यवसाय-सकटमनुभूय नवमे वर्षे ग्रामादबहिर्भूत्वा हरिनगरग्रामे तदानीं

---

33 सं. वाङ्मय का वृहद् इतिहास पञ्चदश खण्ड-व्याकरण- आ. बलदेव उपाध्याय पृ. 276 सं.-2001

विद्याविभावसम्पन्नस्य सुप्रसिद्धस्य हलधर (प्रसिद्ध हल्ली) शर्मणः पार्श्वेऽध्ययनार्थमगच्छत्। तत्र वर्षद्वयं यावद् व्याकरणे तन्त्रे कतिपयग्रन्थान-धीतवान् ।

तत्राप्यार्थिकक्लेशं सम्प्राप्य तत्स्थानं परित्यज्य तदानीं सुप्रसिद्धे गन्धवारिनगर सुविख्यात महामहोपाध्याय डॉक्टर श्रीगंगानाथझाशर्मणो मातामह्या पुण्यशीलया श्री वसुमती देव्या संस्थापिते विद्यालये महामहोपाध्याय-श्रीरजेमिश्रशर्मणः सकाशमध्ययनार्थमगच्छत्। तेनैव शब्देन्दुशेखरादिव्याकरण-ग्रन्थानधीत्य स्वालौकिकविद्याकौशलप्रतिभाभिस्त-दानीमेव विदुषां समाजे परां ख्यातिं प्राप्तवान् ।

ततश्च 1933 ख्रिस्ताब्दे श्रीवसुमतीदेव्या सहैव नावा काशीमागत्य तस्या एवं लब्धजीविकः प्रातः स्मरणीयस्य श्रीमतोः बालशास्त्रिणोऽन्तेवासी भूत्वा पूर्वमधीतमपि व्याकरणं समग्रं सम्मार्ज्य शास्त्रान्तराण्यपि समग्राण्यधिगतवान् । तदनु शास्त्रिणोऽनुरोधेनैव कियन्तं कालं यावत् श्रीदामोदरशास्त्रिणः सकाशे द्वितीयगुरुभावेनाधिगतान्येव शास्त्रण्यालोचयत् । तदनन्तरं क्रमशः सर्वतन्त्रस्वतन्त्रेण प्रातः स्मरणीयेन श्रीमता शिवकुमारशर्मणा सह शास्त्रतत्त्वालोचने विशेषेण मिश्रमहोदयस्य घनिष्ठता अभवत्। श्रीमतः शास्त्रिमहाशयस्यालौकिकवैदग्ध्येनाकृष्टो जयदेवस्तृतीयगुरू स्वरूपरूपेणेतं स्वीकृत्य क्रमशोऽधीत्याप्यखिलानि शास्त्राणि पौनः पुन्येन विशिष्टतर्कवितर्कद्वारा एतेन सह सम्यगालोवचितवान् ।

प्रत्यहमुभावपि गुरुशिष्यौ सांयकाले काशीनगराद् बहिः 'बडी गैवी' तिनामकं प्रसिद्धकूपपर्य्यन्तं गत्वा जनासंकीर्णप्रदेशे शास्त्रण्यालोचितवन्तौ । मार्गेऽपेतियोः शास्त्रविचारः प्रचलित एवासीत्। ततश्च बहिर्गमनं परित्यज्य शास्त्रिणो वासस्थलमेवेतयोः शास्त्रसम्मेलनं भवतिस्म। इत्थं कतिपयवर्षपर्य्यन्तं तयोमिर्थः शास्त्रतत्त्वेषु गूढार्थालोचनानि निरवच्छिन्ननि प्रचलितानि। एतादृशं किमपि शास्त्रतत्त्वं नासीत् यदधिकृत्योभयोर्विचारों न प्रवर्तितः। एषु तर्केषु

पूर्वाचार्यैरनधिगतानि शास्त्रमर्माणि समुद्भूतानि। एतानि सर्वाणि जयदेव मिश्रेण स्वीयां टीकायां तत्तत्स्थलेषु सुस्पष्टं प्रतिपादितानि।

अत्रान्तरे जयदेवशर्मणः वेदान्तशास्त्रनिष्णातेन परमहंसपरिव्राज-काचार्येण श्री विशुद्धानन्दसरस्वती महानुभावेन सह परिचयो जातः। अयम् समये समये वेदान्तयोगदर्शनादी-नामालोचनार्थ स्वामिवराणां सकाशं गच्छतिस्म।

अध्यापनकार्यम् -

युवावस्थायामेव काशीस्थ विद्वज्जनमण्डलेषु प्राप्तवैदुष्यप्रतिष्ठाः मिश्रमहोदयः स्वामिवरा-णामनुरोधेनैव श्री शिवकुमारमिश्र श्रीरामकृष्ण (प्रसिद्ध तात्याशास्त्रि) श्रीसुधाकरद्विवेदी श्रीदुःखभञ्जनकविभिः पण्डितरत्नैः सह दरभंगापाठशालायाम् व्याकरणपदं 1974 वि.स. मितवर्षपर्य्यन्तं सुशोभितवान्।

विद्यालयेऽस्मिन्नध्यापनेन सह छात्राणां सुखबोधाय 1971 मिते वर्षे परिभाषेन्दुशेखरस्य विजया नाम्नीं टीकां व्यरचत् तदनन्तरं काशीस्थहिन्दु-विश्वविद्यालयाध्यक्षः प्राच्यविद्याविभागे प्रधानाध्यापकपदे मिश्रमहोदयं सादरमाहूय नियुक्तवान्। तदारभ्याजीवं तदेव पदं तैनालंकृत-मासीत्।

कृतिपरिचयः

1. **विजयानाम्नी** परिभाषेन्दुशेखरस्य टीका 1971 तमे वर्षे व्यरचयत्।
2. सं 1976 मिते वर्षे शास्त्रार्थरत्नावलीनामकः सपरिष्करः पाणिनीयसूत्रार्थरूपो ग्रन्थः विरचितः। अत्र ग्रन्थे सपरिष्कारः शास्त्रार्थकोटिपरम्परया लौकिक शास्त्रमहिम्न दर्शनं भवति। अत्रैव गुरुपरम्परागता सपरिष्कारा शास्त्रार्थकोटिप्रणाली परा काष्ठां प्राप्य विश्वेश्वर सायुज्यमलभत्।

3. अन्तिमावस्थायां पण्डितमण्डलेन प्रेरितो जयदेवमिश्र 1982 मिते वर्षे व्युत्पत्तिवादस्य जयानाम्नी टीका रचयितुं प्रारभत् किन्तु सर्वेषां शास्त्र-रसिकानां दौर्भाग्येण प्रथमाविवरणे भेदान्वयविचारे प्रत्ययत्वाद्यनुपस्थिति-दशायाम् इतिग्रन्थपर्यन्तां टीका विरच्यैव कर्णमूलकसन्निपातज्वराभि-भूतोऽभवत्। तत्रापि ज्वरप्रलापेषु शास्त्रीयाण्येव वाक्यान्यवदत् ।

तन्निर्मिता अन्ये च ग्रन्थाः -

1. शब्देन्दुशेखरस्य टीका अपर्णा,
2. महाविनायकस्थापनपद्धतिः
3. वास्तुपद्धतिः
4. शतचण्डीविधानपद्धतिः,
5. कुलदेवतास्थापनपद्धतिः
8. नीलवृषोत्सर्गपद्धतिः
7. तुलादानपद्धतिः
8. धर्मशास्त्रविषयका निबन्धाश्च

सम्मानम् -

इत्थं प्रायः षट्चत्वारिंशद्वर्षाणि नानाशास्त्राण्यध्यापयतां सहस्रशश्छा-त्रान् पाण्डित्यपदवीं प्रापयतां लोकोत्तरकीर्ति वैदुष्यमहिमानं च दृष्ट्वा भारतसम्राट् 1916 मिते ईशवीये एभ्यो महामहोपाध्यायपदवीं दत्तवान्। मिश्रचरणानां गणितशास्त्रवर्ज सर्वेष्वपि शास्त्रेषु पूर्णतयाऽधिपत्यमासीदिति।

वैशिष्टयम्

सनातनधर्म्मिणां कृतेऽपि जयदेवशर्मा आदर्श आसीत्। षट्चत्वारिंशद् वर्षाणि यावन्नित्यं ब्राह्मे मुहूर्त समुत्थाय नित्यक्रियादिभ्योः निवृत्य मणिकर्णिकागङ्गाप्रवाहे

कृतावगाहाः विश्वनाथादिदेवतादीनामर्चा विधाय सूर्योदयात्पूर्वमेव सहस्रसंख्यकगायत्रीं जपित्वा विद्यालयं गच्छन्तिस्म ।

सायङ्कृत्य विधाय गुरोरन्तिकं गत्वा तैः सहैव शास्त्राण्यालोच्य प्रहरानन्तरं गृहं समागत्य पुनः तत्रैकत्रीभूतान् विशिष्टछात्रान् आत्मीयान् एकादशवादन-पर्यन्तमध्यापयन् रात्रिभोजना-नन्तरं विश्रामागारं गच्छतिस्म।

मिश्रमहोदयस्य प्रधानतमछात्रेण श्री गंगानाथझाशर्मणा लिखितमित्थं प्रकारेणशून्यमधुना पण्डितमण्डलम्भारते. शास्त्रार्थचर्चा त्वस्तप्रायेव। शोकसन्त-मेनाधिकं वर्णयितुं न पार्यते। समाश्वासनस्थानमेतावदेवयदधिकक्लेशं विनैव पठनपाठनादिकार्य कुर्वाणा एवं यथा सर्वत्र जीवने प्रौढ़ा आसंस्तथैवामरणा-तन्निरवाहयन्। ज्वराक्रान्तदिनपर्यन्तं व्युत्पत्तिवाद-टीकारच-नायां लग्ना आसन्। अत एवोक्तम्-

'जयः कुले जयोऽभ्यासे जयः पण्डितमण्डले।

जयो मृत्यौ जायौ मोक्षे जयदेवः सदा जयः ।।"

6. म. म. शशिनाथ झा

(काल 1869 ख्रिस्ताब्दत. 1931 ख्रिस्ताब्दपर्यन्तम्)

जीवनपरिचयः -

शशिनाथो नामका अनेके मैथिलमनीषिणोऽभूत्। तेषु द्वौ समसामयिकौ ग्रन्थनिर्मातारौ परमप्रसिद्धो आस्ताम्। तयोरेकः वैयाकरणोऽपरश्च नैयायिकः गूढार्थतत्वावलोकव्याख्याता- शशिनाथनिबन्धावलीप्रभृतिग्रन्थनिर्माता आसीत्।

सरला टीकाकारस्य वैयाकरणशिरोमणेः शशिनाथ झाशर्मणः[34] जन्म 1856 ख्रिस्ताब्दे वर्षे मिथिलान्तर्गतचनौरग्रामेऽभवत्। 72 वयसि अवस्थाया 1931 ख्रिस्ताब्दे वर्षे इहलोकलीला समाप्य परलोकं गतवान् ।

अध्ययनकालः -

बाल्यकालात् प्रतिभासासम्पन्नोऽयं काश्या म.म. बालशास्त्रिणं चरणसेवा विधाय पाण्डित्यमवाप्तवान्।

अध्यापनकार्यम् -

व्याकरणस्याखिलान् ग्रन्थान् समधित्य कानपुरनगरे 30 वर्ष यावदध्यापनं कुर्वन् प्रशस्तं यशः प्राप्तवान्। ततश्च 10 वर्ष यावद् मुजफ्फरपुरे धर्मसमाजसंस्कृत-महाविद्यालयेऽ-ध्यापनमकरोत् ।

विशेषः -

अयं हि स्वकीयमधिकं समय पूजायामध्यापने च यापयति स्म। श्रूयते यदयं महाभाष्यस्यानुशीलनेऽद्वितीय आसीत् । शास्त्रार्थावसरेऽयं विपक्षिणां निखिल-परिष्कारान् वा विचारान् भाष्यविरोधमुपस्थाप्यैव खण्डयति स्म।

कृतिपरिचयः -

1. एतत्कृता महाभाष्यटीका आसीदित्यपि श्रूयते। किन्तु इदानीं दृष्टिपथं नागता। 2. अनेन प्रणीता 'विभक्त्यर्थप्रकाशिका' अपि विद्यते। 3. परमलघुमञ्जूषायाः 'सरला' संस्कृत टीका।

सरलाया वैशिष्ट्यम् -

ग्रन्थेऽस्मिन् व्याकरणशास्त्रीयाः पदार्थाः, दार्शनिकविचाराः, सिद्धान्ताश्च नैयायिकमीमांसकादिमतनिराकरणपुरस्सरं वर्णिताः। यथा 1 शाब्दबोधः कीदृशः कथं च भवति, 2. शब्दे कीदृशी शक्तिः 3. शब्दस्य कीदृशं रूपम् 4. धातोरर्थः कीदृशः, 5

---

34 भूमिका, वैया. सि. परमलघुमञ्जूषा श्रीरामचन्द्र मिश्र, प्र.सं. 1982. का. सिं. द.सं. वि. वि.

सुबर्थनामार्थनिपातार्थाः कीदृशाः, 6. समासादिषु वृत्तिषु कीदृशी शक्तिः 7. शब्दो नित्याऽनित्यो वेत्यादयः। टीकेयं झाशर्मकृता मूलार्थालापिनी नूतनविवेचनाशालिनी संक्षिप्ता छात्रोपयोगिनी चास्ति।

7. वसन्त त्रयम्बक-शेवडेमहाशयः

(कालः- 1859 ख्रिस्ताब्दत 1941 ख्रिस्ताब्दपर्यन्तम्)

जीवनपरिचयः -

महाराष्ट्रवर्तिविदर्भामिञ्जनस्य विंशशतकस्य महाकवेः पण्डितमूर्धन्यस्य वसन्तत्रयम्बक-शेवडेमहाशयस्य वैयाकरणेषु विशिष्टं स्थानमस्ति। पण्डिवरोऽ-यमतीते संवत्सरे दि. 5.5. 1999 मिते दिवसे द्वयाशीतितमे वयसि वारणस्यां विश्वनाथसायुज्यं प्राप्तः।[35]

अध्ययनकालः -

महोदयोऽयमाधुनिकशिक्षापरिपाटीमाश्रित्य पुरा एम. ए. उपाधिं समर्जितवान्, ततश्शास्त्राध्ययने निरन्तरं नितरेनानेन ग्रन्थकृता विधातपोमयं सर्वं जीवनं सकलमोहान् परित्यज्यादौ नागपुरेऽन्ते च वाराणस्यां यापितम् ।

कृतिपरिचयः -

स व्याकरणं न्याय साहित्यञ्च विषयमधिकृत्य ग्रन्थान् विरचितवान्। तस्य ग्रन्थद्वयं सबहुमानं निर्देशमर्हति। अस्य प्रथमोग्रन्थोनाम शेषकृष्णविरचितस्य स्फोटतत्त्वनिरूपणस्य 'तत्त्वप्रकाशिका' टीकारूपोऽस्ति । वैयाकरणमूर्धन्येन भट्टोजीदीक्षितगुरुणा शेषकृष्णेन दुरूहं स्फोटतत्त्वं निरूपयितुं कतिपयकारिकारूपोऽयं स्फोटतत्त्वनिरूपणम् नामाख्यो लघुप्रकरणरूपो ग्रन्थः (19 कारिकामितः) विरचितः।

---

35 वसंतत्र्यम्बक शेवडे, 1993 स्फोटतत्वनिरूपणे तस्वप्रकाशिका टीका, चौखम्बा सुरभारती प्रकाशन, वाराणसी।

पण्डितवरश्रीशेवडेमहोदयस्य विरचिताया टीकाया अयं विशेषो यत् शास्त्रीय ग्रन्थाध्ययने प्रवृत्तस्य नवीनाधीतिनो बुद्धिमर्यादा मनसिकृत्य तदीयानि शंकास्थानानि चिन्तयित्वा सरलसुबोधया परं शास्त्रग्रन्थोचितया साधु संस्कृतभाषया ग्रन्थकृता विहितं विवरणं तत्र वर्तते।[36]

अस्यैवग्रन्थकर्तुः द्वितीयोग्रन्थः नाम न्यायकुसुमाञ्जलितत्त्वप्रकाशिकाटीका-ऽस्ति। न्यायकुसुमाञ्जलिः खलु नैयायिकप्रवराणाम् उदयनाचार्याणां निरीश्वरवादिनां पञ्चधा विभक्तानां सकलविप्रपत्तीनां खण्डने, ईश्वरवादस्य तर्कद्वारा मण्डने दीपस्तम्भायमानो ग्रन्थ।

विशेषः -

ज्ञाननगर्या वाराणस्यां शास्त्रविधाव्यसनरसिकेषु तलस्पर्शिषु विद्वत्सु व्याकरणशास्त्रे न्यायशास्त्रे च नदीज्य इति तत्पदं गणनीयं समभवम्। अपरकालिदास विद्वन्मूर्धन्य इति पदाभ्यां समानितस्यास्य पण्डितवरस्य काव्यग्रन्थद्वयं महाराष्ट्रे अलाब्धमुद्रणं संस्कृतप्रकाशने विश्रुतकीर्तिना चौखम्बासुरभारती प्रकाशनेन वाराणसीस्थानेन सादरं प्रकाशितम् ।

8. वासुदेव शास्त्री अभ्यङ्करः

(कालः- 4.8. 1863 तः ख्रिस्ताब्दतः 1942 ख्रिस्ताब्दपर्यन्तम्)

जीवनपरिचयः

वासुदेवमहोदयस्य प्रपितामहस्तु काशीनाथभट्ट आसीत्, पितामहस्तु भास्करशास्त्री आसीत् य परिभाषेन्दुशेखरस्य लघुशब्देन्दुशेखरस्य च टीके अलिखत्।[37] तस्य पितुर्नाम महादेवम भट्ट आसीत्। तस्य जन्म सतारामण्डलस्य झाला इत्याख्ये

---

36 महाराष्ट्र राज्यगतं दार्शनिक संस्कृतालेखनम् के आर जोशी, संस्कृत राइटिंग इन इन्डि इण्डिया ग्रन्थे, पृ. 36

37 काशीनाथ शास्त्री अभ्यकर व्याकरण महाभाष्य भूमिका पृ. 28

ग्रामे 4 अगस्त 1863 ख्रिस्ताब्देऽभवत्। तस्य पिता बाल्यकाले एवं देवलोकमगच्छत् तस्मात् तस्य पालनं मातुलस्य दुर्गाकाकू महोदयस्य गृहेऽभवत्। तस्य पूर्वपुरुषा मूलतः रत्नागिरि मण्डलस्य कोकणस्थीया आसन्। झालाग्रामतः 1910 ख्रिस्ताब्दे पुणे नगरं समागत्य (50) पञ्चाशत्वर्षपर्यन्तं संस्कृत सेवामकरोत्। तस्य मृत्युः 1942 ख्रिस्ताब्दे अभवत्।

अध्ययनकालः -

रामशास्त्रिगोडविलमहोदयाद् व्याकरणशास्त्रमपठत् ततश्च मीमासां वेदान्तधर्मशास्त्रञ्चापठत् ।

अध्यापनकार्यम् -

स परम्परापद्धतिमनुसृत्य नैकान् छात्रान् अध्यापयत्। तेषु नारायणशास्त्री प्रमुख आसीत् ।

कृतिपरिचयः -

स परिभाषेन्दुशेखरस्य तत्त्वादर्शः नामिका टीकाम् 1889 ख्रिस्ताब्दे लिखत्। ततश्च लघुशब्देन्दुशेखरस्य 'गूढार्थप्रकाश' नामिका टीकामलिखत्। व्याकरण-महाभाष्यग्रन्थस्य मराठी भाषायामनुवादमकरोद् यस्य एकतः षट्पर्यन्तभागः 1928 शकवर्षे, डेक्कन एजुकेशन सोसायटी पुणेतः प्रकाशनमभवत्। वासुदेव शास्त्री 1930 ख्रिस्ताब्दे महाभाष्यलेखनं प्रारम्भं कृत्वा 1948 **ख्रिस्ताब्दे** पूर्णामकरोत्। अस्मिन् कार्ये तस्य पुत्रेण म.म.प. काशीनाथशास्त्रिमहोदयेन ग्रन्थस्यास्य सप्तम प्रस्तावना-खण्डं विलिख्य त्रिमुनिव्याकरणस्य समीक्षामकरोत् ।[38]

---

[38] स. वाङ्मय का वृहद् इतिहास -पञ्चदशखण्ड-व्याकरण, आ. बलदेव उपाध्याय. पृ. 299, 2001

9. मैथिलो मधुसूदनः महोदयः

(कालः- 1866 ख्रिस्ताब्दतः 1940 ख्रिस्ताब्दपर्यन्तम्)

जीवनपरिचयः -

एष महाभागो बिहारराज्यान्तर्गत-मुजफ्फरपुरान्तर्वर्तिनि गाढा' नामके ग्रामे पं. वैद्यनाथ ओझाया गृहे कृष्णजन्माष्टमी-दिवसे 1923 तमे वैक्रमाब्दे जन्म लेभे।[39]

विविधविद्यापारङ्गतस्यास्य महाशयस्य जयपुरे एवं पं. चञ्चल झा महोदयस्य कन्यया सह विवाहो समजायत । षष्टिवर्षेभ्योऽधिकं सस्कृतभाषायाः सुमहती सेवा विधाय, सातत्येन वेदव्याख्यानि ग्रन्थलेखनादि कार्यञ्च कृत्वा महोदयोऽयं दिनत्रयं रुजमनुभूय भाद्रपदपूर्णिमाया 1997 तमे वैक्रमाब्दे (1940 ख्रिस्ताब्दे) परलोकमगच्छत् । तदनन्तरमेतेषामात्मजः पं. प्रद्युम्न झा महाशयः एतल्लिखितानां ग्रन्थानां प्रकाशनादिकार्यमनुष्ठितवान् । सोऽपि साम्प्रतं स्वर्गगतः।[40]

मधुसूदनमहोदयस्य धर्मपत्नी 36 वर्षस्याल्पावस्थायामेव एकं पुत्ररत्न प्रद्युम्न ओझा दत्वा पञ्चत्वङ्गता ।

अध्ययनकालः

महानुभावोऽयं प्रारभिकीं शिक्षां तु विहारराज्ये एव समधिगतवान् परं नववर्षात्मिकायामेवावस्थायामेषो बालकः स्वकीयेन निःसन्तानेन ज्येष्ठपितृव्येण राजीवलोचनझामहोदयेन जयपुरनगरे समानीत, यत्र खलु झा महोदय. अत्रत्यैः राजभिः शासकै वा समादृतः सन् न्यवसत्। पितृव्यस्य निधनान्तरं मधुसूदनो वाराणसीमागच्छत् । तत्र चायं दरभङ्गानरेशस्य संस्कृतपाठशालाया म. म.

---

39 का की पा परम्परा - आ. बलदेव उपाध्याय, पृ. 245 प्र.सं. 1983

40 सुधीजनवृत्तम्- कलानाथशास्त्री, रचना प्रका. जयपुर 18. 2002

शिवकुमारशास्त्रिसकाशान्न केवल वेदान्निपितु व्याकरण-दर्शन-साहित्यादिविषयान्नपि समग्रतया अधीतवान्। शतपथ-ब्राह्मणादिग्रन्थानामपि स्वाध्यामकरोत्।

अध्यापनकार्यम् -

महोदयोऽयं यदा काशीतः जयपुरं समागच्छात् तदा जयपुरीयाः शासका अत्रत्या जनाश्च सत्वरमेव तदीयेन पाण्डित्येन प्रभाविता समजायन्तः। सर्वप्रथमं त्वेष विपश्चिदवरी जयपुरस्य महाराजाकोलेजाख्यै, महाविद्यालये महाराज-संस्कृत महाविद्यालये च दर्शनादिविषयाणा-मध्यापनाय प्राध्यापक-त्वमङ्गीकृतवान्। ततस्थ तदानीन्तेन जयपुराधिपतिना श्रीमाधवसिंहेन स्वकीयस्य पोथीखाना इत्याख्यास्य पुस्तकालयस्य प्रबन्धकत्वमस्मै समर्पितम्।

विशेषः -

कालान्तरे जयपुरे एवं मौज-मन्दिर-वैदिकविज्ञानं भारतीयदर्शनं चाधिकृत्य विभिन्नेषु प्रदेशेष्वस्य भाषणानि अभवन्, येन स प्रभूता लोकप्रसिद्धिमप्यर्जयामास । ईशवीये 1902 तमे वत्सरे यदा जयपुराधिपति-र्माधवसिंहो भारतसम्राट्सप्तम-एडवर्ट इत्यस्याग्लशासकस्याभिषेक समारोहेप्रसंगे लन्दननगर प्रतस्थे, तदा सः पण्डित मधुसूदनमपि तत्र निनाय। तत्र च झा महोदयस्य विविधानि भाषणानि वैदिकविज्ञान-भारतीयधर्मादिविषयेषु समायोजितानि। एतानि भाषणानि संश्रुत्य तत्रस्था विपश्चितः सर्वथैव नतमतस्काः अजायन्त। वेदधर्मव्याख्यान मिति शीर्षकेण भाषणानीमानि जयपुरात् प्रकाशितानि ।

यदा मधुसूदनमहाभागः महाराजकॉलेजाख्ये स महाविद्यालये संस्कृतप्राध्यापकपदे नियुक्त आसन् तदा महाविद्यालयस्याध्यक्षः प्रो. हरिदासशास्त्रिमहोदयैः श्रीलंकादेशात् कुमारदासलिखितस्य जानकीहरण-नाम्नी महाकाव्यस्य कापि पाण्डुलिपिः समवाप्ता। श्रूयते यत् मधुसूदनमहोदयेन

काव्यस्याखिलं संशोधनादिकार्य सपरिश्रमं विहितम्। परं तस्य प्रकाशनं हरिदासशास्त्रिणो नाम्ना समजायतेति।

सम्मानोपाधयः -

मधुसूदनझामहोदयाः भारतधर्ममण्डलेन 'विद्यावाचस्पतिः' 'महामहोपदेशकश्च' आभ्यां उपाधिभ्यां विभूषिताः। एतेषां वैदिकविज्ञानाश्रितै-व्याख्यानैः प्रभावितेर्विद्वन्मण्डलैर्मधुसूदनझा-महोदयेभ्यः 'समीक्षाचक्रवति'[41] 'व्याख्यानवाचस्पति" चेत्यादय उपाधयः प्रदत्ताः।

स्मरणीयम् -

यथा मैथिलमहाभागा सप्ततितमे वर्षे पदं निदधु तदैतेषां हीरकजयन्ती जयपुरे ईशवीये 1937 ख्रिस्ताब्देऽखिलभारतीय संस्कृतसाहित्य सम्मेलनस्य तत्त्वावधाने समायोजिता। अस्मिन्नवसरे संस्कृत रत्नाकरस्य वेदाङ्कः एतेभ्योऽभिनन्दनग्रन्थरूपेण समर्पितः।

लन्दननगरात्-समागत्यानेन वैदिककोष इत्याख्यो ग्रन्थोऽपि विरचितः।[42] ततश्च महोदयोऽयं कतिपयान् महनीयग्रन्थान् व्यरचयत्। एषु इन्दविजय, कादम्बिनी, अहोरात्रवाद, महर्षि-कुलवैभवम, आशीचपञ्चिका, पथ्यास्वस्ति, वस्तुसमीक्षा च विशिष्टाः सन्ति। स श्रीमद्भगवद्गीताया विज्ञानवादानुसार विज्ञानभाष्य नामक ग्रन्थमप्यरचत्। अनेन विरचिता कतिपया प्रमुखा ग्रन्थाः

1. बह्मविज्ञानम् (विज्ञान शास्त्रमधिकृत्य विरचितः ग्रन्थः।) सप्तधा विभक्त तेन।
2. यज्ञविज्ञानम्-यज्ञविज्ञानं चतुर्षु भागेषु विभक्तम्।

---

41 सुधीजनवृत्तम कलानाथशास्त्री, रचना प्रका जयपुर पृ. 21, 2002

42 सुधीजनवृत्तम् कलानाथशास्त्री रचना प्रका जयपुर पृष्ठ 20, 2002

3. इतिहासः (अपरनाम पुराणसमीक्षाविभागो) अस्य त्रय विभागाः सन्ति।

4. वेदाङ्गसमीक्षा विभागे ऽस्मिन् चत्वारो विभागाः सन्ति वाक्पदिका, ज्योतिश्चक्रधर, आत्मसंस्कारकल्पः परिशिष्टानुग्रहश्च ।

वाक्पदिकनामके विभागे पञ्चग्रन्थाः सन्ति-वर्णसमीक्षा, छन्दः समीक्षा, वैदिककोश, वैदिकशब्दतालिका व्याकरणविनोदश्च तत्र वर्णसमीक्षाया वर्णमालाया उत्पत्तेर्वेज्ञानिकं रहस्यं, स्वरभक्तिः विवृतिः, यमः, नियमः, चेत्यादय विषया वर्णिताः। व्याकरणविनोदे व्याकरणाशास्त्रपाठनस्य नूतनशैल्या निरूपणमस्ति ।

5. आगमरहस्यम् आगमरहस्येऽपि षट् महाविभागाः सन्ति।

मधुसूदन-ओझा-महोदयस्य वाक्तत्त्वस्य विवेचनम् -

आ. ब्रह्मसमन्वये वाक्तत्त्वस्य निरूपणम्- ग्रन्थोऽयं मधुसूदन ओझाकृतस्य ब्रह्मविज्ञानविभागस्य षष्ठभागे विज्ञानमधुसूदने परिगणितोऽस्ति। विज्ञानमधुसूदनस्य पञ्चसु ग्रन्थेष्वयमन्यतमो विद्यते। ग्रन्थेऽस्मिन् अष्टावनुवाकाः सन्ति। सर्वेष्वेवानुवाकेष्वनेन वाक्तत्त्वविषयमवलम्ब्य न्यूनाधिक्येन लिखितमस्ति। अत्रानुवाक क्रमत्वेनैव वाक्तत्वविषयक तदीयश्चिन्तन वर्ण्यते। अनुवाकानां नामानि क्रमेणेत्थं प्रकारेण सन्ति-

निर्देशेषानुवाकः परात्परानुवाकः अव्ययानुवाकः, अक्षरानुवाकः, ब्रह्मसमन्वयस्याक्षरानुवाकः क्षरानुवाक प्रजापत्यनुवाकः सृष्ट्यनुवाकश्चेति।

आ. अथप्रणवविज्ञानानुवाकः- प्रणवविज्ञानुवाकेऽस्मिन् विभिन्नाभिः उपनिषदिद्भः गीतया च प्रतिपादित प्रणवमाहात्म्यमनेन वर्णितम्। ओझा महोदयेन कथित यद् शब्दब्रह्म परबह्म अपरब्रह्म प्रतिपादक ओंकारः। प्रथममोझामहोदयेन वाङ्मयं वाग्ब्रह्म द्विविधमिति कथितम्-यथा-

वाच्यर्पितानि विश्वानि भुवनानीति चक्षते।

वाग्ब्रह्मा तदिदं द्वेधा शाब्दमार्थ च वाङ्मयम् ।।

वाक्प्राणमनोमयमक्षरं ब्रह्म-ओकारः इति वर्णयता लिखितम् -

ओमुच्यते योध्वनिरत्रसावाक् प्राणः स्वरो यत्वथ बुध्यतेऽस्मात् ।

अर्थप्रतीत्यै पठितात्मनस्तत् तदक्षरं त्रिक्षरतस्त्रिधातु ।।

अर्थात् -

ध्वनिः - वाक्

स्वरः - प्राणः

बोधः - मनश्चेति ।

अयमात्मा मनोमयः प्राणमयो वाङ्मयोस्ति। अत मनोमयः प्राणमयो वाङ्मय एवास्य परिग्रहः वाक्प्राणमनोमयत्वात् एव सर्वेषामपर ब्रह्मणानोपम इति वर्णन तत्र लिखितम् ओझा महोदयेन-

अकारतो मनः प्राणः उकाराद् वाग् मकारतः।

संकेत्यते तु सादृश्यं प्रतिपत्या वषट्कृतौ।।

मनः प्राणवाङ्मय आत्मा ओम् -

अ - मनः

उ - प्राणः

म् - वाग्

अग्रे लिखितं यद् अनेन प्रणयेन सः ओंकार मनः प्राणवाङ्मयोऽस्तिक्षर आत्मा सृष्टिरभिव्यानादुपास्यते ।

2. विज्ञानविद्युति वाक्तत्त्वस्य निरुपणम् -

विज्ञानविद्युद् ग्रन्थोऽयं मधुसूदन-ओझा-महोदयस्य वैज्ञानिको ग्रन्थो वर्तते। ग्रन्धेऽस्मिन् यद्यपि वाक्तत्वस्य वर्णनं न्यूनमेव प्राप्यते, किन्तु यत्किञ्चित्प्राप्यते तदत्यन्तं वैज्ञानिकमस्ति । प्रप्रथमं वाग्ब्रह्ममयः सूर्यः इन्द्रः अक्षरः इत्यस्य वर्णनङ्कृतम् ।

3. पथ्यास्वस्त्यां वाक्तत्त्वस्य निरूपणम् -

अत्र कोऽपि सन्देहो नास्ति यद् ब्राह्मणग्रन्थेषु वागेव पथ्यास्वस्तिः इति नाम्ना श्रूयते। यद्यपि शतपथब्राह्मणानुसारं वाग् इदं नाम कस्यचिद् निदानाधारं गृह्णाति ।

इत्थं पथ्यास्वस्ति' सम्पूर्णग्रन्थं एव वाग्विषयमवलम्ब्य लिखितः। अतः ग्रन्थोऽयं मधुसूदनमहाभागस्य वाग्विषयक वर्णनयुतोऽस्ति । पथ्यास्वस्त्याम्पञ्च प्रपाठारसन्ति, 1 मातृकापरिष्कारः 2. यमपरिष्कार 3. गुणपरिष्कार 4. अक्षरानिर्देशः 5. सन्धिपरिष्कारश्च ।

10. पण्डित देवनारायण त्रिपाठी 'तिवारी'

प्रसिद्धनाम पं. हरिनारायण तिवारी

(कालः 1866 ख्रिस्ताब्दतः 1941 ख्रिस्ताब्दपर्यन्तम्)

जीवन-परिचयः

पण्डित देवनारायणत्रिपाठीमहोदयः पण्डितमण्डल्यां 'तिवारी जी' इति नाम्ना सुविख्यात आसीत्। बिहारप्रदेशस्य श्राद्धकर्मणि प्रधानतीर्थस्थ-लत्वेन प्रसिद्धस्य गयामण्डलस्य समीपे 'पुनपुन' नद्यास्तटे स्थिते एकस्मिन्नग्रामे 1866 ख्रिस्ताब्दे (वि.स. 1923) वर्षे तस्य जन्म अभवत्। तस्य पितुर्नाम रामचरण त्रिपाठी आसीत् यः

सरयूपारीण ब्राह्मण आसीत्। पित्रा नियमतः जन्मकालात् द्वादशेदिवसेऽस्य नाम देवनारायण इति विहितम्। केचन जना एनम् हरिनारायण नाम्नाऽपि जानन्ति। सन् 1941 ईश्वीये पण्डितदेवनारायणत्रिपाठिमहाभागः गंगायाः क्रोडे पञ्चत्वं गतः । निःसन्तानस्य तस्य दाहसरकारश्राद्धादीनि कार्याणि प्रियशिष्येण प. सभापति शर्मोपाध्यायेन महत्ताऽनुरागेण निष्ठया च सम्पादितानि ।

अध्ययनकालः

स स्वप्रतिभया पं. विश्वेश्वरदत्तमहोदयस्यध्यानमाकर्षयत् यः टेकारीस्थले राजगरूरासीत्। तेन स व्याकरणशास्त्रस्य विधिवदध्ययनम् कृत्वा भाष्यान्तव्याकरणे व्युत्पतिं प्राप्तवान्। ततश्च काशीमागत्य मम पं. शिवकुमारशास्त्रिमहोदयस्य प. दामोदरशास्त्रिमहोदयस्य चरणेषु व्याकरणशास्त्रस्य प्रगाढमध्ययनमकरोत्। नूतन परिष्कारानाविष्कृत्य सः काश्याः विद्वन्मण्डलीम् आश्चर्यचकितामकरोत। अनेकपण्डितानामाग्रहवशादयं काशीतः व्याकरणाचार्यपरीक्षा सम्मानमुत्तीर्णवान्। अयं तस्मिन् वर्षे उत्तर्णेषु वैयाकरणछात्रेषु प्रथम स्थानमवाप्तवान्।

अध्यापनकार्यम् -

गुरोर्नानकदेवस्य पुत्रः श्रीचन्द्रमहोदय उदासीनसम्प्रदाय प्रवर्तितवान्। तस्यैव पाठशाला आसीत् श्रीचन्द पाठशाला। तस्यामेव स अध्यापनकार्यं प्रारब्धवान्। स अध्ययने यथा निपुणो आसीत् तावदध्यापनेऽपि। तस्मात तस्य कीर्तिः काश्यां बहुश. विस्तृता। स नूतनपण्डितेश्वग्रगण्य आसीत्। महामना पं. मदनमोहनमालवीयेन काशीहिन्दुविश्वविद्यालयस्य संस्कृतमहाविद्यालये 1919 ख्रिस्ताब्दे नियोजितः परन्तु षड्माषानन्तरम् एवं सस्कृत कॉलेजाख्याध्यक्षेण डॉ. गंगानाथ झा महोदयेन 1920 ख्रिस्ताब्दे गवर्नमेन्ट सस्कृतकॉलेजे व्याकरणपदे नियोजितः। स 1920 ईशवीयतः अष्टादशवर्षपर्यन्तं (1938) तत्रैव सेवामकरोत् ।

अध्यापनवैशिष्ट्यम् -

अध्यापकरूपेण तस्येदृशी ख्यातिरासीत् यत् तस्य गृहे छात्राणं सम्मर्द एवं दृश्यतेस्म। तस्याध्यापशैली अतीव विचित्रा आसीत्। स व्याकरणशास्त्रस्य मूर्धन्यग्रन्थानामीदृशं मननमकरोत, यत् सर्वाण्यपि शास्त्राणि तस्य जिह्वाग्रे विद्यमानान्यासन् । अस्याध्यापनशैल्या इदं वैशिष्टयमासीत् यत् पाणिनेः किमपि सूत्रं व्याचक्षाणोऽयं सूत्रस्यास्य विषयेऽनेकेषु टीकाग्रन्थेषु महाभाष्ये च यत् किञ्चिदपि लिखितम् तत् सर्वमपि छात्रान् पाठयतिस्म। अनेन शिष्याणां विभिन्नटीकाग्रन्थेषु विहितस्य विवेचनस्य सारांश एकदैव सारल्येनावगम्यते स्म।[43]

सत्त्विकं व्यक्तित्वम् -

तस्य सात्त्विकजीवनम् पण्डितानाम् अनुकरणीयं समादरणीयञ्चासीत्। स अत्यधिको दयालुर्धर्मानुष्ठानतत्परः संयमी परोपकारी उदाराशयो दीनानाञ्च सहायक आसीत्। स निर्धनब्राह्मणाय कन्याविवाहाय स्वार्जितषु द्रव्येभ्यः सप्तशतं रूप्यकाणि सहायतार्थमयच्छत्। एकस्य ऋणगृहीतुमृत्योर-नन्तरं तस्य भार्या स्वाभूषणानि विक्रीय ऋणमुक्तये निषिध्य तस्य और्ध्वदैहिककार्येभ्यः शतं रूप्यकाणि दत्वा पुनः सहायतामकरोत्। ईदृशरूदारचेता भगवत्परायणं छात्रेभ्यो विद्यावितरणशीलं पण्डितमहोदय आसीत्।

प्रमुखशिष्याः

अस्य शिष्येषु पण्डितरामाज्ञापाण्डेय, पण्डितनृसिंहत्रिपाठि पण्डित-रामप्रसादत्रिपाठि-महोदयाः प्रमुखा आसन्।

---

43 काशी की पाण्डित्य परम्परा आ. बलदेव उपाध्याय, पृ. 367-372, प्र. सं. 1983

11. नित्यानन्द पर्वतीयः

(काल 1869 ख्रिस्ताब्दतः 1931 ख्रिस्ताब्दपर्यन्तम्)

जीवन-परिचयः

महामहोपाध्यायपण्डितनित्यानन्दपर्वतीयमहोदयस्य जन्म कूर्माचलस्य अल्मोडास्थलस्य विशिष्टब्राह्मणकुलेऽभवत् । तस्य प्रपितामह श्री नीलाम्बरपन्तः अल्गोडामण्डलस्य तिलाडी-ग्रामात् काश्यां त्यागमयं तपोमयं च जीवनं यापयितुं, भूतभावनस्य भगवतो विश्वनाथस्य पादार्चनं च विद्यातुमिच्छया समागतः। श्रीपर्वतीयमहोदयस्य पितुः पितामहस्य चोभयोर्जन्म काश्यामेवाभवत् । अस्मिन्नैवकाले एकोऽन्यः पण्डितगंगाराम-शास्त्रिणः पर्वतीयब्राह्मणपरिवा-रोऽपि अल्मोडामण्डलस्य न्योली इत्याख्य ग्रामादागत्य काश्यां वसतिस्म। गंगारामत्रिपाठिमहोदयः काश्यां नव्यव्याकरणपरम्परायाः उद्भावक आसीत्। तेन नागेशभट्टप्रणीतस्य लघुशब्देन्दुशेखरस्य परिभाषेन्दुशेखरस्य चाध्ययनाध्यापनस्य परिष्कारशैली-मुद्भाव्य व्याकरण-शास्त्रस्यैका नवीना परम्परा प्रवर्तिता, या वर्तमानकालेप्यबाधगत्या प्रचलति। पण्डितनित्या-नन्दमहोदयोऽस्यैव श्री पं. गंगारामस्य दोहित्रोऽस्ति। तस्य पितुर्नाम श्रीनामदेवपन्त आसीत् तथा च जन्म काश्यामेव 1867 ख्रिस्ताब्दे (सं. 1934 वैक्रमाब्दे) वर्षेऽभवत् । 1931 ख्रिस्ताब्दे आतुर सन्यासं गृहीत्वा गोलोकं प्राप्तवान् ।

अध्यापनकालः

यज्ञोपवीतसस्कारानन्तरं स स्वपित्रा एव स्वीयवाजसनेयशाखा-संहितायाः विधिवदध्यय-नमकरोत् । वेदादिशास्त्राभ्यासवशाद् शीघ्रमेव कर्मकाण्डस्य धर्मशास्त्रस्य चोत्तमो विद्वान् अभवत्। ततश्च महामहोपाध्याय-पण्डितगंगाधरशास्त्रिणः व्याकरण न्याय-मीमांसा-वेदान्त-धर्मशास्त्राणां

मनोयोगेनाध्ययनं कृतवान्। स एकोनविंशतिवर्ष 1886 ख्रिस्ताब्दे ससम्मानेन व्याकरणाचार्यस्य पदवीं प्राप्नोत् ।

अध्यापनकार्यम् -

हिन्दुधर्मस्य संस्कृतेश्च प्रतिष्ठापनार्थ 1898 ख्रिस्ताब्दे सेन्ट्रल हिन्दु कॉलेज इत्याख्यो महाविद्यालयः प्रारब्धः यत्र श्रीनित्यानन्दमहोदयस्य पूर्णसहयोगमासीत्। कालान्तरे सोऽस्मिन् महाविद्यालये अनवरतम् 1906 ख्रिस्ताब्दपर्यन्तम् प्राध्यापकपदं सुशोभितवान् । अस्मिन्नेवकाले दैवदुर्विपाकात् तस्य पत्न्याः स्वर्गवासोऽभवत् ततश्च एकमात्रपुत्रस्यमृत्युना दुःखितः स 1906 ख्रिस्ताब्दे महाविद्यालयात् त्यागपत्रं दत्त्वा स्वगृहे एव छात्रान् निःशुल्कमध्यापयत्।[44]

सात्त्विकस्वभावः -

स स्वगुरुगंगाधरशास्त्रिणोऽनुमति विना कस्मिन्नपि कार्येऽग्रसरो नाभवत्। गुरोराज्ञाया अभावे स संस्कृत कॉलेजस्योच्चाध्यापकपदायावेदनमपि नाकरोत्। सोऽवैतनिकाध्यापकव्रतं गृहे एव निष्ठयोत्साहेन मनोयोगेन चापालयत् । स्वशिष्येष्वप्यस्यानुकम्पा श्लाघनीया आसीत् ।

सत्यनिष्ठा अयाचितसात्विकवृत्तिः निरन्तरशास्त्रीयचिन्तनं मननं शास्त्रोन्नतये ऐकान्तिकभावना दिगुणै पण्डितनित्यानन्दशास्त्रिमहोदयो महनीयो महर्षिरासीत्।

कृतिपरिचयः -

मीमांसाया जैमिनिसूत्रवृते टिप्पणीसयुक्तं सम्पादनम्, मीमांसा-परिभाषायाटिप्पणीयुक्त सम्पादनम् कात्यायन श्रौतसूत्रस्य सम्पादनञ्चेति । कर्मकाण्डरय संस्कारदीपकः द्वौ भागौ, परिशिष्टदीपकः, अन्यकर्मदीपकः, वर्षकृत्यदीपकः, कातीयेष्टिदीपक सपिण्ड्यदीपकश्चेति अन्याः कृतयः।

---

44 संस्कृत-वा. का बृहद् इति पञ्चदश-खण्ड व्याकरण आ. बलदेव उपाध्याय पृ. 289-291, 2001

व्याकरणस्य -

1. **दीपकटीका-** नव्यव्याकरणस्य सुप्रसिद्धस्य लघुशब्देन्दुशेखरस्य अव्ययीभावप्रकरणान्तस्य 1918 ख्रिस्ताब्दे दीपकनाम्नी टीकामलिखत्। अस्या द्विविधं वैशिष्ट्मस्ति एकमर्थपरकमपरञ्च परिष्कारपरकम्। नागेशभट्टः कैयटमतान् खण्डितान् अकरोत् । उक्तखण्डनस्य युक्तायुक्तत्वविषये पारम्परिकविचारपद्धतेः सैद्धान्तिकरूपप्रकटनमस्या टीकायाः प्रामुख्यं वैशिष्ट्यमस्ति। स परिष्कारेण सह बहुस्थलेषु वैचारिकसूक्ष्मतां प्रदर्श्य नागेशमतस्य समीक्षामपि अकरोत्।[45]
2. **टिप्पणी तत्त्वप्रकाशिका-** नागेशेन व्याकरणशास्त्रस्य शास्त्रीयपदार्थान् विवेचयितुं रचिता कृतिरस्ति परमलघुमञ्जूषा । तेषां शारत्रीयपदार्थानां वैयाकरणसिद्धान्तानां विषये नैयायिकैर्मीमांसकैश्च सह मतवैपरीत्ये तेषां स्वरूपम् लक्षणसमन्वयादिकञ्च श्रीनित्यानन्दमहोदयः तत्त्वप्रकाशिका इत्याख्यायां स्वटिप्पण्यां स्पष्टीकृतवान् । तेन यत्र- यत्र नागेशेन प्रयुक्तदीर्घानामस्पष्टानाञ्च शब्दानां स्पष्टीकरणम् सरलशब्दैः कृतम्।

उपाधिः -

1921 ख्रिस्ताब्दे सर्वकारोऽस्मै महामहोपाध्याय इति पदवीमयच्छत् ।

प्रमुखशिष्या :-

म. म. प. सीतारामशास्त्रीशैडे, माधवशास्त्री भण्डारी, पण्डितगोपालशास्त्री नेने, पण्डितगोपालदत्तपाण्डेयश्चेति प्रमुखाः शिष्या आसन् ।

इति प्रथमोऽध्यायः

❖ ❖ ❖

---

45 काशी की पाण्डित्य परम्परा - आ. बलदेव उपाध्याय पृ. 386-396 प्र. सं. 1983

द्वितीयोऽध्यायः

1. कालक्रमेण मूलग्रन्थकाराणां परिचयः।

2. स्वातन्त्र्योत्तरकाले प्रणीतानां मूलग्रन्थानां कालक्रमेण परिचयो वैशिष्ट्यञ्च ।

3. अकारादिक्रमेण मूलग्रन्थकाराणां तत्कृतीनाञ्च सूची।

अथ द्वितीयोऽध्यायः

1. कालक्रमेण मूलग्रन्थकाराणां परिचयः

1. महावैयाकरण दीनबन्धु झा

(कालः 1878. ईशवीयतः 26.1.1965 ईशवीयपर्यन्तम्)

जीवनपरिचयः

मैथिलक्षौत्रियवंशावतंसः प्रथितयशोनिधेः म. म. शिवकुमारमिश्रस्य शिष्येष्वन्यतमः 'माण्डरसिंहौल समाख्य काश्यपगोत्रीयः सकलशास्त्र-पारावारपारङ्गतोऽपि व्याकरणैकबद्धश्रद्धः समध्यापनार्जितसमज्ञः प्रख्यात्तमो दीनबन्धु झा महाभाग आसीत् । मध्येमिथिलं परमादर्शस्वरूप-श्रोत्रियपुरावयव-सरिसव ग्रामसमीपे ईशपुर (ईसहपुर) ग्रामे 1800 शकाब्दे 1878 ख्रिस्ताब्दे आश्विनशुक्लचतुर्दश्यां महावैयाकरणस्यास्य दीनबन्धु झा शर्मणो जन्माभूत् ।

अस्य पिता माण्डलिक-सिंहकुल (गाण्डर-सिंहौल) संज्ञक-मैथिलक्षौत्रिय वंशावतंसः कर्मकाण्डिप्रवरः फेकूप्रसिद्धो विद्यानाथ झा शर्मा आसीत्। एतन्मातागहो हारिताम्र (हरि अम्मय) वंशोद्भवो मुरली मिश्रो सरिसवग्रामावयवस्य पाहीसंज्ञकोपग्रामकृतवास आसीत्। जन्मतो मासाभ्यन्तर एव दैवदुर्विपाकादस्य माता जीवछदेवी विक्षिप्ता जाता। अतो लालन-पालनमस्य पितामह्या कृतम्। लखनौर ग्रामकृतवासकर्मकाण्ड-प्रवर पं. जयानन्द झा शर्मणः कन्यां महेश्वरीनाम्नी परिणीतवान्। पं. दीनबन्धु झा महोदयस्य त्रयः पुत्रा अभवत् । ज्येष्ठबालकः विद्यामार्तण्डो जीवनाथ झाः (1910-1970), द्वितीयो बालको महाकविः पं. श्री

गोविन्द झा, तृत्तीयः पं. श्रीमाधवझाः चेति मिथिलायाः गौरवस्वरूपाः ज्ञायन्ते। झा महाभागो स्वयमेव स्वात्मजानध्याप्य विशिष्ट विद्वत्-पदवीं प्रापयामास । दैवदुर्विपाकाद् ग्रामे एव (1876 शाकाब्दे) माघशुक्लतृतीयां बुधे 26.1.1955 दिनाङ्के नश्वरं शरीरं परित्यज्य स्वर्गवासाय मिथिलां त्यक्तवानयम् ।[46]

अध्ययनकालः -

अयं स्वग्रामनिकटस्थ हनुमन्नगरग्रामं प्रतिदिनं मध्याह्ने भानौ तपत्यपि, शैत्याधिक्येऽपि वा, वारिवाहे वर्षति वा गत्वा तद्ग्रामकृतवासात् पण्डित महेशझा शर्मणो लघुकौमुदीं समग्रां ससाधनिकां पठितवान्। समस्तमरकोषं स्मृत्वा प्रतिभासम्पन्नोऽयं पित्रा-पितामहेन चानुज्ञातः सरिसवग्रामे सखवाङग्रामवासिनः पण्डित जुडाओन झा शर्मणः चतुष्पाठिकायां प्रविष्टः। ततश्चायं पितामहस्याज्ञया विशेषाध्ययनाय दरभङ्गम् अगच्छत्। तत्र शुभङ्करपुरे बाबूगुणेश्वरसिंहसंस्थापित-पाठशालायां टटुआरग्रामवासिनः धनुर्धरशर्माप्रधानाचार्यादध्य-यनमकरोत्। तत्रायं पञ्चवर्षाणि स्थित्वा समस्तां सिद्धान्तकौमुद्धीं मनोरमाशब्दरत्नं, रघुवंशमहाकाव्यं, न्यायसिद्धान्तमुक्तावलीं, सांख्यतत्वकौमुदीं, मीमांसापरिभाषां, वेदान्त-परिभाषां चेत्येतान् ग्रन्थानधीतवान् ।

विशिष्टसपरिष्कारशास्त्रानुशीलनाय सोत्साहं काश्यां दरभंगा-संस्कृत पाठशालायां जगद्गुरु महामहोपाध्यायशिवकुमार मिश्रात् सप्रदीपोद्योतं महाभाष्यम्, वाक्यपदीयम्, वैयाकरणसिद्धान्तमञ्जूषां, वैयाकरणभूषणम्, परिभाषेन्दुशेखरम् इत्येतान् सकलटीकाग्रन्थान् सपरिष्कारान् सरहस्यान् सम्यगधीतवानयम्।

---

46 वैयाकरण भूषणसार दीपिका – भूमिकाः मिथिलाविद्यापीठम्, 2002 ख्रिस्ताब्दे

मेधाविने विधिशास्त्रार्थेषु प्राप्तविजयाय दीनबन्धुमहाभागाय विशुद्धानन्द सरस्वतीयतिः रूप्यकचतुष्टयमितां मासिकच्छात्रवृत्तिमयच्छत्, ययाऽस्य पुस्तकादिक्रयणे सौविध्यमभूत् । सप्तवर्षाणि यावन्नैरन्तर्येण काश्यामेव स्थित्वा ग्रामागमननिरपेक्षतया पठन्नयं व्याकरणं शब्दखण्डवेदान्त-सांख्ययोग- धर्मशास्त्र-पुराण-साहित्य-शास्त्रेषु निष्णातो जातः ।

मित्राणामनुरोधेनायं कालिकातातः प्रवर्तिनां व्याकरणतीर्थपरीक्षां प्रथमश्रेण्यां प्रथमस्थाने समुत्तीर्य प्रमाणपत्रमासादित्तवान् । 1900 ख्रिस्ताब्दे वर्षे काशीतः स्वग्रामं प्रति प्रतिस्थतोऽयं तत्रत्य गुरुभिर्हस्तलिखितं विशिष्टयोग्यताबोधकं प्रतिष्ठापात्रं प्राप्तवान्। ततश्च महाराजा दरभङ्गासंचालिता परमोत्कर्षदायिनी विद्वज्जन-निकप-स्वरूपां द्यौतपरीक्षां दशाधिकैकोनविंशतित्तमे (1910) ख्रिस्ताब्दे प्रथमश्रेण्यां प्रथमो भूत्वा समुत्तीर्णवान्। तत्र संजाते शास्त्रार्थे विजयं च लब्धवान्।[47]

अध्यापनकालः -

एकादशाधिकैकोनविंशतिख्रिस्ताब्दतः (1911-13) वर्षद्वयं वैद्यनाथधाम्नि संस्कृत विद्यालये प्रधानाध्यापक पदमलंकृतवान् । तदनन्तरं त्रयोदशाधिकैकोन-विंशतितमख्रिस्ताब्दतः (1913-1921) अष्टौ वर्षाणि यावद् महाराज्ञ्या लक्ष्मीश्वरीदेव्या अनुरोधेन दरभङ्गोपनगर-स्थितलक्ष्मीपुर ग्रामस्थ संस्कृतविद्यालये प्रधानाध्यापकपदं समलंकृत्याध्यापितवान् । ततश्च पारिवारिकबाधाविशेषवशात् कियत्कालं स्वग्रामे यापयित्वा त्रयोविंशत्यधिकैकोनविंशति-ख्रिस्ताब्दतः (1923-1953) त्रिपञ्चाशदधिकैकोनविंशतितमख्रिस्ताब्दं यावत्त्रिशद् वर्षाणि-निरन्तरं स्वग्रामसमीपवर्तिसरिसवग्रामस्थित लक्ष्मीवती संस्कृत विद्यालये प्रधानाध्यापकपद-मलंकुर्वन् शतशश्छात्रान् अध्यापयत्। तदनन्तरं त्रिपञ्चाशदधिकैकोनविंशतितमे

---

47 सं. राइटिंग इन इन्डि. इण्डिया - पुस्तके श्रीसदानन्दविरचितो स्वातन्त्र्योत्तरे काले मिथिलायां व्याकरणशास्त्रीय परम्परा' इत्याख्यो लेखः, पृ.-197-199

ख्रिस्ताब्दे (1953 ईशवीये) सरिसवस्थ महाराज्ञी-लक्ष्मीवती-संस्कृतविद्यालयात् प्राप्तावकाशो महावैयाकरणोऽयं, दरभंगास्थितमिथिलाशोध संस्थानस्य विशिष्ट-विद्वत्पदम् अलङ्कृतवान् ।

कृति-परिचयः -

महापुरुषेणानेन स्वकीयजीवनस्य षट्सप्ततिवर्षमध्ये द्वापञ्चाशद्वर्षाणि निरन्तरमध्यय-नाध्यापने ग्रन्थनिर्माणे चैव यापितानि । षोडशवर्षावस्थात एवायं श्लोकनिर्माणे नैपुण्यं प्राप्नोत् । विद्वांसो विदन्त्येव यदयमपरपाणि-निरूपेण मान्य आसीदिति । तत्कृतो निर्णयो मिथिलायामाप्तवाक्यत्वेन मान्य आसीत्। अस्माकं परम सौम्याग्यं यदेततकृतविचाराः ग्रन्थरूपेण प्रकाशिताः। तेन विरचिता प्रमुखा ग्रन्था निम्नलिखिता सन्ति ।

1. लिङ्गवचनविचारः (1950 ख्रिस्ताब्दे) प्रकाशनकालः 1954 ख्रिस्ततमे वर्षे ।
2. पाणिनीयव्याकरणतत्त्वप्रदीपः (1952 ख्रिस्ताब्दे) प्रकाशनकालः 1988 ख्रिस्ततमे वर्षे ।
3. कौमुदीमूलार्थविद्योतिनी (1918 ख्रिस्ताब्दे) प्रकाशनकालः 1985 ख्रिस्ततमे वर्षे।
4. समासशक्तिदीपिका (1928 ख्रिस्ताब्दे) प्रकाशनकालः 1976, 1987 ख्रिस्ततमे वर्षे ।
5. उपसृष्टधात्वर्थसंग्रहः (1937 ई.) प्रकाशनवर्षम् - 1981 ख्रिस्ततमे वर्षे।
6. वैयाकरणभूषणसारदीपिका (1945 ई.) प्रकाशनवर्षम् 2002 ख्रिस्ततमे वर्षे।
7. हरिकारिकाटीका (1930 ई.) प्रकाशनवर्षम्-अप्रकाशिता।

8. मिथिलाभाषाविद्योतनम् (1914-40) प्रकाशनवर्षम्-1945, 1966 (मैथिलीव्याकरणम्)

9. रसिकमनोरञ्जिनी

विशेषः -

अयं व्याकरणशास्त्रस्य सागर आसीत् । यथैवास्याध्यापनशैली प्रशस्ता सर्वशिष्यप्रिया तथैवास्य ग्रन्थलेखनमपि । अयं महानुभावो मिथिला-विद्वत्परिषदा 'महावैयाकरणोपाधिना' समलंकृतः। विद्वज्जनेष्विव सर्वसाधारणजनेष्वप्यस्या मान्यता नितरां प्रशस्ताऽऽसीत् । व्याकरणशास्त्रीय-निर्णयमिवास्य धर्मशास्त्रीय-निर्णयमपि सर्वे स्वीकुर्वन्ति स्म। अयं दरभङ्गायां समायोजिते अष्टचत्वारिंशद-धिकैकोनविंशतितमख्रिस्तबदीये (1948) अखिल भारतीय प्राच्यविद्यासम्मेलनस्य चतुर्दशेऽधिवेशने शब्दखण्डशाखाया अध्यक्ष आसीत् ।

एतेन प्रदीपेन आलोकिता व्याकरणशास्त्रीयगूढविषया विद्वद्धौरेयाणां चेतांसि समारोक्ष्यन्ति। गवेषणापराणां दृग्गोचरी भविष्यन्ति। मुख्यतया वैयाकरणोऽप्ययं कविरूपेणापि प्रख्यातः। अनेन विरचिता रसिकमनोरञ्जिनी सार्धद्विशतपद्यात्मिका श्रृङ्गाररसमयी रचनाऽस्ति। मुग्धा मध्या-प्रगल्भेति नायिका त्रितयस्य क्रमशः स्वभाववर्णनं प्रसङ्गत्रयात्मकाध्यायत्र-येष्वत्रकृतम्। दाम्पत्यव्यवहारचातुर्यप्राप्तिः काव्यस्यास्य लक्ष्यम् ।[48]

2. श्रीमदमृतलालशास्त्रिणः

(कालः 1889 ख्रिस्ताब्दतः स्वातन्त्र्योतरकालपर्यन्तम्)

जीवनपरिचयः -

आसीदस्य जन्मस्थानं मूली' इत्याख्य ग्राम। पिता श्री त्रिभुवनशङ्करः पितामहश्च गणेशमहाभागः सौराष्ट्रदेशे भोईका ग्रामवासिनः आसीत्। स्वभावतः

---

48 समास शक्तिदीपिकाया भूमिकायाम् दरगंगा सं. वि. विद्यालयः, प्रका. 1977 ख्रिस्ताब्दे

सुशीला स्वरूपतः सुभगा सद्गुणैः समृद्धा 'श्रीमणिबा' अस्य माता आसीत् । श्रावणकृष्णषष्ठयां (1946 संवत्सरे) 1886 श्रीष्टाब्देऽस्य जन्म अभवत् ।

बाल्यत एव क्रीडाविमुखः पठनाभिमुखः सुमुखोऽमृतलालशास्त्री। मध्येऽध्ययनं वृद्धैर्विवाहितः श्रीनृसिंहपाठकस्य सुपुत्री जडीबाई।

अध्ययनकालः -

विवाहानन्तरमपि नाध्ययनमत्यजत् । राजनगरमहाविद्यालयस्या-ध्यापकः रामकृष्णमहामहोपाध्याय श्रीमान् श्री स्वामिनारायणमहा-विद्यालयस्य प्रधानाचार्यो श्रीगिरिजाशङ्कर-शास्त्री प्रथमतो नवीने मेधाभाजने विद्यासंस्काराधनमयच्छत् । पूर्वमाङ्गलशालायां पठन् पुत्रः पितृचरणैरार्यावर्तसंस्कारानुबद्धचेतसा गीर्वाणभाषाध्ययने नीतः । विद्यानुरागेणायं वाराणसीं समागच्छतः पण्डितमण्डलमण्डनात् साक्षाच्छिवात् शिवकुमारशास्त्रिणः व्याकरणशास्त्रं, वेदवेदान्तनिष्णातधर्म-प्राणश्रीलक्ष्मणशास्त्रिणः वेदान्तशास्त्रं चाधीतवान्। बङ्गदेशेऽयं राजकीय संस्कृत विद्यालयेऽप्यधीतवान् ।

अध्यापनकालः -

काशीत विद्यां प्राप्यऽयं बडोदाराज्यनगरस्थसंस्कृतमहाविद्यालये व्याकरणा-ध्यापनमकरोत् । किन्तु भगवदिच्छया अस्य महोपदेशकपदे नियुक्तिरभवत्। उपदेशाय केवलमाचार्या एव प्रभवन्ति न वयं वंशवदा दृढं मन्यमानेन ततोऽध्ययापनार्थ सुरतनगरे (गुर्जरराज्ये) गमनमकारि। तत्र एम. टी.बी. आङ्गलमहाविद्यालये संस्कृताध्यापकाचार्यपदमलभत्। ततश्च श्रीनाराणसंस्कृतमहाविद्यालये पञ्चदशवर्षाणि प्रधानाचार्यपदमलङ्करोत् ।

कृतिपरिचयः -

श्रीमताव्यासेनाध्यापनसमयाद् रिक्तो समयो शास्त्रविलोकनेनैव नीयते। एकदा वाग्देवता समादिदेश ग्रञ्थनिर्माणाय व्यासम्। चकितः पुलकाङ्ग सार्द्रनयनस्त-मादेशमनुग्रहं मन्यमानः प्रारभत परिभाषाणामुपरि परिभाषेन्दु-शेखररूपां व्याख्यां प्रायेणोपजीव्य प्रभानाम्नीं भास्वतीं पद्यमयी व्याख्याम्। सा च विदुषां पुरस्तादुपस्थिताऽस्ति।[49]

विशेषः

कथं शालिनः स्युश्छात्रा इति विचिन्त्य प्रातःकाले पञ्चवादने पञ्चायतनदेवतानां प्रातः स्मरणानि सायं पृथक् पृथग्देवतानां स्तोत्राणि यथा दक्षिणमूर्तिस्तोत्रं शक्रादयस्तुतिरम्बाष्टकं देवीक्षमापनस्त्रोतं शिवताण्डवस्तोत्रं स्वनिरूपिता चेश्वरोपकारनिरूपणस्तुतिरिति संस्कारसामग्र्यश्छात्रेषु निहित हितेच्छुकेनऽनेन।

3. पं. गोपालशास्त्री 'दर्शनकेसरी'

(समयः 1892 ख्रिस्ताब्दतः स्वातन्त्र्योत्तरपर्यन्तम्)

जीवनपरिचयः -

पं. गोपालशास्त्रीमहोदयः संस्कृतशास्त्राणां वैदुष्येन सह पाणिनीयव्याकरणस्य प्रचारप्रसारस्य नूतनदिशाया उद्भावक एको महनीयकर्मठव्यक्तिरासीत्। अस्य जन्म

---

49 प्रभानाम्नी पद्यमयी व्याख्या- परिभाषेन्दुशेखरस्य श्रीमदमृतलालशर्मा, भूमिका, प्र. सं. 1963 गीत विद्यालय जामखभालिया सौराष्ट्र

बिहारप्रान्तस्य सिवानमण्डलस्य 'जगन्नाथपुर' ग्रामे 1992 ख्रिस्ताब्देऽभवत् । भवान् शाण्डिल्यगोत्रीय सरयूपारीणब्राह्मण आसीत् ।

अध्ययनकालः -

प्रारम्भिकमध्ययनं तु मण्डलान्तर्गते पाठशालायां कृत्वा संस्कृतशिक्षार्थ काशीस्थविद्यालयेषु तत्रत्य तात्कालीन महनीय पंण्डितानां शरणं गत्वा व्याकरणस्य दर्शनशास्त्रस्य च गमीरमध्ययनङ्कृत्वा एषु शास्त्रेषु मानवीयप्रावीण्यमुपलब्धवान् । 1915 ख्रिस्ताब्दे काशीहिन्दू विश्वविद्यालयात् व्याकरणशास्त्राचार्य-परीक्षामुत्तीर्णवान्। ततश्च बिहारप्रान्ते काव्ये न्याये च सर्वोच्च 'तीर्थ' परीक्षायामपि साफल्यं प्राप्तवान् ।

अध्यापनकालः -

शिवप्रसादमहोदयस्याग्रहात् काशीविद्यापीठे 1921 ख्रिस्ताब्दतः 1947 ख्रिस्तपर्यन्तं षड्विंशतिवर्षपर्यन्तं व्याकरणस्य दर्शनशास्त्रस्य चाध्यापनमकरोत्। अत्र भवान् बहुषु शिष्येषु संस्कृतं दर्शनं च प्रति अनुरागमुत्पाद्य सुयोग्यान् कृतवान्। येषु लालबहादुरशास्त्री, अलगूराय शास्त्री प्रभृतयः राजनीतिज्ञपुरुषाणां नामान्यग्रगण्यानि सन्ति ।

पुरा पाणिनीय व्याकरणाध्ययनाध्यापनपद्धतिरष्टाध्यायी क्रमानुसा-रिण्यासीत्। अष्टाध्यायीमधिकृत्य कृतं पातञ्जलं महाभाष्यमष्टाध्यायी-क्रमानुरूपमेव वर्तते। वार्तिककारैः सूत्राणामुपरि कृता वार्तिकरचनाऽप्येवं विधैवावलोक्यते । सैव पद्धतिः काशिकाकारेणाथ च काशिकाव्याख्याकारैश्च स्वीकृता। परन्तु कालक्रमेण पद्धतेरस्या ह्रासो जातः, समुद्भुता चाष्टाध्यायी सूत्रक्रमरहिता नवीना पद्धतिः। रूपावतार-प्रक्रियाकौमुदी-वैयाकरणसिद्धान्त-कौमुदीलघुसिद्धान्त-कौमुदीप्रभृति-ग्रन्थेषु या इदानीमप्यवलोक्यते। फलतो याऽष्टाध्यायी क्रमानुसारिणी प्राचीना

पठनपाठन-पद्धतिर्सा विलुप्ता। परन्तु परिव्राजकाचार्येण स्वामिविरजानन्द सरस्वतीमहाभागेन विंशशताब्द्या आरम्भे विलुप्तप्रायाऽष्टाध्यायी-सूत्रक्रमानुसारिणी या प्राचीनाध्ययनाध्यापन-पद्धतिः सा पुनः प्रचलिता, स्वामिदयानन्देन प्रचारिता च। काशीस्थाः स्वर्गीया वैयाकरणब्रह्मदत्तजिज्ञासुमहाभागा अपि पद्धतेरस्याः समर्थका आसन्। तैरष्टाध्याय्या विस्तृता सरला शोभना चैका 'हिन्दीव्याख्या' कृता। तदनु स्वर्गस्थेदर्शनकेशरिभिः स्वकीयैः कठिनसाधनातपस्यानुभवप्रयोगादिभिः सुबोधपद्धतेरस्याः सार्थकता पदे पदेऽनुभूता। ततः काश्यां तत्पद्धतिप्रचार प्रसारयोरेव ते यावज्जीवनं सम्पृक्ताश्चासन्।

कृतिपरिचयः -

पं. गोपालशास्त्रीमहोदयेन संस्कृतभाषायां पञ्चविंशतिग्रन्थानां निर्माणं कृतम्। संस्कृतभाषाप्रसारस्याग्रदूतेन शास्त्रिमहोदयेनास्य निमित्तमेका नवीना पद्धतिराविष्कृता। अनया पद्धत्या स्वस्थापिते 'कन्या संस्कृत-विद्यालये' संस्कृतभाषायाः शिक्षां दत्त्वाऽल्पकालेन चाल्पप्रयासेन संस्कृत सम्भाषणे चावबोधने योग्यतामुत्पादितवान् । अस्योद्देश्यपूर्तये शास्त्रिमहोदयेन बहूनां ग्रन्थानां प्रणयनं कृतम्। येषु मुख्या इमे अधोलिखिताः सन्ति। तद्यथा-

1. पाणिनीयप्रशस्तिः
2. पाणिनीयप्रदीपः
3. पाणिनीयप्रशस्ति नाटकम्
4. पाणिनीयप्रबोधम् (नाटकम्)
5. ऋजुपाणिनीयम्
6. संस्कृतशिक्षकम् (हिन्दीभाषया संस्कृत शिक्षा)

7. ऋजुपाणिनीयम् (अत्यावश्यक सूत्राणां क्रमबद्धेन संकलनम्)

8. बृहद्ऋजुपाणिनीयम्

9. सवृतिः अष्टाध्यायी

10. पाणिनीयप्रबोधव्याकरणम्

11. प्रशिक्षण संविधानम् (संस्कृतभाषया शिक्षणस्य विधि)

12. भट्टिकाव्यम् - (काव्यकर्मप्रकाशिका नामक टीकाया सहितम्)

13. भट्टिकाव्य शास्त्रसारः-संवादात्मकः

14. संस्कृत-संस्कृति शिक्षकम् (हिन्दी भाषया मनुस्मृतौ निर्दिष्ट आचार संहितायाः विवरणम्)

15. गीतामृतम् व्याकरणम् (गीताया प्रयोगानामेवोदाहरणम्)

16. वीरांगना वैभवम् महनीयनारीणां चरितचित्रणम् (इतरग्रन्थैः भारतीयनारीणां महिमा तथा च गीतायाः कर्मयोगस्य विशदः विवेचनं कृतम्)

17. नारी जागरण नाटकम्-संस्कृत हिन्दी चोभयमाध्यमाभ्यां विशिष्टनारीणां परिचयः। (प्रथमभागः)

18. 'नारी जागरणं नाटकम् संस्कृत हिन्दी चोभयमाध्यमाभ्यां विशिष्टनारीणां परिचयः। (द्वितीयभागः)

19. गोमहिमाऽभिनयनाटकम्

20. मीमांसापरिभाषा-दीपिका व्याख्या

21. श्री गीताकर्मयोगशास्त्रम् गीतायाः तात्पर्य कर्मयोगस्य प्रतिपादनेऽस्तीत्यस्य विस्तृतं गम्भीरं च विवेचनं पाण्डित्येन तर्के च कृतम्। दर्शनकेसरी

महोदयस्यायं महिमामण्डितग्रन्थः तेषां दार्शनिक पाण्डित्यस्य निकषग्रावा अस्ति।

कोमलबुद्धिबालकानां कृते पाणिनिव्याकरणाध्ययनसौकर्यसम्पादन-धिया शास्त्रिवर्यैर्दर्शन-केशरिभिः बहवो ग्रन्थाः प्रणीताः यथाकालं प्रकाश्यञ्चानीताः। तेषु 1. प्राणिनीयप्रबोधः 2. संस्कृत-शिक्षकः 3. ऋजुपाणिनीयम् 4. बृहदृजुपाणिनीयमित्यादयोऽनेके ग्रन्था इदानीमस्माकं पुरतो विराजन्ते। एतदतिरिक्तं पाणिनीयप्रणीताया अष्टाध्याय्या बृहद्भूमिका समन्वितमतिविशिष्टं सम्पादनमपि शास्त्रिवर्यैः कृतम्।

4. पण्डित रामाज्ञापाण्डेयः

(कालः 1900 ईशवीयतः 1978 ईशवीयपर्यन्तम्)

जीवनपरिचयः -

पण्डित रामाज्ञापाण्डेयः पं. देवनारायणत्रिपाठिनः (तिवारीजी) शिष्यमण्डल्यां लब्धकीर्तिः विद्वान् आसीत् । उत्तरप्रदेशस्य पूर्वीमण्डलस्य बलियाजनपदस्य 'रतसड"[50] नामके ग्रामे एकस्मिन् सदाचारिणि श्रीवैष्णवमतानुयायिनि ब्राह्मणपरिवारे 1900 ईशवीये वर्षे जन्म अभवत्। ईशकृपयापरिवारे षट्पुत्राः आसन् ये विभिन्नस्थलेषु संस्कृतं असेवन्त ।

अध्ययनकालः -

पं. देवनारायणत्रिपाठिभ्यः व्याकरणाध्ययनेन सह पं. दामोदर-शास्त्रिणः गंगाधरशास्त्रिणः शिवकुमारशास्त्रिणः चापि शब्दशास्त्रस्योच्चस्तरीय-ग्रन्थानां विधिवदध्ययनं कृतम्। भवानाचार्योत्तीर्णानन्तरम् अनेकवर्षपर्यन्तं साधोलालस्कालर

---

50 काशी की पां. पर. आ. बलदेव उपाध्याय, पृ.-466. प्र. सं. 1983

इत्यस्य रूपे डॉ. बेनिसमहोदयादपि बहूनां नवीनविषयाणामध्ययनं कृतवान्। येनास्य प्रतिभाया विमलः प्रसारः परिष्कारोऽभवत् ।

अध्यापनकालः -

काशीस्थाः छात्राः अस्य प्रतिभाप्रसादं 1921 तः 1922 ख्रिस्ताब्दपर्यन्तमेव प्राप्तवन्तः तदनन्तरं जगन्नाथपुर्या राजकीय-संस्कृत-महाविद्यालये व्याकरणव्याख्यातृपदं सुशोभितम्। उत्कलप्रदेशे पाणिनीय व्याकरणस्य प्रथमप्रचारकस्यरूपे प्रख्यातः। फलतस्तत्र स्थित्वा अयमनेकानुत्कलप्रदेशीयच्छात्रान् पाणिनीयव्याकरणमध्याप्य तान् सुबोधान् वैयाकरणान् सम्पादितवान् ।

कृतिपरिचयः -

व्याकरणदर्शनम् अनेनव्याकरणस्य दार्शनिकस्वरूपस्य परिष्कारणाय स्वजीवनं व्यापितम्। प्रातिशाख्यानां (समस्तवैदिकसंहिताभ्यः सम्बद्धाः ग्रन्थाः) निरुक्तस्य पातञ्जलमहाभाष्यस्य भतृहरेर्वाक्यपदीयस्य तथा च नागेशभट्टस्य सिद्धान्तमञ्जूषाया व्याकरणस्य दार्शनिकस्वरूपस्य वर्ण्यसिद्धान्तानां पदार्थानां चिन्तनं च गंभीरं विवेचनं कृत्तवान्।[51] पं. रामाज्ञापाण्डेय महोदयेन स्व प्रखरमत्या एषामूहापोहानां निराकरणं गभीरताऽन्वेषणेन कृतम्। सुदीर्घचिन्तनस्य परिणामस्वरूपेऽनेन व्याकरणदर्शनस्य तत्त्वानां विस्तृतविवेचनं त्रिषु (भूमिका-पीठिका प्रतिमा चेतेषु) विभागेषु विभक्तम्। येषु तृतीयभागस्य प्रतिमा इत्याख्यस्य प्रकाशनं निधनान्तरमभवत्। अस्य जीवनकाल एवं ग्रन्थस्य भागद्वयं (भूमिका पीठिका च) वाराणसीस्थसम्पूर्णानन्द संस्कृत विश्वविद्यालयात् क्रमेण 1954 ख्रिस्ताब्दे 1965 ख्रिस्ताब्दे च प्रकाशितम् । अन्तिमखण्डमप्यत्रादेव प्रकाशितम्। पं रामाज्ञापाण्डेयमहोदयेन विरचितं

---

[51] काशी की पां. पर. आ. बलदेव उपाध्यायः पृ. 470 प्र.सं. 1982

व्याकरणदर्शनम् इत्याख्यस्य ग्रन्थस्य भूमिका पीठिका प्रतिमेषु चेति त्रिषु भागेषु च विषयविवेचनस्य दृष्टौ तेषां गभीरगवेषणाबुद्धेः पदे-पदे परिचयो लभ्यते ।

व्याकरणदर्शनभूमिका -

संस्कृत विश्वविद्यालयात् 1954 ख्रिस्ताब्देऽयं भागः प्रकाशितः । अस्य खण्डस्य प्रस्तावनायां पाण्डेयमहोदयः स्वकीयानां चतुर्णां गुरुणाम् (गुरुचतुष्टयस्य) उल्लेखं कृतवान्। तथा च लिखितवान् यत् अन्तिमगुरु पं. शिवकुमारशास्त्रिमहोदयः तस्य विवेचनं श्रुत्वा अतिप्रफुल्लित आनन्दितः चाभवत् ।

अस्य विचक्षण-बुद्धयां विषये एतस्य सहयोगी सतीर्थ्यश्च नारायणशास्त्री अस्य मूल्यांकनं निम्नशब्देषु कृतवान् ।

"नास्त्येकोऽपि तथाविधोऽत्र विषयो यस्मिन्न तेषां मति-

व्यापारं विदधाति सर्वविषयोदञ्चद्धियो ये सदा।

पाश्चात्येषु गवेषणाविषयेष्वप्युच्छलत् कौशला,

रामाज्ञेति यथार्थ नामकलिता राजन्त्यमी पण्डिताः"।।[52]

श्रीरामाज्ञापाण्डेयमहोदयस्य व्याकरणशास्त्रे वैशिष्ट्यम्

श्रीमान् रामाज्ञापाण्डेयमहोदयः व्याकरणदर्शन-भूमिका-पीठिका प्रतिमा चेति त्रिषु ग्रन्थेषु व्याकरणदर्शनस्यनैकान् विषयान् प्रतिपादितवान्।[53] अस्यशास्त्रस्य दर्शनत्वं प्रतिपाद्य अस्य स्वरूपं-सम्बन्ध-विषयाधिकारीति चतुष्टयं व्याकरणदर्शनभूमिकाख्ये ग्रन्थे निरूपितवान्। यद्यपि ग्रन्थकारो भाष्यवाक्यपदीयादि

---

52 काशी की पां. पर. आ. बलदेव उपाध्यायः पृ. 471 प्र.सं. 1983

53 स्फोट सिद्धान्त की अर्वाचीन पुनः रचना डॉ. रमाकान्त पाण्डेयः, भा. दर्शन के 50 वर्ष, ग्रन्थे पृष्ठ-271-286

ग्रन्थाश्रयेणैवेह शास्त्रोपयोगितत्त्वानि व्यातनोत् तथापि क्वचित् तत्स्वातन्त्र्यमपि दृष्टिपथमायाति। यथा च वाचः स्वरूपविवेचने ग्रन्थकारस्य स्वतन्त्राऽस्ति । शाब्दिकनये वाचस्त्रित्वं चतुष्ट्यं वेति विषयो विवादपथमप्यवतरति, हरि-कैयटादिभिः तत्परवर्तिभिः पराया वाचोऽस्वी-कृतोः, नागेशेन च तस्या अङ्गिकारात्। किन्तु रामाज्ञापाण्डेयस्तु परायामेव वाचि शाब्दिकसिद्धान्तानुगुणतां पश्यति। स ग्रन्थे व्याकृताऽव्याकृताभेदेन वाचो द्वैविध्यमुक्तवान्। अव्याकृता वाक् परा, व्याकृताश्च पश्यन्ती मध्यमा वैखर्यः। एवं पराया एब गती द्वौ भेदी कल्पिताविह। व्याकृतात्मिकां पश्यन्यादित्रयी वाणीमाश्रित्य व्याकरणविषयः प्रकृतिप्रत्ययादिविभागः प्रवर्तत इति हि तेषां सिद्धान्तः।

एवमेव लघुमञ्जूषामुपजीव्य आन्तर-वाह्यभेदेन स्फोटस्य द्वैविध्यं प्रतिपाद्य भूषणकृदभिमतस्फोटभेदेष्वभ्रद्दधानः पण्डितप्रवरोऽयं षोडशवि-धामस्य प्रत्यपादयत। तथा चाह ग्रन्थकारः मूले-

'अद्यावधि' प्रचलितानामष्टानां स्फोटानां स्वरूपं विचार्यते। तत्र वर्णस्फोटस्योदाहरणं 'पचति' इत्येतद्घटकपच्कृक्तिव्यङ्ग्यः 'ति' इति प्रत्ययव्यङ्ग्यः स्फोटो वर्णस्फोटः। तार्किकाणां मते यच्छक्तं पदमिति तद्व्यङ्ग्यस्फोटस्यैव शाब्दिकनये वर्णस्फोटशब्देन व्यवहारः इति च प्रभायामुक्तम्।

अस्यां स्थितौ वाक्यार्थज्ञानमस्माकं कृते वाक्यस्फोटस्य विलय एव स्यात्। नापि 'पचति' इत्यादौ पदस्फोटव्यवहारः। तथा चाऽयं विभागो नहि युक्तियुक्तः। अत एव नागेशभट्टो नहि अष्टौ स्फोटान् मञ्जूषायां निरदिक्षत् किन्तु केवलम् आन्तर-बाह्ययभेदेन द्वौ स्फोटौ प्रदर्श्ये जातिव्यक्तिभेदेन द्वावेव भेदी प्रादर्शयत्। तथा च व्यहवारदृष्ट्या बाह्यस्फोटप्रदर्शने प्राप्ते वक्ष्यमाणरीतिरेव अस्माभिरवलम्वनीया। तथा हि व्यक्तिः पदार्थ इति व्याडिमते व्यक्तिस्फोटः । जातिपदार्थवादिनो वाजप्यायनस्य

मते जातिस्फोट इत्येव रूपेण द्वौ स्फोटौ अभ्युपगन्तव्यौ। यदि चावान्तरस्फोट-प्रतिपादने आग्रहः, तर्हि कल्पितानि पदानि, कल्पितपदेषु कल्पितौ प्रकृति-प्रत्ययावादाय वक्ष्यमाणपद्धत्या स्फोटः स्वीकार्यः एवं श्रीमत्पाण्डेयमतानुसारेणैते षोडशभेदाः स्फोटस्य भवन्ति[54]-

1. प्रकृतिस्फोटः
2. प्रत्ययस्फोटः
3. प्रकृतिजातिस्फोटः
4. प्रत्ययजातिस्फोटः
5. अखण्डप्रकृतिस्फोटः
6. अखण्डप्रत्ययस्फोटः
7. वर्णस्फोटः
8. वर्णजातिस्फोटः
9. पदस्फोटः
10. पदजातिस्फोटः
11. अखण्डपदस्फोटः
12. वाक्यस्फोटः
13. वाक्यजातिस्फोटः
14. अखण्डपदजातिस्फोटः

---

54 व्याकरणदर्शन भूमिका - आ. रामाज्ञापाण्डेयः, पृ.-23-24, द्वि. सं. सम्पूर्णा-सं.वि.वि, वाराणसी, 1982 ख्रिस्ताब्दे

15. अखण्डवाक्यस्फोटः

19. अखण्डवाक्यजातिस्फोटश्चेति ।

षोडशभेदात्मकस्य स्फोटस्य विषये विदुषां वैमत्य दरीदृश्यते। यथा-पाण्डेयस्य-समकालिकौ नैयायिकाः न्यायचक्रचूडामणिः श्रीमान् बदरीनाथ शुक्लमहोदयोऽस्यौचित्यम् अस्वीकरोति। अतश्च स व्याकरणदर्शनभूमिके कृन्मतं निराकृतवान्। श्रीमतः पाण्डेयस्य मतं श्रीमच्छुक्लभावभावितैः कैश्चित् शाब्दिकैरपि खण्डितम्। तत्तु राममनोहरमिश्रप्रणीते 'भूषणसारपरम-लघुमञ्जूषयोः सिद्धान्तानां समीक्षा इत्यस्मिन् ग्रन्थे जिज्ञासुभिः द्रष्टुं शक्यते ।

'स्फोटविस्फोटः[55] इत्यस्मिन् निबन्धे न स्फोटस्य षोडशभेदा अपितु अष्टादशभेदाः स्वीकर्तव्या इति श्रीमत्शुक्लमहोदयस्य सम्मतिं वीक्ष्य यः कोऽपि शब्दिकोऽवगन्तुं शक्नोति यद् तत्कृता व्याकरणदर्शनभूमिकायां षोड्शसङ्ख्यया स्फोटस्य परिगणनं नोक्तम्। तत्तु निदर्शनमात्रमेवेति ।

शब्दशास्त्रीयप्रमाणव्यवस्था विषये रामाज्ञामहोदयस्य चिन्तनम् -

भाष्याद्याकर-ग्रन्थेषु शाब्दिकानां प्रमाणव्यवस्था विकीर्णैव आसीत्। तत्र प्रसङ्गात्क्वचित् प्रमायाः क्वचिङ्गात् प्रमाणस्य चर्चा लभ्यते। यथा मानं हि ना अनिर्ज्ञातविज्ञानार्थमुपादीयते, अनिज्ञातमर्थं ज्ञास्यामि।[56] अथ चैतदेवानुवदन् हरिरप्याह-

अनिर्ज्ञातस्य निर्ज्ञातं येन तन्मानमुच्यते।

प्रस्थादि तेन मेयात्मा साकल्येनावधार्यते।।[57]

---

55 'स्फोटविस्फोटः सारस्वती सुषमा 12.1, तमेऽङ्के

56 महामाप्ये, अ. 2. पा.1. आ-3: सू. 55

57 वाक्यपदीयस्य वृत्तिसमुद्देशे पृ. 395

पाण्डेयमहोदयः प्रथमतः शास्त्रे प्रमाणानां व्यवस्थापनोपक्रमः कृतवान्। अर्थ व्याकरणदर्शनभूमिकायाम्[58] तत्तदग्रन्थेषु विकीर्णानि प्रमाण-व्यवस्थोपयोगितत्त्वानि सङ्कलय्य शाब्दिकानां संक्षिप्तप्रमाणविधिं प्रदर्शयत्। तत एव प्रेरणाप्राप्य पण्डितप्रवरो रामप्रसादत्रिपाठी पाणिनीय व्याकरणे प्रमाणसमीक्षा इत्याख्यं ग्रन्थं व्यरचयत्। अयं पण्डितप्रवरो निर्ज्ञातेत्यादि-भाष्यकृदुक्तया श्रेयेण सम्भावितसकलधर्मप्रकारकं ज्ञानं प्रमा, तत्करणं प्रमाणम् इति प्रमाण सामान्यलक्षणमुपन्यस्तवान्। नैयायिकदीनां पूर्वपक्षिणां मतनिरसनपूर्वकमिह प्रत्यक्षमनुमानमर्थापत्तिः शब्दश्चेति चत्वारि शाब्दिकसम्मतानि प्रमाणानि साधितानि । प्रमाणेष्वेतेषु शब्दस्येव प्राधान्यमुक्तमिति नैतेन सम्प्रदायविरोधः।

रामाज्ञापाण्डेयमतानुसारं मोक्षस्वरूपम् -

व्याकरणाध्ययनप्रयोजनेष्वपि मोक्षोऽपरिगणित एव। व्याकरणशास्त्रे मोक्षव्यवस्थाम-दृष्ट्वैव सोमानन्द तच्छिष्य चोत्पलदेव व्याकरणस्य शास्त्रत्वं निराकृत्वन्तौ। भर्तृहर्यादिभिः यद्यपि बहुत्र मोक्षशब्दः पठितस्तथापि तद्वाप्तिमार्गो नैव प्रदर्शितः। रामाज्ञापाण्डेयमहोदयः शास्त्रे प्रथमतयेदं मोक्षतत्वस्वरूपव्याख्यानं कृतवान्।[59]

संक्षेपेण इह एतद् वक्तुं शक्यते यत् पराख्यवाचः साक्षात्कार एवेह मोक्षः। साधको गुरुणोपदिष्टमार्गेण पराख्यां वाचं साक्षात्करोति। अत्र मोक्षावस्थायामपि नहि शक्तीनां विलयः स्वीक्रियते, तासां यथावज्ज्ञाना-वस्थाया एव मोक्षशब्दवाच्यत्वात् । पाण्डेयस्य सिद्धान्तोऽयं गौरीनाथशास्त्रि-महाप्रभु-लालगोस्वामिमहोदयाभ्यामपि पल्लवितः ।।[60]

---

58 व्याकरणदर्शन भूनिका - रामाज्ञापाण्डेय, पृ. 63. द्वि.सं. 1982 ख्रिस्ताब्दे, सं.सं. वि.वि.,

59 व्याकरणदर्शन भूमिका श्रीरामाज्ञा पाण्डेय, पृ.-68. द्वि.सं. 1982 ख्रिस्ताब्दे सं.सं. वि.वि.

60 सारस्वती सुषमा-36.1-4 अंके

5. पं. बालकृष्ण व्यास शास्त्री

(कालः - 1906 ख्रिस्ताब्दतः विंशशतकपर्यन्तम्)

जीवनपरिचयः -

महोदयस्यास्य जन्म राजस्थानप्रान्ते उदयपुरमण्डले 1906 ख्रिस्ताब्देऽभवत्। अस्य पितुर्नाम वंशीलाल आसीत्। अस्य पत्नी रमाख्यायाः तिस्रः पुत्र्यः एकश्च पुत्र उत्पना अभवन्।

अध्ययनकालः

हाई स्कूल परीक्षां (आंग्लमाध्यमेन) राज. मा. शि. बोर्ड अजमेरतः समुत्तीर्य साहित्यशास्त्रिपरीक्षामपि गवर्नमेण्ट संस्कृत कॉलेज बनारसतः समुत्तीर्णवान्। अस्य गुरोर्नाम शोभालालाभिध आसीत् ।

अध्यापनकालः -

महानुभावोऽयं विभिन्नासु संस्थासु स्वीय सेवां दत्त्वा जीवनस्यान्ति-मवेलायां शिवशक्तिपीठ-पुस्तकालयः राजमहल, उदयपुर-राजस्थाने कार्यरत आसीत्।

कृतिपरिचयः -

अनेन बहवोः व्याकरणविषयकग्रन्था विरचिता, संस्कृत वाङ्मयस्य नैका ग्रन्थाश्चानूदिता। अनेन 'पाणिनीय-व्याकरणशब्द-निर्माणस्य अभिनवपद्धति' इत्याख्यपद्यात्मकग्रन्थो विरचितः। अस्य विमोचन 1988 ख्रिस्ताब्दे वर्षेऽभवत् । ततश्च 'पद्यसिद्धान्तकौमुदी प्रथमभागो द्विरूक्तप्रक्रियान्तः प्रकाशितः 1960 ख्रिस्ताब्दे। द्विसहस्रपद्यात्मको द्वितीयोऽपि भागः प्रकाशितः। अनेनानूदितग्रन्थेषु भासकृत मध्यमव्यायोगस्य हिन्दी अनुवादः 1933 ख्रिस्ताब्दे, नीतिशतकस्य (भर्तृहरेः) हिन्दी-अनुवादः 1940 ख्रिस्ताब्दे चादयः प्रमुखाः सन्ति। गंगालहरी

शिवस्तोत्रपञ्चकम्, भक्तमरस्तोत्र समश्लोकी, गोविन्द-दामोदरस्तोत्रञ्च स्फुटकृतयः प्रणीता।[61]

पुरस्कारः

राजस्थान सर्वकारेण सम्मानितः 1985-86 ख्रिस्ताब्दे तदनन्तरञ्च उदयपुरमण्डलस्य जिलाधीशेन सम्मानितः 1986 ख्रिस्ताब्देऽयं महानुभावः।

6. श्रीसुरेशझा शिक्षाशास्त्री

(कालः -5.12.1920 ख्रिस्ताब्दतः विंशशतकपर्यन्तम्)

जीवनपरिचयः -

महोदयस्यास्य जन्म नेपालराज्यमहुतरीमण्डलान्तर्गतसाण्ढा ग्रामे 5.2.1920 ख्रिस्ताब्देऽभवत्। काश्यां निवास कुर्वन्नेव देवलोकं गतवान्।

अध्ययनकालः -

व्याकरणसाहित्याचार्य, न्यायतीर्थः, साहित्यरत्नम् प्रभृतीः उपाधीरवाप्तवान् ।

अध्यापनकालः -

अध्ययनानन्तरमस्य कार्यस्थली राजस्थानप्रदेश आसीत् स राजस्थानजोधपुर-शिक्षाविभागस्य संस्कृत-वरिष्ठाध्यापकपदे कार्यमकरोत् ।

कृतिपरिचयः -

श्री सुरेशझा महोदयः श्लोकसिद्धान्तकौमुदी विलिख्य सम्पादन-मप्यकरोत् । अस्य प्रकाशनम् वाराणस्यां 1982 तमे ख्रिस्ताब्देऽभवत् ।

इह वैयाकरणसिद्धान्तकौमुदीगताः सर्वे विषया यद्यपि श्लोकात्मना समुन्मीलिताः सन्ति, तथापि तेषां प्रतिपादनं भट्टिकाव्य-कवि रहस्य द्वयाश्रयकाव्य-

---

61 पद्यसिद्धान्तकौमुदी- भूमिका' पं. बालकृष्ण व्यासशास्त्री

कौमुदीकथाकल्लोलिनीत्यादिदृशा काव्यमुखेन नास्ति। यद्यपि गुर्जरदेशीयकोविदेन श्रीमदमृतलालशास्त्रिव्यासेन परिभाषेन्दु-प्रभाख्यो ग्रन्थ आर्याछन्दोभिर्ग्रथितः परिभाषेन्दुशेखरस्यैव मन्थनमस्ति । किन्तु श्लोकसिद्धान्तकौमुदीपद्येषु कानिचन काव्यपद्यानि तादृशानि सन्ति यानि शास्त्रिमहोदयस्य सुदुर्लभानि एव। समर्थानां प्रथमाद्वा' इति सूत्रार्थ विश्लेषणाय विरचितं हृद्यं पद्यं द्रष्टव्यम्-

पदं समर्थ परिनिष्ठितं तद्, बोभूयते यत्कृतसन्धिकार्यम् ।

तस्माद् विकल्पेन च तद्धिताः स्युरर्थे विभिन्ने प्रथमादियुक्तात् ।।[62]

विशेषः

झा महोदयं प्रति विदुषां गौरीनाथशास्त्री झा महोदयस्य सम्मतयः श्रीमन्तः सुरेशझामहोदयाः पाणिनीयव्याकरणसिद्धान्तकौमुदी श्लोकबद्धां कृत्वा अन्तेवासिनां कल्याणाय प्रकाशयन्तः विराजन्ते तेषामयं प्रयासः सर्वथा अभिनन्दनीय इति मदीया मतिः। (गौरीनाथ शास्त्री, कुलपति सं. सं. वि.वि. वाराणसी)

7. डॉ. पुष्पा दीक्षिता

(कालः 1.7.1942 तः संस्कृतसेवारता अस्ति)

जीवनपरिचयः -

एषा प्राणाचार्यः पं. सुन्दरलालशुक्लमहोदयस्य सुपुत्री अस्ति। अस्या जन्म 1 जुलाई 1942 ख्रिस्ताब्दे जबलपुरनगरेऽभवत् । अस्य मातुर्नाम सौ. जानकी देवी आसीत्। अस्या विवाहो प्रो. शिवप्रसाददीक्षितेन सहाभवत् । वर्तमानकाले एषा महोदयाऽष्टाध्यायी पद्धत्याधारित व्याकरणशिक्षणे सेवारता अस्ति।

---

62 श्लोकसिद्धान्तकौमुदी-श्री सुरेशझा, पृ. 352 प्र. सं. 1982 ख्रिस्ताब्दे

अध्ययनकालः -

बाल्यावस्थायां एषा दीक्षिता महोदया पितुर्मुखाद् व्याकरणशास्त्र गणितीय पद्धत्या ज्ञातव्यमिति वाक्यं श्रुत्वा श्रुत्वा व्याकरणाध्ययनं कृतवती। ततश्च पूज्यपादं गुरुवर्य आचार्यः पं. विश्वनाथत्रिपाठिनः सिद्धान्तकौमुद्यामधीतवती । चात्राप्य-ध्ययनकाले तस्या चित्ते स एव संस्कारो ध्रुवमासीद् यद्व्याकरणशास्त्रं गणितीय-विधिनैव ज्ञातव्यमिति ।

अध्यापनकार्यम् -

एम. ए. (पीएच.डी.) विद्यावारिधिरित्युपाधिञ्च प्राप्य 1965 ख्रिस्ताब्दतः मध्यप्रदेशे शासकीय महाविद्यालये शिक्षायां प्राध्यापकपदमलङ्करोति ।

कृतिपरिचयः -

अपरपाणिनीति नाम्ना विख्याता आचार्या डॉ. बच्चूलाल अवस्थी महोदयो 'अष्टाध्यायी सहजबोधः' इत्याख्यस्य ग्रन्थस्य प्रणयने दिव्यादृष्टिं प्रदत्तवान् डॉ. पुष्पा दीक्षितां महोदयामिति सा बहुधा लिखितवती। 'अष्टाध्यायी सहजबोध' इत्याख्ये ग्रन्थविरचनकार्ये प्रथप्रदर्शकरूपयोः डॉ. रामयत्न शुक्लः डॉ. रामकरणशर्ममहोदयो स्तः।

अनया द्विरचिता अष्टाध्यायी सहजबोध रचना वैशिष्ट्यपरिपूर्णा मौलिकरचना चास्तीति विदुषां सम्मतयः।

प्रकाशितकृत्तयः

1. अष्टाध्यायीसहजबोधः भाग-1. सार्वधातुकलकार
2. अष्टाध्यायीसहजबोधः भाग-2. आर्धधातुकलकार
3. अष्टाध्यायीसहजबोधः भाग-3. कृदन्तप्रकरणम्
4. अष्टाध्यायी सहजबोधः भाग-4. तद्धितप्रकरणम्

5. आर्धधातुकप्रत्ययों की इडागम व्यवस्था

6. शीघ्रबोधव्याकरणम्

2. स्वातन्त्र्योत्तरकाले प्रणीतानां मूलग्रन्थानां कालक्रमेण परिचयो वैशिष्ट्यञ्च

1. पाणिनीयव्याकरणतत्त्वप्रदीपः

प्रणेता महावैयाकरण पं. दीनबन्धु झा

प्रकाशनकालः 1988 ख्रिस्ताब्दे, दरभंगा, बिहार

मनीषिणां प्रमोदाय पाणिनीय व्याकरणतत्त्वप्रदीपाभिधस्य[63] मौलिकग्रन्थस्य का. सि. द. सं. वि. वि., दरभंगाः, बिहारतः 1988 ख्रिस्ताब्दे वर्षे प्रकाशनमभवत्। अस्य मौलिकता प्रति प्रकरणं प्रस्फुटिताऽस्ति। व्याकरणशास्त्रीय अनेका स्वाभाविको जिज्ञासात्र समाहिता। एतच्छात्रीया अनेके सन्देहा, न केवलमध्येतॄणां चेतांसि विषादयन्ति अपितु पण्डितानामपि चेतो व्याकुलयन्ति। यथा (1.) व्याकरणस्य वेदाङ्गत्वेऽङ्गाङ्गिभावेन तस्यापि वेदग्रहणेन ग्रहणापत्तिः कथं नेति ? (2) लृकारस्योच्चारणं ऌ इतिवत् कार्यम् 'लि' इतिवत् 'लु' इतिवद् वा ? (3) माहेश्वरसूत्रस्य वर्णविन्यासक्रमो मातृकापाठापेक्षया विलक्षणः कथम् ? (4) अनभिधानमित्यस्य क आशयः ? (5) सूत्रप्रत्याख्यानस्थले पाणिनेर्भान्तत्वं कथं नेति ? (6) किन्नाम उच्चारणार्थत्वम् ? (7) षड्विधसूत्राणां स्वतन्त्ररूपेण विस्तृता विवेचनेत्यादि-विषयाणामत्र सप्रमाणं सयुक्तिकञ्च विवेचनं सूक्ष्मेक्षिकया, अथ च सरलशैल्या प्रस्तुतम्।

---

63 लेखः-सदानन्द झा, सं. रा. इन इन्डिया,

ग्रन्थकारः पाणिनीयव्याकरणस्य माहेश्वरसूत्राणां कतिपयपरिभाषाणां च रहस्यमुद्घाटय-तिस्म समासेन पाणिनीयव्याकरणं च प्रदर्शतिस्म। अदसीयभूमिका ग्रन्थाकारेणेव लिखितम्। अस्यामपि नैके मौलिका विचारा द्रष्टुं शक्यन्ते । ग्रन्थाकारोऽत्र पाणिनीयव्याकरणस्य महत्त्वे पञ्चहेतून-प्रत्त्यपादयत्।[64] यथा-

(i) तपः प्रसादित-महेश्वरप्रभावसमासादित प्रज्ञा-विशेषाचार्य प्रणीत्तत्त्वम्।

(ii) श्रुतिरूप माहेश्वरसूत्रमूलकत्वम्।

(iii) प्रमाणभूताचार्यप्रणीतत्वम्।

(iv) दर्भपवित्रपाणि-पवित्रदेशप्राङ्मुखोपविष्टतया पवित्रीभूयनिर्मितत्त्वम्।

(v) महाप्रयत्नपूर्वकं सावधानतया रचितत्त्वं चेति।

ग्रन्थेऽस्मिन् ग्रन्थकारेण झामहोदयेन पाणिनीया शैली मुख्यरूपेण प्रदर्शिता।

1.1 कौमुदी मूलार्थ-विद्योतिनी

प्रणेता-महावैयाकरण पं. दीनबन्धु झा

रचनाकालः 1918 ख्रिस्ताब्दे

प्रकाशनकालः 1977 ख्रिस्ताब्दे

ग्रन्थेऽस्मिन्कारकभागपर्यन्तं वैयाकरणसिद्धान्तकौमुद्याः क्लिष्टतं मूलार्थः प्रकाशितः। सिद्धान्तकौमुदीग्रन्थं सुस्पष्टीतमत्र पं. दीनबन्धुमहाभागेन।

---

64 भूमिका-समासशक्तिदीपिका द.सं.वि.वि. बिहार-1977 ख्रिस्ताब्दे

1.2 समासशक्ति दीपिका

प्रणेता-महावैयाकरण पं दीनबन्धु झा महोदयः

रचनाकालः 1928 ख्रिस्ताब्दे

प्रकाशनकालः 1977 ख्रिस्ताब्दे

ग्रन्थेऽस्मिन् ग्रन्धकारः शाब्दिकाभिमते समासगताजहत्स्वार्थावृतिः बहवः प्रमाणोपन्यासेन विचारितवान् ।

तद्यथा-

ग्रन्थकारः स्वीयाऽप्रतिमया प्रतिभया समासे शक्तिस्वीकारविषये एवं प्रत्यपादयत्-

नैवलक्षणया लिङ्गभेदो भवति कर्हिचित्।

तद्दर्शनात्तु निर्णेया शक्तिः समासिकी बुधैः ।।[65]

अस्याऽयं तात्पर्यमस्ति यत् दार्शनिकाः लक्षणावृत्त्या सर्वत्र निवोढुं न शक्ष्यन्ति। लक्षणावृत्तिर्हि न खलु लिङ्गभेदप्रयोजिका, समासे च लिङ्गवैपरीत्यामपिदृश्यते अत एव वैयाकरणसम्मतं मतं स्वीकरणीयमेव। नोचेत्-

श्रवसो कुवलयमक्ष्णोरञ्चनमुरसो महेन्द्रमणिदाम।

वृन्दावनतरूणीनां मण्डनमखिलं हरिर्जयति।।

इति कविकर्णपूरविरचिते श्लोके कुवलयादौ, यथा च गङ्गाया घोषः मञ्चाः क्रोशन्तीत्यादौ च। (यत्र लिङ्ग व्यत्यासो न भवति) लक्षणाया निर्वाहेऽपि यशोधन इत्यादि समासस्थलेनिर्वाहो न स्यात् ।[66]

---

65 सं. रा. इन इन्डि, इं. ग्रन्थे सदानन्द झा विरचितो लेखः

66 समासशक्ति दीपिकाया भूमिकायाम् द.सं.वि.वि. बिहार-1977 ख्रिस्ताब्दे

अत्र धनशब्दस्य नित्यनपुंसकलिङ्गत्वात्। कृतायामपि लक्षणायां इष्टार्थ बोधेऽपि लिङ्गविपरिणामः कथं स्यात्। तदभावे च अन्यपदार्थगतं लिङ्गज्ञानं कथं स्यात्। अत एव सर्वैः लिङ्गभेदप्रयोजिका समासनिष्ठा शक्तिरेकार्थौ भावरूपा स्वीकार्येव इति।

1.3 उपसृष्टधात्वर्थसंग्रहः

प्रणेता-दीनबन्धु झा

रचनाकालः - 1937 ख्रिस्ताब्दे

प्रकाशनकालः - 1981 ख्रिस्ताब्दे

महावैयाकरण पं. दीनबन्धुझामहोदयेन 1936 ख्रिस्ताब्दे विरचितस्यास्य ग्रन्थस्य 1981 ख्रिस्ततमवर्षे का, सि.द.सं. वि. विद्यालयात् प्रकाशनमभवत्। ग्रन्थेऽस्मिन् झा महोदयेन कस्मिन् धातौ कति के चोपसर्गा युज्यन्ते, के च तेषामर्था इति विषयस्यैकत्रैव कोषरूपेण संकलनङ्कृतम् ।

अर्थप्रदर्शनानन्तरं प्रतिधातुविषयमुदाहरणानां प्रयोगं पद्यं विरच्य प्रस्तुतञ्चकार। एतेन प्रस्तुतग्रन्थेन काव्यानन्दोऽपि लभ्येत। किन्तुहन्त! अञ्च धातुतः दिश् धातुपर्यन्तमेव पद्योदाहरणं विश्वयितुं पारयामास महावैयाकरणः। ततोऽग्रे समुद्यतोऽपि दुर्भाग्यवशान्न पूर्तिकर्तुमशक्नोत् । अत एव मूलपुस्तके तद्भागोपरि लिखितमस्ति-

दृङ्-हेञ् सम्पादनीय पद्योदहरणदानेन इति।

पुस्तकेऽस्मिन् यदा कदाऽर्थनिर्देशः कृत्वापि प्रयोगाणां पुरतोऽर्धनिर्देशो न दृश्यते यस्य पूर्तिः प्रकाशनकाले शशिनाथ झा महोदयेन कृतः।

1.4 वैयाकरणभूषणसारदीपिकाः

प्रणेता-दीनबन्धुझा

रचनाकालः - 1945 ख्रिस्ताब्दे

प्रकाशनकालः- 2002 ख्रिस्ताब्दे

व्याकरणशास्त्रस्य दार्शनिकग्रन्थे वैयाकरणभूषणसारे महावैयाकरण पं. दीनबन्धु झा महोदयेन दीपिका नाम्नी व्याख्या विरचिता।

अत्र दार्शनिकतत्वानां गूढरहस्यानाञ्च विमर्शः कृतो ग्रन्थकारेण।

1.5 लिङ्गवचनविचारः

प्रणेता-दीनबन्धुझा

प्रकाशनकालः- 1954 ख्रिस्ताब्दे

ग्रन्थेऽस्मिन् शब्दशास्त्रीयं लिङ्गवचनं च सरलयाऽपि पाण्डित्यपूर्णता शैल्या स्पष्टितम् । दीनबन्धुझामहोदयः महाभाष्यीयं गुह्यं रहस्यमुद्घाटयन्नपि स्वीयां मौलिकतां प्रकटयति। प्रायेण समे शाब्दिका जानन्ति यच्छब्दशास्त्रे शास्त्रीयं लिङ्गमाश्रीयते। तत्र सत्त्वरजतमसामुपचयः पुंस्त्वम्, अपचयः स्त्रीत्वम्, साम्यं क्लीबत्वञ्चेति विपश्चितामेव व्यक्तम् । अत्र विशेषरहस्यमुद्घाटयन् ग्रन्थकारो स्पष्टयति यद् गुणानां साम्य क्लीबत्वं वक्तुं न शक्यते। साम्ये हि प्रलयमेवेष्यते ।

अत एवात्र साम्यशब्देन त्रयाणां गुणानां कस्यचिदेकस्य समः स्थितिरूपः परिणामः क्लीबत्वेन स्वीकार्यः । सांख्यशास्त्रस्य मतानुसारं समे पदार्थाः त्रिगुणानां परिणामः सन्ति। तत्र कस्मिन्नपि पदार्थे सत्त्यादिषु एको गुणो यदोपचीयते तदाऽपरोऽपचीयते, अन्यश्च नोपचीयते, नापचीयते च. स तु समस्तिष्ठति। एवमेव यदा कस्यचिद् गुणस्योपचयस्य विवक्षा तदा पुंस्त्वम्, अपचयस्य स्त्रीत्वम्, साम्यस्य क्लीबत्म् । एवं ग्रन्थकारः सत्त्वादिगुणपरिभाषाः शास्त्रीयलिङ्गत्त्वेनऽमन्यत् । अत्र

स्वमतस्य पुष्ट्यर्थे कैयटवचनं प्रमाणत्वेन ग्रन्थकारोऽलिखत् यत् सरुप-सूत्रस्थ गुणानां सत्त्वरजस्तमः परिणामरूपाणां शब्दादीनां वृद्धिह्राससमध्यमावस्थाः शब्दैकगोचरा लिङ्गत्त्वेन परिगृह्यन्ते इति। एवमस्मिन्नग्रन्थे लौकिकं लिङ्गमपि निरूपितमस्ति। एवं विदग्धानां चेतश्चमत्कुर्वन्ति तादृशा लिंगववचनविषयस्यानेके विचारा अत्र प्रतिपादिताः सन्ति। प्रायेण सर्वो मन्यते यद दाराक्षत शब्दौ भूम्नि पुंस्त्वे च प्रयुज्येते। किन्त्वत्र दारशब्दस्य स्त्रीत्वे स्त्रियाम् एकवचनेऽपि, अक्षतशब्दस्य च क्लीबेऽपि प्रयोगः साधुतयाऽङ्गीकृतः ।[67]

2. परिभाषेन्दुप्रभा भावप्रकाशिका च श्रीमदमृतलाल शास्त्रिणः

प्रकाशनवर्षम्-1963 ख्रिस्ताब्दः (2020 संवत्सरम्)

श्रीमदगृतलालशास्त्रिकृतोऽयं परिभाषेन्दुप्रभाख्यो ग्रन्थः परिभाषेन्दुशेखररय पद्यानुवादः। ग्रन्थस्यास्य दार्शनिकतत्त्वान्याविष्कर्तु परिभाषेन्दुप्रभाकारेण भावप्रकाशिकेत्याख्या टीकाऽपि प्रणीत।। यस्याः प्रकाशनं गीताविद्यालय, जामखंभालिया, सौराष्ट्रतोऽभवत्। अत्र यावत्परिभाषार्थः सपरिष्कृतिः कारिकास्वेव प्रथितः। एतत्पर्यालोचनेन ग्रन्थकर्तुर्व्याकरणशास्त्रे प्रभुत्वं कारिकाविरचननैपुण्यं च सम्यक् प्रतीयते। परिभाषार्थस्य परिष्कृतस्य लक्ष्ये सङ्गतिरपि कारिकास्वेव निबद्धा।

ग्रन्थस्यास्य प्रथमप्रकरणे शास्त्रत्वसाधके पञ्चत्रिंशदुत्तरचतुः शतं कारिकाः, बाधबीजाख्ये द्वितीयप्रकरणे चतुरुत्तरचतुःशतं कारिकाः शेषार्थनिरूपणाख्ये तृतीयप्रकरणे द्वात्रिंशदुत्तरचतुःशतं कारिकाः च निर्माय समस्तवैयाकरणसिद्धान्ताः समुपवर्णिताः। इतरवर्णनशून्यम् अलङ्कारादिवर्जितं केवलव्याकरणपदार्थानामेव कारिकासु समुपवर्णनमस्य भूयसीं प्रतिभां प्रख्यापयति।

---

67 स्वा. व्या-भारते मिथिलायां व्या. शास्त्रीय ग्रन्थलेखनपरम्परा' सदानन्द झाः सं. राइटिंग इन इन्डिपेनडेन्ड इंडिया, पृ.

3. पाणिनीयप्रबोधः

प्रणेता पं. गोपालशास्त्री 'दर्शनकेसरी'

प्रकाशनकालः 1970 ख्रिस्ताब्दः, सं.सं. वि.वि., वाराणसी

पाणिनीयप्रबोधस्यास्य ग्रन्थस्याध्ययनाध्यापननिमित्तकं यदावश्यकं ज्ञानं तद् यथा ग्रन्थप्रणेतृभिर्दर्शनकेशरिभिरनुभूतं न तथाऽन्यैरनुभवितुं शक्यते। अतस्तैस्तैरनुभवैः सम्प्राप्त विषयोपयोगि समग्रं ज्ञानतत्त्वं ग्रन्थस्यास्य प्रथमसंस्करणे शास्त्रिवर्यैर्यत्प्राक्कथनं व्यलेखि तत्रैव सप्रपञ्चं समुपस्थापितम्। अतो ग्रन्थपरिचायकं प्राक्कथनमिदमत्यन्तं महत्त्वपूर्णमिति । ग्रन्थस्यान्ते छात्राणां सौविध्याय सर्वतः पूर्व पाणिनीयशिक्षा पञ्जिकाख्यभाष्यसहिता प्रथमे परिशिष्टे समुपन्यस्ता। द्वितीये परिशिष्टे सम्पूर्णोगणपाठः तृतीये परिशिष्टे नागेशसम्मतपरिभाषापाठः चतुर्थे परिशिष्टे पाणिनीयप्रबोधे समागता ये धातवस्तेषां क्रमेण संग्रहः, पञ्चमे परिशिष्टे लिङ्गानुशासन-सूत्रपाठः, अन्तिमे षष्ठे च परिशिष्टे पाणिनीयप्रबोधे समागतानां सूत्राणामकारादिक्रमेण सूची वर्तते ।[68]

श्री गिरिजेशकुमारदीक्षितेन सम्पादितेऽस्य ग्रन्थस्य द्वितीयसंस्करणे गणपाठादयोऽपि संयोजिताः। श्रीशास्त्रिणा तु ऋजुपाणिनीयग्रन्थान्तर्वर्ति-सूत्राणामेव बालोपयोगि व्याख्यानमिह कृतम्। अष्टाध्यायीसूत्रक्रमाश्रयणात् लघुकौमुद्याद्यपेक्षया कश्चन विशेषोऽत्र लक्ष्यते।

4. व्याकरणदर्शनभूमिका

प्रणेता पं. रामाज्ञापाण्डेयः

प्रकाशनकालः- 1954 ख्रिस्ताब्दः, सम्पूर्णानन्द स. विश्वविद्यालय, वाराणसी

व्याकरणदर्शनस्य स्फोट-शब्दाद्वैतवादप्रभृतिसिद्धान् खण्डनमण्डन-विधयाव्याख्यातवन्तो दार्शनिका दर्शनत्वं सम्मानयन्त्येव । तेषु तेषु दार्शनिकेषु

---

68 भूमिका पाणिनीय प्रबोधः - पं. गोपालशास्त्री दर्शनकेसरी

महोदयरामाज्ञापाण्डेयस्य-स्थानमप्यग्रगण्योऽस्ति। अनेनविरचिता व्याकरणदर्शन-भूमिकारचनाऽस्ति। सा चेयं भूमिका षट्स्वाध्यायेषु निरूपिताऽस्ति । तत्र च शब्दार्थनिरूपणाध्यायः प्रथमः, शब्दार्थसम्बन्ध-निरूपणाध्यायो द्वितीयः, साधन-निरूपणाध्यायस्तृतीयः, गुणनिरूपणाध्याय-श्चतुर्थः, क्रियानि-रुपणाध्यायःपञ्चमः, वृत्तिनिरूपणाध्यायः षष्ठ इत्येवं स्थितिः षण्णामध्यायानाम् ।[69]

प्रथमाध्यायः- शब्दार्थनिरूपणाध्यायनामके प्रथमाध्याये व्याकरणस्य स्वरूपवर्णनप्रसङ्गे पश्यन्त्या वाचो वेदरूपत्वं प्रतिपादयता ग्रन्थकारेण व्याकरणं सर्वपदार्थापेक्षया पवित्रमिति सोल्लासं प्रतिपादिवान्। प्रकृतेर्मातृरूपत्वम् प्रत्ययस्य च पितृरूपत्वम्, उभयोः सम्भूतिस्थानं पश्यन्ती एव। एतयोरर्थसम्बन्धोऽपि तत्रैवानुस्यूतोऽवतिष्ठते, शब्दार्थसम्बन्धस्य नित्यत्वात् ।

प्रतिभायाः प्रणवस्य च पश्यन्त्या सहैक्यमपि द्रष्टव्यम्। तदनु, पाणिनेः शिष्टत्वम्, व्याकरणस्य सर्ववेदपारिषद्यम् अष्टाध्यायीस्वरूपं, इन्द्रियविषययोः संस्कारः बाह्यन्तरभेदेन स्फोटद्वैविध्यम्, शब्दसृष्ट्युत्पत्तिप्रक्रिया चेत्यादयो विषयाः सूक्ष्मेक्षिकया विवेचिताः सन्ति ।

तत्र शब्दसृष्टिप्रक्रियाप्रस्तावे इत्थं निरुक्तमस्ति - 'यथा हि सूक्ष्मं वटबीजं विवृद्धं सदाविर्भूतचैतन्यं वृक्षात्मना दृश्यते, तथैव तत्रस्फोटरूपं शब्दब्रह्म-स्फुटत्यर्थोऽस्मादिति व्युत्पत्तिविशिष्टं सत् सूक्ष्मतम सूक्ष्मतरसूक्ष्म स्थूलरूपेण प्रकाश-रूपं वैखरीपर्यन्तशब्दराश्यात्मना विमर्शात्मना चार्थकक्षामाश्रित्य सत्त्वरजस्तमोरूपेण बुद्धयहङ्कारेन्द्रियादिना सूक्ष्मस्थूल-भूतात्मना च परिणमति।

तत्र सर्वमपि बीजं वर्तुलाकृति अङ्कुरोत्पत्तिकाले दलद्वयेन विभक्तं भवति तथैव प्रणवरूपः शब्दोऽपि बिन्दुर्वर्तुलाकृतिरेव सृष्ट्युन्मुखत्त्वे विभक्तो भवति। पुनश्च

---

69 व्याकरणदर्शनभूमिका-द्वि. सं. स. सं. वि. वि. वाराणसी. 1982 ख्रिस्ताब्दे

ऋक्सामयजुरादिप्रातिशाख्यानुसारेण शैवशाक्ततन्त्रानुसारेण च वर्णोपन्यासः सोपपत्तिकं कृतोऽस्ति। तत्र सर्वेऽपि विषया आर्षप्रभावप्रभवा इत्यप्युक्तम्।

तदग्रे च प्रत्यक्षानुमानार्थापत्तिशब्दानुपलब्धयः पञ्च प्रमाणानि, तेषु च शब्दस्य मुख्यं प्रमाणत्वमभ्युपेतम्। स्फोटविभागः कल्पनाप्रसूतः अष्टानां पदार्थानां स्वरूपं चालोचनीयमस्ति।

द्वितीयाध्यायः - शब्दार्थसम्बन्धनिरूपाख्ये द्वितीयाध्याये वाच्यवाचक-भावकार्यकारण-भारूपसम्बन्धविमर्शः कृतोऽस्ति।

तत्र बहुशो वाक्यपदीयं प्रमाणत्वेन निर्दिष्टमस्ति ग्रन्थकारेण।

तृतीयाध्यायः - गुणनिरूपाणाख्ये तृतीयाध्याये- 'सत्वे निविशतेऽपैति' इत्यादिना गुणस्वरूपं सोपपत्तिकं निरूपितम्। एतत्प्रसङ्ग एवं-

जात्युत्कर्षो युगे ज्ञेयः सप्तमे पञ्चमेऽपि वा।

व्यत्यये कर्मणा साम्यं पूर्ववच्चाधरोत्तरम्।।[70]

इति याज्ञवल्क्यस्मृतिरपि सम्यग् विवेचिताऽस्ति।

चतुर्थाध्यायः - साधननिरूपणचतुर्थेऽध्याये साधनपदव्यपदेश्यानि कारकाणि निरूपितानि सन्ति। तत्र कृधातोर्निष्पन्नानि कर्तृ-कर्म-कारण-अधिकरणपदान्येव स्वार्थभूतं वास्तविकं कारकं बोधयन्ति। एवं च कर्मादीनि चत्वार्येव मुख्यानि कारकाणि। सम्प्रदानापादानयोस्तु न मुख्यं कारकत्वम्, अपि तु गौणमेय। एतत्सर्वमस्मिन्नध्याये पाण्डेयमहोदयेन सुस्पष्टीकृतम्।

पञ्चमाध्यायः- क्रियानिरूपणाख्ये पञ्चमेऽध्याये-धात्वर्थभूता क्रिया, तत्परिच्छेदका भूतभविष्यदादिकालभेदाश्च निरूपिताः सन्ति। स्वातन्त्र्याऽपरपर्याया कालशक्तिः लिङ्गसंख्यादिश्च सोपष्टम्भं निरूपिताः सन्ति।

---

70 याज्ञवलक्यस्मृतिः आचाराध्यायः डॉ. उमेशचन्द्र पाण्डेयः पृ. 43, 1-96, 2006

षष्ठाध्यायः - वृत्तिनिरूपणाख्ये षष्ठेऽध्याये कृद्वृत्तिं परित्यज्य चतस्र एव वृत्तयः सिद्धान्तरूपेण स्पष्टिताः। यत्तु श्रीनागेशभट्टेन एकशेषं विहाय चतस्रो वृत्तयो व्याख्याताः तन्मतं खण्डितमत्र।

व्याकरणदर्शनभूमिकाया वैशिष्ट्यम्

स्फोटभेदनिरूपणान्ते सृष्टिक्रमो निरूपितो व्याकरणदर्शन-भूमिकायामस्याम्। यद्यपि पाणिनीयेषु सूत्रेषु कात्यायनीयेषु वार्तिकेषु पातञ्जले च महाभाष्ये सृष्टिक्रमो न विवेचितः तथापि श्रीपाण्डेयमहोदयेन पाणिनीयव्याकरणसिद्धान्तानवलम्ब्य श्रुतिप्रामाण्यानिरुक्तसन्दर्भाच्च निरूपणं कृतम्। निरुक्तमाश्रित्य परिणामवाद आस्थितो न तु विवर्तवादः। स्फोटाख्यं शब्दब्रह्म प्रकाशरूपं वैखरीपर्यन्तशब्दराश्यात्मना विमर्शात्मना चार्थश्रेणिमवलम्बमाणं सत्त्वरजस्तमो-रूपेण बुद्धयहङ्कारेन्द्रियादिना सूक्ष्मस्थूलभूतात्मना परिणमते। सृष्टिप्रकरणे यद्यपीन्द्रियाणामपि सृष्टिर्भाष्यादपि प्रतीयते, तथापि तस्या व्याकरणविषयाभावान्नेह ग्रन्थे वर्णनम्। ज्ञानस्य शब्दरूपेण परिणामो वर्णितः।

एवं तावच्छब्दसृष्टिप्रक्रियामभिधाय वैखरीरूपः सूक्ष्मः शब्दो व्याकरणेनानुशिष्यते। तत्र स्वरव्यञ्जनसम्भूतिम् वर्णोच्चारणप्रक्रियां चोक्त्या **'वायोरणूनां ज्ञानस्य'** इति वाक्यपदीयोक्तो दर्शनभेदो विवेचितः। ततो वर्णानां स्थानप्रयत्नविवेको विस्तरेण विभावितः प्रातिशाख्यशिक्षाग्रन्थानामाधारेण। सर्वेषां प्रातिशाख्यानां शिक्षाग्रन्थानां चाधारेण वर्णानां स्थितिरुपवर्णिता, पाणिनीयव्याकरणानुसारेण च विवेचनं कृतम्। तत्र ग्रन्थेषु वर्णानां साङ्गोपाङ्ग यादृशं वर्णनं लभ्यते, न तादृशमन्यत्र। श्रीपाण्डेयेन वैष्णवशैवशाक्ततन्त्रग्रन्थान् पर्यालोड्य वर्णोपन्यासपूर्वकं तत्रत्यः सृष्टिक्रमो दर्शितः। ततो निरुक्तानुसारेण शब्दार्थसृष्टिक्रमो निरूपितः।

परतो द्रव्य-सम्बन्ध-गुण-साधन-शक्ति क्रिया-काल-उपग्रह-लिङ्ग वृत्तिप्रभृतीनि व्याकरणदर्शन तत्त्वानिमुख्यतो वाक्यपदीयमाश्रित्य साधीयो विवेचितान्यस्मिन् व्याकरणदर्शनभूमिका भागे। व्याकरणदर्शन-प्रतिष्ठापनादिशि श्रीपाण्डेयमहाभागस्य प्रयासोऽयं आदिमोऽस्ति। षट्सु अध्यायेषु प्रतिष्ठापिता व्याकरणशास्त्रदर्शनभूमिकैषा विशिष्ट-रचनाऽस्ति। या पञ्चमे विश्वसंस्कृतपरिषन्महोत्सवावसरे सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन प्रकाश्यमाना सती बहुजन हिताय बहुजन सुखाय च समर्पिताऽस्ति ।

5. व्याकरणदर्शनपीठिका

प्रणेता पण्डितश्रीरामाज्ञापाण्डेयः

(प्रकाशनकालः- 1965 ख्रिस्ताब्दः, सं.सं. वि.वि. वाराणसी)

पण्डित श्रीरामाज्ञापाण्डेयविरचितस्य व्याकरणदर्शनस्य द्वितीयोभागो व्याकरणदर्शन-पीठिकाख्यः 1965 ख्रिस्ताब्दे वाराणसेयसंस्कृतविश्व-विद्यालयेन प्रकाशितः। अस्मिन् व्याकरणदर्शनस्य पीठिकाख्ये द्वितीये भागे शिक्षाग्रन्थेषु प्रातिशाख्येषु च प्रतिपादिता विषया दशसु दलेषु प्राधान्येन समालोचिताः ।[71]

प्रथमे दले - शिक्षारूपस्याङ्गस्याध्ययनोपज्ञाप्रयुक्तो वर्णोच्चारणशैल्या-रत्याग, शिक्षकस्य प्राधान्यम्, शब्दस्य स्वरूपम्, तदीयद्रुतादिवृत्तीनां विचारः, तत्प्रसङ्गे प्रदीपग्रन्थमण्डलम्, उद्योतटीकाखण्डनम् च, द्वयोर्वर्णयोरुच्चारण-मध्ये कियान् कालः ? एकस्यापि वर्णस्य स्थानभेदेन कालभेदः वृत्तिभेदेन कालभेदोऽपि न वर्णभेदः, विलम्बितायां शाकटायनस्य मतभेदः वर्णस्फोटयोर्विचारः एते विषया वर्णिताः सन्ति।

---

[71] व्याकरणदर्शन पीठिका - पं. श्री रामाज्ञापाण्डेयः, द्वि. सं.सं.सं. वि.विध वाराणसी

द्वितीये दले- शब्दस्य ज्ञानरूपत्वं वाक्यपदीयादिप्रति-पादिताभिरनेकाभिर्युक्तिभिः सम्यग्निरूपितमस्ति ।

तृतीये दले - नित्यत्वानित्यत्वाभ्यां शब्दस्य द्वैविध्यम्, आणवत्वं वायवीयत्वं वा, नित्यत्वे विवर्तपरिणामो वा? एते विषयाः प्रतिपादिताः सन्ति ।

चतुर्थे दले- 'उद्यती क्रियाशक्तिर्नादः, नादाद् बिन्दुः तस्य द्वैविध्यम्, पुनरपि द्वैविध्यम्, अथ स्वराः अथ व्यञ्जनानि इमे विषयाः निरूपिताः सन्ति ।

पञ्चमे दले- उद्यती क्रियाशक्तिर्नादः' अत्र विषये शैव शाक्ततन्त्राणि अनुसृत्य वर्णानां क्रियाशक्त्यादिविषये विशदो विचारः कृतोऽस्ति ।

षष्ठे दले- वर्णानां पञ्चमहाभूतबोधकत्वम्, बीजमन्येषु वर्णानां संख्या, तदुच्चारणकालश्च, वर्णानामुत्पत्तिस्थानानि, मातृकाशब्दव्युत्पत्तिः, तत्र शब्दसृष्टिप्रक्रिया, अन्ते च षोडशस्वराः, कादीनि व्यञ्जनानि च विशदं निरूपितानि सन्ति ।

सप्तमे दले - प्रातिशाख्यमपि व्याकरणविशेष एव, तत्र ऋक्प्रातिशाख्यानुसारिणी वर्णविषयिणी चर्चा, व्यञ्जनविषयिणी चर्चा, संहिताविषयिका चर्चा चतुर्विधसन्धिविषयिका, वर्णानां प्रकृत्तिविषयिणी, स्थान प्रयत्नविषयिणी च विस्तृता चर्चा कृताऽस्ति ग्रन्थकारेण।

अष्टमे दले - वर्णानामात्मविशेषगुणकथनान्तरमिदानीं तेषां दोषविशेषाः क्रमशो निरूपिताः । तत्र प्रथमम् आयः, उपायः व्यथनश्चेति त्रयो दोषा निर्दिष्टाः। आयो नाम असतो वर्णस्योपजनः, यथा 'द्वयामि' इत्यत्र पुरस्तादनुनादः अर्थाद ह

इत्यतः पूर्व 'अव' इत्याकारो ध्वनिः। अपायो नाम सतोऽपकर्षः, यथा 'ऊनयीः' इत्यत्र यकारस्यानुच्चारणम् । व्यथनं नाम सतोऽन्यथाश्रवणम् यथा 'रथ्या' इत्यत्र थकारस्य सकारवच्छ्रवणम् ।

एवमेव निरस्त-व्यास-पीडन-अम्बूकृत-सन्दष्ट-विक्लिष्ट-ग्रस्त प्रभृतयो दोषाः संकीर्तिताः । पुनश्च प्रातिशाख्यरीत्या ग्राम-प्रतीहार-निरास-विक्लेश- अतिस्पर्श असौकुमार्य अधिकश्वास-पीडन-संस्थान-प्रभृतयो दोषाः सुष्ठुनिर्दिष्टाः ।

ततः परं वैदिकवाक्यान्युदाहृत्य दोषोद्घाटनं कृतमस्ति, यथा- शुनश्शेपो यगह्वद गृभीतः[72] इति ऋग्वेदमन्त्रे शकारस्थाने विरागोच्चारणं दोषः। 'अन्तमहांश्चरति रोचनेन[73] अस्मिन्नपि ऋङ्मन्त्रेऽनुनासिकामकृत्वाऽनुस्वारोच्चारणं दोषः ।

एवमेव 'दीर्घायुः', 'सूर्यः', 'सतदीर्तिः, 'ऊर्जम्' एषु रेफात् पृथक्कुर्वन्ति, केनचित्स्वरेण व्यवदधतीत्यर्थः, स च दोषः। एवमेव इ-3. इत्येतयोः सन्धौ कासुचिद् विवृत्तिषु सन्ध्यक्षररयोच्चारणं परस्परादर्शनं च क्रियते, तौ दोषौ। अन्ततश्चैते बहवो दोषा दिङ्मात्रेण दर्शिताः ग्रन्थकारेण।

नवमे दले - यद्यपि यजुर्वेदी प्रातिशाख्यानुसारं दोषादिविचारः कृतोऽस्तिः तथापि य एव लौकिकास्त एव वैदिकास्त एव तेषामर्थाः 'इत्युव्वटभाष्योक्त्या' लौकिकशब्देष्यपि स्वरसंरकारयोरपेक्षा समाद्रियते। तदनु वर्णानां कारणभूतानि वायुः खात्' (य.मा.1.6) इत्यादीनि सूत्राण्युपन्यस्तानि। अग्रे च वर्णानां करणं जिह्वाग्रादि प्रदर्शितमस्ति। सूत्रकारमते द्वित्वविधानात् स्फोटनाख्यो दोष उक्तोऽस्ति। 'अथातो

---

[72] ऋक सं. 2.24.12

[73] ऋक. सं. 3.55.1

वर्णसमाम्नाय व्याख्यास्यामः' (य.प्रा. 81) इत्यनेम् सूत्रेण वर्णसमाम्नायस्योपक्रमो विहितः। तत्र वर्णानां संख्या, वकारस्य त्रैविधम्, स्वरितस्पष्टविधत्वम्, स्वराणां सप्तविधत्वं साधु निरूपितमस्ति।

दशमे दले - तैत्तिरीयप्रातिशाख्यमधिकृत्य वर्णानां स्वरूपोच्चारणपद्धतिः प्रदर्शिताऽस्ति। तत्रादौ पञ्चभिः सूत्रैरेकपञ्चाशत्संख्याका वर्णा गणशो निर्दिष्टाः सन्ति। तत्र समानाक्षरसंज्ञकानां वर्णानाम् अवसाने ह्रस्वात् परस्य नासिक्यस्य द्विमात्रिकस्य, नानाविधस्य स्वरितस्य, 'अथशब्दोत्पत्तिः' (तै. प्रा. 2.1) इत्यादिनिः सूत्रसमूहैः वर्णोपादानकारणी-भूतध्वनीनाम्, वर्णानां स्थानकरणादीनाम्, कण्ठ्योरस्यभेदेन द्विविधस्य हकारस्य वायोरणूनां ज्ञानस्य शब्दत्वापत्ति-रिष्यते,[74] इति सिद्धान्तस्य, एकविंशतिसंख्याकानां यमानाम् परा-पश्यन्ती मध्यमा-वैखरीणां चतसृणां वाचाम् तत् तत् प्रातिशाख्यानुसारिण्या वर्णोच्चारणसाधनीभूतस्थान-करणादीनां सम्यग् विचारः कृतोऽस्ति ग्रन्थकारेण।

ग्रन्थस्यान्ते परिशिष्टद्वये तत्तद्देशीयपुरुषाणां भेदाद् वर्णोच्चारण-प्रक्रियाभेदः समीचीनयुक्तिभिर्महानुभावेन ग्रन्थकृता प्रदर्शितः स च शुद्ध-वर्णोच्चारणे महदुपकारी अस्ति। प्रथमे परिशिष्टे भाषाविज्ञानदृष्ट्या मानवीयस्य स्वरोच्चारणयन्त्रस्य वर्णोच्चारणप्रक्रियायाश्च सचित्रं विवरणमुपस्थापितम्। द्वितीये परिशिष्टे च निगमागमविवेकः कृतः।

व्याकरणदर्शनभूमिकाख्ये प्रथमे भागे संक्षेपेण प्रतिपादिता वर्णोच्चारण-प्रक्रियाऽत्र विस्तरेण प्रदर्शिता अस्ति। पण्डितश्रीरामाज्ञापाण्डेयमहोदया-नुसारेण निरुक्तप्रातिशाख्यशिक्षादि-प्राचीनैर्ग्रन्थैराधुनिकेन भाषाविज्ञानेन च सहैव व्याकरणाध्ययनं सर्वाङ्गपूर्ण भवतीति ग्रन्थस्यालोडनेन विलोडनेन च वक्तुं शक्नोगि।

---

[74] वा. प. 10.108

6. व्याकरणदर्शनप्रतिमा

प्रणेता पण्डितश्रीरामाज्ञापाण्डेयः

(प्रकाशनकालः- 1979 ख्रिस्ताब्दे)

श्रीमता रामाज्ञापाण्डेयेन भूमिकापीठिकाप्रतिमाख्येषु त्रिषु प्रकरणेषु महता समारोहेण व्याकरणदर्शनं प्रतिपादितम्। त्रिषु प्रतिमाख्यस्यान्तिमस्य प्रकरणस्य प्रकाशनं 1976 ख्रिस्ताब्दे सं. सं. विश्वविद्यालयेन जातम् ।

अत्र केचन नवीना विचारा महता परिश्रमेण निरूपिताः सन्ति। अस्मिन् खण्डे भूमिकायाम् उपक्रान्ता विषयाः विस्तरेण वर्णिताः। शब्दब्रह्मणः प्रतिमां चत्वारि शृङ्गा आदिमन्त्रैरुपक्रान्ता स्फुटं स्थापिता। तद्यथा-

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।

त्रिधा बद्धो वृभषो रोरवीति महो देवो मर्त्या आविवेश।।[75]

यद्यपि महाभाष्यकारेण पतञ्जलिना अस्य मन्त्रस्यार्थो वक्ष्यमाणो निर्दिष्टः चत्वारि शृङ्गाणि पदजातानि- नामाख्यातोपसर्गनिपाताश्च। त्रयो अस्य पादाः- त्रयः कालाः -भूतभविष्यद्वर्तमानाः द्वे शीर्षे - द्रौ शब्दात्मानौः नित्यः कार्यश्च। सप्तहस्तासो अस्य सप्तविभक्तयः। त्रिधाबद्धः- त्रिषु स्थानेषु बद्धः उरसि कण्ठे शिरसि इति । वृषभो वर्षणात्। रोरवीति शब्दं करोति। कुत एतत्। रौतिः शब्दकर्मा, महो देवो मर्त्या आविवेशेति। महान् देवः - शब्दः । मर्त्याः - मरणधर्माणो मनुष्याः। तानाविवेश। महता देवेन न साम्यं यथा स्यादित्यध्येयं व्याकरणनिति।[76]

परन्तु रामाज्ञापाण्डेयमहोदयेनायं मन्त्रार्थो व्याकरणदर्शनाभिधे पुरुषे योज्यते। तद्यथामूले "तत्र चत्वारि शृङ्गाणि दिक्-क्रिया-साधन-कालात्मकानि। त्रयो अस्य पादाः- संबन्ध व्यक्तिजातिकालरूपाः। द्वे शीर्षे -बाह्याभ्यन्तरभेद भिन्नौ स्फोटौ। सप्त

---

[75] आक्ऋक् सं. 2/3/22/5

[76] महाभाष्य, पस्पशाह्निके- पृ. 12, 1999, मोतीलाल बनारसीदास

हस्तासो अस्य-पुरुषः, गुणः, वृत्तिः लिङ्गम्, संख्या, उपग्रहः, द्रव्यम् इति सप्तहस्ताः । त्रिधा बद्धः पश्यन्त्यां मध्यमायां वैखर्याञ्च बद्धः। एतास्तिस्रोवाचः क्रमेण दृढं दृढतरं च बध्नन्ति पुरुषम्। परातो वियोग एवं पश्यन्त्याद्यात्मना बन्धः। 'तद् व्याकरणमागम्य पश्यन्ति परमं पदम् । इत्यादिना पश्यन्त्यामेवापन्नो योगी परां द्रष्टुं बहुभिः प्रयत्नैः शक्नोति । अस्यैव मन्त्रस्यार्थो मङ्गलश्लोकात्मना संबन्धव्यक्ति-जातीत्यादिना दर्शितः।[77]

'इदं विष्णुः इति यथा धूलिमये प्रदेशे निहितं पदं द्रष्टुं शक्यते, तथैव दिवि अन्तरिक्षे पृथिव्यां च क्रमेण सूर्यविद्युदग्नीति रूपत्रयेणास्य विष्णोः पदं दृश्यते ।

वस्तुतस्तु अयं हि व्याकरणात्मा पुरुषः पुरुषसूक्तेन स्तूयते। तत्र हि तस्य चतुष्पात्त्वेन कल्पना। तथैव रीत्या 'पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवि इत्यादिना अमृतायां दिवि अस्य त्रयः पादाः सन्ति। मृतायां तु दिवि अस्य एक एव पादस्त्रिधा निहित इत्ययं मन्त्रार्थः। 'महो देवो मर्त्यान् आविवेश' इत्युक्त्या मरणधर्मा मनुष्यान् आविवेश इत्येतदर्थिकया सूचितः। तथा च परायां वाचि शब्दार्थावत्यन्तं संश्लिष्टावास्ताम्। परातो बहिः स्फुरणे तावेव शब्दार्थौ पार्थक्येन दृष्टिगोचरौ भवतो द्वयोः श्रेण्योः। एका च शुद्धा शब्दश्रेणीः, अपरा च अर्थश्रेणीः। तत्र शब्दश्रेण्यां प्रथमा पश्यन्ती, द्वितीया मध्यमा, तृतीया च वैखरी। अर्थश्रेण्यां प्रथमा प्रतिमा, द्वितीया बुद्धिः तृतीया तु मनोरूपा।

एवं चायं विष्णुर्नाम व्याकरणात्मा पुरुषो दिवि सूर्यरूपेण, अन्तरिक्षे वरुणरूपेण विद्युदात्मना पृथिव्यामग्निरूपेण चकास्ति। इत्थं प्रकारेण मंत्रस्य शाब्दिकानुसारिणी व्याख्या कृता पं. श्रीरागज्ञापाण्डेयेनऽत्र।

---

[77] व्याकरणदर्शनप्रतिमा- पं. श्रीरामाज्ञापाण्डेयः भूमिका, पृ.ग. प्र.सं. 1976 ख्रिस्ताब्दे सं.सं.वि.वि. वाराणसी

शब्दस्वरूपम् -

वाचः त्रित्वं चतुष्ट्वं वेति विषये वैयाकरणेषु विमतिर्दृश्यते। भर्तृहरिराचार्यः -

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्।

अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम् ।।[78]

इति कारिकायां वाचारित्रत्वमाह। तस्यैव समर्थनं कैयटादितः सूर्यनारायण-शुक्ल प्रभृतिभिर्महावैयाकरणैः वाक्यपदीयभावप्रदीपेकृतम्। पराया वाच आगमादिषु दर्शनेऽपि न वैयाकरणसम्मतत्वम् इति महतोपक्रमेण साधितञ्च ।

नागेशभट्टादिभिः परायाः वाचः वैयाकरणसम्मतत्वं साधितम्। परन्तु प्रतिमाकारेण-श्रीरामाज्ञापाण्डेयेन व्याकृताव्याकृतभेदेन वाचो द्वैविध्यं प्रतिपाद्य अव्याकृता वाक् परा, व्याकृतापदेन त्रय्याग्रहणमुक्तम् । इत्थं च यस्या वाचो भेदद्वयं सा परैवेति प्रतिपादितम्। अस्मिन् मतेऽपि सृष्टेः वाचः पूर्वत्वम् वाचश्च पश्यन्तीरूपत्वं तत एव च ओङ्कारस्य वेदस्य शब्द ब्रह्मणो वा प्रकाशत्वं सर्वप्रवृत्तिजनकत्वमुक्तम्। एतेन पश्यन्ती वाग् एव जगदुत्पत्तिहेतुः सिद्धा। इत्थं जगतः प्रादुर्भावकारणं पश्यन्ती एवेति सिद्धं भवति।

इयं च वाक् प्रकृतिप्रत्ययभेदेन द्विभेदा। तत्र तयोः शब्दार्थ रूपेणी नामरूपेण पश्यन्तीप्रतिमारूपेण वा व्याकरणपर्यायत्वं च साधितम्। पश्यन्तीप्रतिभयोश्च शब्दार्थरूपयोः व्यवहारे भेददर्शनेऽपि शब्दार्थयोस्ता-दात्म्यान् नास्ति भेदः ।

स्फोटसिद्धान्तः -

महाभाष्यकारेण 'कः शब्दः' इति प्रश्नस्य 'स्फोटः शब्दः' इति समाधानं प्रदत्तम्। तत्र स्फुटत्यर्थोऽस्मात् इति व्युत्पत्या 'स्फुट विकसने' धातोः अचि गुणे स्फोटशब्दः सिद्धयति। अस्य सिद्धान्तस्य प्रवर्तकस्यर्षेः स्फोटायन' इति नामाभूत् इति मन्ये।

---

[78] वाक्यपदीयम् ब्रह्मकाण्डम्, पृ. 266. 1967, कृष्णदास अकादमी

अयं च स्फोट आन्तरः शब्दः। स एव च वाचको नित्योऽनवयवः। बाह्यशब्दस्तु ध्वनिः।

स्फोटभेदाः -

अयं च स्फोटोऽष्टविधः वर्णस्फोट, पदस्फोट; वाक्यस्फोट, वर्णजाति-स्फोटः पदजातिस्फोटः, वाक्यजातिस्फोटः, अखण्डपदस्फोटः, अखण्डवाक्य-स्फोटश्चेति भूषणसारे।

षोडशविधो व्याकरणदर्शनभूमिकायाम् 1. तद् यथा-प्रकृतिस्फोटः, 2. प्रत्ययस्फोटः, 3. प्रकृतिजातिस्फोटः, 4. प्रत्ययजातिस्फोटः 5. अखण्ड-प्रकृतिस्फोटः 6. अखण्डप्रत्ययस्फोटः, 7. वर्णस्फोटः, 8. वर्णजातिस्फोटः, 6. पदस्फोटः, 10. पदाजातिस्फोटः, 11. अखण्डपदस्फोटः 12. वाक्यस्फोटः, 13. वाक्यजातिस्फोटः, 14. अखण्डपदजातिस्फोटः 15. अखण्डवाक्यस्फोटः, 19. अखण्डवाक्यजाति-स्फोटश्चेति । द्वात्रिंशद्विधः पाणिनीयव्याकरणे प्रमाणसमीक्षाग्रन्थे श्रीरामप्रसाद-त्रिपाठी।

तात्पर्यमिदमस्ति यत् पाण्डेयमहोदयेन ये षोडशस्फोटाः वर्णितास्ते बाह्य-स्फोटभेदा एव। एते यद्यान्तरस्फोटेऽपि स्वीकृताः स्युस्तदैकमत्य-मेवोभयोरिति विद्मः।

प्रमाणानि -

वैयाकरणैः स्वीकृतानि प्रमाणानि न नवीनानि। नैयायिकाः प्रत्यक्षस्य लौकिकालौकिकभेदेन विभागं विधायादृष्टस्य प्रत्यक्षेऽन्तर्भावम्, अभ्यासस्य चानुमानेऽन्तभावं कुर्वन्ति। उपमानं पृथक् प्रमाणमिति स्वीकृतमपि

वैयाकरणैरनुमानगतार्थत्वमुक्तम्। अनुपलब्धेरप्यनुमान एवान्तभावश्च साधितः। अत्र शब्दस्य प्रमाणेषूत्कृष्टत्वं स्पष्टितम्।[79]

इत्थं प्रमाणानां संख्यानिर्धारणविषये न वैयाकरणानामाग्रहः। एते अर्थापतिमपि स्वीकुर्वन्ति, किन्तु अर्थापत्तिजन्यस्य शाब्दबोधे भानमपि स्वीकुर्वन्ति।

7. 'श्लोकसिद्धान्तकौमुदी' सिद्धान्तकौमुदीग्रन्थस्य पद्यानुवादः

प्रणेता - सुरेशझा महाभागः (उत्तरप्रदेशीयः)

(प्रकाशनकालः 1982 ख्रिस्ताब्दः)

ग्रन्थपरिचयः -

श्रीसुरेशझामहोदयः समग्रस्य सिद्धान्तकौमुदीग्रन्थस्य पद्यानुवादः श्लोकसिद्धान्तकौमुदी इत्याख्यग्रन्थं विरचितवान् यत् सम्पूर्णानन्द संस्कृतविश्वविद्यालयेन 1982 ख्रिस्ताब्दे प्रकाशितः। नेपालाभिजनेन अनेन काश्यां निवसता श्लोकानां द्वादशसाहस्री अत्र निबद्धो।

'इयं द्वादशी साहस्री सौरेशी कौमुदी नव।

छात्राणामुपकाराय भूयच्छम्भूशुभाशिषा।।'[80]

अस्य ग्रन्थस्य प्रथमार्द्धः पूर्वार्द्धश्चेति द्वौ भागौ स्तः। ग्रन्थस्य प्रथमार्द्ध संज्ञाप्रकरणतः द्विरुक्तान्तो भागः प्रकाशितः। भ्वाद्यादिकृदन्तो भागश्च पश्चार्द्धे प्रकाशितः। ग्रन्थकारः पद्यानुवादेन सहैव तत्तत्फक्किकानां समाधानेऽपि कृतप्रयत्नो विद्यते। सुरेशझाः महोदयो नव्यव्याकरणोक्तपरवर्तिसिद्धान्तान्नपि स्वीकरोति ग्रन्थेऽस्मिन् ।

---

[79] व्याकरणदर्शनप्रतिमा-पं. श्री रामाज्ञापाण्डेयः पृ.-28, 1976 ख्रिस्ताब्दे सं.सं.वि.वि. वाराणसी

[80] श्लोकसिद्धान्तकौमुदी श्री सुरेश झा: पृ. 526. द्वि.सं.

षडङ्गप्रकरणे तु तत्तच्छब्दानां रूपतत्प्रयोगप्रदर्शने काऽपि विशिष्टा सरणिरिह। तद्यथा पतिशब्दस्य रूपप्रदर्शने ।

पतिः प्राणसमः स्त्रीणां, पतयः सुखनाशकाः।

पतिं सा सेवते धन्या, पती न करोति पुंश्चली।।

पत्या सह सती याति, पतिभिश्च वराङ्गना।

पत्ये सा रोचते धन्या, पतिभ्यः द्रौपदीप्रिया।।

पत्युः पृथग् न शोभाऽस्ति, पतिभ्यः सा पलायते।

पत्युः प्रियतमा राधा, पतीनां च नृणा सुखम् ।।

पत्यौ भक्तिं करिष्यामि, पतिषु वचसां गुणाः।

द्विवचने -

पती पती पतिभ्यां त्रिः, पत्योः पत्योः स्थलद्वये।

प्रथमादिक्रमाद् रूपं, द्विवचनेषु जायते ।।

नैपुण्येन शब्दानां प्रक्रियामेदोऽपीह प्रदर्शितः । यथा चाऽत्रैव-

पतिना वानरेन्द्रेण, सीतायाः पतये नमः।

इत्यादिरूपसिद्धयर्थं, घिसंज्ञा केवलेऽपि च।।

आर्षस्वं वा विजानीयात् सूत्राऽनित्यत्वमत्र या।

संज्ञापूर्वककार्य या, अनित्यत्वमिति उत्तरम् ।।

अत्रविशेषः -

बहुच्प्रत्ययपूर्वस्य, पतिशब्दस्य यण् भवेत्।

बहुपत्या बहुत्ये, बहुपत्युरादि स्यात् ।।

पतिशब्दान्तशब्दस्य, हरिवद्रूपमुच्यते।

पतिः समास एवात्र, घिसंज्ञकश्च जायते।।

तस्माद् भूपतिना रूपं, भूपतेरादि जायते।

सूत्राणां वृत्तिरपि पद्येनैव वर्णिता ग्रन्थकारेण। यथा आडुत्तमस्य पिच्च' (पा. 3.4.62) इति सूत्रस्य वृत्तिः-

लोडुत्तमस्य सर्वस्य, भवेदाडागमः स पित्।

हिन्योरूत्वं न कर्त्तव्यम्, इकारोच्चारणादिह।।

धातूनां रूपसाधनप्रक्रियाप्रदर्शने पद्याश्रयणं कवेर्मनोहारि-

भू-धातोर्लोट्लकारे तिप शप् गुणावादिकार्यतः।

एरूर्यदा विभक्तो स्यात्, रूपं 'भवतु' सिद्ध्यति।।

तसस्तामन्यपुरूषे, थसस्त थस्य त पुनः।

शप्गुणावादिकार्येण, 'भवतां, 'भवतं', पदम्।।

'भवन्तु' इति रूपं तु, 'एरुः' सूत्रेण साध्यते।

भूधातोर्लोटि सिप्तस्य, सेह्यपिच्चेति हिर्भवेत्।।

शब्गुणावः क्रमेणैव, आडागमे भवान्यहम्।

वस्मसोः सस्य लोपने, शब्गुणावश्च स्युर्यदा।।

आडागमे भवावेति, भवाय किन्न पण्डिताः ।।

कलिकातानगरस्य केनचिद् पण्डितेन व्याकरणकारिकेति नाम्ना सिद्धान्तकौमुद्याः पद्यानुवादः पूर्वमेव कृतः तथापि नैतादृशी प्रक्रियायाः स्पष्टता तत्र प्राप्यते इति।[81] स्वातन्त्र्योत्तरव्याकरणशास्त्रेतिह्ये सुरेशझामहोदयस्य प्रयासोऽयं महत्त्वं प्राप्स्यति नात्र संशयः।

8. पद्यसिद्धान्त कौमुदी

पं. बालकृष्ण व्यास शास्त्री

(प्रकाशनवर्षम-1990 ख्रिस्ताब्दः)

आ. पं. बालकृष्णव्यास शास्त्रिणा विरचितस्यास्य ग्रन्थस्य प्रकाशनं 1990 ख्रिस्ताब्देऽभवत्। अस्यां पद्यसिद्धान्तकौमुद्यां बहवः सामान्या भूत्वाऽपि महत्वपूर्णा विषया उपवर्णिताः। अस्याध्ययनेन शीघ्रातिशीघ्रम् सरलरीत्या व्याकरणशास्त्रस्य ज्ञानं कर्तुं शक्यते। व्यासमहोदयानुसारं सरलसंस्कृतस्य सामान्यनियमानां पठन-पाठनस्याभावेन संस्कृतलेखने बहवः दोषा आगच्छन्ति। व्यासमहाभागेन वर्तमानपद्धतौ विद्यमानानां दोषानां पटाक्षेप इत्थं प्रकारेण कृतम्-

1 संज्ञाया सर्वनामस्य प्रयोगः नर शब्देने साकं नृ शब्दस्य अध्यापनस्योपेक्षया उत प्रकाशितपुस्तकेषु अशुद्धप्रयोगानां प्रचलनेन बहवः दोषा आपतन्ति। तद्यथा- विश्वम्भर भर त्वं गां, विश्वस्माद्वा बहिष्कुरु' अस्मिन् पद्यभागे संज्ञाशब्दप्रयोगेण विश्वात् पदस्य प्रयोगः भवेत्। एवमेव अस्मिन् पद्ये 'अहल्या-द्रौपदी-सीता-तारा-मन्दोदरी तथा। पञ्चकन्या स्मरेन्नित्यं महापातकनाशनम् ।। पद्येऽस्मिन्

---

[81] स्वातन्त्र्योत्तकाले मध्यप्रदेशे सं. व्याकरणम्' लेखः पुष्पा दीक्षिता, संस्कृत राइटिंग इन इन्डि, इण्डिया, पृ.

पञ्चकन्यास्थाने पञ्चक ना भवेत्। नृ शब्दो नरशब्दात् पृथगितिज्ञानस्याभावे दोषोऽयं प्रचलन्नस्ति।

2. धातुर्निर्मिता आ. ई. ऊ. ए. ऐ ओ औ च स्वरान्तशब्दाः पुल्लिङ्गे स्त्रीलिङ्गे च समानाः भवन्ति। इति न पाठ्यते । कविभिः प्रयुक्तैर्शब्दैरेव ज्ञायते तस्मात् अधोलिखितशब्देषु शङ्का भवति। तद्यथा- विश्वपा जगदम्बिकया। तया मुनिना। सुधिये बालिकायै। बहुना नृपाय। गुरुणा सुशीलया। श्यामायां गवि। बहुनार्ये नार्य। बहुनद्याः देशस्य। शत्रुणा नार्या च आदयः।

प्रयोगः- स पाटलायां गवि तस्थिवांस, धनुर्धरं केसरिणं ददर्श। पुस्तकेषु गौ शब्द पुल्लिङ्गे एवं पाठ्यमानात् प्रायः पाठकाः पाटले गवि इति शुद्धम् अवगच्छन्ते। एवमेव मुनि आदयः शब्दाः पुल्लिङ्ग एवं उल्लेखात् स्त्रीमुनि हेतु स्त्रीलिंगविशेषणानि भवितुं शक्यन्ते। तद्यथा- 'विद्या नाम नरस्य अत्र विद्या गुरुणां गुरुः। यथा माता शत्रुः पिता वैरी आदिषु शत्रु शब्दस्य माता सह प्रयोगः।

3. आई ऊ ॠ ए ऐ ओ औ च स्वरान्तनपुसंकलिङ्गशब्दानां स्पष्टज्ञानस्याभावात् बहवः दोषाः समागच्छन्ति ।

4. शब्दरूपेषु हलादिविभक्तिषु सदृशानां शब्दानां प्रत्ययययोजनेन निर्माणं न बोधयित्वा अपितु पुस्तकेषुप्रकाश्य सर्वान् रटित्वा श्रवणं श्रवणं च भवति वर्तमाने।

5. रामशब्देन शाकं पाद-दन्त मास-यूष शब्दानां ज्ञानस्याभावः।

एते सर्वे दोषाः नूतनपद्धतौ निःसरिता येन उपर्युक्तांशानां दोषानां परिहारोऽभवत्। पद्यसिद्धान्तकौमुदीकारेण अनुष्टुप् छन्दसि स्वपूर्वलिखित हिन्दीपद्यानां संस्कृतभाषायामनुवादः कृतः। तद्शब्दभागस्यायं नूतना विधिः 52 पद्येषु वर्णिता। यस्मिन् स्वरान्तान् निखिलान् शब्दान् व्यञ्जनान्तान् शब्दाञ्च

पाठनीयेन सूत्रानुसारेणानुष्टुप्छन्दसि सोदाहरणं वर्णितं ग्रन्थकारेण। पुस्तकेऽस्मिन् कथं छात्रा अनायासेनैव बहून् शब्दान् अल्पकालेऽवगच्छेयुरिति विस्तरेण वर्णितमस्ति ।

9. अष्टाध्यायी सहजवोधः

प्रणेत्री डॉ. पुष्पा दीक्षिता (मध्यप्रदेशीया विदुषी)

प्रकाशनकालः-2004 ख्रिस्ताब्दः

ग्रन्थपरिचयः -

'अष्टाध्यायी सहजबोध' नामाख्यो खण्डद्वयात्मको ग्रन्थो दीक्षिता महाभागया विरचितः स तु प्रतिभाप्रकाशन' 29/5 शक्तिनगर, दिल्लीतः प्रकाशितः ।

पाणिनीयधातुपाठे पठितानां सर्वेषां धातूनामन्येषाञ्च सनाद्यन्तधातूनां सर्वेषां लकारेषु सर्वेषु च प्रक्रियासु रूपनिर्माणाय लघुतमोपायः प्रदर्शितः। अपूर्वोऽयमुपायो वर्तते, यस्मिन् पाणिनीयाभिप्रायेणेय सर्वं विचारितम् ।

अस्य ग्रन्थस्य वैशिष्ट्यमस्ति यत् मासद्वयेन अनेन सर्वेषां धातूनां सर्वेषु लकारेषु, सर्वासु च प्रक्रियासु सर्वाणि रूपाणि निर्मातुं शक्यन्ते। अस्य कृते आदावष्टाध्याय्यां पठिताः सर्वे प्रत्ययाः, संकल्प्य पठिताः। अनन्तरं तेषां सार्वधातुकार्धधातुकविभागः कृतः। सार्वधातुकेषु प्रत्ययेषु परेषु कीदृशमङ्गकार्य भवति, इति विभज्य निर्दिष्टम् । धातुपाठस्य पुनर्व्यस्थापनमप्यङ्ग-कार्यानुसारेणैव कृतम्। अस्मिन् धातुपाठे पाणिनीय धातुपाठे परिपठिताः सर्व एव धातव उपात्ताः परमङ्गकार्यदृष्ट्या तेषां धातूनां क्रमोभग्नः ।

सिद्धान्तकौमुद्यादिषु ग्रन्थेष्वकारादिक्रमेण लकाराणां सिद्धिः क्रियते। लट् लिट् लुट् लेट् लोट् इति लकाराणामकरादिक्रमौ वर्तते। अत्र नास्ति किमपि विज्ञानं, न

चात्रास्ति किमपि प्रमाणम्। भूधातोः लट् लकारस्य रूपं साधयित्वा यदा लिट् लकारस्य रूपं साध्यते, तदा सर्वा प्रक्रिया परिणमति। यथा लट्लकारे परे विकरणस्य विचारः क्रियते। लिटि परे इडागमस्य विचारः क्रियते, द्वित्वादयश्च क्रियन्ते। अतः येषां लकाराणां प्रक्रियासादृश्यं भवति तेषां लकाराणां रूपसिद्धिर्यद्येकत्र क्रियते तदा महल्लाघवं भवति। अत अस्मिन्ग्रन्थे लट्लकारानन्तरं लोट् लङ् विधिलिङ् चेत्येतेषां सार्वधातुकलकाराणां सिद्धिः कृता। अनन्तरमवशिष्टा-नामार्धधातुकलकाराणां सिद्धिः कृता। सिद्धान्तकौमुद्यादिष्वेकस्य धातोः सर्वलकाररूपाणि-साध्यन्ते। लकाराणामेष प्रचलितः क्रमोऽप्यत्र भग्नः।[82]

अष्टाध्यायीसहजबोधस्य प्रथमे सार्वधातुकखण्डे सर्वेषां धातुनां लट्, लोट्, लङ्, विधिलिङ्ग, इत्येतेषु चतुर्षु लकारेषु रूपनिर्माणविधिरुपदिष्टः । अष्टाध्यायीसहज-बोधस्य द्वितीये आर्धधातुकखण्डे सर्वेषां धातूनां एकैकस्यार्धधातुकलकारे रूपनिर्माणविधिरुपदिष्टः। यथा लृट् लकारस्य रूपनिर्माणविधावेव सर्वेषां धातूना लृट्लकारस्य रूपाणि साधितानि एवमेव लिङ्लकारादिनां रूपसिद्धिः। लकारनिरूपणानन्तरं यङन्तप्रक्रिया, यङ्लुगन्तप्रक्रिया, सन्नन्तप्रक्रिया, भावकर्म-प्रक्रिया, लकारार्थप्रक्रिया, च तथैवोपदिष्टाः।

अष्टाध्यायी सहजबोधस्य तृतीये कृदन्तखण्डे चतुर्थे च तद्धितखण्डे कृत्तद्धितनिर्माणविधिरष्टाध्याय्या मन्तव्यानुसारेण प्रदर्शितः । एतत्खण्डद्वयमद्यावध्यप्रकाशितम्। वर्षपर्यन्तमेव सम्पूर्णा अष्टाध्यायी आगच्छेत् इति 'अष्टाध्यायी सहजबोधस्य प्रयोजनम्। अस्यकृते सकलामष्टाध्यायीमविभाज्य अष्टसु खण्डेषु कार्य क्रियमाणमस्ति ।

---

[82] स्वातन्त्र्योत्तरकाले मध्यप्रदेशे सं. व्याकरणम्-लेखः पुष्पादीक्षित, संस्कृत राइटिंग इन इन्डि, इण्डिया, पृ.

3. स्वातन्त्र्योत्तरकालस्य मूलग्रन्थकाराणामकारादिक्रमेण ग्रन्थैः सह प्रणीता सूची

	कृतिकारः	मूलग्रन्थः	प्रकाशकः	प्रकाशन-कालः
1.	चतुर्वेदी, रामाधीनः	संस्कृतभाषाविज्ञानम्	चौखम्बा विद्याभवन, वाराणसी	1963
2.	झा. महावै. दीनबन्धुः	व्याकरणतत्वप्रदीप	दरभंगा, बिहारतः	1988
3.	झा. सुरेशः	श्लोक सिद्धान्तकौमुदी (भागद्वयात्मिका)	सम्पूर्णानन्द सं. वि. विद्या, वाराणसी	1982
4.	त्रिपाठी, रामप्रसादः	'सिद्धान्तचिन्तामणि'	सम्पूर्णानन्द, सं.वि.वि. वाराणसी	1987
5.	त्रिपाठी, रामप्रसादः	शब्दशास्त्रीयवृत्ति-विमर्शः	सं.स.वि.वि.वाराणसी	1967
6.	त्रिपाठी, सुदर्शनाचार्यः	'लघुकाशिका'	सं. सं. वि. वि. वाराणसी	1973-74
7.	दर्शनकेसरी, गोपालशास्त्री	'पाणिनीय प्रबोधः	सं.सं.वि.वि.वाराणसी	1966
8.	द्विवेदी, ब्रह्मदतः	शब्दाद्वैतदर्शनबिन्दुः	सं.सं.वि.वि.वाराणसी	1981
9.	दीक्षिता डॉ. पुष्पा	'अष्टाध्यायी सहजबोधः		2004

10.	पाण्डेयः रामाज्ञा	1. व्याकरणदर्शन-भूमिका 2. व्याकरणदर्शन-भूमिका (द्वितीय-संस्करणम्) 3. व्याकरणदर्शन-पीठिका 4. व्याकरणदर्शन-प्रतिमा	सं.सं.वि.वि.वाराणसी सं.सं.वि.वि.वाराणसी सं.सं.वि.वि.वाराणसी सं.सं.वि.वि. वाराणसी	1954 1982 1965 1976
11.	भट्टाचार्यः हाराणचन्द्रः	'कालसिद्धान्तदर्शिनी' प्रकाशिता, कलिकता	लेखकेन स्वयं (वैक्रमाब्दे)	1998
12.	शर्मा, रघुनाथः	'व्याकरणदर्शनबिन्दुः	सं.सं.वि.वि. वाराणसी	1971
13.	शास्त्री, रामशरणः	'कौमुदीकथाकल्लोलिनी'	चौखम्बा विद्याभवन, वाराणसी	1961

इति द्वितीयोऽध्यायः

❖ ❖ ❖

तृतीयोऽध्यायः

1. स्वातन्त्र्यात्परं टीकाग्रन्थानां विकासनिरूपणं महत्त्वञ्च।
2. स्वातन्त्र्योत्तरकालस्य संस्कृतटीकाकाराणां कालक्रमेण परिचयः।
3. स्वातन्त्र्योत्तरकालस्य संस्कृतेतरटीकाकाराणां कालक्रमेण परिचयः।
4. स्वातन्त्र्योत्तरकाले प्रणीतानां संस्कृतटीकाग्रन्थानां संस्कृतेतरभाषा-प्रणीतानां टीकाग्रन्थानाञ्चाकारादिक्रमेण परिचयो वैशिष्ट्यञ्च ।
5. स्वातन्त्र्योत्तरकालस्य संस्कृतटीकाकाराणां संस्कृतेतरटीकाकाराणाञ्च टीकया सह अकारादिक्रमेण विरचिता सूची।

अथ तृतीयोऽध्यायः

1. स्वातन्त्र्यात्परं टीकाग्रन्थानां विकासनिरूपणं महत्त्वञ्च

टीका शब्दस्य व्युत्पत्तिः टीक्+टाप् इति टीक् धातो टाप् प्रत्ययस्य टीका इति शब्द निष्पद्यते। अस्या भावार्थो भवति व्याख्या भाष्यञ्चेति। अर्थात् टीका साहाय्येन छात्रेभ्य संस्कृतमूलसामग्रयाः ज्ञानसम्पादनाय अवसरः कल्प्यते ।

व्याकरणशास्त्रे टीकाग्रन्थानां प्रादुर्भावो विकासश्च -

व्याकरणशास्त्रे टीकाग्रन्थलेखनस्य परम्परेयं नाधुनिकी अपितु व्याकरण-शास्त्रस्यैतिह्ये दृष्टिपातेन ज्ञायते यत् पाणिनिकालात्परं मूलार्थावबोधने विलिखिता टीकाग्रन्थपरम्परेयं प्राचलत्। मूलसूत्रार्थ-परिष्काराय स्वीयमतस्योद्घाटनाय च वार्तिककारेण ये वार्तिका विलिखिता महाभाष्यकारेण च यद्महाभाष्यग्रन्थः प्रणीतः तत्रैवास्याष्टीकाग्रन्थलेखन-परम्पराया बीजोत्पत्तिरभवदिति। पतञ्जलेरनन्तरं ग्रन्थरचनायां द्वे शाखे प्रचलिते आस्ताम् । एका अष्टाध्यायी-परम्परा तर्हि अपरा प्रक्रियानुसारी-परम्परा चेति।

तत्र व्याकरणशास्त्रस्यैतिह्ये बहवः ग्रन्था अष्टाध्यायीमनुसृत्य मूलग्रन्थेव प्रौढ़पाण्डित्येन वैदुष्येन च परिपूर्णाः काले काले विलिखिताः। तद्यथा- अष्टाध्यायीपद्धतिमनुसृत्य विरचितेषु ग्रन्थेषु जयादित्यवामनस्य (6-7 शताब्द्यां) काशिकावृत्तिः, विमलमतिप्रणीताः भागवृत्ति' (अनुपलब्धा) पुरुषोत्तमदेवस्य (12 शताब्द्यां) भाषावृत्तिः, शरणदेवस्य (1173 ख्रिस्ताब्दे) दुर्घटवृत्तिः भट्टोजीदीक्षितस्य-शब्दकौस्तुभश्च प्रमुखा व्याख्याग्रन्थाः सन्ति । अष्टाध्याय्या प्रक्रियाग्रन्थेषु

रामचन्द्राचार्यस्य प्रक्रियाकौमुदी, भट्टोजिदीक्षितस्य सिद्धान्तकौमुदी तथा तस्य व्याख्या प्रौढ़मनोरमा, वरदराजाचार्येण प्रणीता मध्य-लघु-सार-सिद्धान्तकौमुद्यः ततश्च नागेश-प्रणीताः बृहच्छब्देन्दुशेखरः लघुशब्देन्दुशेखरः परिभाषेन्दुशेखरश्चादयः प्रमुखा व्याख्याग्रन्थाः सन्ति।

व्याकरणशास्त्रस्यैका दार्शनिकग्रन्थलेखनस्यापि धाराप्रवाहिता तत्र महाभाष्यग्रन्थः प्रमुखोऽस्ति । ततश्च महाभाष्यस्य दीपिकाख्यायाः टीकाकारः भर्तृहरिः 'वाक्यपदीयम्' नामकदार्शनिकग्रन्थं व्यरचयत्। तदनन्तरं कौण्डभट्टस्य वैयाकरणभूषणसारं नागेशभट्टस्य वैयाकरणसिद्धान्त-मञ्जूषालघुमञ्जूषा-परमलघुमञ्जूषा चेति प्रौढ़ग्रन्था प्रणीताः । व्याकरणस्य स्फोटविषयमधिकृत्यापि मण्डनमिश्रस्य स्फोटसिद्धिः कौण्डभट्टस्य स्फोटवादश्चादयः ग्रन्थाः विलिखिताः। एते सर्वे ग्रन्था मूलांशसम्पोषका दुरूहार्थवबोधका व्याकरणदर्शनद्योतकाः स्फोटतत्वं स्फोटकाः शब्दार्थसम्बन्धावबोधकाश्च सन्ति।

मूलग्रन्थैव प्रणीता एतादृशाः सर्वेः ग्रन्थाः टीकाग्रन्थलेखनपरम्पराया-माकरग्रन्था इव विद्यमाना दृश्यन्ते। कारणादस्मादेव प्राचीनकालादेवैतेषु ग्रन्थेषु सरस्वती समुपासकैः विद्यद्भिः नैकाः टीकाग्रन्थाः प्रणीता। टीकाग्रन्था न केवलं मूलग्रन्थेष्वेवापितु टीकाग्रन्थेष्वपि सारल्येनार्थावबोधनपरा विरचिता उपटीकाग्रन्था दृष्टिपटले समागच्छन्ति । तद्यथा- भट्टोजीदीक्षितप्रणीतसिद्धान्तकौमुद्यायाः प्रौढ़मनोरमाया व्याख्यायाः सरस्वती ज्ञानेन्द्रकृत-तत्वबोधिनी टीकाऽस्ति, तस्यापि वाजपेयी नीलककण्ठप्रणीता सुखबोधिनी उपटीका मिलति। एवमेव महाभाष्ये भर्तृहरेः दीपिकायाः कैयटप्रणीता 'प्रदीप' प्रटीका मिलति तस्यापि नागेशभट्टस्य भाष्य-प्रदीपोद्द्योतः अस्ति, तत्र पायगुण्डे वैद्यनाथकृत प्रदीपस्य 'छाया' टीका च

विद्यते। एवमेव सरस्वती-समुपासकैः शाब्दिकैः स्वातन्त्र्योत्तरकालेऽपि टीकानां प्रटीकानामुपटीकानां वा लेखनस्येयम्परम्परा प्रचाल्यमाना दृश्यते।

स्वातंत्र्योत्तरकाले टीकाग्रन्थानां विकासक्रमः-

स्वातन्त्र्योत्तरकालस्य महाभाष्याधारीकृत्य विरचितासु प्रमुखटीकासु वा व्याख्यासु हिन्दीभाष्यः (नवाह्निक भागस्य) पं. चारुदेवशास्त्रिणः, संस्कृतहिन्दीव्याख्या- (पञ्चमह्निकपर्यन्तं) पं मधुसूदनप्रसादमिश्रस्य, आंग्लभाषायां व्याख्या (सम्पूर्णभाष्यस्य) श्री एस. डी. जोशी महोदयस्य अष्टाध्यायी प्रथमावृत्तिभाष्यप्रणेता पं. ब्रह्मदत्त जिज्ञासु महोदयाः (महाभाष्य-विद्वासः): हिन्दीव्याख्या (द्वाह्निकभागस्य) माधवशास्त्री भण्डारीकृतश्च प्रमुखाः सन्ति । **सिद्धान्तकौमुदीटीकासु-** 'लक्ष्मी'- सभापति उपाध्यायस्य, कौमुद्या हिन्दी-व्याख्या-पंचोली श्री बालकृष्णकृता, 'सरला'-नेने पं. श्रीगोपालशास्त्रिणः, 'दीपिका' हिन्दी-व्याख्या-पाण्डेयः गोपालदत्तकृता, प्राभाकरी हिन्दीव्याख्या-पं श्रीप्रभाकर-शास्त्रिणश्चादयः प्रमुखाः सन्ति। **प्रौढमनोरमा-टीकाग्रन्थेषु** सशब्दरत्न प्रौढमनोरमाटिप्पणी नेने पं. गोपालशास्त्रिणः, 'प्रभा' उपाध्यायः सभापतिशर्मणः 'प्रभानाम्नी टिप्पणी' माधवशास्त्रिभण्डारिणः, 'विभा' (अव्ययीभावान्तः) सदाशिवशास्त्रिणश्चादयः प्रमुखाः सन्ति। **लघुशब्देन्दुशेखरस्य**-वरवर्णिनी (टिप्पणी) पं. गुरुप्रसादशास्त्रिणः, 'दीपकः' पवर्ततीय पं. नित्यानन्दस्य, 'राधिका' द्विवेदिनः पं. ब्रह्मदत्तस्य च समुपलब्धा सन्ति। **परिभाषेन्दुशेखरस्य** 'सुबोधिनी' टीका पं. विश्वनाथमिश्रस्य प्रमुखा अस्ति। वाक्यपदीयस्य 'अम्बाकत्री पं. रघुनाथशर्मणः 'प्रकाशाख्या' त्रिपाठिनः नृसिंहस्य च प्रमुखे स्तः। वैयाकरणभूषणसारस्य- 'सरला' नेने

पं. श्रीगोपालशास्त्रिणः 'सुबोधिनी-द्विवेदिनः चन्द्रिकाप्रसादस्य 'शाङ्करी' (मराठीभाषायाम्) मारुलकर पं. शंकरशास्त्रिणश्च प्रमुखाटीकाग्रन्थाः समुपलभ्यन्ते ।

एवमेव **वैया. सिद्धान्त लघुमञ्जूषाग्रन्थस्य** 'रत्नप्रभा' उपाध्याय पं. सभापतिकृता, 'विषमस्थलेषु टिप्पणी' पन्त पं. नित्यानन्दकृता, 'ज्योत्स्ना' शुक्ल पं. कालिकाप्रसादस्य च विशिष्टाः टीकाग्रन्थाः सन्ति। स्फोटविषयकग्रन्थेषु व्याकरणदर्शन भूमिका पीठिका प्रतिमाश्चेति रामाज्ञापाण्डेयकृताः प्रमुखा मौलिका ग्रन्थाः सन्ति।

टीकाग्रन्थानां महत्त्वम्

मूलोक्तार्थविशदीकरणं तावट्टीकायाः प्रथमं लक्ष्यम्भवति, विश्लेषणं तु नान्तीयकतानुगतमेव स्यात्किन्तु दुरूहार्थकं न स्यादिति प्रथमापेक्षा भवति। मघवामूलमिति न्यायेन प्रवर्तनं यत्रैकतो वैदुष्यप्रदर्शनमात्रोद्देश्यतां व्यनक्ति तत्रैवाऽपरत उपयोज्यत्वहानमप्यभिव्यनक्ति। बौद्धिकव्यायामाऽऽयामपराय-णानां विदुषां कृते तु स्वयमवबुद्धार्थत्वाट्टीकाऽनपेक्षितैव भवति तथापि तत्र सर्वथानुपयुक्ततेति न वक्तुं शक्यते, विषयविश्लेषणस्य वैशिष्ठ्यत्वादिति ।

टीकाग्रन्थानां व्याख्याग्रन्थानां वा प्रमुखमुदद्देश्यन्तु मूलार्थ-वगमोऽनायासेन जिज्ञासुभिर्भवेयुरित्यस्ति, तस्मादेव टीकाग्रन्थैः गुणदोषैर्विविच्यते। स्थाने स्थाने स्वसिद्धान्तोऽपि निवेश्यते टीकाकारैः। व्याकरणशास्त्रे प्रवेशकर्तृणां छात्रान् टीकाग्रन्थैः मूलग्रन्थानामपेक्षया झटिति अनायासेन च विषयावबोधनं गूढरहस्यावगमनश्च जायते यतो हि टीकाग्रन्थानां ग्रन्थालापनशैली वैशिष्ट्यपरिपूर्णा दूरूहार्थावबोधनक्षमा च भवति। टीका ग्रन्थेषु पदे पदे क्लिष्टप्रयोगाणां प्रक्रियाऽपि प्रदर्शिता दरीदृश्यते।

टीकाग्रन्थानामध्ययनस्य प्रमुखा लाभाः-

1. पदानामवबोधनाय टीकाग्रन्थाः सहायकाः सन्ति।
2. छात्रा व्याकरणांशानां यथाशीघ्रं समाधानं टीकाग्रन्थैः प्राप्तुं शक्यन्ते।

3. सुबन्त-तिङन्तादीनां प्रकृतिप्रत्ययानाञ्च ज्ञानं टीकाग्रन्थैः सारल्येन भवति।

4. नूतनपदानां मौलिकरूपेणावबोधनमपि भवति।

5. मूलग्रन्थानां टीका एव शिक्षणकर्मणि सहयोगं प्रददाति। अतः कथितं केनापि 'टीका गुरुणां गुरुः'।

6. भाषायाः विविधसम्प्रत्ययानां काले काले समागतानां व्यावहारिक-प्रयोगाणाञ्च ज्ञानं टीकाग्रन्थैः प्राप्तुं शक्यते ।

7. टीकाग्रन्थानां शिक्षणे प्रयोगः प्राचीनग्रन्थानां व्याकरणांशान् स्पष्टीकर्तु लाभप्रदो भवति ।

8. टीकाग्रन्थानां महत्वाल्लाभाच्च व्याकरणविचक्षणैः विदुषैः परम्परायाः पोषणार्थं व्याकरणशिक्षणे एतेषां ग्रन्थानां प्रयोगः क्रीयते ।

अस्मादेव व्याकरणशास्त्रकृतभूरिपरिश्रमैः बहुभिः विद्वद्भिः मूलार्थोद्घाटनाय दुरूहार्थावबोधनाय स्वीयनतस्य स्थापनाय छात्रहिताय विदूषां च सहयोगाय स्वातन्त्र्योत्तरकालेऽपि टीकाग्रन्थलेखनपरम्परा अनवरता अग्रेसररता दृश्यते नात्र विदुषां वैमत्यमनवरतटीकाग्रन्थ-प्रणयत्वादिति ।

एवं स्वातन्त्र्योत्तरकाले व्याकरणशास्त्रस्य न केवल संस्कृत-भाषायामपितु छात्राणां सौकर्याय विदुषैः हिन्दी-मराठी-गुजराती-बंगाली-पञ्जाबी चादयः नैकासु भारतीयभाषासु टीकाग्रन्थलेखनेन सह अनुवादकार्यमपि बहुधा कृतम्। अत्र आङ्ग्लभाषाविद् महावैयाकरणैः डॉ. एस. डी. जोशी, अयर के. वी., अभ्यंकर; के.वी. चादयैः महोदयैः आङ्ग्लानुवादेन टिप्पण्या टीकया च कार्यं कृतं तेन न केवलं भारतीयाऽपितु पाश्चात्याः संस्कृतप्रिया जना लाभान्विता अभवन्। अतः टीकालेखनपरम्परा भविष्येऽपि निर्बाधगतिमाना भविष्यति नात्र लेशमात्रवकाशः।

2. स्वातन्त्र्योत्तरकालस्य संस्कृतटीकाकाराणां कालक्रमेण परिचयो वैशिष्ठ्यञ्च-

1. पं. सभापति उपाध्यायः

(कालः 1882 ईशवीयतः 1966 ईशवीयपर्यन्तम्)

जीवनपरिचयः-

पं. सभापति उपाध्यायः स्वनैष्ठिकसाहित्यिकसेवया त्यागतपस्यामय-जीवनस्य सात्त्विकप्रवृत्तेः च कारणादर्वाचीनयुगस्य पण्डितेषु विशिष्ट-सम्मानास्पदमा-दरास्पदश्चासीत्। अस्य जन्म 1882 ख्रिस्ताब्दे 'बलिया' मण्डलस्य पूर्वीभागे गंगातीरवर्तिनि 'उदयीछपरा' ग्रामेऽभवत्।[83] अस्य पितुर्नाम पं. रामपलट उपाध्याये मातुर्नाम 'सखीदेवी' चासीत् ।

अध्ययनकालः-

पं. रामपलट उपाध्यायमहोदयस्य त्रिषु पुत्रेषु कनिष्ठोऽयं स्वग्रामस्य पं. बाबूरामोपाध्यायेन कस्यापि साधुनोक्तमुहूर्ते सारस्वतव्याकरणाध्यापनं प्रारब्धवान्। तदनन्तरं काश्यामेव पं. देवनारायणतिवारी 'तिवारी जी आदिगुरुरभवत् ।

अध्यापनकालः -

प्रारम्भकाले सभापतिमहोदयः आंग्लविद्यालयेषु संस्कृतस्याध्यापनकार्य कृतवान्। अनन्तरं च जीवनपर्यन्तं राजा बालदेवदासबिरलासंस्कृतपाठ-शालायामध्यापनं कृतवान्। काश्यामेवाध्ययनाध्यापनं कुर्वन् वर्षाणां षष्ठ्यधिकं कालं

---

83 का. की पा. परम्परा आ.व. उपाध्यायः, पृ. प्र.सं. 1983

काशीस्थ पण्डितसमाजे व्यतीतवान्। चतुरशीतिः (84) जीवनवेलायां स्वजीवनं संस्कृतस्योत्थानायाभ्युदयाय चापर्यत् तस्मात् नैकासु संस्थासु सम्मानं प्राप्नोत् ।

टीका-परिचयः -

विद्याव्यसनी उपाध्यायमहोदयः व्याकरणशास्त्रस्य परिष्काराय न्यायशास्त्रस्य गभीरमध्ययनमकरोत् । स्वानुशीलनप्रवृत्तेः कारणादेव सभा-पतिमहोदयेन न्यायस्य वेदान्तस्य च ज्ञानमर्जितम्। अध्यापनकार्यातिरिक्तकाले व्याकरणग्रन्थानां व्याख्यालेखने प्रावीण्यं प्राप्तवान्। अनेन विरचितानां चतुर्ण्णा ग्रन्थानां परिचयोऽधोलिखितप्रकारेण सन्ति-

1. लघुमंजूषायाः 'रत्नप्रभाटीका' नागेशभट्टस्यायमनुपमं ग्रन्थो वैयाकरण-सिद्धान्तमंजूषानाम्ना प्रख्यातमस्ति। अस्योपरि बहवष्टीका विरचिताः तथापि तेषामध्ययनेनापि ग्रन्थस्य ग्रन्थीनां समाधानं न मिलति। सभापतिमहोदयः स्वग्रन्थेः तादृशानां ग्रन्थीनां समाधानायाः प्रयासमकरोत् ।

2. शब्दरत्नेन सहिता प्रौढ़मनोरमायाः **'प्रभाटीका'** व्याकरणशास्त्रस्यास्य-दार्शनिकग्रन्थस्य सुबोधटीकायाः प्रणयनं कृतवान्। यस्याः सहाय्येन मूलग्रन्थस्य दुरूहानां विषमस्थलानामवबोधने सरलता भवति ।

3. सिद्धान्तकौमुद्या 'लक्ष्मीव्याख्या' प्रणीता। अस्यां टीकायां व्याकरण-शास्त्रस्य विभिन्नग्रन्थेषु तेषां सूत्राणां विषये यत् सिद्धान्तं स्थापितं तेषां सर्वेषामेकत्र संकलनमस्ति ।

4. वैदिकधर्मरहस्यम् – अस्मिन् ग्रन्थे सनातनधर्मस्य विरुद्धानामाक्षेपाणां निराकरणमस्ति। गुरोर्भक्तेः कारणादेय निःसन्तानमहामहिमति-वारीमहोदयस्य दाहसंस्कारादीन् कार्यान् पुत्रमिव सहर्ष स्वीकृत्य सम्पादयामास ।

उपाधिः -

भारतधर्ममहामण्डलेन 'महामहाध्यापकः' पदव्या तथा शाङ्गवेद-विद्यालयेन 'शाब्दिकरत्न' पदव्या च सुशोभितमकरोत् ।

प्रमुखाः शिष्याः

पण्डितसभापति उपाध्यायमहोदयस्य शिष्येषु पण्डितगणपतिशास्त्रि-मोकाटे महोदयस्य नाम उल्लेखनीयमस्ति । सः श्रीतात्याशास्त्रिप्रणीतायां भूति' टीकायां नवीनां व्याख्यां विरच्य तां सरलां सुबोधाञ्च कृतवान्। तच्छिष्यः पण्डितमुरलीधरमिश्र महोदयः (सं.सं.वि.वि. वाराणस्यां व्याकरणविभागाध्यक्षपदं सुशोभितवान्) रामचन्द्राचार्यप्रणीतायाः प्रक्रियाकौमुद्याः श्रीशेषकृष्णप्रणीतां 'प्रकाश' नाम्नी व्याख्यां सम्पादितवान्। तथा चाऽनेन तस्या उपरि 'रश्मि इत्याख्यटिप्पणीं विलिख्य गूढस्थलानि सरलीकृतानि। पं. संभापतिमहोदयस्यास्यऽन्यो शिष्यः पं. बालकृष्णः पञ्चोली गुर्जर प्रदेशीयो ब्राह्मणः आसीत्। तस्य ग्रन्थद्वयमस्ति । तस्य अन्यतमो शिष्यः पण्डितकालिकाप्रसादशुक्लमहोदयः गोरखपुरमण्डलस्य सरयूपारीणोब्राह्मण आसीत् ।[84]

सभापतिमहोदयस्य शिष्याः

1. गणपति शास्त्री मोकाटे महोदयः स्वगुरुवर्य श्रीतात्याशास्त्रीमहोदयस्य 'भूति' टीकाया नवीनव्याख्यायाः प्रणयन् कृत्वा छात्रेभ्यः सरल-सुबोधञ्चाकरोत् ।
2. गणपतिशास्त्री मोकाटे महोदयस्य शिष्यः पण्डित मुरलीधरमिश्र-महोदयः रामचन्द्राचार्येणविरचितायाः प्रक्रियाकौमुद्यायाः शेषकृष्ण-प्रणीतायाः प्रकाशनाम्नी व्याख्यायाश्च सम्पादनं सुयोग्यतया अकरोत्। स स्वलिखित

---

84 का. की. पाण्डित्य परम्परा- आ. ब. उपाध्यायः, पृष्ठ-480 प्र. सं. 1983

'रश्मि' नामक्या टिप्पण्या अपि विभूषितां कृत्वा गूढस्थलान् सुबोधाय श्लाघ्यं प्रयाशमकरोत् ।

3. पण्डित बालकृष्ण पञ्चोली - गुजराती ब्राह्मण आसीत्। सभापति-महोदयस्य सायुज्ये व्याकरणाध्ययनमकरोत् । स शास्त्रेषु यावद् निपुण आसीत् तदधिकम् लोकव्यवहारे, तस्य गुरुभक्तिर्विशेषः श्लाघनीय आसीत्। गुरु कृपया स ग्रन्थे द्वे विरचितवान्।[85]

4. पण्डितकालिका प्रसादः- पण्डितकालिकाप्रसादमहोदयो गोरखपुर-मण्डलस्य सरयूपारीणब्राह्मणावतंस आसीत्। शास्त्रेण सह लोक-व्यवहारेऽपि तस्य चातुर्य प्रशंसनीयमस्ति । व्याकरणशास्त्रस्य सूक्ष्मविवेचनायाङ्कृतकार्यवशात् पण्डितयागेश्वरशास्त्री विरचिता हैमवती टीका अनेनसम्पादिता या 1975 ख्रिस्ताब्दे संस्कृत विश्वविद्यालयेन प्रकाशिता। नागेशविरचित-वैयाकरणसिद्धान्तमञ्जूषा 'हैमवती' चोभये नितान्त उपादेया प्रामाणिकी च प्रस्तावनाभ्यां मण्डिते स्तः। अत्र तस्य शास्त्रीय वैदुष्यः स्पष्टतो दृग्गोचरो भवति।

2. महामहोपाध्यायतातासुब्बरायशास्त्रिणः

(कालः 19 शतकात् स्वातन्त्र्योत्तरकालपर्यन्तम्)

जीवनपरिचयः -

दाक्षिणात्येषु विद्वत्सु महानुभावोऽयमासीदग्रगण्यो विद्वान्। स्वातन्त्र्यो-त्तरकालेऽपि संस्कृतसेवां कृत्वा ब्रह्मलोक - गच्छत्।

---

85 का. की. पाण्डित्य परम्परा आ. व. उपाध्यायः, पृष्ठ-481 प्र. सं. 1983

अध्ययनकार्यम् -

तातोपनामको सुब्बरायशास्त्री रूद्राभट्ल रामलक्ष्मणशास्त्रिपादानां शिष्य आसीत्।

अध्यापनम् -

विजयनगरमहाराजसंस्कृतकलाशालाया आद्याः प्राचार्य इमे आसीत्। एतेषां सकाशाद पेरि सूर्यनारायण शास्त्री-भूषणमञ्जूषाद्युग्रन्थान्, ध्वन्यालोकः-काव्यप्रकाश-रसङ्गाधर-चित्रमीमांसादीनालङ्कारग्रन्थांश्च सम्यगधीतवान् ।

सम्मानोपाधयः-

जार्जसम्राट्तः 'महामहोपाध्यायः' इति सम्मानोपाधिम्, आन्ध्रविश्व-विद्यालयतः कलाप्रपूर्ण' इत्युपाधिञ्चैते प्राप्नुवन्।

कृति-परिचयः-

महानुभावोऽयं नागेशभट्टकृतलघुशब्देन्दुशेखरस्य स्वरसन्ध्यन्तं **'गुरुप्रसादं'** नाम्नी विपुलां व्याख्यान् एवं शब्दरत्नस्यानुव्याख्यां चित्रप्रभां खण्डयन्तो 'लघुटिप्पणी' नाम्नी टिप्पणीञ्च सल्लिखितवान् ।[86]

3. ब्रह्मदत्तजिज्ञासुमहोदयः

(कालः 1890 ईशवीयतः 1964 ईशवीयपर्यन्तम्)

जीवनपरिचयः-

पाणिनीयपद्धत्या च सरलसंस्कृतशिक्षणस्याऽऽविष्कर्ता पदवाक्य-प्रमाणज्ञः वेदानां तलस्पर्शी विदुषः पं. ब्रह्मदत्तजिज्ञासोः सन् 1890 ईशवीये अक्टूबरमासस्य

---

86 नागेशभावप्रकाशः - पेरि सूर्यनारायणशास्त्री, प्र.सं. 2004 खि. पाणिनीय प्रकाशन, तिरूपतिः

चतुर्दशदिनांके पञ्जाबप्रदेशस्य जालन्धरमण्डलस्यैकस्मिन् ग्रामे सारस्वतब्राह्मणे पाठकगोत्रीये परिवारे जन्म अभवत्। अस्य पितुर्नाम रामदासः मातुश्चनाम परमेश्वरी आसीत् । अस्य बाल्यावस्थाया नाम 'लभुराम' आसीत्। नववर्षावस्थायां पितरौ दिवङ्गतौ। आर्षग्रन्थान् पठितुं प्रबलेच्छया विंशतिमितवर्षावस्थायां जूनमासे सन् 1912 ईशवीये सः पितुर्गृहात् पलायितः। सः स्वामिपूर्णानन्दसरस्वतिमहाभागस्य शिष्यत्मङ्गीकृतवान्। तेन नवीनं नाम दत्तम्- 'ब्रह्मदत्तो जिज्ञासुरिति। तस्यपार्श्वे सोऽष्टाध्यायिक्रमेण पाणिनीय व्याकरणशास्त्रं ज्ञातवान्। काश्यामेव 1964 ईशवीये दिसम्बरमासस्य एकविंशतितमे दिनाङ्के श्रीजिज्ञासुमहोदयो दिवङ्गतः ।

अध्ययनकालः-

सन् 1926 ईशवीये वर्षे श्री जिज्ञासुमहोदयः कैश्चिच्छात्रैः सह काशीमागत्य सप्तसागर इत्याख्येस्थाने वासमकुर्वन्। अत्र सः वैयाकरण-मूर्धन्यात् पण्डितदेवनारायणत्रिपाठिमहाभागात् समग्रं व्याकरणमहाभाष्य-मधीतवान् । अत्रैव सदुण्ढिराजशास्त्रि-पण्डितगिरीशजीशुक्ल-गोस्वामि दामोदरलालमहोदयेभ्य प्राचीनानि दर्शनानि ज्ञातवान् । पण्डितभगवद्दत्त-महोदयात् सः शोधविषयमधीतवान्। एकेन आततायिना यवनेन स्वामीश्रद्धानन्दमहोदयो 1926 ईश्वीयस्यान्ते हतः । फलतः श्रीत्रिपाठि-महोदयस्यादेशेन सः काशीं निकटस्थमण्डलेषु शुद्धिकार्यं कृतवान्। पुनः सन् 1928 ईशवीयस्य मध्ये सोऽमृतसरनगरं गत्वा व्याकरणनिरुक्तादि-ग्रन्थानध्यापयति स्म। पण्डितब्रह्मदत्तो जिज्ञासुमहोदयो विस्तरेण मीमांसादर्शनमध्येतुं कतिपयैः स्वशिष्यैः सह 1932 ईशवीये वर्षे काशीमगच्छत। अत्र स महामहोपाध्यायात् पण्डितचिन्नस्वामिशास्त्रि-महोदयात्, तच्छिष्यात् पण्डितपट्टाभिरामशास्त्रिमहोदयाच्च गाम्भीर्येण पूर्वमीमांसाशास्त्रमधीतवान् । स श्रीपण्डितरामरट्टरटाटेममहोदयात् श्रौतग्रन्थानामध्ययनमकरोत् ।

अध्यापनकालः-

सन् 1920 ईशवीये वर्षे श्रीमतः स्वामिसर्वदानन्दस्य साधु आश्रमे (पुलकाली नदी हरदुआगञ्ज जिला अलीगढ़) श्रीजिज्ञासुमहोदयोऽष्टाध्यायी-क्रमेण पाणिनीयव्याकरणस्याऽध्यापनकार्यमारब्धवान्। सन् 1921 ईशवीयस्यान्ते सः 'गण्डासिंहबाला अमृतसर' नगरस्थे विराजनन्दाश्रमेऽध्या-पयन्नासीत्। सन् 1935 ईशवीये सः पुनः लाहौरनगरम्प्रति प्रस्थितः। सन् 1947 ईशवीयं पर्यन्तं सः लाहौरनगरे उषित्वा संस्कृतशास्त्राणां पठनपाठनकार्ये प्रवृत्त आसीत् ।

देशविभाजनानन्तरं सः काशीमागत्यः 'मोतीझील' इत्याख्ये स्थाने पाणिनीमहाविद्यालयं संस्थाप्य छात्रेभ्यः आर्षपद्धत्या संस्कृतशिक्षणं कुर्वन्नासीत्। भारतसर्वकारेण सन् 1932 ईशवीये श्री जिज्ञासुमहोदयः संस्कृतविद्वान् रूपेण पद्मविभूषण' इति सम्मानोपाधिना सम्मानितः पुरस्कृतश्च। श्री जिज्ञासुमहोदयस्य शिष्याणामेका सुदीर्घा परम्परा वर्तते।

कृतिपरिचयः -

पण्डितब्रह्मदतजिज्ञासुमहोदयः पाणिनीयाष्टाध्याया उपरि भाष्य-प्रणयनं कर्तुमेच्छत्। सोऽस्मिन् कार्ये तस्य शिष्यायाः प्रज्ञादेव्याः साहाय्येन साफल्यमवाप। सः स्वजीवनकाले पञ्चाध्यायमात्रमेवाष्टाध्याय्या भाष्यलेखनं पूरयितुमशक्नोत् । तस्य निर्देशने तच्छिष्या सुश्री प्रज्ञादेवी पाणिनीयाष्टाध्यायाः भाष्यलेखनं प्रारब्धवती। ग्रन्थस्य नाम प्रथमावृत्ति' रिति निर्धारितम्। पञ्चानामध्यायानां पाण्डुलिपिः सम्पूर्णा, प्रथम-द्वितीय-तृतीयाध्यायात्मकः प्रथमो भागः प्रकाशितः । सहसा श्री जिज्ञासुमहोदयो दिङ्गवतः। दुर्दैवात् पण्डितप्रवरजिज्ञासुमहोदयानामकाल-मृत्योर्वृत्तिरियम-पूर्णेव आसीत्। किन्तु प्रज्ञादेव्या षष्ठ-सप्तमष्टमाध्यायेषु तयैव पद्धत्या (सा) वृत्तिं विरच्य न्यूनतेयं दूरीकृता। एवं पाणिनीयाष्टस्य पञ्चमाध्यायपर्यन्तं

ब्रह्मदत्तजिज्ञासुनाविरचिता, षष्ठसप्तमाष्टमाध्यायेषु च प्रज्ञादेव्या विरचिता प्रथमावृत्तिरियं लभ्यते। वृत्तौ विभक्तिवचनानुवृत्तिनिर्देशपुरस्सरं सूत्राणां व्याख्यानं कृतं विद्यते। न केवलं बालानामपितु विदुषां कृतेऽपि अस्या वृत्तेः उपयोगित्वमस्त्येवेति नात्र संशयः।

पण्डितजिज्ञासुमहोदयः 'काशिकावृत्तः ग्रन्थस्य भूमिकामलिखत मूल-मष्टाध्यायी च सम्पादयामास । स स्वामिदयानन्दप्रणीतस्य यजुर्वेदभाष्यस्य पञ्चदशस्वध्यायेषु विस्तृतं विवरणमलिखित् । यत्र स विविधटिप्पणीभिः व्याकरणप्रक्रियां सम्पुष्टवान्। सममेव स वेदविषयकं दयानन्दमतसम्पुष्टिपूर्वक-मेकाविस्तृता वैदुष्यपूर्णा भूमिकाऽपि लिखितवान्। अनेन बहवो निबन्धा लिखिताः तेषां संग्रह पण्डितयुधिष्ठिरमीमांसकेन प्रकाशितः। सः भर्तृहरिप्रणीताया व्याकरणमहाभाष्यटीकायाः सम्पादनकार्य-मकरोत्। काश्या विद्वत्सु पदवाक्य-प्रमाणज्ञः पण्डितब्रह्मदत्तजिज्ञासुः सर्वदा समाहत आसीत्। तथा च सः आर्षपठनपाठनप्रणाल्या आविष्कारप्रयोगकर्तृ रूपेण सुविख्यातोऽभवत् ।

4. पं. गोपालशास्त्री नेने

(कालः 1882 ईशवीयतः 2 मार्च 1967 ईशवीययावत्)

जीवनपरिचयः-

पण्डितनित्यानन्दपन्तपर्वतीयमहोदयस्य शिष्यस्य पण्डितगोपाल-शास्त्रीनेने महोदयस्य जन्म काश्यां 1862 ख्रिस्ताब्देऽभवत्। अस्य पूर्वजाः अनेकेभ्यः वर्षेभ्यः काश्यां निवसन्तिस्म। अस्य पितुर्नाम श्री बाबूभट्टनेने इत्यासीत् । सः वैदिकः कर्मकाण्डी चाऽऽसीत्। कृष्णयजुर्वेदस्य आपस्तम्ब-शाखाया वैदिकेषु श्रीबाबूभट्टो गण्यते ।'

अध्ययनकालः-

श्रीपण्डितगोपालशास्त्रीनेने महोदयो व्याकरण-धर्मशास्त्र-वेदान्तादि-शास्त्राणामध्ययनं पर्वतीयमहाभागानां चरणयोर्मध्ये स्थित्वा विहितवान्।

अध्यापनकालः-

व्याकरणाचार्यपरीक्षोत्तीर्णान्तरं किञ्चित्कालानन्तरं स किञ्चित्कालं यावद् हरिद्वारनगरे ऋषिकुलब्रह्मचर्याश्रमे-ध्ययापनकार्यमकरोत् । ततः राजकीयसेवायां चित्वात् 'जालौन' मण्डले 'उंरई' ग्रामे 'राजकीय हाई स्कूल' इति विद्यालये संस्कृताध्यापक आसीत्। ततश्च 1928 ईशवीये वर्षेऽयं व्याकरणधर्मशास्त्र-विषयोरध्यापकत्वेन नियुक्तः, यतः 1957 ईशवीये वर्षे सेवानिवृत्तः। तत्राऽध्यापन-काले सः राजकीयसंस्कृतमहाविद्यालयसम्बद्ध-सरस्वतीभवन पुस्तकालयात् प्रकाश्यमानामनेकेषां पुस्तकानां सम्पादन-कार्यमकरोत् ।

कृतिपरिचयः-

श्रीनेनेमहोदयः कौण्डभट्टप्रणीतस्य वैयाकरणभूषणस्य 'सरला' नाम्नी व्याख्यामलिखत्। यत्र शाब्दबोधप्रक्रियायाः स्वरूपं सारल्येन बोधितमस्ति। नागेशभट्टस्य 'लघुशब्देदुशेखरस्य' 'भैरवी' टीकायुतस्य तत्पुरुषसमासादारभ्यः स्वरप्रक्रियान्तभागस्याऽनेन सम्पादनकार्यं विहितम्। धर्मशास्त्रविषयस्य सुप्रसिद्ध - ग्रन्थस्य 'निर्णयसिन्धु' इत्याख्यस्य 'कृष्णम्भट्टी' टीकायुतस्य आद्योपान्तं सम्पादनं कृत्त्वाऽयं ग्रन्थममुं वाराणसीस्थचौखम्बासंस्कृतसीरिज-प्रकाशात् प्राकाश्यमानीतवान्। श्रीनेनेमहोदयः वैयाकरणसिद्धान्तकौमुद्यां टिप्पणीं विलिख्याऽनेकेषु खण्डेषु प्रकाशितवान्।

काश्यामेव पञ्चसप्ततिवर्षावस्थायां मार्चमासस्य द्वितारिकायां सप्तषष्ठ्युत्तरैकोनविंशतिशततमे ईशवीये वर्षे श्रीपण्डितगोपालशास्त्रीनेने-महोदयो दिवङ्गतः ।

5. महामहोपाध्यायः पण्डितमाधवशास्त्री भाण्डारी

(कालः 19 शतकात् स्वातन्त्र्योत्तरकालपर्यन्तम्)

जीवनपरिचयः-

महामहोपाध्यायः पण्डितनित्यानन्दपर्वतीयमहोदयस्य शिष्यस्य (1867-1931) महामहोपाध्याय पण्डितमाधवशास्त्रिभाण्डारिणो मूलं निवासस्थानं नेर इत्याख्यो ग्राम आसीत्। अस्य पितुर्नाम श्री हरिशास्त्री आसीत् । अस्य जन्म मन्ये 1900 ख्रिस्ताब्दतः पूर्वमेवाभवत्

अध्ययनकालः-

वाराणसीमागमनात्पूर्वमयं माध्यन्दिनशाखाया वाजसनेयिसंहितां स्वनिवासस्थानेऽधीतवान् । वाराणस्यामनेन सहैवाऽस्य लघुभ्राता श्रीराम-शास्त्रीभण्डारीमहोदयोऽप्यध्ययनार्थमागतः। उभयोरेकतरो व्याकरणस्या-ऽध्येता संवृत्तः, अपरश्च न्यायशास्त्रस्य । श्रीमाधवशास्त्री श्रीपण्डितनित्यानन्द-पर्वतीयस्य शिष्यत्वं स्वीकृतवान्, तथा च श्री श्रीरामभण्डारी महामहो-पाध्यायवामाचरण-भट्टाचार्यस्य शिष्यत्वमाश्रितवान् । पण्डितमाधवशास्त्री-भण्डारीमहोदयः वाराणसीतः व्याकरणाचार्यपरीक्षां, कलिकातातः (कोलकातातः) साहित्यमीमांसयो-र्विषययोः 'तीर्थ' परीक्षां बिहारतश्च वेदान्ताचार्यपरीक्षाञ्चोत्तीर्णवान्। ज्योतिषशास्त्रस्य गभीराध्ययनकारणेनाऽस्य गणितफलितयोरुभयोरपि ज्योतिष-शास्त्रयोः समानरूपेण प्रावीण्यमासीत् ।

अध्यापनकालः-

सर्वप्रथममनेन काशीस्थ मारवाड़ीसंस्कृतमहाविद्यालये व्याकरण-शास्त्रध्यापनं विधायोत्तमा ख्यातिरर्जिता । ततश्चायं शास्त्रार्थे पाटवमवाप्य शास्त्रार्थेऽपि स्वगुरुपरम्पराया यशो वर्द्धितवान्। महामहोपाध्यायपण्डित-शिवदत्तदधिमथेः अवकाशे गृहीते सति लाहौरमहाविद्यालये डॉ. ए.सी. वूल्नरमहोदयोऽस्य वैदुष्यलाभार्थम् इमं तत्र प्रधानाध्यापकपदे नियुक्तवान् ।

ग्रन्थपरिचयः-

काश्यामुषित्वा श्रीमाधवशास्त्रिभण्डारीमहोदयोऽनेकान् ग्रन्थान् सम्पादित-वान्। तत्र प्रामुख्यम्भजमानौ ग्रन्थौ स्तः व्याकरणासिद्धान्त-सुधानिधिः (अध्यायत्रयमात्रम्) प्रौढ़मनोरमा (अव्ययीभावप्रकरणान्ता) चेति। प्रौढमनोरमा' इत्याख्ये ग्रन्थे तेन विषमस्थलेषु टिप्पणी अपि लिखिता। प्रस्तुतेयं टिप्पणी न केवलं परिष्कारदृष्ट्योपयोगिनी वर्तते, अपितुप्राचीन-वैयाकरणस्य (कैयटस्य) नागेशस्य च मतभेदे सति वस्तुस्थितेः समीक्षाप्रस्तुतिदृष्ट्याऽप्युपयोगी वर्तते। तथ्यमेतत् पण्डितगङ्गारामशास्त्रिणा प्रवर्तितानां वैयाकरणसिद्धान्तानामाधारेण गुरुपरम्पराप्राप्तस्याऽर्थोन्मेषस्य निदर्शनमवगन्तुं शक्यते। लाहौरमहाविद्यालये प्रधानाध्यापकपदे कार्य कुर्वन् श्रीमाधवशास्त्रिभण्डारीमहोदयो 1926 ईशवीये वर्षे व्याकरणमहाभाष्यस्य प्रारम्भिकाह्निकद्वयोपरि **'स्फोटविमर्शिनी'** इत्याख्यां व्याख्यां विरचितवान्। व्याख्यायामस्यां व्याकरणसिद्धान्तानुसारेण स्फोटस्य, स्फोटस्वरूप, अपभ्रंशेषु शक्तिविचार, माहेश्वरसूत्राणाम् अद्वैतब्रह्मप्रतिपादकता प्रभृतिषु विषयेषु स्फुटं प्रतिपादित्तम। स्वयं भण्डारीमहोदयोऽस्याः टीकायाऽन्ते पुष्पिकायां विलिख्य तथ्यमेतदभिव्यञ्जितम्। तथा हि-

'सच्चिन्नित्यानन्दरूप-नित्यानन्दाख्यराद्गुरोः ।

पर्वतीयस्य चरणद्वन्द्वासज्जित चेतसा ।।

लवपुर्या प्राच्यमहाविद्यालयविराजितम्।

प्रधानाध्यापकपदमध्यासीनेन धीमता।।

मीमांसायुगले शब्दशास्त्रे तर्केष्वधीतिना।

भण्डारिणा माधवेन शास्त्रिणाऽऽरचिता स्फुट ।।

पातञ्जले महाभाष्ये व्याख्या स्फोटविमर्शिनी।

भूरि भद्राय भवताच्छब्दब्रह्मविचारिणाम् ।।'

टिप्पणी -

'अकथितं चेति' सूत्रे अकथितशब्दो असंकीर्तिपर्यायः, न अप्रधानपर्यायः एवञ्च पूर्वविधिविषयप्रसक्तिपूर्वकं तदविवक्षायां सर्वथा पूर्वविधेः अप्रसक्तौ च चैतत् प्रवृत्तिरिति सर्वसम्मतम्।[87] तत्राद्योदाहरणम् 'गां दोग्धि पयः इत्यादि। द्वितीयोदाहरणं याचिपृच्छिभिक्षियोगे बलिं याचते वसुधाम् इत्यादि। तत्र प्रथमस्योदाहरणेषु 'गोर्दोग्धि पयः', 'गां पयो दोग्धि' इत्यादिप्रयोग-द्वैविध्यसम्भवेऽपि द्वितीयप्रकारोदाहरणेषु 'बलिं याचते वसुधाम्' इत्यादिषु न तादृशप्रयोगद्वैविध्यमिति । अत एवाऽत्र केयटेनोक्तम्-असंकीर्तितपर्यायाकथित-ग्रहणे 'गां दोग्धि' 'गो र्दोग्धि' इति च। याचि-पृच्छि-भिक्षियोगे कर्मसंज्ञैव इत्येषा व्यवस्थेति ।[88]

---

[87] काशी की पा. परम्परा-आ. बलदेव उपाध्याय, पृ. 363-396, प्र.सं. 1983 वि.वि.प्रका, वाराणसी

[88] प्रभा टिप्पणी अकथितं च (पा.सू.) प्रौढमनोरमा

6. आचार्य चारुदेवशास्त्री

(कालः 9.5.1983 ख्रिस्ताब्दतः 9.4.1987 ख्रिस्ताब्दपर्यन्तम्)

जीवनपरिचयः-

डॉ. श्रीरामकृष्णमहोदयस्य पुत्रस्य डॉ. चारुदतशास्त्रिणो मूलस्थानं होशियारपुरमण्डले टाडा उडमुड समीपस्थ अहियापुरं ग्राम अस्ति। अस्य मूलनाम तु चरणदास आसीत् परन्तु वैदुष्याद् बन्धुवर्गे चारुदेवशास्त्री, संस्कृतजगति च 'अभिनव पाणिनिः' इति नाम्ना प्रथितः। ते त्रयः साहिबदयालः, चारुदेवः, मेहचरचन्द (जौली इत्युपनामधारी) च भ्रातर आसन्। चारुदेवोऽग्रजसाहिबदयालमहोदयस्य बहुसम्मानं विश्वासं चाकरोत् । शास्त्रिणः विवाहः रामरक्खी' इत्याख्यया देव्या सहाभवत् ततश्च द्वादशवर्षात्परं (12) सुपुत्र्या उषाया जन्म अभवत्। सस्नेहेन

संपूरिता प्रसन्नवदना पितुः पुत्री उषाऽपि अत्यन्तशालीना कुशाग्रबुद्धिबालिका आसीत्। उषायाः सप्तवयसिगते सति डॉ. सत्यव्रतस्य जन्म अभवत् । ग्रीष्मावकाशे स्वहस्ताभ्यां शीतलपेयं (ठण्डाई) निर्मायतयोरपाययत्।

अध्ययनकालः-

बाल्यकालादेव प्रतिभासम्पन्न आसीत् चारुदेवमहाभागः। स विश्वविद्यालयस्य शिक्षणं दयानन्द महाविद्यालय, लाहौरतः प्राप्तवान् । तस्मिन्नकाले तस्य सतीर्थ्यो विश्वबन्धुमहोदय आसीत्। संस्कृतभाषां प्रति विशिष्टस्वरुचिवशादध्ययनकाले 'चरणदासे' ति नाम्ना ख्यातिं लब्धवान्। तस्मिन्नेवकाले संस्कृतस्य 'प्राज्ञे' ति परीक्षां समुत्तीर्य संस्कृत्तानुवादस्याभ्या-पुस्तकं प्रकाशितवान् स्वनामाग्रे 'पाणिनीय' इति आरपदं (सम्बोधनं) चायोजयत् ।

चतुर्वर्षानन्तरं 1916 तमे ख्रिस्ताब्दे चारुदेवमहोदयः बी.ए. आनर्सपरीक्षां दत्तवान्। तस्यकृते विश्वबन्धुमहाभागो वैदिकस्वराणां किञ्चिदवबोधनमकारयत्। स योगाध्ययन-निरत छात्रस्तु आसीदेव, आर्यसमाजस्य सत्संगीतिष्वपि (सत्संगोष्ठष्वपि) नियमपूर्वकं गच्छतिस्म।

विश्वबन्धुमहोदयः 1921 ख्रिस्ताब्दे दयानन्दमहाविद्यालयप्रबन्धकर्त्री-सभायाः अन्तर्गते दयानन्द-ब्राह्ममहाविद्यालयनाम्ना राष्ट्रिय (अ. विश्वविद्यालयीयस्य) संस्थानस्य स्थापनां चकार। तस्मिन् वि. विद्यालये 1924 ख्रिस्ताब्दे विश्वबन्धुमहोदयस्य स्वतन्त्रसंचालकत्वे विश्वेश्वरानन्द-वैदिक-शोधसंस्थानस्य कार्यमपि नवव्यवस्थितरूपे प्रारम्भकमकरोत्। तस्मिन्नेवकाले चारुदेवमहोदयोऽपि बहुपरिश्रमेण एम. ए. शास्त्रिपरीक्षां च समुत्तीर्णवान्।

अध्यापनकालः-

किञ्चितत्कालं यावत् डी.ए.वी. कॉलेज जालन्धरनगरे प्राध्यापको भूत्वा स्थायिरूपेण डी.ए.वी. कॉलेज लाहौरे प्राध्यापकपदमेवाशोभयत्। तेषु दिवेषु विश्वेश्वरानन्द-वैदिक-शोधसंस्थानेऽपि किञ्चित्कालं यावत् विश्वबन्धुमहोदयेन साकं कार्यमकरोत्। भारतविभाजनात्परं देहलीमागत्य दिल्ली विश्वविद्यालयस्य संस्कृत विभागाध्यक्षपदमालङ्करोत्।[89]

प्रसिद्धशास्त्रार्थे चारुदेवस्याभिमतम् -

स्वर्गीयमहात्माहंसराजस्याध्यक्षतायां 1931 ख्रिस्ताब्दे आर्यसमाजस्य प्रमुखानां विदुषामेका विशेषा गोष्ठीसमायोजिता आसीत्। यस्यां गोष्ठ्यां पञ्चदशदिवसपर्यन्तमनवरतमष्ट अष्ट होरा यावत् शास्त्रार्थः प्राचलत्। तस्यां गोष्ठ्यां महात्मा नारायणस्वामी, स्व. स्वामी अच्युदानन्द, स्व. स्वामी सर्वदानन्द, स्व.

---

[89] सं. वाङ्मय का वृ. इतिहास- (पञ्चदश खण्ड) आ. बल. उपा. पृ. 161, 2001 उ.प्र.सं. सं. लखनऊ

स्वामी नित्यानन्द, स्व. पं. आर्यमुनिः स्व. पं. रामचन्द्रमेहता, स्व. पं. राजाराम, स्व. पं. भवदत्तमहोदयः स्व. पं. ब्रह्मदत्तजिज्ञासु-महोदयादयःपञ्चाशद् विद्वांसः भागमगृह्णन्। पं. चारुदेवोऽपि गोष्ठ्यां सम्मिलितोऽभवत् ।

तस्यां गोष्ठ्यां विचारणीयोऽयं विषयो यत् 'किं निरुक्तकारो यास्काचार्य वेदेऽनित्यंमैतिह्यं स्वीकरोति वा नेति। अस्मिन् विषये स्व. राजाराममहोदयः विश्वबन्धुमहोदयः चारुदेवमहोदयानामेकमतमासीत् यद् नैव स्वीकरोतीति। फलतः गोष्ठी निर्णयाऽभावे विसर्जिता। चारुदेवोऽस्मिन् गृहयुद्धेऽत्युत्कर्षरूपेण भागं तु नागृह्णात् परन्त्विदं सर्वेजानन्ति यत् तस्योत्कटेच्छा सहानुभूतिर्वा विश्वबन्धुमहोदयस्य पक्षे आसीत्।

विश्वबन्धुमहोदयो डी.ए.वी. कॉलेजस्यानुसंधान विभागस्य संचालकपदे व्ययोजयत्। तत्र रा.व. तालचन्दस्मारक पुस्तकालयो विश्वबन्धोः कार्यास्थलमाशीत । यत्र विश्ववन्धुमहोदयो विश्वेश्वरानन्द वैदिक शोधसंस्थानस्य कार्यालयं स्थापितवान्। चारुदेव महोदयो यत डी.ए.वी कॉलेजस्य संस्कृतविभागे प्राध्यापक आसीत् प्रायः प्रतिदिनं लालचन्द-पुस्तकालयेऽगच्छत्।

कृतिपरिचयः-

'अभिनय पाणिनि' इति नाम्ना प्रसिद्धः चारुदेवमहोदय जनसाधारणस्य हृदये संस्कृतं प्रति रूच्युत्पादनार्थ विशिष्टकार्यमकरोत् । स स्वोपज्ञवृत्त्याः वृषभदेवस्य व्याख्यानस्य महत्त्वपूर्णाशैः सह च 'वाक्यपदीय-ब्रह्मकाण्डस्य' सम्पादनं कृत्वा रामलाल कपूर ट्रस्ट लाहौरतः स्वातन्त्र्यात्पूर्वमेव प्रकाशितवान् ततश्च भारतविभाजनात्परं पञ्जावप्रान्ताद् देहलीमागत्य महाभाष्यस्य नवाह्निकभागस्य

हिन्दीभाष्यलेखनं प्रारभत् यस्य 1966 ख्रिस्ताब्दे लेखनकार्य सम्पन्नमभवत्। तदनन्तरं 1968 ख्रिस्ताब्दे छात्रोपयोगी-महाभाष्य-नवाह्निकभागस्य प्रकाशनं जातम्।'[90]

अनेन नैकाः व्याकरणविषयकग्रन्थाः प्रणीताः तेषु-वाक्यमुक्तावली, शब्दापशब्दविवेकः, व्याकरण चन्द्रोदयश्चादयः प्रमुखा सन्ति।[91]

संगीतेऽभिरूचि-

पं. चारुदेवशास्त्रिमहोदयः 1935 ख्रिस्ताब्दे ग्रीष्मावकाशे पं. विश्वबन्धु स्व. प्रो. बहादुरमल्ल, स्व. पं. रामानन्द, स्व. प्राध्यापकज्ञानचन्दभाटिया-महोदयैः सह मिलित्वा शिमलायाः कुल्लूमनालीपर्यन्तं पदयात्रामकरोत् । सर्वे प्रायः द्वादश या त्रयोदश मीलं (क्रोशं) पर्यन्तं कस्मिन्नपि रम्यस्थले व्यश्राम्यन्। पं. चारुदेवो विधिपूर्वकं संगीतस्याप्यभ्यासमकरोत् । स प्रतिदिनं स्वमधुरसंगीतेन पदयात्रां सुखदामानन्ददायिकां चाकरोत् ।

चारुदेवस्य दानशीलता-

यदा 1936 ख्रिस्ताब्दे विश्वेश्वरानन्द वैदिक-शोध-संस्थानस्य पंजीकरणं सम्पन्नमभवत्। तदा तस्यनियमानुसारं नियतशुल्कं दत्त्वा ये सज्जना वि. वै. शोध सं. सभायाः प्रथम जीवनसदस्यतां प्राप्तवन्तः तेषु पं. चारुदेवोऽपि आसीत्। 1947 ख्रिस्ताब्दे देशविभाजनानन्तरं तत्संस्थानम् लाहौरतः विस्थापितं भूत्त्वा साधु-आश्रम-होशियारपुरे पुनः प्रतिष्ठापितोऽभवत्। तस्यावासीयावश्यकतानां पूर्तये लघुनि-दीर्घाणि च शतानि प्रकोष्ठानि निर्मितानि। तस्यावसरे चारुदेवो लघुप्रकोष्ठनिमित्ताय पञ्चदशशतं रुप्यकाण्ययच्छत् ।

---

[90] व्याकरण महाभाष्य - (प्रथमनवाह्निक) चा. शा. प्र. 1-2 1999, मोती. बना. दिल्ली

[91] वाक्यमुक्तावली घा.शा. भूमिका मा.सं. भवन जालन्धर शहर 1999, मोती बना दिल्ली

चारुदेवस्य वैशिष्टयम् -

स एको विलक्षण व्यक्तित्वयुक्तो विद्वान् आसीत्। तस्य प्रत्येकं श्वासोऽपि संस्कृतमयासीत्। स आधुनिकयुगस्य महर्षिरासीत्। देदीप्यमानो ललाटः, ज्ञानोदीप्ता दृष्टिः, वात्सल्ययुक्तो सरल मधुर-स्वभावः, गौरवेऽपि नितान्त निरपेक्षोऽनासक्तो-भावश्च मन्ये तस्य गरिम्णौ गुण आसीत्। विद्वत्ता उदात्तता चैव तस्य सम्पत्तिरासीत् ।

7. पं. गुरुप्रसादशास्त्री

(कालः 1900 ईशवीयतः 1972 ईशवीयावत्)

जीवनपरिचयः-

श्रीशिवनारायणशास्त्रिणो ज्येष्ठतनयस्य आचार्यगुरुप्रसादशास्त्रि-महोदयस्य राजस्थानप्रदेशे सन् 1900 ईशवीये वर्षे (संवत 1957 वैक्रमाब्दे ज्येष्ठशुक्लपञ्चम्या) जन्म अभवत्। अस्य मातुर्नाम राजलक्ष्मीदेवी इत्यासीत । अयं 1972 ईशवीये वर्षे (संवत् 2029 वैक्रमाब्देश्रावणकृष्णचतुर्दश्यां) दिवङ्गतः ।

अध्ययनकालः-

सः प्रारम्भिकमध्ययनं पूज्यपितामहचरणानां पितृचरणानाञ्च चरणयोः स्थित्वा सम्पादयामास। ततः सः स्वीय वाराणसीप्रवासकाले वैयाकरण-केसरिणः पण्डितदेवनारायणत्रिपाठिनः व्याकरणशास्त्रम्, न्यायमार्तण्डात् महामहोपाध्याय-स्वर्गीय श्रीवामाचरणभट्टाचार्यात् न्यायशास्त्रञ्च गाम्भीर्येणाधीतवान्। पितुः संसर्गजेन प्रभावेणाऽयं शीघ्रमेव शास्त्राणां प्रौढ़ो विद्वान् संवृतः। विंशतिवर्षदेशीय एव सः काशीराजकीयसंस्कृत-महाविद्यालयात् व्याकरणाचार्यपरीक्षां प्रथमश्रेण्यामुत्तीर्य सर्वतोऽधि-कानङ्कानवाप्तवान्। ततः सः न्यायचार्य-दर्शनाचार्य-आयुर्वेदाचार्य-परीक्षामपि प्रथमश्रेण्यामुत्तीर्य विशिष्टं कीर्तिमानं स्थापितवान्।

अध्यापनकालः-

सर्वकारीयसेवाविरुद्धत्वात् सः कुतश्चिदनुदानस्वीकारमन्तरेण 'राजस्थान-संस्कृतकॉलेज' इत्याख्या संस्था स्थापिता, यत्र सः प्रधानाचार्य आसीत्।

कृतिपरिचयः- अस्य ग्रन्थेषु प्रामुख्यम्भजमानाः सन्ति।[92]

क. षट्टीकाविभूषितस्य लघुशब्देन्दुशेखरस्य प्रकाशनम्। अत्र पञ्चटीकया सह षष्ठी स्वीया 'वरवर्णिनी' नामाख्या व्याख्यात्मकटिप्पणी कृता।

ख. राजलक्ष्मीसंवलितं सम्पूर्णमहाभाष्यम् ।

ग. लघुशब्देन्दुशेखरसहिता सिद्धान्तकौमुदी चेति।

पण्डितगुरुप्रसादशास्त्रिणः पुत्रः पण्डितसीतारामशास्त्रीमहोदयोऽपि व्याकरणे साहित्ये च आचार्योत्तीर्णे विद्वानस्ति। सः हिन्दुविश्वविद्यालयस्य संस्कृतमहाविद्यालये व्याकरणाध्यापकरूपेणाधिकं समयो यापितवान्। सः 1988 ईशवीये सेवामुक्तोऽ-भवत्।

8. पण्डितनृसिंहत्रिपाठी

(कालः 19 तमं शतकम्)

जीवनपरिचयः-

अस्य प्रसिद्धं नाम नृसिंहत्रिपाठी इत्यासीत्। अयं गाजीपुर-मण्डलान्तर्गतस्य 'खढिया' ग्रामस्यासीत्।

अध्ययनकालः-

बाल्यकालादप्रतिभासम्पन्नोऽयं प्रारम्भिकमध्ययनं ग्राम्यपाठशालायां कृत्वा विशिष्टयोग्यतार्थ काश्यामागत्य त्रिपाठीमहोदयस्य (पं. देवनारायणत्रिपाठिनः)

---

[92] संस्कृत-वाङ्मय का बृहद इति. (पञ्चदश खण्ड-व्याकरण) आ. बलदेव उपाध्यायः पृ-287, 2001, उत्तर प्र.सं.सं. लखनऊ

चरणौ उपविश्य व्याकरणशास्त्रस्य दुरुहग्रन्थानां विधिवदध्ययनं कृतवान्। अयं खलु श्रीत्रिपाठिनो नितान्तमनुगतश्छात्र आसीत्। व्याकरणशास्त्राचार्यपरीक्षायां श्रेष्ठत्वेनोद्घोषितत्वादयं विशिष्टं पारितोषिकं लब्धवान्। अनेकवर्षाणियावत् पोस्ट-आचार्यकक्षायामितराणि शास्त्राण्यपि सम्यगधीतवानयम् । नृसिंहत्रिपाठिमहोदयस्य न्यायशास्त्रे सम्यक् प्रवेशः साहित्यशास्त्रेचापि योग्या व्युत्पतिरासीत्।[93]

अध्यापनकालः-

काश्यामेवुषित्वाऽयमध्यापनकार्यं सम्पादितवान्। प्रथमं श्रीचन्द्र-महाविद्यालये व्याकरणशास्त्रस्याध्यापनं त्रिपाठिमहोदयेन सह अकरोत्। अनन्तरं त्रिपाठिमहोदयस्य संस्कृतमहाविद्यालये प्रधानाध्यापकपदं सुशोभितम्। ततो मारवाडीमहाविद्यालये अप्यस्य नियुक्तिः प्रधानाध्यापकस्य पदेऽभवत्। व्याकरणग्रन्थानामध्ययने कीर्तिः स्वगुरोरिव सातिशायिनी आसीत्।

टीकापरिचयः-

अध्यापनेन सह ग्रन्थलेखनस्य कार्यमपि सम्पादितम्। अनेन विरचितं ग्रन्थद्वयं 'मुक्तावली प्रकाशः' तथा च वाक्यपदीयबह्मकाण्डस्य 'प्रकाशटीका' प्रसिद्धिमाप्तवान्।

1. **मुक्तावली प्रकाशः-** मुक्तावली प्रकाशः लघुरूपग्रन्थोऽस्ति। अस्यां कृतौ न्यायमुक्तावल्याः शब्दखण्डस्य व्याख्यानं प्रश्नोत्तररूपे कृतम्। ग्रन्थस्य लक्ष्यं न्यायस्य कठिनान् तत्त्वान् छात्रेभ्यः सरल सुबोधरीत्या च विरचनमासीत्। अस्मिन् लक्ष्ये ते सर्वथा साफल्यं प्राप्तवन्तः ।

2. **वाक्यपदीयस्य ब्रह्मकाण्डटीका-** अस्य टीकाया नाम 'प्रकाशटीका' अस्ति। टीकेयं वाक्यपदीये प्रथमकाण्डे प्रामाणिकी व्याख्याऽस्ति । अस्याष्टीकाया विषये पं. काशीनाथ शर्मणः श्लाघनीयमिदं मतमस्ति यद् अस्यां टीकायां

---

93 का. की. पा. परम्परा-आ. बलदेव उपाध्याय, पृ.-471, प्र.सं.-1983

व्याख्यात्शास्त्रस्य सर्वे पदार्थाः नितान्तं स्फुटीभवन्ति तेनैव प्रकारेणाभिव्यक्ता यथा सूर्यालोके जगतः पदार्था नितान्तं प्रकटीभवन्ति । अस्यां टीकायां नरसिंहत्रिपाठिनः वैदुष्यं रचनाकौशलं नितान्तं प्रामाणिकमस्ति ।

9. पण्डितः रघुनाथशर्मा

(कालः - 19 तमं ईशवीयशतकम्)

जीवनपरिचयः-

उत्तरप्रदेशस्य 'बलिया' मण्डलान्तर्गते 'छाता' इत्याख्ये ग्रामे पण्डितश्रीकाशीनाथशास्त्रिणो गृहे पण्डितरघुनाथशर्मणो जन्म अभवत्। सः व्याकरणस्य वेदान्तस्य च विशिष्टवैदुष्येण सह विचक्षणबुद्धया (मेधया) सम्पन्नो नितान्तं मेवाधी शास्त्रज्ञो व्यावहारिकबुद्ध्या मण्डितोऽत्यन्तं लोकव्यवहारकुशलः पण्डित आसीत्।

अध्यापनकालः-

अयं सम्पूर्णानन्दविश्वविद्यालये विभिन्नेषु पदेष्वध्यापयत्।[94]

टीकापरिचयः-

अम्बाकर्त्रीटीका – चिन्तामणिमन्त्रप्रभावाल्लब्धप्रज्ञेन काशीनाथ-शर्मतुजुषा सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयस्य वेदान्तविभागाध्यक्षेण पण्डित-रघुनाथशर्म-पाण्डेयेन षोडषवर्षात्मक समयोऽस्याष्टीकायाः प्रणयने ग्रन्थस्य च पाठभेदादि संशोधने व्यतीतवान्। वाक्यपदीयस्य प्राचीनव्याख्यानां निर्माण काश्मीरस्यैव प्रत्यभिज्ञादर्शनस्य मार्मिकः विद्वज्जना अकुर्वन् शर्ममहोदयः स्वीयव्याख्यायां तासु टीकासु अव्याख्याताना-माल्पव्याख्यातामं नाशानामपि वा व्याख्यां कृत्वा मूलग्रन्थं

---

[94] का. की. पा. परम्परा-आ. बलदेव उपाध्याय, पृ. 475, प्र.सं.-1983

सरलः सुबोधो बोधगम्यश्च कृतवान्। सम्पूर्णानन्द-संस्कृतविश्वविद्यालयेन पञ्चसु भागेषु प्रकाशितेयम् एकैव स्वातन्त्र्योत्तरव्याकरणशास्त्रे काश्या योगदानद्योतनाय अलम्।

अस्याः टीकाया अध्यनेन टीकाकर्तुः व्याकरणे वेदान्तादिविविधशास्त्रेषु पाण्डित्यं ज्ञातुं शक्यते। स्वसिद्धान्तानां स्पष्टार्थ विविधशास्त्रीयग्रन्थाना-मुद्धरणान्यपि दत्तानि सन्ति। अत्र पूर्वटीकाकृतां कृते महान् समादरोऽवलोक्यते । यथा च पदकाण्डारम्भे हेलराजं स्मरन् कथयति ग्रन्थकारः-

येन काण्डद्वयं पूर्व विवृतं वृत्तिसंश्रयात्।

तृतीय स्वप्रतिभाया हेलराजः समे गतिः ।।

किन्तु टीकाकारः हेलराजस्य अन्धानुकृतौ न विश्वसिति। अनेकत्र तेन सह तत् मतभेदोऽप्यवलोक्यते । तत्पक्षमुत्थाप्य स्वपक्षसाधनाय नैकधा तर्कन्ते शर्ममहाभागः।

महाभाष्य-टिप्पणी- विश्रुतवैदुषीकेन श्रीमद्रघुनाथशर्ममहोदयेन प्रदीपोद्योतच्छायेति टीकात्रयालंकृत - नवाह्निकमहाभाष्ये विषमस्थलेषु टिप्पण्यः प्रदत्तः ।

10. पेरि वेङ्कटेश्वरशास्त्रिणः

(कालः-विंशशतकस्योत्तरार्द्धपर्यन्तम्)

जीवनपरिचयः-

दाक्षिणात्योमहानुभावोऽयमासीत् व्याकरणस्य मूर्धन्यो विद्वान्। 'कलाप्रपूर्ण' सम्मानोपाधिं प्राप्तवान्। महामहोपाध्यायऽयं सुब्बरायशास्त्रिणां शिष्येष्वग्रगण्य आसीत्।

अध्ययनकालः-

महोदयो वेङ्कटेश्वरशास्त्री उपत्रिंशद्वर्षाणि विजयनगरमहाराजसंस्कृत-कलाशालायां व्याकरणाचार्यत्वेन सेवां विधाय ततः कृष्णामण्डलीये 'आगिरिपल्ली' इत्याख्ये पत्तने श्रीमार्कण्डेय संस्कृतकलाशालायां दश वर्षाणि प्राचार्यपदं निरूह्य ततश्च पश्चिमगोदावरीमण्डलान्तर्गते 'कोव्वूरु' पत्तने संस्कृतकलाशालायां वर्षचतुष्टयं प्राध्यापकपदं व्यभूषयत् ।

अध्यापनकालः-

महोदयस्यास्याध्यापनस्येदं वैशिष्ट्यं यदयं पूर्वस्मिन्दिने पठितं पाठं परस्मिन्नेव दिनेऽश्रुणोत्। तथैवापि पूर्वस्मिन्दिनेऽधीतं पाठं परस्मिन्नेव दिने प्रत्यर्पयन्ति स्म। सिद्धान्तकौमुदीतः महाभाष्य पर्यन्तमेवास्याध्यापनं प्राचलत्।

महानुभावोऽयं स्वशिष्यं पेरिसूर्यनारायणशास्त्री भृशं संतुष्यापि स्वीयं शिष्यमुदिदधीर्षवोवैयाकरणभूषण-लघुमञ्जूषाद्यार्थिकग्रन्थाध्ययनाय स्वेषां गुरुचरणान् ताता सुब्बारायशास्त्रीः समुपासनीयमिति समादिशतः ।

कृतिपरिचयः-

'गुरुप्रसादशेष' इत्याख्यां व्याख्यां लघुशब्देन्दुशेखरस्य हल्सन्धिप्रकरणमारभ्य कारकप्रकरणं यावद् विरचितवान्। तथा चालितखत् परिभाषेन्दुखरस्य **'नागेशगूढार्थदीपिका'** नाम्नीं व्याख्याम्।

11. पेरि सूर्यनारायणशास्त्री

(कालः 20.8.1910 तः 24.9.1995 ईशबीयपर्यन्तम्)

जीवनपरिचयः-

पेरि सूर्यनारायणशास्त्रिमहोदयस्य जन्म 20.8.1910 ख्रिस्ताब्दे विशाखमण्डलस्थे विजयनगरस्य चोडवरसमीपे पेदनन्दिपल्लि अग्रहारे सोमदेवी

सर्वेश्वरशास्त्राख्ययोः पुण्यदम्पत्योः गृहेऽभवत्। अस्य चरमे काले द्वावभिलाषा-वास्ताम्। यथा- (1) अन्तिमो वाक्यार्थः श्रीशृङ्गेरी-जगद्गुरुचरणानां सन्निधौ भवेत्। (2) शरीरपरित्यागः राजमहेन्द्रनगरे गौतमीतीरे भवतु इति च। **"ऋषिणां पुनराद्यानां वाचमर्थोऽनुधावति"।** इति चरितार्थ कुर्वन् अयं स्वाभीष्टमेतदद्वयं संप्राप्य 24.6.1995 तमे ईशवीयवर्षे संसारं त्यक्त्वा परलोकमगच्छत्।[95]

शिक्षाभ्यासः-

अस्य पिता प्रारम्भिक शिक्षायै चतुर्दशवर्षस्यावस्थायां मातामहं प्रति प्रैषयत्। अस्योपनयनसंस्कारः सप्तमे वर्षेऽभवत्। सप्तवर्षानन्तरमयं श्रीवेदुला राममूर्ति-शास्त्रिमहाभागस्य सान्निध्ये संस्कृतकाव्यशास्त्राणामध्ययनार्थ श्री रामपुरम् अग्रहारम् गतवान्। चतुर् मासानन्तरं यदा पेदनन्दिपल्ली अग्रहारे संस्कृतविद्यालयस्य स्थापना जाता तदा अस्य पिता एनं पुनः पेदनन्दिपल्लीम् आनयत्। एष स्थानिकप्राथमिक-पाठशालायामभ्यस्तप्राथमिकविद्यः श्रीमतां पेरि अप्पलनरंसिंहशास्त्रिणां वात्सल्यानुग्रहेण समस्तप्रसिद्धगीर्वाणगद्य-पद्य-चम्पू-रुपकाणि चापठत्।

बाल्ये एव् पञ्चमहाकाव्यादिकमधीत्य विद्यानगरीपरानिधाने विजयनगरे सततगीर्वाणवाणीचरणारविन्दसंसेवनप्रसिद्धायां विद्वद्वरेण्य-पूजितायां श्रीमहाराज-संस्कृतकलाशालायां दीर्घकालमधीत्य 1934 ईशवीयवर्षे व्याकरणविद्याप्रवीणोपाधिं प्राप्नोत् । ततश्च क्रमशः भाषाप्रवीण, P.O.L. परीक्षेपि विशिष्टश्रेण्यामुत्तीर्णवान्। एष स्वपूर्वसंस्कारविशेषेण महामहोपाध्यायानां कलाप्रपूर्णा ताता सुब्बरायशास्त्रिणां तथा तत् शिष्यश्रेष्ठस्य महामहोपाध्यायस्य पेरि वेङ्कटेश्वरशास्त्रिणश्च सान्निध्यमलभत। अयं केवलव्याकरणशास्त्राध्ययनेन सन्तोषं न प्राप्तवान् तस्मात् कोल्लुरु लक्ष्मणमूर्तिशास्त्रिणां संकाशात् न्यायशास्त्रम्, महामहोपाध्याय पेरिलक्ष्मी-

---

[95] नागेशभावप्रकाशः-पेरि सूर्यनारायणशस्त्री, भूमिका, प्र.सं.2004, पाणिनीय प्रकाशन, तिरूपतिः

नारायणशास्त्रिणां तथा 'चतुस्तन्त्री' इति बिरुदभाजां कोल्लूरु सोमशेखरशास्त्रिणां सान्निध्ये पूर्वोत्तरमीमांसाशास्त्रे चाधीतवान् ।[96]

अस्य प्रमुखा गुरव इमे आसन्-

1. ब्रह्मश्रीवेदुलारामामूर्तिशास्त्री श्री रामपुरम्
2. ब्रह्मश्रीवदलामणी वेंकटेश्वरशास्त्री-पेदन्दिपल्ली
3. ब्रह्मश्री पेरि अप्पानरसिंह-पेदन्दिपल्ली
4. कलाप्रपूरणा पेरि वेङ्कटेश्वरशास्त्रि-विजिनग्राम
5. एम. एम. तातासुब्बराय शास्त्री-विजिनग्राम
6. एमएम पेरी लक्ष्मी नारायणशास्त्री-विजिनग्राम
7. ब्रह्मश्रीकुल्लुरी लक्ष्मणमूर्तिशर्मा-विजिनग्राम
8. ब्रह्मश्रीकुल्लुरी शोमशेखरशास्त्री-विजिनग्राम
9. ब्रह्मश्री कुल्लुरी वेङ्कटरमणशास्त्री-विजिनग्राम चेति।

अध्यापनकालः-

छात्रत्वेन कलाशालायां प्रविष्टोऽयं तत्रैवाध्यापको भूत्वा परमगुरुणां ताता सुब्बरायशास्त्रिणां प्रीत्यतिशयस्य पात्रमभूत। 1934 तमे ईशयीयाब्दे वर्षे भण्डारकरशोधसंस्थापक्षतः व्याकरणशास्त्रशोधनाय कश्चन् विद्वान् चयनीय इति मद्रासर्वकारतो लेखः कश्चन लब्धो यश्च विजयनगरसंस्कृतकलाशालाप्राचार्यं प्रेषित आसीत्। स च विद्वान् ताता सुब्बरायशास्त्रिवर्याणामेव सन्निधौ अधीयीतेति, तस्मै उपकृतिवेतनत्वेन किञ्चिदिव धनं प्रदीयत इति च लेखस्य सारः। तदानीं

---

[96] शाब्दिकवागीश पेरिसूर्यनारायणशास्त्रिणोऽभिनन्दनग्रन्थः पृ-8 प्र.सं. 2006, स्त्रि., तिरूपतिः

व्याकरणविद्याप्रवीण इति परीक्षां समुत्तीर्य स्वसान्निध्ये व्याकरणशास्त्रीयान् प्रौढ़ग्रन्थानधीयानं पेरिसूर्यनारायणशास्त्रिवर्य शोधनार्थमचिन्वन् ।[97]

श्रीशास्त्रिणः पञ्चाशद्वर्षपर्यन्तमध्ययापनकार्यमकरोत्। अयं प्रथमतया श्रीसिंहाचलदेवस्थानसंस्कृतपाठशालाया-मध्ययापनसेयां प्रारभत्। तत्र वर्षत्रयमध्यापनं कृत्वा अनन्तरं 1971 पर्यन्तं श्रीविजयनगरसंस्कृत-पाठशालायामध्यापनमकरोत् । अनन्तरं राजमहेन्द्रनगरस्थ श्रीगौतमी-विद्यापीठसंस्कृतकलाशालायामपि 1977 पर्यन्तम् अध्यापनसेवामकार्षीत्। ततश्च 1971 वत्सरपर्यन्तं मन्त्रालयक्षेत्रे श्रीराघवेन्द्रस्वामिमठसम्बन्धिनि श्रीगुरुसार्वभौम-विद्यापीठेऽध्यापकाध्यापकपदव्यां सुशोभितवान्। तदुत्तरकाले 1985 वर्षं यावत् श्रीतिरुमलतिरुपतिदेवस्थानस्य प्रणालीमनुसृत्य वर्षचतुष्टयकालमुन्नतशास्त्राध्यापन-कार्यक्रमस्य निर्वहणमकरोत् । अयं पञ्चाशद्वर्षपर्यन्तमस्मिन् अध्यापनकार्ये सर्वत्र व्याकरणप्राचार्यपदमेव सुशोभितम्।

गुरवो बहवस्सन्ति शिष्यवित्तापहारकाः ।

शिष्यचित्तापहारी तु गुरुः परमदुर्लभः ।।

इति महतां वचनं सत्यं करोति पेरि सूर्यनारायणशास्त्रिमहोदयः ।

कृतिपरिचयः-

1. षड्दर्शनमुलु। (आन्ध्रभाषायां षड्दर्शनपरिचयः)
2. वृत्तिविचारमु। (आन्ध्रभाषायां कृत्तद्धितादीनां विचारः)
3. परमार्थसारमु (आन्ध्रभाषायां वेदान्ते)
4. वाक्यपदीयम् (आन्ध्रभाषायां व्याकरणे)
5. तत्त्वदर्शिनी। (वैयाकरणभूषणसारस्य संस्कृतव्याख्या)

---

[97] Son-Autobio-Graphy-Prof.-Subbaryan peri, (R.S.S.T.Trupati) P-8-13

6. खण्डदेवभावप्रकाशः। (पूर्वमीमांसाग्रन्थः संस्कृते)

7. नागेशभावप्रकाशः (संस्कृते इदं नागेशलघुगञ्जुषायाः व्याख्यानम्)

महामहोपाध्याय-पेरि-सूर्यनारायणशास्त्रिणाः प्रणीताः कतिपय-निबन्धाः-

1. षडङ्गानि वेदस्याहुर्मनीषिणः, पत्रिका-शाब्दिकवागीश प्रथम सं. 2006 पृष्ठ-25-31

2. भूषणसारव्याख्या तत्त्वदर्शिनीः पत्रिका-शाब्दिकवागीश प्रथम सं. 2006 पृष्ठ-32-42

3. लघुमञ्जूषाव्याख्या नागेशभावप्रकाशः, पत्रिका-शाब्दिकवागीश प्रथम सं. 2006 पृष्ठ-43-46

4. धात्वर्थमुख्यविशेष्यकबोधः, पत्रिका-शाब्दिकवागीश प्रथम सं. 2006 पृष्ठ-47-49

5. क्रियाविशेषणानां कर्मत्वम्, पत्रिका-शाब्दिकवागीश प्रथम सं. 2006 पृष्ठ-50-57-31

6. भाट्टरहस्ये न्यायमतखण्डनम्, पत्रिका-शाब्दिकवागीश प्रथम सं. 2006 पृष्ठ-58-70

7. पाणिनीयेऽद्वैतभावाः, पत्रिका-शाब्दिकवागीश प्रथम सं. 2006 पृष्ठ-86-88

8. कुमारसम्भवविमर्शः, पत्रिका-शाब्दिकवागीश प्रथम सं. 2006 पृष्ठ-89-92

पुरस्कारोपाधयः-

अयं श्रीशृङ्गेरीजगद्गुरुशंकराचार्येण 'व्याकरणवागीश' इत्युपाधिना सम्मानितः। भारतराष्ट्रपतिभिः 1981 ख्रिस्ताब्दे भारतराष्ट्रपतिपुरस्कारेण

सम्मानितः। मन्त्रालयस्य श्रीराघवेन्द्रमहाधिपतयः 1979 ख्रिस्ताब्दे 'व्याकरणालंकार इति विरुदेन सम्मानितवन्तः। वाराणस्यां सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः 1989 ईशवीयेवर्षे एनं 'महामहोपाध्याय' त्वेनोद्घोषयत्। 1981 ख्रिस्ताब्दे 'राजलक्ष्मीपुरस्कारः' इति पुरस्कारेण समभ्यर्चितः। इमम् 'उपनिषदर्थवाचस्पतिः, व्याकरणरत्नम्', 'दर्शनाचार्य' इत्येवमादय उपाधिना समलंकृतवान्।

तदानीन्तनभारतोपराष्ट्रपतयः श्रीशंङ्करदयालशर्माणः 1992 तमे वर्षे सर्वजनसमक्षं श्रीशास्त्रिणां पादयोः साष्टाङ्गप्रणाममाचरितवन्तः । यस्य कस्यापि संस्कृतपण्डितस्य दिवास्वप्नवदलभ्योऽयं सम्मानविशेषोऽयं वाण्याः प्रसादेन प्राप्तवान् ।

श्री शृङ्गेरीक्षेत्रे महागणपतिवाक्यार्थसभासु प्रतिवर्ष भागं ग्रहीतुं गतानेतान् विलोक्य जगद्गुरुणाः 'व्याकरणवागीशाः समायाताः' इत्येवं स्वीयामपारकृपां प्रादर्शयन्।

सभाः-

श्रीशृङ्गेरीस्वामिनः श्रीभारतीर्थमहास्वामिनः शास्त्रिणां मार्गदर्शने नैकशास्त्ररहस्यानि ज्ञातवन्तः। एवं श्रीशास्त्रीमहोदयस्य विविधविद्वत्सभासु गोष्ठीषु मूर्धन्यस्थानमासीत्। तिरुपति-विजयवाडएलूरुराजमहेन्द्रनगरम्-अन्नवरं प्रभृति-स्थानेषु आयोजिताः सभास्सर्वा अपि श्रीशास्त्रिणां भागग्रहणेनैव सार्थकताम् प्राप्तवत्यः ।

कठोरविद्याव्यासङ्गः-

श्रीशास्त्रिणां विद्याव्यासङ्गस्य नास्ति तुल्यता। तदेकं कृच्छ्रचान्द्रायण-व्रतमिव प्राचलत् । एष सारस्वतो पुत्र निद्राहारादिकमपि विस्मृत्य व्याकरणाध्ययनमकार्षीत्।

गुरुकुले विद्याव्यसनस्यास्य 'पण्डित' इति प्रतीतिरासीत् । तादृशो दृढव्यवसायी एष । एष तर्क- पूर्वोत्तरमीमांसा-साहित्यशास्त्रादिष्वपि अप्रतिहतप्रजां समावाप।

श्रीशास्त्रिमहोदयस्य विषयवस्तुविवेचनशैली प्रसिद्धैयासीत्। द्वित्राणि उदाहरणानि प्रदर्शयामि। तद्यथा-विप्राय ओदनम्' इत्यादिषु स्थलेषु 'तादर्थ्य चतुर्थी' इति सर्वेषां गतम्। तादर्थ्य नाम उपकार्योपकारकभावः सम्बन्धः। अत्र तादर्थस्यापि सम्बन्धत्वेन विवक्षा यदि तदा षष्ठ्येव भवति। यथा-गुरोः इदम-गुर्वर्थम् इत्यादिषु । अत्र तादर्थ्यशब्दस्य-तस्मै इदं तदर्थम्। तस्य भावः तादर्थ्यम् इति केचन वर्णयन्ति। तत्तु सिंद्धान्तरीत्या न सर्वत्र सङ्गच्छते। यतो हि अर्थशब्दः निवृत्तियचनोऽपि प्रयोगे दृश्यते। तादृशार्थमादायापि निर्वाहः कर्त्तव्य आपतति । "अर्थोऽभिधेयरै-वस्तुप्रयोजननिवृत्तिषु" इति कोशादपि निवृत्त्यर्थकत्वं व्यक्तम्। वसेः अस्यर्थस्य प्रतिषेधः" इति वार्तिके प्रयुक्तोऽर्थशब्दः अर्थशब्दो निवृत्तिवाची इत्थं कैयटाचार्येण व्याख्यातम्। अत एव 'मशकार्थो धूमः" इत्यत्र मशकनिवृत्तिरूपप्रयोजनाय धूम इति तात्पर्य व्यर्ण्यते। एवं मृगेभ्यो वागुरा इत्यत्र मृगाणा बन्धनीकरणार्थनिति अर्थः। अतश्च लक्ष्यानुसारेण अपकार्यापकारकभावेऽपि अर्थशब्दो वर्तते इति कैयटाशयः।

अस्य परामर्शसमये श्रीशास्त्रिमहोदयस्य मतमित्थं प्रकारेणास्ति- लोके कुत्राप्यर्थशब्दस्यापकारार्थकत्वं न दृष्टम्। 'भक्षितेऽपि लशुने न शान्तो व्याधिः' इति न्यायेन कथञ्चिदेतर्थकत्ये' मशकार्थो धूमः' इत्यादिषु अन्वयानुपपत्त्या सर्वैरपि लक्षणा स्वीकार्या। तेनैव लक्षणास्वीकरणेन 'मशकेभ्यः' इत्यत्रापि लाक्षणिको निर्वाहः सम्भवति । तदर्थम् अप्रसिद्धार्थस्यात्राश्रयणं न समञ्जसम्। नागेशैरपि उपकार्योपकारकभावसम्बन्ध एव तत्र प्रतिपादितः । अत एव 'वसेरश्यर्थस्य प्रतिषेधः' इति वार्तिकस्यस्यार्थशब्दस्य अशिनिवृत्तिमर्थत्वं वर्णयित्वा शाकपार्थिवादित्वात् निवृत्तिशब्दस्य लोपः इति व्याख्याकारेणोक्तम्। कैयटैरेव स्वयं प्रथमत उक्ते

व्याख्यानेऽस्वारस्यं मन्दानैः शेतेरर्थः श्यर्थः, न श्यर्थः अश्यर्थः इति तत्वेन वर्णनमपि न सङ्गच्छते। भाट्टरहस्ये 'उपकारापकारसाधारणं तादर्थ्य लक्षणया चतुर्थ्यर्थः इति समन्वयप्रकारश्च न समीचीनः।

एवं व्युत्पत्तिवादे 'स एव अर्थः- प्रयोजनं यस्य सः तदर्थः। तस्य भावः तादर्थ्यम् इति भाष्यादिविरुद्धा या बहुव्रीहिसमाश्रयणरीतिः प्रदर्शिता साऽपि न प्रामाणिकी। उपकार्योपकारकभावसम्बन्धं पुरस्कृत्य अर्थशब्दस्य विवेचने दुःखाय पापम् इत्यपि प्रयोगः साधुः स्यात् इति भट्टाचार्यस्याशयः। प्रयोजनत्वं किं जन्यत्वम् ? उत जन्यतया इच्छाविषयत्वम् ? इति विकल्प्य बहुधा आक्षेपाः कृताः। दुःखाय पापम्, स्वर्गीय पुण्यम्" इत्यादिप्रयोगाणां साधुत्वे, पक्तुं व्रजति' इतिवत् 'पाकाय व्रजति' इत्यस्यापि साधुत्वसम्पादनार्थ तुमर्थाच्च भाववचनात्' इति सूत्रप्रणयनवैयर्थ्यमपि तैः आपादितम्।

नागेशोपाध्यायैः पक्षोऽयं प्रतिक्षिप्तः। 'सुखाय पुण्यम्, नरकाय पापम्' इत्याद्याः प्रयोगाः साधव एव। 'यागाय याति इत्यादौ तुमर्थघञ तादर्थ्यस्योक्तत्वात् 'उक्तार्थानामप्रयोगः" इति न्यायेन पाकपदात् चतुर्थ्याः अप्राप्तौ तुमर्थाच्च भाववचनात्" इति सूत्रमारब्धम्। भाष्ये तादर्थ्यशब्दे 'तस्मै इदम् तदर्थम्, तस्य इदम् तदर्थम्" इति चतुर्थी-षष्ठ्यौ एव विग्रहवाक्ये प्रदर्शिते। तौ च तत्पुरुषसमासौ। भट्टाचार्योक्तरीत्या बहुव्रीहिसमासो भाष्ये कुत्रापि न प्रदर्शितः। किञ्च शब्दमर्यादया भट्टाचार्योक्तोऽर्थोऽत्र न लभ्येत्। क्रियार्थोपपदकघञन्तस्य प्रयोगे चतुर्थीविधानार्थ तुमर्थाच्च इति सूत्रमारब्धम्। एवं विषयभेदस्य विद्यमानत्वात् तत्सूत्रमपि न निर्विषयम्। एवं रीत्या तादर्थ्यचतुर्थीविषये भाष्यकैयटनागेशादि भाववर्णनपूर्वकं श्रीशास्त्रिमहोदयेन सुबर्थवादे यत्साधितम्, तदतीव विदुषामानन्दाय भवेदिति ।

कारकशब्दार्थपरिष्कारविषयेऽपि किञ्चिदुच्यते-

कृधातोः कर्तरि ण्वुलि निष्पन्नः कारकशब्दः। तेन क्रियां निर्वर्तयति इति कारकशब्दव्युत्पत्तिः। कारकत्वं घ-क्रियाजननशक्तिः । अनभिहिते इति सूत्रे-गुणाः साधनम् इति भाष्यम्। साधनस्य परतन्त्रत्वेन एवमभिधानम् । गुणत्वेन एव पारतन्त्र्यात् शक्तिरेवात्र भाष्ये अभिहिता। 'शक्तिः कारकम्" इति, क्रियाजनकं कारकम् इति च सिद्धान्ते पक्षद्वयं वर्तते। उभयोरपि अदूरविप्रकर्षेण तुल्यार्थकत्वमेव। अत एव 'कारणं-क्रियाजनकत्यशक्तिः" इति शेखरकारैः विवृत्तम्। शक्तिः सामर्थ्यम् इत्यनर्थान्तरम्।

अत एव भर्तृहरिभिः - स्वाश्रये समवेतानां तद्वदेवश्रयान्तरे। क्रियाणामभिनिष्पतौ सामर्थ्य साधनं विदुः इति विवृतम्। 'कारके' इति सूत्रे "साधकं निर्वर्तकं कारकसंज्ञं भवतीति वक्तव्यम्" इति वार्तिकस्य व्याख्यानावसरे अन्वर्थसंज्ञा यथा विज्ञायेत- 'करोति इति कारकम् इति एवं तर्हि सामान्यभूता क्रिया वर्तते, तस्याः निर्वर्तकं कारकम् इति च भाष्यमत्रज्ञातव्यम् । अत्र सर्वत्र साक्षात् क्रियानिर्वर्तनस्य विवक्षा। तेन ब्राह्मणस्य पुत्रं पन्थानं पृच्छति इत्यत्र ब्राह्मणरूपार्थस्य पृच्छतिक्रियायां साक्षात् सम्बन्धाभावात् न षष्ठ्यन्तस्य तस्य कारकत्वम्। पुत्रस्यैब क्रियासम्बन्धः। ब्राह्मणस्तु अन्ययासिद्धः। 'काष्ठैः स्थाल्यां तण्डुलान् पचति' इति प्रयोगे सन्निहितस्य काष्ठादेरेब करणत्वम्, न अरण्यस्थादेः। एवं चुल्याम् आरोपिताया एव स्थाल्या अधिकरणत्वम्, न कुलालगृहे विद्यमानस्य । अत्रोपात्तस्यैव तण्डुलादेः कर्मत्वम्, न तु विपण्यादिस्थस्य। एतत् सर्व प्रकरणात् लभ्यते। एवञ्च तत्तच्छक्त्याविष्टस्यैव क्रियाजनकत्वम्-इति सिद्धस्य द्रव्यस्य स्वरूपतः क्रियाजनकत्वं न इत्यादिकमपि ज्ञातव्यम्। काष्ठादीनां तत्तकारकत्वेऽपि शक्त्याविष्टस्यैव कार्योत्पादनदर्शनात्

शक्तावेशो नान्तरीयकः। न केवलमत्र, सर्वत्राप्येवमेव। अत एव "प्राप्ताप्राप्तविवेकेन शक्तिः साधनम्" इति पूर्वैरूक्तम् एवं 'परोक्षे लिट्' सूत्रेऽपि गुणसमुदायः साधनम् इति भाष्यम्। एतत् सर्व मञ्जूषायां स्पष्टम् ।

अत्र 'शक्तिः कारकम्' इति पक्षः न सङ्गच्छते, क्वचित् शक्तिमतो द्रव्यस्यैव कारकशब्दव्यवहारो भाष्ये दृष्टः। यथा-सार्वधातुके यक्' इत्यत्र भाष्ये - द्रव्यं क्रियाभिनिर्वृत्तिं प्रति साधनत्वमुपैति" इति द्रव्यस्य साधनत्वमुक्तम् । 'अतिशायने तमविष्ठनौ' इत्यत्र तु भाष्ये "साधनं नैव द्रव्यम्" इत्यभिहितम्। अत्र उभयोर्भाष्ययोर्विरोधः स्पष्टं एव। अतः 'क्वचित् शक्त्याविष्टस्यापि साधनत्वेन व्यवहारः, शक्तिशक्तिमतोरभेदस्यापि सत्त्वात्। 'शक्त्या करोति' इत्यादौ शक्तेरपि द्रव्यायमाणतया शक्त्यन्तरयोग इति श्रीनागेशैरभिहितम् ।

अत्र श्रीशास्त्रिमहोदयस्य गम्भीरं विवेचनमस्ति। तद्यथा- "कृदभिहितो भावो द्रव्यवत् प्रकाशते" इति भाष्योक्तेः अत्र शक्तिशब्दोत्तरकरणशक्त्या-भिधायक-तृतीयायाः प्रयोगः साधुरेव। अत एव विभक्त्यर्थकाव्ययेन अव्ययीभावसमासः सङ्गच्छते ।

सर्वेषां च कारकाणां स्वस्वावान्तरक्रियाद्वारा प्रधानक्रियायाः निष्पादकत्वम्। विक्लेदनक्रियाजनकत्वेन कर्मणः ज्वलनसंबन्धपरिकल्पनरूप-क्रियानिष्पादकत्वे काष्ठादीनां, पात्रस्थतण्डुलादेः चुल्ल्या अधो वा पतनाभाव-सम्पादनद्वारा आधारणक्रियानिर्वर्तनद्वारा स्थाल्याः इत्याद्याकारेण तत्त्वदवान्तरक्रियानिष्पादनेन सर्वेषां कारकाणां प्रधान क्रियोपयोगित्व-मवगन्तव्यम् ।

"ग्रामे वसते ब्राह्मणाय गां ददाति' इत्यत्र दानकाले देवदत्तस्य प्रतिग्रहीतुरसान्निध्येऽपि दातृबुद्धिस्थत्वेन दातृज्ञानपूर्वकालत्वेन प्रतिपत्तिर्भवति। तावतैव दानरूपायाः क्रियायाः निष्पतेः। एवं घटं करोति इति प्रयोगोऽपि साधुरेव । भाविनी संज्ञामाश्रित्यापि लोके व्यवहारस्य दृष्टत्वात्। तादृशं वस्तु कुलालो निर्माति यस्य निर्मितस्य घट इति व्यवहारो भविष्यति इति पर्यन्तं तत्रार्थस्य विवक्षितत्त्वात स्पष्टमेवं भाविनी संज्ञामाश्रित्यापि व्यवहारः साधुरिति 'वृद्धिरादैच" सूत्रभाष्ये । तेन अनुत्पन्ने घटे घटव्यवहारो साधुः कारकव्यापारवैयर्थ्यप्रसाद इति केषाञ्चिदालेपो भाष्यविरुद्धः । नापि अनुत्पन्ने घटे घटव्यवहारो गौणः मुख्यत्वात् ।

एवं भाष्यादिपरामर्शन वैयाकरणैः निरूपणात् 'क्रियान्वयित्वं कारकत्वम्, क्रियान्वितप्रत्ययार्थान्वयित्वं कारकत्वं इत्याद्याः पक्षा असङ्गत्ता इति अत्र शास्त्रिमहोदयेन प्रतिपादितम्। अनेन सुपा द्योतकतापक्ष एवं भाष्यतात्पर्यम इति सम्यक् उपपादितम्।

परन्तु पेरिसूर्यनारायणशास्त्रिमहोदय एवं सूत्र-वार्तिक भाष्य-वाक्यपदीयादिविरुद्धं किमपि न प्रदर्शयति, नाङ्गीकरोति च। सर्वत्र स्वोक्तार्थे भाष्यादिकं प्रमाणत्वेनोपस्थापयति। अस्य जिह्वाग्रे भाष्यभारती नर्तनं करोति स्म नात्र संशयः।

अस्य प्रमुखाः शिष्याः'[98]

1.	श्रीमन भाष्यम् अपालाचार्जुलु
2.	पेरि कुर्मनाथशर्मा

[98] शाब्दिक वागीश - पेरिसूर्यनारायणशास्त्रिणोऽभिनन्दनग्रन्थ, 2006 ख्रि. तिरुपतिः

3.	श्रीमान् राकाकृष्णामाचार्जुलु (विजयनगरम्)
4.	कलागा बैंकटा सौम्याजुलु
5.	पेरि सर्वेश्वरा शर्मा (जर्मनी)
6.	कृष्णमाचार्युलु (आन्ध्र. वि. विद्यालय)
7.	श्री रङ्गाचार्युलु
8.	पीडापार्थीवीरभ्रदाशर्म
9.	वेदुलु सत्यनारायण
10.	बन्धि विश्वनाथन
11.	पेरि श्रीरामामूर्तिः
12.	पेरि रमेशम
13.	ओरूगण्टी अपालानरसिह्मन्
14.	धवला रमेश्वरा राव
15.	ओ. सिंहइ
16.	अकेला मल्लै. सौभ्याजुलु
17.	पप्पू रघुराम
18.	गोदावर्ति सम्भशिवा राव
19.	उपाध्यायुलु अपाला नरसिंह्मन्
20.	कोलुरु नारायणमूर्ति
21.	कोलुरु श्रीरामामूर्ति

22.	श्री चादा
23.	प्रयागसयुशा
24.	कारोडा सुब्रह्मण्यम्
25.	राघवाचार्युलु (चेन्नई)
26.	वदलामनि नरसिहाम्
27.	वदलामनि सूर्यनारायण
28.	वदलामनि सीतारामैया
29.	पेरि पेडा अपालानरसिह्मन्
30.	पेरि चिन्ना अपालानरसिह्यन्
31.	प्रो. वेदुला सुब्रह्मण्यम्
32.	प्रो. पेरि सुब्रह्मण्यम्
33.	डॉ. पी. सूर्यकान्तम्
34.	डॉ. पी मेधा दक्षिणामूर्ति
35.	श्रीमती पी. सीतम्मा
36.	अर्चका पेरि मालाचार्य
37.	विजयविट्टलराव
38.	कुडप्पा राघवेन्द्रचर
39.	अक्की राघवेन्द्रा चाचर
40.	वेदव सत्यनारायणा
41.	यमिजला आनन्दराव
42.	बंदि विश्वनाथम्

43.	श्रीमति वी पदमावति
44.	वि श्रीनिवासराव
45.	विश्वनाथगोपालकृष्णशास्त्री
46.	कोम्पेला सत्यनारायणशास्त्री
47.	कन्दुकुरी सत्यसूर्यनारायनशास्त्री
48.	एस. टी. के. श्री रमाचार्युल
49.	आर. आर. सैम्युजुलु
50.	रानीलक्ष्मी नरसिह्याशास्त्री
51.	जन्मद्दि रामकृष्णा
52.	चेरु कुमिलि नरसिह्यामूर्ति
53.	के. वी. सोमयाजुलु
54.	एन. एस. गणपति भट्ट
55.	पी. वी. एन. एन. मारुती
56.	बी.पी.एम. श्रीनिवासु

12. पण्डित अनन्तरामशास्त्रीफड़के

(कालः 19 शतकखिस्ताब्दतः विंशशतकस्योत्तरार्द्धपर्यन्तम्)

अध्ययनकालः -

पण्डित अनन्तरामशास्त्रीमहोदयः स्वयमेव काश्यामध्ययनार्थ-मागच्छत् । सर्वप्रथममयं पण्डितश्रीगणपतिशास्त्रिमोकाटे महोदयाद् व्याकरणशास्त्रमधीतवान्। काश्यामयं व्याकरणाचार्यपरीक्षामुत्तीर्णवान्। ततश्च पण्डितनित्यानन्दन्त-पर्वतीयमहोदयानां (1867-1931) चरणयोर्मध्ये स्थित्वा मीमांसा वेदान्त

पुराणशास्त्राण्यधीतवान्। कालिकाकातानगरतः मीमांसाविषये तीर्थ परीक्षां श्रीफड़केमहोदयः समुत्तीर्णवान्।

अध्यापनकालः -

काशीस्थविदुषां संस्तुत्यनुसारं किञ्चित् कालं यावत् श्रीफड़केमहोदयः लाहौरनगरस्य सुप्रसिद्धस्य डॉक्टर बालकृष्णकौलस्य पौत्रान् संस्कृत-मध्यापयामास। तदनन्तरमयं काशीस्थस्याद्वादिगम्बरजैनविद्यालये व्याकरणाध्यापकत्वेन नियुक्तिं प्राप्तवान्। ततश्च सः महामहोपाध्याय-पण्डितनित्यानन्दपर्वतीयमहोदयस्य विशिष्टसंस्तुत्येन काशीस्थ राजकीयसंस्कृतमहाविद्यालये नवसृष्टे पुराणेतिहासाध्यापकपदे नियुक्तः। सेवानिवृत्तेरनन्तरं सः विश्वसंस्कृतपरिषदः तत्त्वावधाने सम्मानिताचार्य-रूपेणानेकेषु स्थानेषु गत्वा देववाण्याः प्रचारे प्रसारे च महद् योगदानमददत् ।

टीकापरिचयः -

आचार्यपरीक्षोत्तीर्णानन्तरं सः 'काशीका' 'वैयाकरणभूषणसारम्' (दर्पणटीका-युत) इत्यनयोर्ग्रन्थयोः सम्पादनकार्यमकरोत् ।[99]

13. डॉ. वेदानन्दझामहोदयः

(सन् 1926 ख्रिस्ताब्दतः विंशशतकपर्यन्तम्)

जीवनपरिचयः-

डॉ. वेदानन्दझामहोदयोऽखिलेऽपि देशे विख्यातानां महामहोपाध्या-यानां श्रीद्रव्येश-विद्वद्वर वसंतपुरनामके ग्रामे सीतामढयं जनपदे षड्विंशति ख्रिस्ताब्देऽभवत्।

---

[99] का. की. पां. परम्परा आ. बलदेव उपाध्याय, पृ. 396. प्र.सं. 1983

अध्ययनकालः-

यदा अयं पञ्चवर्षीय आसीत् तदैव विहितोपनयनसंस्कार वेदवेदाङ्गाध्ययने निरतो जात। तदनन्तरं व्याकरण-साहित्य-न्याय-सांख्ययोग-वेदान्तेति पञ्चसु विषयेष्वाचार्य परीक्षामपि उत्तीर्णवान्।

अध्यापनम् -

प्रथमं तावदनेन निजजनपदे 'सीतामढयम् अध्यापनकार्यमारब्धम्। ततोऽयं हरिद्वारस्थे योगाश्रमेपीठे प्राचार्यपदं सुशोभितवान्। तदनन्तरं गुजरातप्रान्तस्य राजकोट नगरेऽपि वर्षपर्यन्तमध्यापितम्। बरेली-चन्द्रोसी आंवलागुरुकुलप्रभृतिषु स्थानेषु अपि भवता ज्ञानगङ्गा प्रभाविता। अनेन नेपालदेशस्य सिद्धेश्वर संस्कृतमहाविद्यालये चत्वारि वर्षाणि यावत् प्राचार्य-पदमलङ्कृत्य प्रभूतं यशोर्जितम्। ततश्चायं महाभाग ऋषिकुलब्रह्मचर्याश्रम-पीठस्य तथा श्रीभगवानदाससंस्कृत-महाविद्यालयस्याचार्यपदमपि विभूषितवान्। त्रयोदशवर्षाणि यावत् श्रीमोतीनाथ संस्कृतमहाविद्यालयस्य प्राचार्यपदमलङ्चकार कीर्तिकौमुदी च व्यस्तारयत्। अयं महानुभावो राष्ट्रपतिना राष्ट्रपतिसम्मानेनापि सम्मानितः ।

कृतिपरिचयः-

स विविधविषये स्वीयं लेखनीमचालयत्। महावैयाकरणश्रीमद्-भर्तृहरिविरचितस्य वाक्यपदीयम् इत्याख्यस्य प्रसिद्धग्रन्थस्य प्रथमकाण्डस्य 'विमर्श विपुलां आलन्दा नाम्नी संस्कृतटीकां 'सूर्यमायाऽभिधां हिन्दीटीकां विरचितवान् झामहोदयः। तेन विलिखिताः सारगर्भिताः लेखा सरस्वती सुषमा दिषु विख्यातासु पत्रिकासु समये समये प्रकाशिताः सन्ति।

साहित्यक्षेत्रे तेन विरचिता 'त्रिपथगा' इति कथनम् विद्वत्समाजे प्रतिष्ठितम्। काव्यस्यास्य विषये कविवर्याः लिखन्ति त्रिपथगां सङ्गता कुल्यापि भवति त्रिपथगेति

स्वाभिधानमात्रत इयमपि त्रिवेणी मण्डिता त्रिपथगा मुक्तामृत-युक्तामृत-श्रीकृष्णचरणामृतैस्त्रिभिस्तरङ्गैर्बालेय रिङ्गन्ती प्रभवतु विदां मोदाय।[100] काव्येऽस्मिन् मुक्तामृतं नामके प्रथमे तरङ्गे 'भाति मे भारती भारतेऽनारतम्' अतीव ह्लाद्या रुचिरा मनोहरा गीतिः। निखिलं काव्यं मनोहरगद्यैः संयुतं वर्तते। काव्यमिदमधीत्य सह्रदया अमन्दमानन्दमनुभवन्ति। यद्यपि ते भौतिक देहेन न सन्ति परं यशः शरीरेण जीवन्ति अद्यापि स्थास्यान्ति च चिरम्।[101]

14. पण्डितप्रभाकरमिश्रः

(कालः- 1936 ईशवीयतः विंशशतकोत्तरपर्यन्तम्)

जीवनपरिचयः-

पण्डितप्रभाकरमिश्रः पण्डितरामप्रसादत्रिपाठिमहाभगस्य शिष्यः। अस्य पितुर्नाम श्रीहरिप्रसादमिश्र आसीत् । उत्तरप्रदेशस्य जौनपुर मण्डलान्तर्गत-शाहपुरपत्रालयस्य मुकुन्दीपुर इति ग्रामे 1936 ख्रिस्ताब्दे ईशवीये मई मासे पञ्चदशदिनाङ्के पण्डितप्रभाकरमिश्रमहोदयो जनिं लेभे। अयं खलु विद्वन्मूर्धन्यस्य न्यायवेदान्तव्याकरणावतारस्य काश्यां सुप्रसिद्धस्य श्रीशुभकरणमिश्रस्य पौत्रः ।

अध्ययनकालः-

अनेन पण्डितरामप्रसादत्रिपाठि- पं. रामकरणपाण्डेय पं. रामराज-द्विवेदप्रभृतीनां त्रयाणां विदुषां चरणयोरध्ययनं विहितम्। सन् 1958 ईशवीये अनेन वाराणसीस्थ सम्पूर्णानन्दसंस्कृतविश्वविद्यालयाद् व्याकरणाचार्यपरीक्षोत्तीर्णा । ततोऽनेन एम. ए. परीक्षाऽप्युत्तीर्णा"। अयं सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

---

[100] त्रिपथगा' काव्यम्- डॉ. वेदानन्द झा. पृ. 2

[101] हरिद्वारस्य स्वातन्त्र्योत्तरस्य सं. सेवा परायणा आचार्या इति लेखः, पो. इन्डि. सं. लिट्रे. एक क्रिटि. सर्वे. पृ. 234

"व्याकरणशास्त्रे प्रमेयसमीक्षा" इति शोधप्रबन्धं प्रस्तूय सन् 1977 ईशवीये 'विद्यावारिधि' इत्युपाधिमवाप्तवान् ।

अध्यापनकालः-

अयं सन् 1955 ई. त. 1978 ई. यावद् वाराणसीस्थ रामानुजसंस्कृत-महाविद्यालये व्याकरणविभागाध्यक्ष आसीत्। तथा च सन् 1976 ईशवीयतोऽ-बहुकालपर्यन्तं वाराणसीस्थ सन्यासीसंस्कृतमहाविद्यालये प्रधानाचार्यपद-मलङ्कृतवान्।[102]

टीकापरिचयः-

अनेन वैयाकरणभूषणसार-सिद्धान्तकौमुदी-लघुसिद्धान्तकौमुदी-मध्यसिद्धान्त-कौमुदी ग्रन्थानां सुविशदाः 'प्राभाकरी' इत्याख्याः संस्कृतटीका हिन्दीटीकाश्च प्रणीताः।

15. पण्डिता डॉ. प्रज्ञादेवी

(सन् 1937 ख्रिस्ताब्दतः विंशशतकोत्तरपर्यन्तम्)

जीवनपरिचयः-

संस्कृतव्याकरणशास्त्रस्य मूर्द्धन्याविदुषी, ओजस्विनी, वाग्मिनी हृदयग्राहिणी वैदिकवाङ्मयस्य वैदिकसिद्धान्तान् ज्ञात्री लेखिका पण्डिता डॉ. प्रज्ञादेवी मध्यप्रदेशस्य 'सतना' नगरे 'कोलगवा इत्याख्ये लघुग्रामे 1937 ख्रिस्ताब्दे वर्षे मार्चमासस्य पञ्चमे दिनाङ्के जन्म प्राप्तवती। अस्याः पितुर्नाम श्रीकमलप्रसाद आर्यः

---

102 संस्कृत वाङ्मय का वृहद इतिहास- (पञ्चदश-खण्ड) आ. बलदेव उपाध्याय, पृ. 235, 2001, उत्तर प्र.सं.सं. लखनऊ

मातुश्च नाम श्रीमती हरदेवी आर्या आसीत्। इयं स्वजीवनस्यऽष्टादशवर्षाणिस्त्रीयैः पञ्च स्वसृभिः एकेन भ्राता च मध्यप्रदेशे एव व्यतीतवती ।

अध्ययनकालः-

इयं स्वीयमाध्यमिकशिक्षां प्रपूर्य गवर्नमेण्ट गर्ल्स विद्यालयेऽध्या-पिकारूपेण कार्यमकरोत्। स्वाध्यायशीलस्य संस्कृतविद्यानुरागिणश्च पितुराज्ञया सुश्रीप्रज्ञादेवी द्वादशवर्षाणि पर्यन्तमार्षपाठविधे पुनरुद्धारकात् पदवाक्यप्रमाणज्ञात् पण्डितब्रह्मदत्तजिज्ञासुमहाभागात् संस्कृतव्याकरणशास्त्रं निरुक्तमहाभाष्यान्तं मीमांसाशास्त्रञ्च गाम्भीर्येणाधीतवती । ततः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयात् प्राचीनव्याकरणाचार्यपरीक्षां समुत्तीर्य संस्कृते शोधप्रबन्धं च प्रपूर्य तत्रतः विद्यावारिधि (पीएच.डी.) इत्याख्यनुपाधिं प्राप्नोत् ।

अध्यापनकालः-

आर्षपाठविधि समुद्धारेच्छ्या अनया आजन्मब्रह्मचर्यव्रतस्य प्रतिज्ञा कृता। अस्याः प्रथमं कार्यमस्ति-'आर्यजगतः कृते 'पाणिनिकन्याविद्यालयः। पौराणिकानां नगर्या काश्यां कन्यासु आर्षपाठविधि प्रसारार्थमयं विद्यालयः संस्थापितः। अद्यत्वेऽस्मिन् विद्यालये कन्याः विशुद्ध आर्षपाठविधिना व्याकरणं वेद-वेदाङ्ग गृहकलादीन् विषयान् पाठ्यते। सुश्रीप्रज्ञादेव्या आचार्यत्वे विद्यालयोऽयं निरन्तरमुन्नतिपथमारोहत्। वस्तुतः काश्यां प्राचीन-व्याकरणपरम्परायां सुश्रीप्रज्ञादेवी सदैव चिरस्मरणीया अभिनन्दनीया वन्दनीया च स्थास्यति नात्र संशयः।

कृतिपरिचयः-

पण्डितब्रह्मदत्तजिज्ञासुमहोदयस्य 'प्रथमावृत्ति' ग्रन्थप्रणयने प्रकाशने तथा च तस्य मरणानन्तरं प्रथमावृत्तिग्रन्थस्य पूर्ती च प्रज्ञादेव्याः महद् योगदानमस्ति। प्रथमावृत्तिः सारल्येन सुगमतया अष्टाध्यायीं बोधयति। ततः सन् 1971 ईशवीये

इयमथर्वेदस्य चत्वारि काण्डानि 1977 ईशवीये च गोपथब्राह्मणस्य दुर्लभभाष्यं वैदुष्यपूर्णतया व्यरचयत्। अस्या विरचिता अनेके ग्रन्थाः प्रकाशिता बहवो निबन्धाः प्रकाशिता भवन्त्येव ।

16. पञ्चोली बालकृष्णः

जीवनपरिचयः -

एष गुर्जरप्रान्तस्य (गुजरात) बडौदा' राज्ये 'वसाई ग्रामनिवासिनः श्रीनीलकण्ठस्य पुत्र आसीत्। वाराणसेय संस्कृतविश्वविद्यालयादवकाशमवाप्य इदानी ते गुर्जरप्रान्तस्य 'अहमदाबाद' इत्याख्ये नगरे स्वभवने निवसन्ति ।

अध्ययनकालः-

एष खलु विश्वविश्रुतपण्डितानां श्रीसभापतिशर्मोपाध्यायानां शिष्य आसीत्।

अध्यापनकालः-

श्रीपञ्चोलीमहोदयः प्रथमं काश्यां खेतानसंस्कृतमहाविद्यालये प्रधानाध्यापक आसीत् तदनु काशिकराजकीयसंस्कृतमहाविद्यालये, वाराणासेयसंस्कृतविश्वविद्यालये च व्याकरणप्राध्यापकपदेऽधिष्ठितो जातः ।[103]

कृति-परिचयः-

पञ्चोलीत्युपाख्येन बालकृष्णशर्मविदुषा वैयाकरणभूषणसारस्य 'प्रभा' नाम्नी टीका रविता। एषा विस्तृता गभीरा, पाण्डित्यपूर्णा विशिष्टा टीका अस्त्रि नाशत्रसंशयः। 'प्रभाटीका' 2040 वै. वर्षे प्रकाश्यमुपगता। श्री पंचोलीमहोदयः सिद्धान्तकौमुद्याया हिन्दी-व्याख्यां विलिख्य मार्ग प्रशस्तमकरोत् ।

---

103 सं. वा. का वृ. इति, (पञ्चदश-खण्ड) आ.ब.उपा., पृ.234 2001, लखनऊ

17. श्रीकालिकाप्रसाद शुक्लः

जीवनपरिचयः-

शाब्दिकेषु स्वातन्त्र्योत्तरकालेषु श्रीकालिकाप्रसादमहोदयोऽन्यतम आसीत्। पण्डितकालिकाप्रसादमहोदयः गोरखपुरमण्डलस्य सरयूपारीण ब्राह्मणावतंस आसीत्। शास्त्रेण सह लोकव्यवहारेऽपि तस्य चातुर्य प्रशंसनीयमस्ति ।

अध्यापनकालः-

महानुभावोऽयं सम्पूर्णानन्दसंस्कृतविश्वविद्यालये व्याकरणविभागस्या-ध्यक्षपदं सुशोभितवान्। अनेनाधीताः छात्रा विभिन्नासु संस्थासु कार्यरताः सन्ति ।

कृतिपरिचयः-

अनेन महोदयेन वैयाकरणसिद्धान्तमञ्जूषाया 'ज्योत्स्ना' इत्याख्या टीका प्रणीता। शुक्लमहोदयेन 'वैयाकरणानामन्येषां च मतेन शब्दस्वरूप तच्छक्तिविचार[104] इति गवेषणात्मको शोधप्रबन्धो 1979 ख्रिस्ताब्दे लिखितः। शोधप्रबन्धेऽस्मिन् शब्दनित्यानित्यात्वशब्दार्थसम्बन्ध-शब्दार्थ-संबन्धनित्यत्व-देववाणीप्राचीनत्वादि-विविधैर्विचारतरङ्गैर्गवेषणाप्रबन्धे पूर्ववर्तिनां सर्वेषां दार्शनिकानां मतानामालोच-नपूर्वकं भाषाविज्ञानमतस्यापि युक्तायुक्तत्वं निर्धारितं ग्रन्थकारकालिका-प्रसादशुक्लमहोदयेन। अयं परिभाषेन्दुशेखरस्य (हैमवती टीका संवलितायाः) सम्पादनमपि कृतवान् यस्याः 1975 ख्रिस्ताब्दे सं.सं.वि.वि. वाराणसीतः प्रकाशनं जातम्।

विशेषः-

वैयाकरणोऽप्यशुष्कहृदयः कोमकान्तपदपवलीषु सदयः पण्डितप्रवरः स्व. श्री कालिकाप्रसाद शुक्लः काशिकविसमवाये परं सम्मानितो विभातिस्म। अस्य प्रथमा

---

[104] वैयाकरणमन्येषां च मतेन शब्दस्वरूपतच्छक्तिविचारः' भूमिका, सं. सं.वि.वि., वाराणसी

काव्यकृतिर्विद्यते भास्करभावमानवः यत्र भगवतोद्युमणेः सुललिता स्तुतिर-लघुवृत्तैर्वर्तते। काव्यगुणगणोद्भासितं रसपेशलं राधाचरितम् इति महाकाव्यं निर्मायनेन स्वीयं महाकवित्वं प्रमाणितम्।[105]

3. स्वातन्त्र्योत्तरकालस्य संस्कृतेतरटीकाकाराणां कालक्रमेण परिचयः-

1. पं. देवदत्तशर्मोपाध्यायः

(कालः- 1905 ईशवीयतः 1971 ईशवीयपर्यन्तम्)

जीवनपरिचयः-

पण्डितदेवदत्तशर्मोपाध्यायः संस्कृतभाषायाः प्रकाण्डो विद्वान् मीमांसादर्शनस्य च भाष्यकार आसीत्। अस्योत्तरप्रदेशस्यालीगढमण्डलान्तर्गते 'भमसोई' नामक एकस्मिन ग्रामे 1905 ख्रिस्ताब्दे जन्म अभवत् । अयं भारद्वाजगोत्रीयः माध्यन्दिन शाखाध्यायी ब्राह्माण आसीत् । 1971 ईशवीये अक्टूबरमासे शरतपूर्णिमातिथौ पं. उपाध्याय इहलोकं त्यक्त्वा परलोकमगच्छत्।

अध्ययनकालः-

अयं गुरुकुलमहाविद्यालयज्वालापुरे स्वामिशुद्धबोधतीर्थमहोदयस्य सान्निध्येऽ-ध्ययनमकरोत्। अयं गुरुकुलस्य विद्याभास्कर' इत्युपाधिना सह आचार्य तीर्थ एम. ए. प्रभृत्युपाधीन् अपि प्राप्तवान्।

अध्यापनकालः-

सन् 1939 तमे ईशवीये वर्षेऽयं काशीमागत्य डॉ. मङ्गलदेवशास्त्रिमहोदयेन सह काशिराजकीयसंस्कृतमहाविद्यालयस्य सरस्वतीभवने वर्तमानानां त्रिसहस्रमितानां पाण्डुलिपीनां सूचीं निर्मितवान्। अयमस्मिन्नेव महाविद्यालये

---

[105] स्वातन्त्र्योत्तरकाले सं. काव्ये काश्या अवदानम्. पो. इन्डि, सं.लि.एक-क्रिटि. सर्वे, पृ. 223

वेदान्ताध्यापकपदं 1943 ख्रिस्ताब्दे सुशोभितवान् । 1941 ईशवीयतः 1948 ईशवीयं पर्यन्तमयं दर्शन-विभागाध्यक्षपदे कार्यरत आसीत्। यस्मिन् काले राजकीयसंस्कृत-महाविद्यालयः वाराणसेयसंस्कृतविश्वविद्यालये विलोनोऽभवत् तस्मिन् काले सः संस्कृतसंकायस्याधिष्ठाता अप्यासीत्। यदा विश्वविद्यालयस्य प्रथम कुलपतिः डॉ. आदित्यनाथ झामहोदयेन विश्वविद्यालये प्राचीनव्याकरण-विभागः स्थापितः तदा एवं तेन पण्डितदेवदत्तशर्मोपाध्यायमहोदयः प्राचीनव्याकरण-दर्शनागमविभागे प्रथम आचार्यः (प्रोफेसर) विभागाध्यक्षश्च नियुक्तः । सः 1965 ख्रिस्ताब्दे विश्वविद्यालयात् सेवानिवृत्तोऽभवत् ।

ग्रन्थपरिचयः-

अस्य व्याकरणशास्त्रस्य 'वैयाकरणभूषणसार-ग्रन्थस्य "हिन्दीभाष्यं" बहुलोकोपकारकं वर्तते। 'तत्त्वपरिशुद्धिः इत्याख्यग्रन्थसम्पादने कृते काशी-हिन्दूविश्वविद्यालयेनायं पीएच.डी. इत्युपाधिनाऽलंकृतः। अनेन गूढजटिल-दर्शनस्य मीमांसायाः सरलहिन्दीभाषायां भाष्यम्प्रणीतम्। भाष्यमिदमध्या-यत्रयपर्यन्तं सन् 1957 ख्रिस्ताब्दे वर्षे प्रकाशितम् ।

प्रमुखाः शिष्याः-

अस्य शिष्येषु पं. रामनाथवेदालंकार, प्रो. डॉ. श्रीपतिरामत्रिपाठी, पं. रामरङ्गशर्मा, आचार्य नरेन्द्रदेव पाण्डेयप्रभृतयः सन्ति ।

2. ब्रह्मदत्तद्विवेदी 'विद्यावाचस्पतिः'

(कालः- 1915 ख्रिस्ताब्दतः विंशशतकपर्यन्तम्)

जीवनपरिचयः-

विद्यावाचस्पतिः पण्डितबहादत्तद्विवेदीमहोदयस्य सारस्वतवैभवमूले वंशे उत्तरप्रदेशस्य प्रयाग मण्डले करछना खण्डे 'पण्डितपुरा' नामके ग्रामे 1906 तमे

ख्रिस्ताब्दे वर्षे (1963 तमे वैक्रमाब्दे) जन्म अभवत्। सन् 1987 ईशदीये अगस्तमासे पञ्चदशदिनांकेऽयं पञ्चत्वं गतः।[106]

अध्ययनकालः-

अस्य पितामहमहोपाध्यायपण्डितहरिहरकृपालु द्विवेदीमहोदय संस्कृतरत-पाण्डित्यपरम्परायां विशिष्ट आसीत् । अयं महोदयः स्वपितुः शकाशे काणादं पाणिनीयञ्च शास्त्रं साहित्यञ्च नियमानुसारमधीतवान्। प्रप्रथमं सन् 1927 ईशवीये वर्षे अयं व्याकरणाचार्य परीक्षां समुत्तीर्णवान्। ततश्च सन् 1930 ईशवीये न्याये, सन् 1932 ईशवीये साहित्ये चाचार्यपरीक्षां प्रथमश्रेण्या सह प्रथमस्थानेनोत्तीर्णवान्।

अध्यापनकालः-

अयं सन् 1932 ईशवीयतः 1955 ईशवीयपर्यन्तः पाटलिपुत्रे (पटना) बिहारप्रान्ते मुरारकासंस्कृतमहाविद्यालये प्राचार्यपदे कार्य प्रारभत्। अयं सन् 1955 ईशवीये वर्षे पाटलिपुत्रे स्थापिते महाविद्यालये सादरमामन्त्रितो नियोजितश्च। अयमस्मिन्नेव वर्षे श्रीमतामहाराजाधिराजेन मिथिलायां विशिष्टसम्मानेन सम्मानितः। 1976 ख्रिस्ताब्दे कामेश्वरसिंहदरभङ्गा-संस्कृतविश्वविद्यालये 'विद्यावाचस्पति' इत्युपाधिमलभत्। वाराणस्यां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेऽतिथिप्राध्यापकरूपे 1975, तमे ख्रिस्ताब्दे कार्यमकरोत्। महोदयोऽयं 1971 ईशयीये वर्षे सम्पूर्णानन्द-संस्कृति-विश्वविद्यालयस्य दीक्षान्तसमारोहे 'शब्दाद्वैतबिन्दु' विषये व्याख्यानमददत् 1982 ख्रिस्ताब्देऽयमिलाहबादनगरे गंगानाथझाकेन्द्रीयसंस्कृतविद्यापीठे शास्त्रचूडामणि' योजनायामध्यापनमकरोत्। अस्मिन्नेव (1982) वर्षेऽयमुत्तर-प्रदेशसंस्कृताकादम्या संस्कृते विशिष्टयोगदानाय सम्मानितः। अस्य सन् 1986 ईशवीये महामहिम राष्ट्रपतिमहोदयः सम्मानमकरोत् ।

---

[106] राधिका (लघु-टीका) ब्रह्मदत्तद्विवेदी, पृ.25-26, 1988. सुशील प्रका, पटना

ग्रन्थपरिचयः-

'मधुसूदनीगीताभाष्यस्य हिन्दीव्याख्या, वैयाकरणभूषणसारस्य संस्कृतहिन्दी-भाष्यञ्च 1985 ख्रिस्ताब्दे प्रकाशिते। लघुशब्देन्दुशेखरस्य 'राधिका' नाम्नी संस्कृत हिन्दी टीका सन् 1988 ईशवीये वर्षे प्रकाशिता।

3. पण्डित गोपालदत्तपाण्डेयः

(कालः- 1915 ख्रिस्ताब्दतः विंशशतकपर्यन्तम्)

जीवनपरिचयः-

पण्डितगोपालदत्तपाण्डेयः श्रीनित्यानन्दपर्वतीयमहोदयस्य न केवलं दौहित्रोऽ-पितु तच्छिष्यश्चासीत्। अस्य जन्म 1915 ख्रिस्ताब्देऽभवत् ।

अध्ययनकालः-

अयं पण्डितनित्यानन्दपर्वतीयमहोदयात सिद्धान्तकौमुदी अन्ये टीकाग्रन्था-श्चापठत्। तदनन्तरमयं व्याकरणाचार्यपरीक्षां, एम. ए. परीक्षां चोत्तीर्णवान्।

अध्यापनकालः-

अयमुत्तरप्रदेशस्य राजकीयमहाविद्यालयेषु बहूनि वर्षाणि पर्यन्तं 'प्रोफेसर' पदे योग्यतापूर्वकं कार्यमकरोत् । अयं नैनीताले राजकीय स्नातकोत्तरमहाविद्यालये आचार्यः संस्कृतविभागाध्यक्षश्चासीत्। ततः परमयमुत्तरप्रदेशस्य शिक्षाविभागे उपशिक्षानिदेशक आसीत् । महोदयोऽयं सेवानिवृत्त्यनन्तरं काश्यामेव न्यवसत् ।

ग्रन्थपरिचयः-

अयं वैयाकरणसिद्धान्तकौमुद्याः 'दीपिका' नाम्नी प्रामाणिकी हिन्दीव्याख्याम् व्यरचयत्। सा च श्रीवासुदेवदीक्षितरचितया 'बालमनोरमाटीकया सह सम्पादिता,

त्रिषु भागेषु च प्रकाशिता। श्रीपाण्डेयमहोदयेन विरचिता 'दीपिका' व्याख्या हिन्दीभाषायां तत्तत्सूत्राणां गभीरं शास्त्रीयविषयमपि सारल्येन स्पष्टयति।[107]

4. डॉ. चंद्रिकाप्रसाद द्विवेदी

जीवनपरिचयः-

अयं मध्यप्रदेशवास्तव्य महावैयाकरणः आसीत् ।

अध्ययनाध्यापनकालम्-

मध्यप्रदेशे रीवांनगरे प्रशासकीयवेङ्कटसंस्कृतमहाविद्यालये व्याकरण-विभागाध्यक्षपदे कार्यमकरोत् ।

ग्रन्थपरिचयः-

पण्डितप्रवरेण श्रीचन्द्रिकाप्रसादद्विवेदिना राष्ट्रभाषायां विरचिता 'सुबोधिनी' व्याख्या न केवलं छात्राणामपितु विदुषामपि महान्तमुपकारं करोति। अस्यां व्याख्यायामतिसारल्येन गम्भीरविषयाणां विवेचनमस्ति। अस्या रचना 1983 तमे ख्रिस्ताब्दे (2046 वैक्रमाब्दे) सम्पन्ना जाता।[108]

5. प्रो. महादेव दामोदर साठे

जीवनपरिचयः-

महाराष्ट्रीय विदुषामन्यतम आसीत्। प्रो. महादेव दामोदर साठेमहोदय जीवनपर्यन्तमयं संस्कृतसेवामकरोत् ।

अध्ययनम् -

महानुभावोऽयं प्राचीनशास्त्रीयपद्धत्यानुसारं संस्कृतव्याकरणस्याध्ययनमकरोत् । साठेमहोदयः पाश्चात्यविद्याविभूषित आसीत् । सिद्धान्तकौमुदी-

---

[107] का. की पां. प्रम्परा आ. बलदेव उपा., पृ. 396, प्र.सं. 1983

[108] स्वा. म.प्र. सं. व्याकरणम्- पुष्पा दीक्षिता, सं. राइ. इन इण्डि. इण्डिया, पृ. 119

प्रभृतीनामाकरग्रन्थानामध्ययनं के. पण्डित हरिशास्त्रिभट्टात् इन्दौर नगरे के. म.म. वासुदेव शास्त्रि अभ्यकरात् पूणे नगरे चाकरोत् ।

अध्यापनम् -

महानुभावोऽयं तत्रत्यान् छात्रान् व्याकरणशास्त्रमध्यापयत्। मराठी भाषायाश्छात्राणां संस्कृतव्याकरणशास्त्रे मन्दगतिं दृष्ट्वा अध्यापनकालाद् एवं सिद्धान्तकौमुदीप्रभृतीनां ग्रन्थानां मराठी भाषायां टीकालेखनकार्य प्रारब्धवान्।

कृतिपरिचयः-

सेवानिवृत्त्यन्तरं दामोदरसाठेमहोदयो विंशतिर्वर्षाणि यावत् संस्कृत-विषयकलेखनकार्यरत आसीत्। अत्रान्तरे लघुकौमुद्याः सविस्तर-मनुवादः, पाणिनि एवं पाणिनीय सम्प्रदायश्चेति ग्रन्थद्वयं व्यरचत्। उभय ग्रन्थयोः निर्माणाय पुणे विद्यापीठतोऽनुदानं महाराष्ट्र ग्रन्थोत्तेजकसस्थया पारितोषिकञ्च लब्धवान्। ततश्च नैकानि वर्षाणि यावदयं के. म.म. वासुदेवशास्त्री 'अभ्यङ्करमहोदयस्य जीवनचरितं डॉ. सं. वि. सहस्रबुद्धे-महोदयस्य साहाय्येनालिखत् यत् शास्त्रिमहोदयस्य जन्मशताब्दी समारोह-स्यावसरे प्रकाशितमभवत्।

साठेमहोदयोव्याकरणविषयकान् नैकान् लेखान् काले काले लिखितवान् ये च शीघ्रातिशीघ्रं विभिन्नासु पत्रिकासु प्रकाशिताः। महानुभावोऽयं 1965 ख्रिस्ताब्दे वैयाकरणसिद्धान्तकौमुद्याः षट्त्षु भागेषु मराठीभाषायां बालबोधिनीटीकां तथा तत्र टिप्पणीञ्चाकरोत्। तत्र साठेमहोदयस्य विषयाधिकारः सम्यक् दरीदृश्यते। तत्रास्य सिद्धान्त-कौमुदीविषयकाः सिद्धान्ता अपि मान्याः सन्ति। अनेन विरचिताय षड्भागात्मकाय सिद्धान्तकौमुद्या-मराठी-विवरणग्रन्थाय पुणे विद्यापीठतो-

ऽनुदानममिलत् । अस्य प्रकाशनं वासुदेवशास्त्री अभ्यंकरमहोदयस्य स्मरणार्थ प्रथमग्रन्थमालायामभवत् ।[109]

सिद्धान्तकौमुद्या मराठीभाषायामनुवादेन तस्या अध्ययनं मराठी-छात्राणां कृते बहुसौकर्यपूर्णमभवत्। तथा चानेन माध्यमिकस्तरीयाध्यापकानां महाविद्यालयस्य व्याख्यातृणाञ्च कृते सिद्धान्तकौमुद्याः पद्धत्याऽध्यापनं बहुसरलं सञ्जातम्। षट्प्रकरणात्मकेऽस्मिन् ग्रन्थे प्रथमे संज्ञाप्रकरणे पञ्चविंशतिप्रमुखसंज्ञानां विश्लेषण-ङ्कृतम्। ततश्च परिभाषाप्रकरणं कारकप्रकरणं समासप्रकरणञ्च सन्ति।

6. आ. विश्वनाथ मिश्रः

(कालः 1931 ख्रिस्ताब्दतः)

जीयनपरिचयः-

मरुप्रदेशीय विद्वान् विश्वनाथमिश्रमहोदयस्य पितुर्नाम श्रीरामकेशव-मिश्र आसीत्। तस्य जन्म जूनमासस्य पञ्चदश तारिकायां 15.6.1931 ख्रिस्ताब्दे बीकानेरमण्डले एकस्मिन् ग्रामेऽभवत्।

अध्ययनम्-

बाल्यकालात् प्रतिभासम्पन्नो विश्वनाथो महोदयः प्राथमिकशिक्षां ग्रामं निकषा कस्मिन् ग्रामेऽधीत्य प्रौढग्रन्थेषु प्रौढिप्राप्तुं राजस्थानतः बनारसं प्रत्यगच्छत्। तत्र स 1955 ख्रिस्ताब्दे गवर्नमेन्ट संस्कृत कॉलेज बनारसतः व्याकरणाचार्यस्य परीक्षां प्रथमश्रेण्यामुत्तीर्णवान् । ततश्च वाराणसेय संस्कृत-विश्वविद्यालय-वाराणसीतः 1962 ख्रिस्ताब्दे साहित्याचार्यस्यापि परीक्षां प्रथमश्रेण्यामुत्तीर्णवान्। तदनन्तरम् 1961 ख्रिस्ताब्देवर्षे गोरखपुरविश्व-विद्यालयः गोरखपुरतः एम.ए. संस्कृत परीक्षां द्वितीय श्रेण्यामुत्तीर्णवान्।

---

[109] भूमिका बालबोधिनी टीका-वै. सि. कौमुद्याः मो. म. द. साठे, पृ. 6-13, 1964 पूणे

वारणस्यां व्याकरणस्य गूढार्थान् दार्शनिकत्तत्त्वान् चावबोधनाय मिश्रमहोदयः महाशयजी इत्युपनामधारिणः पं रामयशत्रिपाठिनः सान्निध्ये व्याकरणमध्यैत। श्रीबदरीनाथशुक्लस्य श्रीहरिरामशुक्लस्य चापि सान्निध्ये स्वीय ज्ञानपिपासा-शमनमकरोत्।[110]

अध्यापनकार्यम्-

मिश्रमहोदयः स्वीयजीवने बहुषु संस्थास्वध्यापनमकरोत्। प्रथमं सः 1-6-1957 ख्रिस्ताब्दतः 11.06.1960 ख्रिस्ताब्दपर्यन्तमग्रवाल-संस्कृतमहा-विद्यालय, वाराणस्यां प्राध्यापकपदमलंकृतवान्। ततश्च 12.6.1960 ख्रिस्ताब्दतः 17.06.1963 ख्रिस्ताब्दपर्यन्तं राजकीय-संस्कृत-विद्यालय, डालटनगंज, बिहार-राज्ये प्राध्यापकपदं सुशोभितवान् । तदन्तरम् 27.06.1963 ख्रिस्ताब्दतः 30.6.1988 ख्रिस्ताब्दपर्यन्तम् (नवमासाधिकं-चतुर्विंशतिवर्षपर्यन्तम्) राजकीय-आचार्य-संस्कृत-महाविद्यालयः बीकानेर-राजस्थाने प्राचार्यपदमलङ्करोत् । 15.01.1983 ख्रिस्ताब्दतः 01.06.1994 ख्रिस्ताब्दतपर्यन्तं जैन विश्व भारती संस्थान; लाडनूँ नागौरराजस्थाने रीडर-पदाय, जैनदर्शनाध्यक्षपदे च कार्यमकरोत् । 02.06.1994 ख्रिस्ताब्दतः 3101.2004 ख्रिस्ताब्दपर्यन्तं ब्राह्मी-विद्यापीठं, लाडनूं राजस्थाने प्राध्यापकपदे सेवामयच्छत्।

अयं 01.12.2005 ख्रिस्ताब्दतोऽद्यावधि जैन-विश्वभारती लाडनूँ, राजस्थाने एव जैन-विद्याया प्रोफेसरपदमलंकरोति। अतिथि प्रोफेसररुपेऽपि मिश्रमहोदयोऽनेकेषु विश्वविद्यालयेषु च सेवामयच्छत्। तद्यथा-11.02.1988 ख्रिस्ताब्दतः 28.12.1988 ख्रिस्ताब्दपर्यन्तं जम्मूप्रान्ते जम्मूविश्वविद्यालयस्य संस्कृत- विभागे सेवामयच्छत् ।

---

[110] महोदयस्य पुत्रस्य साक्षाद्दर्शनमाशीर्वादञ्च प्राप्य मुखारविन्देन विश्रुत्य लिखितम्।

तदनन्तरं 19.01.1962 ख्रिस्ताब्दतः 11.02.1992 ख्रिस्तपर्यन्तं कुरुक्षेत्र विश्वविद्यालये, हरियाणाप्रान्ते ततश्च 06.02.1965 ख्रिस्ताब्दतः 25.02.1995 ख्रिस्ताब्दपर्यन्तं कुरुक्षेत्रविश्व-विद्यालये हरियाणाप्रान्तेऽध्यापयत्।

शास्त्रीय-भाषणम् -

मिश्रमहोदयो शास्त्रियभाषणे स्वीयविचारान् गूढार्थान् (रहस्यान्) भाषा-ग्रन्थीः च स्पष्टमकरोत्। विभिन्नासु संस्थासु स्वीयशास्त्रीय भाषण-मयच्छत् । तद्यथा-

क्र.सं.	**दिनांकतः**	**दिनांकपर्यन्तम्**	**संस्थान/महाविद्यालयः**
1.	22.01.1993	24.01.1993	कुरुक्षेत्र विश्वविद्यालयः, हरियाणा
2.	24.02.1993	26.02.1993	जोधपुर विश्वविद्यालयः, राजस्थानम्
3.	10.01.1993	10.01.1993	राजस्थान संस्कृत अकादमी, जयपुरम्
4.	01.06.1993	01.06.1993	रणवीर केन्द्रीय संस्कृत-विद्यापीठम्, जम्मू
5.	13.08.2001	15.08.2001	जोधपुर विश्वविद्यालयः, जोधपुरम्, राजस्थान्

(क) द्वे टीके- व्याकरणशास्त्रस्य विदुषा मिश्रमहोदयेन परिभाषेन्दु-शेखरस्य 'सुबोधिनी' व्याख्या हिन्दीव्याख्या विरचिता, या चौखम्बा सुरभारती-वाराणसीतः प्रकाशिता। ततश्च व्याकरणशास्त्रस्य प्रौढग्रन्थस्य लघुशब्देन्दुशेखरस्य गूढभावार्थ च छात्रहृदयंगमाय 'सुबोधिनी' व्याख्या हिन्दी व्याख्या अलिखत मिश्रमहोदयोः साऽपि चौखम्भा सुरभारती वारणसीतः 1968 ख्रिस्ताब्दे प्रकाशिता।

(ख) निबन्धग्रन्थः- शास्त्रीय गभीरविषयेष्वाधारित 'प्रौढ-निबन्ध-सौरभम्' नामकं निबन्धग्रन्थं विरचितवान् यत् हंसाप्रकाशन-जयपुरतः प्रकाशितं जातम्। ततः तस्य द्वितीयसंरकरणमपि 2004 ख्रिस्ताब्दे प्रकाशितमभवत् ।

तेन विरचिता दार्शनिका-साहित्यका-व्याकरणशास्त्रविषयकाः च बहवो लेखा निबन्धाश्च विभिन्नासु शोध-पत्रिकासु प्रकाशिता अभवन्।

(ग) संस्कृत-अभिनवनाटकम् - कालिकौतुकम् वामनविजयश्च नामके संस्कृत-नाटके 'भारती' इत्याख्यां संस्कृत-पत्रिकायां प्रकाशिते ।

(घ) धारावाहिकं लेखम् - मिश्रमहोदयेन विरचितं 'संस्कृत-व्याकरण प्रवेशिका' नामकं धारावाहिकं लेखम् मासिक सं. पत्रिकायाम् 10 वर्षाणि पर्यन्तं प्रकाशितम् ।

उपसम्पादनम्- राजस्थान संस्कृत-अकादम्या-त्रैमासिकशोध-पत्रिकायाः स्वरमंगलायाः प्रथमयोः द्वयोः अंकयोः उपसम्पादनमकरोत् ।

सम्मानम्

(क) अखिलभारतीये स्तरे- स फरवरीमासे 2002 ख्रिस्ताब्दे महामहिमराष्ट्रपतिमहोदयेन राष्ट्रपति-भवने, नवदेहल्यां सम्मानितः ।

(ख) राज्यस्तरे

1. 1975 ख्रिस्ताब्दे सरदारशहरे, राजस्थानस्य शिक्षाविद्भिः सम्मानितः।
2. 13 मार्चमासे 1978 ख्रिस्ताब्दे जयपुरे स्थितसंस्कृतपरिषदेन सम्मानितः।
3. 1983 ख्रिस्ताब्दे संस्कृतदिवसस्यावसरे राजस्थानस्य महामहिमराज्य-पालमहोदयेन सम्मानितः।
4. 1999 ख्रिस्ताब्दे राजस्थान संस्कृत-अकादम्या विशिष्टविदुषः रूपे सम्मानितः।

5. 2007 ख्रिस्ताब्दे आचार्यमहाप्रज्ञस्य सानिध्ये आचार्यतुलसी प्राकृतपुरस्कारेण सम्मानितः।

अन्यानि सम्मानानि-

1. 1991 ख्रिस्ताब्दे राजकीय आचार्य संस्कृतमहाविद्यालय, बीकानेरेण सम्मानितः।
2. 2002 ख्रिस्ताब्दे राजस्थानस्य लाडनूँनगरे स्थितेन 'रामद्वारा-सत्संगभवनेन सम्मानितः।
3. 2002 ख्रिस्ताब्दे राजस्थानस्य जसोलनगरे आचार्यमहाप्रज्ञस्य सान्निध्ये सम्मानितः।

मिश्रमहोदयस्य मार्गदर्शने डॉ. बजरंगलालशर्मा, प्रोफेसर म.सं. कॉलेज. डॉ. प्रद्युम्नशाहमहोदयः सुदेशकुमार सुनीतापण्डा चादयाः शोधः कृतवन्त्यः।

4. स्वातन्त्र्योत्तरकाले प्रणीतानां संस्कृतटीकाग्रन्थानां संस्कृतेतरभाषाप्रणीतानाञ्च टीकाग्रन्थानामकारादिक्रमेण परिचयो वैशिष्ट्यञ्च

1. ज्योतिष्मती (काशिकायाः हिन्दी व्याख्या)

रचयिता - डॉ. रघुवीर वेदालङ्कारः

प्रकाशनकालः- 1997 ख्रिस्ताब्दः प्राच्यविद्याप्रतिष्ठानम्, दिल्ली

डॉ. रघुवीरमहोदयेन विरचितायां ज्योष्मतिव्याख्यायां न केवल-मनुवादमात्रमस्ति अपित्वत्र सूत्र-परिच्छेदो विभक्तिज्ञानं समासादयश्च प्रदर्शिताः। अनेन सूत्रार्थायबोधने सारल्यं पाणिनीयसूत्रसंरचनायाः सम्यक् ज्ञानञ्च भवति। अत्र

व्याख्याकर्ता नैकानां ग्रन्थानां सहायतया विस्तृतां व्याख्यां विरच्य वृत्तिकारस्याशयं स्पष्टवान्। स्पष्टाय 1.4.21, 2.3.22, 2.1.1. सूत्राणां व्याख्यां द्रष्टुं शक्यन्ते जिज्ञासवः।

महाभाष्य-न्यास-पदमञ्जर्यानां सारमप्यत्र समाहितं ग्रन्थकारेण। स्थाने-स्थाने वाक्यपदीय-प्रदीप-उद्योत-सिद्धान्तकौमुदी चादिनां ग्रन्थानामपि यथेष्टमुपयोगोत्रा-भयत् । अनेकेषु विवेच्यस्थलेषु स्वामी दयानन्दादयः नवीनानां वैयाकरणानां मतमपि उद्धृतमकरोत् ।

ग्रन्थेऽस्मिन् प्रायः सर्वाण्युदाहरणानि प्रत्युदाहरणानि च ससूत्रेण प्रदर्शितानि। प्रत्युदाहरणानां वास्तविकमभिप्रायं स्पष्टयन् तत्र मूले काऽपि कथाऽस्ति चेद् साऽपि उद्धृता ग्रन्थकारेण। यथा 1.1.11 सूत्रार्थे प्रदत्ता कथा। प्रत्युदाहरणानां वार्तिकानां विषये स्वतन्त्रटिप्पणी अपि प्रदत्ता ग्रन्थकारेण। अस्मिन् विषये 1.1.11, 1.4.32 चादयान् सूत्राणामुदाहरणान् द्रष्टुं शक्यन्ते। स्वर-विषयकानां सूत्राणामुदाहरणानि सस्वरेण विलिखितानि। पाणिनीय सूत्ररचनाविषये विभिन्नवैयाकरणानां मतमपि प्रदर्शितं ग्रन्थकर्त्रा।

2. 'तत्त्वदर्शिनी' भूषणसारस्य टीका

प्रणेता पेरि सूर्यनारायणशास्त्री (व्याकरणवागीशः)

(28.8.1910 तः 24.01.1995 पर्यन्तम्)

तत्त्वदर्शिनी व्याख्येयं सर्वतन्त्र स्वतन्त्र श्रीकौण्डभट्टप्रणीतवैयाकरण-भूषणसारस्यास्ति। दर्पणाद्यभिधानां मूलग्रन्थानवेक्षणेन प्रवृतानां षण्णां व्याख्यानां खण्डनपुरस्सरं 'तत्त्वदर्शिनी' इत्यन्वर्थाभिधां व्याख्यां व्यरचत् शास्त्रिमहोदयः ।

श्रीशृङ्गेरीजगद्गुरुचरणानामुखेन सह ग्रन्थोऽयं पाणिनीय प्रकाशनम्, तिरुपतितः प्रकाशितः। वैयाकरणान् व्याख्यानमिदमत्यन्तमुपकुरुते।

3. नागेशभावप्रकाशः

रचयिता - पेरि सूर्यनारायणशास्त्री (व्याकरणवागीशः)

28.8.1910 तः 24.01.1995 पर्यन्तम्

प्रकाशनकालः-प्र.सं. 2004 ख्रिस्ताब्दवर्षम्

नागेशभावप्रकाशः-

नागेशविरचितलघुमञ्जूषाया व्याख्याभूतोऽयं ग्रन्थः श्री शृङ्गेरी-जगद्गुरुचरणानां नारायणस्मरणपूर्वकं 2004 ख्रिस्ताब्दे पाणिनीय प्रकाशन तिरुपतितः प्रकाशितः। यद्यपि लघुमञ्जूषायाः कला, कुञ्जिकेति द्वे व्याख्ये स्तः। परन्तु तेऽसमये। इयं तु समेषां नागेशभावानां सप्रमाणमाविष्कारेऽलम्। पेरि महोदयस्यायमपि ग्रन्थो वैयाकरणानां करदीपिकायते । तिङर्थधात्वर्थ-निपातार्थ-प्रातिपदिकार्थ-सुबर्थेत्येवं भागश आविष्कृतोऽयम्।

लघुमञ्जूषाया वृत्तिविचारस्य व्याख्याने नागेशभावप्रकाशे प्रतिपादिता विशेषांशाः। तद्यथा-

1 प्रतिप्रघट्टकं शीर्षकनामकरणम्। अनेन पाठकानां महते सौकर्याय भवति। 2. वैयाकरणैः वृतौ एकार्थीभाव एव स्वीकार्य न तु व्यपेक्षा। 3. समर्थः पदविधिः इति नाधिकारसूत्रम्, किन्तु परिभाषसूत्रमेव। 4 जहत्स्वार्थायाम्, अजहस्वार्थायां च एकार्थीभावनिर्वाहप्रकारः। 5. सामानाधिकरण्य-शब्दार्थविचारः 6 भेद-संसर्गयोरभावे सामर्थ्याभावः। 7. दन्तोष्ठस्य दन्ताः स्निग्धतराः, इति प्रयोगस्योपपत्तिः। 8. यथोत्तरं मुनीनां प्रामाण्यम् इति सिद्धान्तस्य सूत्रकारसंमतत्वम्। 6. अभेदैकत्व-

संख्यानिरूपणम्। 10. द्वन्द्वे चकारप्रयोगो भाष्यकृता नोक्त' इति कलाकार मतखण्डनपूर्वकं तस्य भाष्योक्तत्वप्रतिपादनम्। 11. द्विदशा इत्यत्र वृत्तिप्रतिपादनम्। 12. निषादस्थपत्यधिकरणस्वरूपनिरूपणम्। 13. दहराधिकरणनिरूपणम्। 14. भेद-संसर्गो सामर्थ्यमिति विषये कलाकारमतनिराकरणम्। 15. व्यपेक्षावादस्य सूत्रकारसमतत्वप्रतिपादनावसरे ऋतेन मित्रावरुणौ' इति मन्त्रार्थनिरूपणम् । 19. एकशेषस्य वृत्तित्याभावप्रदर्शनम् । 17. शब्दबुद्धिकर्मणां विरम्य व्यापाराभाव इति सिद्धान्ते प्राप्तस्य पूर्वपक्षस्य आशयविवरणम् 18. कटं करोति भीष्ममुदारमिति भाष्यकारप्रयुक्तवाक्यस्य समग्रतया विचारः। 19. प्रकृतित्तत्वपरिष्कारावसरे पाणिनीयोक्तप्रत्ययसंख्यानिरूपणम्। 20. तद्वहति रथयुगप्रासङ्गम् इति सूत्रभाष्यार्थस्य विस्तरेण निरूपणम्। 21 लौकिक-विग्रहवाक्ये एकार्थीभावस्याभावे गुरुचरणानां पेरि वेङ्कटेश्वरशास्त्रिपादानां वचनप्रामाण्यन् 22. तद्गुणातद्गुणसंविज्ञानबहुव्रीहयोः भेदप्रदर्शनम्। 23. अरुणाधिकरणस्वरूपविचारः। तदवसरे खण्डदेवमतनिराकणम् । 24. इन्द्रपीताधिकरणनिरूपणावसरे खण्डदेवमतखण्डनम्। 25. 'बहुल' ग्रहणेन इन्द्रपीतशब्दस्य साधुत्वविचारः 26. न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत् तदर्थप्रतिपत्तिकरः' इति मुनिवचनस्य गौरवमूलकत्वम्। 27. त्रिंशदादिषु शब्देषु प्रकृतिप्रत्ययविभागप्रदर्शनम्। 28. 'द्यावा ह क्षाम प्रथमा ऋतेन' इतिमन्त्रे 'द्यो' शब्दस्य अर्थद्वयप्रतिपादनम् । 26. 'चार्थेद्वन्द्वः' इति सूत्रे अर्थग्रहणप्रयोजनम्। 30. 'अखण्डोपाधि' शब्दार्थविचारः। 31. तेन तुल्यं क्रिया चेद्वतिः इति सूत्रार्थनिष्कर्षः । 32. मयट् प्रत्ययार्थविचारावसरे महता ग्रन्थेन कल्पतरूपरिमलकारयोः मतनिराकरणम्।[111]

---

[111] नागेशभावप्रकाशः - पेरि सूर्यनारायण शास्त्री, भूमिका, प्र.सं. 2004, पाणिनीय प्रका., तिरुपतिः

इत्थं प्रकारेण नागेशभावप्रकाशे ग्रन्थकारेण बहवः विषयाः समाख्याताः समालोचिताश्च ।

4. रत्नप्रभा-सिद्धान्तकौमुद्याष्टीका

प्रणेता- बालकृष्ण पञ्चोली

प्रकाशिता चौ. सं. संस्थानम्, वाराणसी

रचनाकालः 1.4.1966

वैयाकरणसिद्धान्तकौमुद्या 'रत्नप्रभा' इत्याख्यां हिन्दी व्याख्यां प्रणीतवान् श्री बालकृष्णपञ्चोली महोदयः। श्रीबालशास्त्रिणः प्रधानशिष्यस्य श्रीदामोदरशास्त्रिणः जातात् श्रीसभापतिशर्मोपाध्यायमहोदयात् गुरुपरम्परया ज्ञातशब्दिकसिद्धान्तानां 'रत्नप्रभा' टीकायामुल्लेखः कृतः टीकाकारेण बालकृष्ण पञ्चोली महोदयेन।

टीकावैशिष्ट्यम् -

संज्ञा-संज्ञिस्वरूपस्य ज्ञानं स्पष्टतया लिखितमत्र। अनुवृत्तिक्रमः निर्देष्टसूत्रार्थ बोधक्रमो वर्णितोऽस्ति । प्रक्रिया साधनिकया सह प्रयोगाणामर्थः सुस्पष्टः यथासम्भव प्रदर्शितः। सिद्धान्तकौमुद्यां फक्किकाः अपि समागच्छन्ति तासामस्यां टीकायां सारगर्भितं व्याख्यानं कृतम्।

अर्थज्ञानार्थ शब्दप्रयोगः। प्रत्यर्थ शब्दानिनिवेशः इति भाष्योक्तेऽध्यय-नाध्यापने सम्प्रति उपेक्षा भवति, तस्यापि समाधानं प्रदत्तमत्र टीकाग्रन्थ-कारेण प्रौढ-पाण्डित्यरक्षार्थ फक्किकानां विशदशास्त्रार्थवर्णनं मिलतिऽस्मिन् टीकाग्रन्थे पाणिनि कात्यायनपतञ्जलीनां त्रिकालदर्शित्वसाधनपूर्वकं परस्परम् ऐक्यमतस्य रत्नप्रभाटीकायां व्याख्यानं कतं तदन्यत्रास्ति दुर्लभम् । 'षटकारकाणि इति मतस्य निरासपूर्वकं चत्वारि कारकाणीति विवेचितमत्र। कर्मादि कारकेषु व्यापारजन्य

फलोत्पत्यां कार्यकारणाभावस्य विवेचनमत्रकृतं ग्रन्थकर्त्रा । तद्यथा- समवायेन विक्लतिम्प्रति सादात्म्येन तण्डुलस्य कारणता' एवमेवान्यत्रापि विशदं विमर्शः कृतः।

अत्र प्रायः 3975 पाणिनीयसूत्राणि 748 अपाणिनीयानि उणादिसूत्राणि 116 लिङ्ङ्गानुशासन सूत्राणि, आहत्य 4839 सूत्राणि व्याख्यातानि पञ्चोलिना। तथा 1200 वार्तिकानां व्याख्यानं 2200 धातूनामर्थनिर्देशः स्त्रप्रभाटीकायां कृतो ग्रन्थकारेण।

5. राधिका लघुशब्देन्दुशेखरस्य

प्रणेता श्री ब्रह्मदत्तद्विवेदी

प्रकाशनवर्षम् - 1988 ख्रिस्ताब्दः

सिद्धान्तकौमुद्याया बहवष्टीकाः समुपलभ्यन्ते। अस्यां स्थितौ सर्वतन्त्रस्वतन्त्रैः सम्पूर्णानन्दसंस्कृत-विश्वविद्यालये सम्मानितप्राध्यापकैः श्रीब्रह्मदत्तद्विवेदिमहाभागैः विरचिताया राधिकाटीकाया गतार्थत्वा-दुपयोगिता सन्धिग्धति नैव वक्तुं शक्यते। यतो हि अल्पधियामपि छात्राणां कृतेऽस्याः व्याख्याया आवश्यकतत्वात् ।

पण्डितप्रवरामप्रसादत्रिपाठिनां गम्भीरया प्रस्तावनया समलङ्कृतोऽयं ग्रन्थस्तत्कृतः शिवसायुज्यप्राप्त्यनन्तरं प्रकाशितः। प्राचीन टीकासु यत्सार-वद्वस्तु तद् ग्रहीता स्वीयेन मौलिकचिन्तनेन किञ्चिदधिकमुल्लिखितं येन बाला अपि शेखरस्य गभीराशयमवगन्तुं शक्नुयुः ।

नागेशमतस्य पल्लवने टीकाकृतोऽस्य विशेषो लक्ष्यते। क्वचिद् विवादस्थलेषु यत्र पूर्वे टीकाकारा नागेशं न प्रमणतयाङ्गीकुर्वन्ति, तत्र टीकाकारोऽयं नागेशमतोपोद्यलनाय नैकानि मतानि प्रस्तौति। यथा चाऽभिनयचन्द्रिकाप्रभृतिटीकासु प्रत्याहारखण्डनं वीक्ष्य अत्र शेखर-ग्रन्थसमर्थनाय सारगर्भिता युक्तयः प्रतिपादिताः

सन्ति। अतश्च 'उरणलपरः' इति लकारघटितसूत्रपाठ एव भाष्य-तात्पर्यमवगाहमानः शेखरग्रन्थः सयुक्तिकमुपस्थापित इति।[112]

6. विद्यानिधि-व्याख्या

(महाभाष्यस्य हिन्द्याम्)

प्रणेता- भीमसेन वेदालङ्कारः

भीमसेनवेदाङ्कालारमहोदयः महाभाष्यस्य व्याख्येयं पितुर्नामनि प्रणीतवान्। अस्य पुत्रयोर्नाम प्रदीप उद्योतश्च स्तः यद्मह्राभाष्यटीकयोर्नाम अस्ति। श्रीमती रजनीदेव्याः पति भीमसेनः व्याकरणमहाभाष्यग्रन्थस्य 'विद्यानिधि' इत्याख्यां हिन्दी-व्याख्यां विरचितवान् । प्रथमाध्यायतोऽष्टमखण्डपर्यन्तं सम्पूर्ण महाभाष्यं लिखितवान् महोदयोऽयम्। परन्तु प्रकाशनन्तु केवलं प्रथमपादस्यैकतः नवाह्निकपर्यन्तमेवाभयत् ।

टीकावैशिष्ट्यम् -

व्याख्याग्रन्थोऽयं महाभाष्यस्य शब्दशः हिन्द्यामनुवादो न भूत्वा धाराप्रवाहयुक्ता भावयुक्ता च रोचकशैल्यां विलिखिता हिन्दी व्याख्या अस्ति। अत्र महाभाष्यस्य गूढतत्त्वानामुदघाटनस्य प्रयत्नः क्रियते ग्रन्थकर्त्रा।

महाभाष्ये एकस्मिन् विषस्य व्याख्यावसरे प्रसङ्गानुसारमन्य-विषयान्तरमूलकविषये विस्तृतविवेचनेन बहुधा मूलप्रारम्भिकसमस्यायाः वा पाठकस्य तारतम्यं विभज्यते। परन्तु विद्यानिधि इत्याख्यामस्यां व्याख्यायां मलविषयेन सहैवान्तरप्रसङ्गस्योपस्थापनकाले मूलेन विषयेण सह सम्बन्धो वा औचित्यमनवरतं दरीदृश्यते ।

---

[112] राधिका-लघुशब्देन्दुशेखरटीका, प्र.सं. 1988 ख्रिस्ताब्दे, सु. प्रकाशन

व्याकरणस्याध्येतृणामत्पधीयां छात्राणाङ्कृते तु ग्रन्थोऽयं गुरुकल्पग्रन्थेव कार्यं करिष्यति। अतोऽस्य कृते ग्रन्थकारेण यत्र-तत्र विस्तरेण व्याख्या अपि कृता। चिन्तनेन सहाल्पधीयां व्युत्पन्नमतिनामपि च मनसि निधाय शिष्य-बुद्धिव्युत्पादनार्थं प्रदीपोद्योतस्य प्रायः बहवो नूतनविचाराणामपि समावेशोऽत्र कृतो ग्रन्थक्रतुना।

निखिलं महाभाष्य प्रसङ्गनिर्देशिकापूर्वकमवतरणपूर्वकं प्रतिसूत्रं प्रति-आह्निकञ्च संख्यायुक्तेष्वनुच्छेदेषु विभक्तम्। महाभाष्ये यन्त्रैकस्य सूत्रस्य व्याख्याया अनन्तरं यानि कानि चान्यानि सूत्राणि सन्ति। तेभ्यः सूत्रेभ्यः पूर्वाणि पराणि च सूत्राणि न मिलन्ति। तर्हि ग्रन्थेऽस्मिन् मध्यवर्तीतानि अव्याख्यातृणि सूत्राण्यपि सरलार्थेन सोदाहरणेन च पादटिप्पण्यां व्याख्यातं (सूत्रितम्) ग्रन्थकारेण। इत्थमत्र सम्पूर्णां अष्टाध्यायी समाविष्टा।

7. दीपिका-वैयाकरणभूषणसारस्य

रचनाकारः मं. पं. दीनबन्धु झा

रचनाकालः 1945 ख्रिस्ताब्दः (सम्भाव्यते)

प्रकाशनकालः 2002 ख्रिस्ताब्दः

महावैयाकरणेन पण्डितदीनबन्धुझाशर्मणा सर्वत्राध्ययनाध्यापनयोः प्रचलितत्वेन छात्रोपयोगिन्या पङ्क्तिविवरणेन सह ग्रन्थाशयप्रकाशनपराया व्याख्याया आवश्यकतामनुभूय तदध्यापनस्य चिरकालिकानुभवाधारेण वैयाकरणभूषणसारस्य दीपिका नाम्नी व्याख्या विरचिता। व्याख्येयं मन्ये 1942-46 ख्रिस्ताब्दे वर्षमध्ये रचिता यदा एतच्छिष्येषु पं. मणिनाथ झा (दिल्ली विद्यापीठस्थः), पं. श्री गोविन्द झा (व्याख्याकृत्पुत्रः), पं. श्री माधवझा (व्याख्याकृत्पुत्रः) इत्यादयोऽधीयाना आसन्। वस्तुतस्तेषामध्यापनक्रम एव व्याख्येयं कृता। तेषां प्रश्नानां समाधानान्यत्र निवेशितानि सन्ति ।

भूषणसारदीपिकायाः मङ्गलाचरणमनुप्रासालङ्कारझङ्कृतिसम-लङ्कृतम्। तद्यथा-

"अन्तः करणावरण व्यपसारण कारणप्रणती।

गणपतिचरणावरूणौ करूणावरूणालयौ प्रणुमः ।।"

अस्यार्थः- अन्तःकरणस्य (बुद्धेः) आवरणम् (आच्छादनम्) अन्तः-करणावरणम्, तस्य व्यपसारणम् (वि+अपसारणं, बहिष्करणम्) अन्तःकरणा-वरणव्यपसारणम्, तच्चादः कारणम् (हेतु) अन्तः करणावरणव्यपसारण-कारणम्, तेन प्रणतिर्ययोः अनू अन्तःकरणावरणव्यपसारणकारणप्रणती, करुणावरुणालयौ करुणायाः (दयाया वरुणांलयः (सागर) तौ अरुण (रक्तवर्णी) गणपतिचरणी गणपतेः (गणेशस्य) चरणौ प्रणुम। अत्र समासबहुलत्वं रकारणकारयोरेकादशवारश्रवणत्वं च दर्शनीयमस्ति ।

विशाले ग्रन्थेऽस्मिन् बहवो नूतनविचाराः सन्ति तेषु केचिदशा यथा-

क. धातुसम्बन्धे प्रत्यया -

वसन् ददर्श, पठन्नासीत् इत्यादि प्रयोगेषु क्रियाद्वयमध्ये उत्तरा क्रियाभूतकालिकी विद्यते। ततः पूर्वस्थ-क्रियायाः सुतरा भूतत्वेन कथं वर्तमानकालिकलट् प्रत्ययः तत्स्थाने च शतृप्रत्ययो दृश्यते (काशिका-4-1), अस्याः शंकायाः निराकरणं कर्त्तु सूत्रमिदं पाणिनिना प्रणीतम् 'धातुसम्बन्धे प्रत्ययाः'[113] इति। अभिप्रायोज्यं यद् वसन् इत्यस्यात्र लङ्न्तत्वेऽपि न वर्तमानकालोऽर्थः । भूतकालिकदर्शन-क्रियापेक्षया पूर्वत्वात् सुतरामस्य भूतत्वं सिद्धम् ।

तथाहि काशिकायाम् - धात्वर्थे धातुशब्दः। धात्वर्थानां सम्बन्धो धातुसम्बन्धः। विशेषणविशेष्यभावः। तस्मिन् सति अयथाकालोक्ता अपि प्रत्ययाः साधवो भवन्ति।

---

[113] अष्टाध्यायी सूत्रपाठः 3.4.1

अग्निष्टोमयाय्यस्य पुत्रो जनिता। कृतः कटः श्वो भविता । भाविकृत्यमासीत्। अग्निष्टोमयाजीति भूतकालः, जनितेति भविष्यत्कालः। तत्र भूत कालो भविष्यत्कालेनाभि-सम्बध्यमानः साधुर्भवति। विशेषणं गुणत्वाद्विशेष्यस्य कालमनुरुध्यते। मतेऽस्मिन् वसन् ददर्शत्यस्यार्थो भवति भूतकालिकदर्शन-क्रियासम्बन्धिभूतकालिकवसनक्रिया।

महावैयाकरण दीनबन्धुशर्मणोऽत्र कथयन्ति यद्[114] धातुसम्बन्धे प्रत्ययाः भवन्ति, अर्थात् वसन् ददर्श इत्यत्र मुख्यो धातुः दृश् धातु तत्सम्बन्धिवस्घातोः लडादिप्रत्ययोः यथाविहितेऽर्थे भवति। तथा च दर्शनक्रियापेक्षयैव वस् धातोः वर्तमानत्वं ज्ञायते। अर्थात् यदा वसन् ददर्शेत्युच्यते तत्कालापेक्षया दर्शनक्रियां भूतकालिकी वर्तते। दर्शनक्रियानिरूपिता च वसनक्रिया वर्तमानास्ति। 'कृतः कट श्वो भाविता' इत्यत्र श्वः (भविष्यत्काले) कटः निर्मितः (भूतकालिक-निर्माणयुक्तः) भविष्यति इत्येव बोधो भवति। अर्थात् नाधुनापेक्षया कटनिर्माणस्य भूतत्वं, किन्तु धातुसम्बद्धं भविता इति सम्बद्धं भूतत्वं ज्ञायते, इत्येव 'धातु-सम्बन्धे प्रत्ययाः' इत्यनेन क्रियते।

अतः एव वसन् ददर्श इत्यनेन भूतकालिकदर्शनक्रियानिरूपिता या वर्तमानकालिकी वसनक्रिया' तस्या एव बोधो भवति।

दर्पणखण्डनम् -

सारदीपिकायां दर्पणकृन्मतखण्डनं बहुधा विलोक्यते। किंचास्मिन् मूलार्थालापने भूयोऽशाः लिखिताः, किन्तु दर्पणे न्यायादिमतविचारायैव। तथा चोक्तं

---

[114] भूषणसारदीपिकागोविन्दशर्मसम्पादिता पांडुलिपिः पृ.173

दीनबन्धुशर्म्माभिः 'दर्पणस्य[115] प्रायेण न्यायमत-व्यवस्थापनप्रवृत्ततया वैयाकरणैः स्वसिद्धान्तबुद्ध्यानुपादेयत्वाच्च इति। एवं दर्पणादिभूषणसार-व्याख्यादितोऽस्याः व्याख्यायाः विलक्षणत्वं बहुविधं विलोक्यते । अस्याः सरला प्रणाली स्वीया एव, या न कुत्रापि दृश्यते, विषयेऽत्र द्रष्टारो मन्तारश्च विद्वांस एव प्रमाणम्।

अत्र बहवो नूतना विचाराः संक्षिप्ततया स्पष्टं निगदिताः। विशेषत-मीमांसाविषयका विषया अस्यां व्याख्यायां यथा स्पष्ट प्रदर्शिताः न तथान्यत्र (दर्पणेऽपि नहि)। अत वक्तुं शक्यते भूषणशारदीपिका नवीना विलक्षणा चास्ति।

सारदीपिकाया व्याख्याया अपरं वैशिष्ट्यमिदं यत् त्रिविधानाम-धिकारिणामुपयोगित्वा प्रयासो विहितः । साधारणविषयजिज्ञासूनां कृते प्रथमतो ग्रन्थलापनम् मध्यमजिज्ञासूनां कृते विषयस्फुटीकरणम् सूक्ष्मदर्शितानां कृते विषयपरिष्कारश्चेति । यस्य यावत् प्रयोजनं सतावन्नेवांशं विलोक्य सन्तुष्टो भवितुर्महति । एकत्र त्रिविध व्यवस्था वर्तते।

8. शाङ्करी-भूषणसारस्य-टीका

प्रणेता श्रीशङ्करशास्त्रीः

रचनाकालः 1957 ख्रिस्ताब्दः

श्रीरङ्गभट्टपुत्रेण शङ्करशास्त्रिणा 1957 ख्रिस्ताब्दे वर्षे 'शाङ्करी नाम्नी भूषणसारस्य टीका विरचिता। टीकेयं सुविस्तृता, सारल्येनावबोद्धुं शक्या पाण्डित्यपूर्णा सन्दर्भसंयोजिता चेत्यवगम्यते। पुण्यपत्तनस्यानन्दा-श्रममुद्रणालये 1957 ख्रिस्ताब्दे टीकेयं प्रकाशिता जाता। भारद्वाजकुलोत्पनस्य रमेति नाम्नाख्यातायाः मातायाः पुत्रस्य श्रीशङ्करस्य अस्यां टीकायां विशेषः प्रयासो

---

[115] धात्वर्थ का. 5, पृ. 80, दर्पण पृ. 52

दरीदृश्यते। महानुभावोऽयं पण्डितः श्रीनरहरिरस्य ज्यायान् भ्राता आसीत् यो हि विद्याशंकरभारती' इति नाम्ना जगद्गुरुपदे आरूढ आसीत् ।

9. ज्ञापकसंग्रहस्य व्याख्या

प्रणेता श्रीरामानुज तातार्यः

प्रकाशकः सं. विद्यापीठतः (तिरूपतिः)

श्रीरामानुज तातार्यमहानुभावेन श्रीनागेशकृतो ज्ञापकसङ्ग्रहो ग्रन्थो व्याख्यातः। अनेनात्र तदितरज्ञापकानां संग्रहं विधाय च व्याख्यातः। ग्रन्थोऽयं तिरूपतिस्थ रा. संस्कृत विद्यापीठतः 1972 ख्रिस्ताब्दे वर्षे प्रकाशितः ।

ग्रन्थेऽस्मिन् श्रीरामानुजतातार्येण प्रत्याख्याताः परिभाषाः परित्यक्ताः। महानुभावोऽयं व्याकरण न्यायादि शास्त्रावतारस्वरूपः तिरूपतिनगरमध्यास्ते।

5. स्वातन्त्र्योत्तरकालस्य संस्कृतटीकाकाराणां संस्कृतेतर-टीकाकाराणाञ्च टीकया सह अकारादिक्रमेण विरचिता सूची

प्रणेता	टीकाग्रन्थः	प्रकाशकः	प्रकाशन कालः
1. आचार्यः, वामदेवः	i. प्रतिमा (वाक्यपदीय ब्रह्मकाण्डटीका)	कृष्णदास अकादमी, वाराणसी	1987
2. उपाध्यायः शर्मा सभापतिः	i रत्नाप्रभा (लघुमञ्जूषा-ग्रन्थस्यतात्पर्यान्त भागो लभ्यते) ii लक्ष्मीः (वैयाकरण-सिद्धान्तकौमुद्या कारकान्तभागो)	चौ. सं. सीरीज ऑफिन्स, वाराणसी मोतीलालबनारसीदास, वाराणसी	1973

3. जिज्ञासु, ब्रह्मदत्तः	i अष्टाध्यायी भाष्य-प्रथमावृत्तिः (प्रथमत-स्तृतीयाध्यान्तो भागः) ii अष्टाध्यायी भाष्य-प्रथमावृत्तिः (प्रथम-तस्तृतीयाध्यान्तो भागः) पंचमसंस्करणम् iii अष्टाध्यायी भाष्य-प्रथमावृत्तिः (द्वितीया-दिपञ्चमाध्यायान्तो भागः) iv अष्टाध्यायी भाष्य-प्रथमावृत्तिः (द्वितीया-दिपञ्चमाध्यायान्तो भागः) षष्ठसंस्करणम्	रामलाल कपूर ट्रस्ट, बहालगढ रामलाल कपूर ट्रस्ट, बहालगढ़ रामलाल कपूर ट्रस्ट, बहालगढ रामलाल कपूर ट्रस्ट बहालगढ	1964 1965 1964 1966
4. झाः, पं. आद्याचरणः	i मनोरमा शब्दरत्न-प्रकाशिका ii लेखाः नित्यं शब्दमयं ब्रह्म	पटना पटना	1965
5. झा. पं. ताराकान्तः	i लघुशब्देन्दुशेखर-दीपिकाव्याख्या	दरभंगा संवि. विद्या	1987

6. झा, महेशः	i 'विमला' महाभाष्य-नवाह्नि-कटीका	संस्कृतशोध सं. दरभंगा	
7. त्रिपाठी, जयशंकर लालः	i 'भावप्रकाशिका' परम-लघुमञ्जूषाटीका	कृष्णदास अकादमी, वाराणसी	1985
8. त्रिपाठी, नारायण-दत्तः	i प्रकाश' वाक्यपदीय-टीका	श्रीचंद कॉलेज, वाराणसी	1937
9. त्रिपाठी, रामचरितः	i फक्किकासरलार्थः	चौ. प्रकाशन, वाराणसी	1942
10. त्रिपाठी, रामप्रसादः	i सुबोधिनी (भूषणसार-टिप्पणी-गोपालशास्त्रिनेनेकृत्या सरलया टीकया सहिता) ii. सिद्धान्तचिन्तामणिः	चौ.सं. सीरीज ऑ. वाराणसी सं.सं. वि.वि. वाराणसी	1952 -
11. दास, कृष्णः	पारसीकप्रकाशः	सं.सं.वि.वि. वाराणसी	1965
12. द्विवेदी, ब्रह्मदत्तः	राधिका' लघुशब्देन्दुशेखरटीका	सुशीलप्रकाशनम्, पटना	1988
13. देवी,	i अष्टाध्यायीभाष्या-	रामलाल कूपर ट्रस्ट,	1968

प्रज्ञा	त्यगावृति, षष्ठ सप्तम-अष्टायाध्यायात्मिका ii अष्टाध्यायीभाष्य-प्रथमावृत्तिः, षष्ठं संस्करणम्	बहालगढ़ रामलाल कूपर ट्रस्ट, महालगढ़	 1966
14. नेने, गोपालशास्त्री	i 'सरला' भूषणसार-टीका (रामप्रसाद त्रिपाठिकृत्या सुबोधिन्या) टिप्पण्या सनाथिता ii. व्याकरणपूर्वपक्षा-वलिः	चौखम्बा प्रकाशन, वाराणसी चौ. प्रकाशनं, वाराणसी	1952 1927
15. पञ्चोली, बालकृष्णः	'प्रभा' भूषणसारटीका	चौ. प्रकाशनं, वाराणसी	1966
16. पर्वतीयः, नित्यानन्द पन्तः	'अर्थदीपिका' (परमलघुमञ्जूषाटीका)	चौ.सं.सी.ऑ., वाराणसी	1946
17. मारूलरकर शास्त्री शंकरः	शांकरी-भूषणसारटीका	आनन्दाश्रम मुद्राणालय, पुणे.	1957

18. मिश्रः, जयदेवः	i. जया-व्युत्पत्तिवादटीका ii. विजया-परिभाषेन्दु-शेखरटीका	त्रिभूक्ति प्रकाशन, इलाहबाद त्रिभूक्ति, प्रकाशन, इलाहबाद	1927 1962
19. मिश्रः, प्रभाकरः	i. प्राभाकरी भूषणसार-टीका	अरविन्दमिश्रमकरन्द-मिश्री श्रीरामानुज संमहा वाराणसी	1982
20. मिश्रः, ब्रह्मशंकरः	व्याकरणोत्तरपक्षः	चौखम्बा प्रकाशन, वाराणसी	-
21 मिश्र, मुरलीधरः	i. रश्मिः- प्रक्रियाकौमुदी-टिप्पणी, स्त्रीप्रत्ययान्त-प्रथमो-भागः ii. रश्मिः– प्रक्रियाकौमु-दीटिप्पणी द्वितीयोभागः iii. रश्मिः- प्रक्रियाकौमु-दीटिप्पणीः तृतीयोभागः	सम्पू सं. वि. वाराणसी सं. सं. वि. वाराणसी सं. सं. वि. वि. वाराणसी	1977
22. मिश्र, यदुनाथः	i. गूढार्थदीपिका-पदवाक्यरत्नाकर टीका ii. समासशक्तिवादः iii. व्यञ्जनावादः	सं.सं.वि.वि. वाराणसी वाराणसी बिहार संस्कृत सा. समिति	1960 1926

23. मिश्र, श्रीनारायणः	i. दुर्घटवृत्तिव्याख्या सम्पादनम् ii. काशिका-पदमञ्जरी-सम्पादनम् iii. परिभाषेन्दुशेखरस्य व्याख्या सम्पादनम् च iv. स्फोट-मीमांसा	वाराणसी वाराणसी वाराणसी सं. सं. वि. वि., वाराणसी	1973 1973 1973 1961
24. मिश्रः हर्षनाथः	i. दुर्गाटीका-परिभाषेन्दुशेखरस्य	नई दिल्ली	1970
25. मैथिल इन्दिरादत्तः	i. फक्किकाप्रकाशः	चौ. प्रकाशन, वाराणसी	1947
26. शर्मा, रघुनाथः	i. अम्बाकर्ती-वाक्य-पदीय टीका, (ब्रह्मका-ण्डात्मको प्रथमो भागः) ii. अम्बाकर्ती-वाक्य-पदीय टीका, (ब्रह्मका-ण्डात्मको द्वितीयो भागः) iii. अम्बाकर्ती-वाक्य-पदीय टीका, (पदका-	सं.सं. वि.वि., वाराणसी सं.सं. वि.वि., वाराणसी सं.सं. वि.वि., वाराणसी	1963 1980 1991

	ण्डात्मकस्मृतीयो भागः) द्वितीयसंस्करणम् iv. अम्बाकर्तीवाक्य-पदीय टीका. (पदकाण्ड-स्य द्वितीयो भागः, द्वितीयसंस्करणम्) v. अम्बाकर्ती-वाक्य-पदीय टीका, (वृत्तिस-मुद्देशात्मकोभागः) vi. महाभाष्यटिप्पणी vii. व्याकरणदर्शनविन्दुः	सं.सं. वि.वि., वाराणसी सं.सं. वि.वि., वाराणसी सुधीरप्रकाशनम्, वाराणसी सं.सं. वि.वि. वाराणसी	1997 1997 1987 1965
27. शर्मा, रामशरण	कौमुदीकथाकल्लोलिनी	चौ. सं. सीरीज ऑ. वाराणसी	1961
28. शर्मा, लक्ष्मणः	i तत्त्वप्रकाशिका-परिभाषेन्दु-शेखरटीका	चौ. सं. संस्थानं, वाराणसी	1978
29. शास्त्री, अमृतलाल	i भावप्रकाशिका-परिभाषेन्दुशेख-रटीका	गीता विद्यालय, जाम-खाभलिया, (गुजरात)	1964
30. शास्त्री,	i तत्त्वप्रकाशिका-	गुरुकुलकांगडी, हरिद्वार,	1952-62

गंगाधरः	अष्टाध्यायी व्याख्या		
31 शास्त्री, गुरुप्रसादः	1. वरवर्णिनी-लघुशब्देन्दुशेख-रटीका	भार्गव पुस्तकालय, वाराणसी	1940
32. शास्त्री, गोविन्दः	i लघु जटाजूट-परिभाषेन्दु-शेखरटीका	मास्टर खेलाडीलाल वाराणसी	1940
33. शास्त्री, गौरीनाथ	i. प्रभा-प्रामाण्य-वादटीका	सं.सं.वि.वि., वाराणसी	-
34. शास्त्री तातासुब्बाराय	i गुरुप्रसाद-लघुशब्देन्दुशेखरटीका	आनंदप्रेस, मद्रास	1926
35. शास्त्री, पेरीवैकटेशरः	i गुरुप्रसादशेप लघुशब्देन्दुशेखरटीका	आना वि.वि. आ. प्रदेश	1941
36. शास्त्री, वेणीमाधवः	i. परिष्कारदर्पणः	चौखम्बा प्रकाराऩ्न, वाराणसी	1934
37. शास्त्री, रामशरणः	i. पाणिनीयशास्त्रे वैशेषिकतत्त्व-मीमांसा	स्वप्रकाशित, दिल्ली	1976
38. शास्त्री, सदाशिवः	i. रत्नदीपिका-प्रौढमनोरमाटीका	चौ. प्रकाशन, वाराणसी	1934
39. शुक्ल,	i. ज्योत्सना-	सं. महा, सयाजिरावविश्वावि	1961

कालिकाप्रसादः	परमलघुमञ्जू-षाटीका	बडौदा, गुजरात	
40. शुक्ल, रामयत्नः	i. वैयाकरणभूषणटीका	_ _ _	_
41. शुक्लः, वेणीशंकरः	i. शास्त्रार्थकला-व्युत्पत्तिवाद-टीका ii. शास्त्रार्थकला-परिभाषेन्दुशे-खरटीका	चौ. प्रकाशन, वाराणसी चौ. प्रकाशन, वाराणसी	1943 1943
42. शुक्लः सूर्यनारायणः	i. 'पाणिनीयव्याकरणे वादरत्नम् ii. भावप्रदीपः	चौ. प्रकाशन, वाराणसी चौ. प्रकाशन, वाराणसी	1946 1975

(इति तृतीयोऽध्यायः)

❖ ❖ ❖

चतुर्थोऽध्यायः

1. व्याकरणशास्त्रस्य विकासे शोधप्रबन्धानां योगदानं महत्वञ्च ।
2. स्वातन्त्र्योत्तरकालस्य संस्कृतभाषायाः शोधप्रबन्धकाराणां संस्कृतेत-राणां शोधप्रबन्धकाराणां च कालक्रमेण विकास-निरूपणम् ।
3. संस्कृतभाषायां संस्कृतेतरभाषायां च विरचितानां प्रमुखानां शोध-प्रबन्धानामकारादिक्रमेण विकासनिरूपणम् (परिचयो वैशिष्ट्यञ्च)।
4. अकारादिक्रमेण प्रमुखशोधप्रबन्धकर्तृणां शोधग्रन्थैः सह प्रणीता सूची।
5. अकारादिक्रमेण लघुशोधप्रबन्धकर्तृणां लघुशोधप्रबन्धैः सह प्रणीता सूची।

अथ चतुर्थोऽध्यायः

1. व्याकरणशास्त्रस्य विकासे शोधप्रबन्धानां योगदानं महत्वञ्च

शुध् धातो घञ् प्रत्ययेसति निष्पन्नोऽयं शोधशब्दः। शोधस्य शब्दार्थोऽस्ति शुद्धं तर्हि प्रबन्धस्यार्थो-विशिष्टप्रकारेण बन्धनमिति । समासतः शोधप्रबन्धस्यार्थोऽस्ति-विशिष्टप्रकारेण गवेषणात्मकमन्वेषणात्म-कञ्च शुद्धः परिष्कृतः परिमार्जितः वास्तविको विमर्शितो ग्रन्थः । पक्षयोः शुद्धाशुद्धयोः मध्ये कतर शुद्धः संशोधनीयश्च कः पक्षः इत्यपि अनुसंधानविषये समाविष्टोऽस्ति तदा आङ्ग्लभाषायाः रिसर्च (RESEARCH) शब्देन साकं सादृश्यं भजते शोधशब्दः ।

शोधप्रबन्धानामुद्भवो विकासश्च -

वेद-वेदाङ्ग-रामायण-महाभारत-पुराण-गीता-न्याय-मीमांसासाहित्य-ज्योतिष-चादयेषु विषयेषु टीकाग्रन्थवद् बहवो शोधप्रबन्धग्रन्थाः काले काले विद्वद्भिः प्रणीता। व्याकरणशास्त्रेऽपि किमस्ति लेखनीयं यन्न लिखित्तम्, किमस्ति विचारणीयं यन्नस्याद् विचारितम्, किमस्ति विवेचनीयं यन्न स्याद् विवेचितमिति विचिन्त्य शब्दिकैः नागेशोत्तरकाले प्रणीता नैके शोधपरका ग्रन्थाः। स्वातन्त्र्योत्तरकालात्पूर्व शोधप्रबन्धकर्तृषु पं. श्री जयदेवः पं. मधुसूदन ओझा, वसन्तत्र्यम्बक शेवडे महाशयप्रभृतयो वैयाकरणा आसन्।

स्वातन्त्र्यात्परं शाब्दिकानां शोधलेखनसरिता किञ्चिद् तीव्रगतिमादधाति। कालेऽस्मिन् बहवो शब्दिका अभवन्। ये शोधप्रबन्धग्रन्थान् विरच्य

सरस्वतीसेवामकुर्वन्। तत्र चारूदेवशास्त्री डॉ. गौरीनाथशास्त्री. कालिकाप्रसादशुक्लः, आचार्य श्रीरामप्रसादत्रिपाठी, डॉ. भागीरथप्रसाद त्रिपाठी, युधिष्ठिरमीमांसकः, मणिनाथझा, प्रो. जी. बी. पलसुले, बच्चूलालोऽवस्थी, प्रो. एस. डी. लद्दू प्रभृतयः प्रमुखा आसन्। स्वातन्त्र्यात्परं मूर्धन्यशाब्दिकेषु सरस्वतीसमुपासकेषु सन्ति बहवो शोधप्रबन्धकाराः समग्रभारते, ये इदानीं सरस्वतीमुपसेवन्ते। तेषु डॉ. सत्यव्रतशास्त्री, डॉ. राममनोहरमिश्रः, श्री रामानुजताताचार्यः, एसः डी. जोशी, अवनीन्द्र कुमारः प्रभृतयः प्रमुखाः सन्ति ।

टीकाग्रन्थेषु शोधप्रबन्धेषु च भेदः -

यद्यपि बहवष्टीकाग्रन्था मूलग्रन्थानां दुरूहार्थावबोधनाय मूलग्रन्थस्याभिप्रायस्यालोचनाय च प्रणीताः समुपलभ्यन्ते। तथापि किमस्ति विशिष्टं को विषयो वर्तते विशेषो यत्र टीकाग्रन्था अपि तादृशमर्थस्पष्टीकरणेऽसक्षमाः वर्तन्ते यादृशमर्थस्पष्टीकरणे शोधप्रबन्धाः कुशला वर्तन्ते। टीकाग्रन्थानां शोधप्रबन्धानां च मूलभेदे विषयभेदो वर्तते । तद्यथा-

टीकाग्रन्था मूलग्रन्थानां शब्दतो व्याख्यानं कुर्वन्ति। टीकाग्रन्थानां लेखनन्तु समग्रग्रन्थे वा तस्य कस्मिन्नप्येकस्मिन् भागे क्रियते शाब्दिकैः। टीकालेखनक्रमे टीकाकर्तुर्विचाराः चिन्तनं मननं विषयविमर्शक्षमता च प्रामुख्यस्थानं भजते।

परन्तु शोधप्रबन्धेषु कस्यापि पूर्वलिखितस्य विषयस्य पक्ष-विपक्षसिद्धान्तस्य च मन्थनमालोडनं विलोडनञ्च कृत्वा याथातथ्यं सिद्धान्तो मतं पक्षश्च निश्चीयन्ते शोधप्रबन्धकर्तृभिः शाब्दिकैः। शोधप्रबन्धलेखनकालात्पूर्व शोधकर्तुर्मनसि समागताः नैके विचाराः मतानि सिद्धान्ताश्च विषयानुसारिणो सिद्धान्तानुसारिणो च समुचितानि सन्ति वा नेति सर्व पर्यालोच्यते। अत्र तेन शोधप्रबन्धस्य

विषयवस्तुविषये विभिन्नानां मतानां पक्षाणाञ्च विमर्शङ्कृत्वा व्याकरणसम्मत-सिद्धान्तः सुनिश्चीयतेऽन्ते ।

व्याकरणशास्त्रस्य विकासे शोधप्रबन्धानां योगदानं महत्त्वञ्च-

टीकाग्रन्थानामिव शोधप्रबन्धग्रन्थानामपि व्याकरणशास्त्रस्य गूढार्थाव-बोधनाय रहस्योद्घाटनाय उत मूलग्रन्थोक्तविचाराणां दुरुहवाक्यानामंशानां वा सारल्येन तार्किकक्रमेव चावबोधाय हृदयङ्गमाय च महत्त्वं दरीदृश्यते ।

समग्रभारतवर्षे व्याकरणशोधप्रबन्धलेखनस्य धारा प्रवाहमाना दृश्यते। स्वातन्त्र्योत्तरकालेऽपि बहवो शोधप्रबन्धा व्याकरणविद्वद्दिभः काले काले प्रणीता। तेषु तेषु शोधप्रबन्धेषु केचन सन्ति व्याकरणशास्त्रस्य दार्शनिकस्वरूपमिधकृत्य विलिखिता केचन च नव्यन्यायशैल्यां प्रणीता विराजन्ते, केचन तु परिष्कारपद्धतिमनुसृत्य विरचिता समुपलभ्यन्ते।

शोधप्रबन्धेषु व्याकरणशास्त्रस्य विभिन्ना विषयाः बहवः सिद्धान्ताः नैकानि मतानि च पर्यालोवितानि काले काले व्याकरणविचक्षणैः शाब्दिकैः। तत्र स्फोटः शब्दब्रह्म प्रमाणानि धात्वर्थः परिभाषा शब्दशक्तिः पदपदार्थविभागः शब्दार्थमीमांसा परिभाषा शब्दार्थसम्बन्धश्चादयः नैके विषयाः सन्ति।

यथा पाणिनिविरचितामष्टाध्यायीमाश्रित्य विलिखिता नैके, शोधप्रबन्धा दृश्यन्ते तथैव पाणिनेरितरव्याकरणं कातन्त्रादि व्याकरणादिक-ञ्चादिधकृत्य परस्परं समीक्षात्मकं तुलनात्मकञ्च शोधप्रबन्धा विलिख्य शाब्दिकैः तात्कालि स्थितिः सुस्पष्टा।

स्वातन्त्र्योत्तरकाले व्याकरणशास्त्रमवलम्ब्य प्रणीता नैकेः शोधप्रबन्धाः काशीस्थविवद्भिर्यथावसरे प्रकाशिताः । तेषु प्रबन्धेषु केचन प्रतिष्ठिता दृश्यन्ते विद्वत्कुलेषु। यथा त्रिपाठिरामप्रसादेन सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

वाचस्पतिरित्युपाधये प्रस्तुतः 'पाणिनीयव्याकरणे प्रमाणसमीक्षां' इत्याख्यो शोधप्रबन्धः पाणिनीयशास्त्राध्ययने नूतनमेव द्वारमुन्मिषति । ग्रन्थेऽस्मिन् षट्ष्वध्यायेषु व्याकरणदर्शनपद्धत्या प्रमाणानि व्यवस्थापितानि सन्ति । प्रबन्धेऽत्रानुसन्धातुः शास्त्रवैदुष्येण परम्पराज्ञानेन चापूर्वतैवोपन्ना।

अत्र मणिनाथ झा महोदयस्य 'ज्ञापकादर्शः', देवस्वरूपमिश्रस्य 'महाभाष्य निगूढाकूतयः', श्रीकान्तपाण्डेयस्य 'व्याकरणशास्त्रदृष्ट्या सम्बन्ध-स्वरूपपर्यालोचनम्' त्रिपाठिनो राजनाथस्य 'नागेशकृतिषु तन्त्रस्य प्रभावः', त्रिपाठिनो हरिश्चन्द्रमणेः 'निपातार्थनिर्णयः', राधेश्याममिश्रस्य-'व्याकरण-शास्त्रदृष्ट्याजातिस्वरूपविमर्शः, भागीरथप्रसादत्रिपाठिनोधात्वर्थविज्ञानम्', शेषनाथमिश्रस्य 'शब्दानुशासने उत्सर्गापवादविमर्शः', जानकीप्रसादद्विवेदस्य-'कातन्त्रव्याकरणविमर्शः बदरीनाथ-सिंहस्य- 'शाब्दबोधविमर्शः, अवनीन्द्र कुमारस्य-अष्टाध्यायी पदानुक्रमकोशः प्रभृतयः प्रमुखाः शोधप्रबन्धाः प्रणीताः ।

इत्थं व्याकरणशास्त्रस्य बहवः शोधप्रबन्धा विराजन्ते येषामध्ययनेन न केवलं छात्राणामपितु विदुषामपि बौद्धिकव्यायामो भवति। शोधप्रबन्धानां प्रणयनेन व्याकरणशास्त्रस्य सैद्धान्तिका दार्शनिकाश्च विषयाः पक्षा वा व्याकरणशास्त्रमध्येतृषु बुद्धिपटले समागच्छन्त्यानायासेन। अष्टाध्यायी महाभाष्यो वाक्यपदीयं भूषणसारः परमलघुमञ्जूषा सदृशा व्याकरण-शास्त्रस्याकरग्रन्थाः सन्ति शोधप्रबन्धकर्तृणाङ्कृते। तस्माद् व्याकरणशास्त्रस्य विदुषां काले शोधप्रबन्धानां प्रणयने विमर्शे च गच्छति । शोधप्रबन्धानां प्रणयनेन संस्कृतव्याकरणशास्त्रस्यानुदिनं विकासो भवति छात्राणामुपकारः सिद्धयति ।

2. स्वातन्त्र्योत्तरकालस्य संस्कृतभाषायाः शोधप्रबन्धकाराणां संस्कृतेतराणां शोधप्रबन्धकाराणाञ्च कालक्रमेण विकासनिरूपणम्

1. पं. गौरीनाथशास्त्री

(कालः- 2.2.1906 ख्रिस्ताब्दतः 1991 ख्रिस्ताब्दपर्यन्तम्)

जीवनपरिचयः-

स्वातन्त्र्योत्तरशाब्दिकविद्वत्कुलेष्वग्रगण्यस्य गौरीनाथशास्त्रिणो जन्म 2 फरवरीमासे 1906 ख्रिस्ताब्देऽभवत्। संस्कृत-हिन्दी-आङ्ग्ल-बंगला इत्यादीनां भाषाणां वेता आसीत् गौरीनाथशास्त्रिमहोदयः।

अध्ययनकालः-

प्रतिभासम्पन्नो महानुभावोऽयं एम. ए. परीक्षां प्रथमश्रेण्यां कलकत्ता विश्वविद्यालयतः 1931 ख्रिस्ताब्दे समुत्तीर्णवान्। ततश्च प्रेमचन्द रायचन्द स्कॉलर (P.R.S.) कलकत्ता-विश्वविद्यालयत् 1935 ख्रिस्ताब्दे प्राप्य तदनन्तरं ततो डी. लिट् इत्युपाधिमपि 1952 ख्रिस्ताब्दे गृहीतवान्। महोदयोऽयं 'शास्त्री' एफ. ए. ए. एस. तः कृतवान्।

अध्ययापनकालः-

महानुभावोऽयं नैकेषु विश्वविद्यालयेषु स्वीयसेवां प्रदत्तवान्। तद्यथा-गवर्न्मेन्ट कॉलेज कोलकातानगरे 1957 ख्रिस्ताब्दतः 1967 ख्रिस्ताब्दपर्यन्तं प्राचार्यपदं सुशोभितवान्। अयं लेक्चररूपेण प्रोफेसररूपेण च प्रेसीडेन्सी कॉलेज कोलकातामध्ये कार्यमकरोत्। उपकुलपति रूपेणऽयं बनारस सं. वि.वि. 1967 ख्रिस्ताब्दतः 1970 ख्रिस्ताब्दपर्यन्तं कार्यमकरोत्।

महानुभावो गौरीनाथोऽतिथिप्रोफेसररूपेण पञ्जाबवि.वि.वि., पटीयालानगरे 1970 तः 73 ख्रिस्ताब्दपर्यन्तम्. जादवपुर वि. विद्यालये, ब्रूद्वा वि. विद्यालये, रवीन्द्र भर्तृहरि वि. विद्यालये, विश्वभारती वि. विद्यालये, बनारस वि. विद्यालये, सम्पू, सं. वि. विद्यालये, दरभङ्गा वि. विद्यालये, राजस्थान वि. विद्यालययये कार्य कृत्वा तत्रत्यान् छात्रान् उपकृतमकरोत् ।

पौराणिक एवं वैदिक अध्ययन-शोध-संस्थाने, नैमिसारण्ये निदेशकपदे सेवां प्रदत्तवान्। एशियाटिक सोशाइटी कलकत्ता 1966 तः 67 ख्रिस्ताब्दपर्यन्तमुपाध्यक्षपदे कार्य कृत्या 1978-76 ख्रिस्ताब्दपर्यन्त-मध्यक्षपदमलङ्करोत् ।

कृतिपरिचयः-

व्याकरण-वेद-धर्म-साहित्यशास्त्रेषु नैकान् ग्रन्थान् प्रणीतवान्। व्याकरणविषयेऽनेन आङ्गलभाषामाध्यमेना-पिशोधपरका ग्रन्था लिखिताः । अनेन विरचिता व्याकरणविषयकग्रन्थाः सन्ति-

1. 'फिलोसॉफी ऑफ वर्ड एण्ड मिनिंग' - संस्कृत कॉ. री. सीरिज 1956 ख्रिस्ताब्दे ।
2. 'ए स्टडी इन द डाइलेक्टिक ऑफ स्फोट' कोलकाता वि.वि. 1937 द्वितीयमुद्रण दिल्ली-1980 ख्रिस्ताब्दे ।
3. 'द फिलासफी ऑफ भर्तृहरिः'-1991 ख्रिस्ताब्दे ।

गौरीनाथशास्त्रिणा व्याकरणेतर धर्म-वेद-साहित्यादीन् विषयान-धिकृत्य बहवो ग्रन्थाः प्रणीताः सम्पादिताश्चा-नूदिताः। अनेन 'संस्कृत साहित्यस्य इतिहास'

इत्याख्यो ग्रन्थो बंगालीभाषायां प्रणीतः, यस्य कोलकातातः 1966 ख्रिस्ताब्दे प्रकाशनमभवत् । महानुभावोऽयं नैकान् शोधनिबन्धान् लेखान् च लिखितवान्। ये काले काले विभिन्नासु पत्र-पत्रिकासु प्रकाशिताः।

सम्मानोपाधयः-

गौरीनाथ शास्त्रिमहोदयः राष्ट्रपतिसम्मानेन 1977 ख्रिस्ताब्दे सम्मानितः। एशियाटिक सोसाइटी कोलकाताद्वारा विशिष्ट (ओनरली फैलोशिप) सम्मानेन सम्मानितः। एशियाटिक सोशाइटी फॉर आउटस्टेण्डिंग कॉन्ट्रीब्यूशन इन इण्डोलोजी संस्थया प्रदत्तेन 'सर विलियम जोन्स गोल्ड मेडल पुरस्कारेण सम्मानितः। कोलकाता विश्वविद्यालयेन भारतीय-चिन्तनम् विषये 'श्यामप्रसाद मुखर्जी मेमोरियल व्याख्यानमालायानयं 1966 ख्रिस्ताब्दे सम्मानितः ।

'विबुद्धजननीसभा' द्वारा 'विद्यावृद्धि', शंकराचार्य श्रृङ्गेरी द्वारा प्रदत्तः 'नवद्वीप' इत्युपाधिञ्च प्राप्तवान्। सं. अकादमी लखनऊ द्वारा प्रदत्त पुरस्कारेण 1987 ख्रिस्ताब्दे सम्मानितः। जावदपुर वि. विद्यालयेन 1980 ख्रिस्ताब्दे डी. लिट् सम्मानेन सम्मानितः। महानुभावोऽयं 1960 ख्रिस्ताब्दे भारतीय सर्वकारस्य प्रतिनिधिरूपेण पञ्चविंशतितमे (25) सम्मेलने मास्कोमध्ये (रूसदेशम्) अगच्छत् ।

विशेषः-

गौरीनाथशास्त्रिमहोदयो नैकेषु भारतीयविश्वविद्यालयेषु विभिन्नविषयेषु समायोजितेषु गोष्ठीषु स्वीयमौलिकविचारान् प्रस्तुत्य तत्रत्यान् विदुषः छात्रांश्च लाभान्वितानकरोत्। अयं बहुषु विदेशीय विश्वविद्यालयेष्वुतिथि-आचार्यमलङ्कृत्य-गवेषणात्मकानि भाषणानि प्रदत्तवान्। तद्यथा यू. एस. एस. आर. जर्मनी देशे, नीदरलेण्ड्स्, फ्रांस, यू. के. इत्यादिषु देशेषु।

कुरुक्षेत्र वि. विद्यालये 1974 सप्तविंशतितमे (27) ततश्च शान्तिनिकेतनविश्वविद्यालये 1986 ख्रिस्ताब्दे त्रिंशत्तमे (30) समायोजिते अखिल भारतीय ओरियण्टल सम्मेलनेऽध्यक्षपदं सुशोभितवान्। नैकासु यू.जी.सी. संस्थया समायोजितासु गोष्ठीसु अध्यक्षपदमलङ्कृतवान् गौरीनाथशास्त्रिमहोदयः। शास्त्रिमहोदयस्य विषये दिङ्मात्रमेतत् प्रदर्शनम्।

2. 'पं. युधिष्ठिर मीमांसकः'

(कालः - 1906 ईशवीयतः 1965 ख्रिस्ताब्दपर्यन्तम्)

जीबनपरिचयः-

पं. युधिष्ठिरमीमांसकस्य पूर्वपुरुषः राजस्थानराज्यस्य पुष्करक्षेत्रान्तर्गते अजमेरमण्डलस्य 'विरकव्यावास' नाम्निग्रामे निवसमानो भारद्वाजगोत्रीय यजुर्वेदीय माध्यन्दिनशाखाया अध्येतारः सारस्वतब्राह्मण आसन्। पितामहस्तु रघुनाथमहोदयः पितास्तु पं. गौरीलालाचार्यो माता च यमुनाबाई आसीत । अस्य पिता आजीवकाय सन् 1908 ख्रिस्ताब्दे इन्दौरराज्येऽगच्छत् । तस्मिन्नेव राज्ये 'निमइ'[116] जिलान्तर्गते मुहम्मदपुरग्रामे 1906 ख्रिस्ताब्देऽस्य जन्म अभवत्।

अध्ययनकालः-

पं. युधिष्ठरमीमांसकः अलीगढं गत्वा स्वामी सर्वदानन्देन स्थापिते साध्वाश्रमे स्वाध्यायरतं भूत्वा पं. ब्रह्मदत्तजिज्ञासो पं. बुद्धदेवादयः विद्वद्भ्योऽध्ययनस्य स्ववसरं प्राप्तवान् । कतिचिद् दिनान्ते ब्रह्मदत्तजिज्ञासुना सह काश्यामागत्य महामहिम पं. चिन्नस्वामीशास्त्रिणः पं. पट्टाभिरामशास्त्रिणः च मीमांसाशास्त्रस्य पं. दुण्ढिराजात् न्यायवैशेषिकस्य पं. भगवतमिश्रात् 'कर्मकाण्डस्य च विधिवदध्ययनं कृतवान्। भवान्

---

116 का. की पाण्डित्य परम्परा-आ. ब. उपाध्याय, पृ. 602 प्र.सं. 1983

1921 ख्रिस्ताब्दतः 1935 ख्रिस्ताब्दपर्यन्तं पं. ब्रह्मदत्तजिज्ञासुसदृशः विदुषः सततशिष्यत्वं प्राप्तवान् ।[117] अनेन भवान् व्याकरण-मीमांसा-कर्मकाण्ड-वेदादीनां विषयानां गभीरं पाण्डित्यमर्जितवान्।

अध्ययापनकार्यम् -

पं. युधिष्ठिरमीमांसकः संस्कृतस्य गभीरं विद्वानस्ति। गुरोः (चिन्नास्वामीशास्त्रिद्राविडेति) मुखाद् विधिवदध्ययनङ्कृत्वा पाण्डित्यं प्राप्तवान्। मीमांसाशास्त्रे प्रकाण्डपाण्डित्येनैव स्वनामाग्रे सम्भवतः मीमांसकः इत्युपाधिं धारितवान्। मीमांसकमहोदयः बहून् विषयान् सम्यक्तया अधीत्यापि परीक्षासंबंध्या न कापि उपाधिमर्जितवान्। अतः स्वजीवकाय विभिन्नमहाविद्यालयेष्वपाठ्यत्। 1936 ख्रिस्ताब्दतः 1942 ख्रिस्ताब्दपर्यन्तम् विरजानन्द साङ्गवेद विद्यालय लाहौरप्रान्ते व्याकरणस्य, 1943 तः 1947 ख्रिस्ताब्दपर्यन्तम् अजमेरनगरे, 1950 ख्रिस्ताब्दतः 1955 ख्रिस्ताब्दपर्यन्तं 'पाणिनीय महाविद्यालय' मोतीझील वाराणस्यां च छात्रान् विद्यादानं कृतवान्।

शोधकार्यम् -

पं. युधिष्ठिरमीमांसकस्य छात्रावस्थायामेव शोधकार्य प्रति प्रवृतिरासीत् परिणामतो विगत 45 वर्षेषु' संस्कृते एकादश हिन्द्यां च षोडश-शोधपूर्णा निबन्धाः लिखिताः। शिक्षानिरुक्तव्याकरणवेदाः चादयैः विषयैः सम्बन्धिताः विंशति (20) दुर्लभाः महत्वपूर्णाश्च ग्रन्था सम्पादिताः । प्राचीनप्रौढ़शास्त्रीयग्रन्थानां हिन्द्यामनुवादेन सह व्याख्यामपि कृतवान् येषु महाभाष्यस्य प्रथमाध्यायद्वयस्य मीमांसासूत्रेषु शबरस्यामिनो भाष्यस्य च हिन्दीव्याख्या प्रकाशिता।

---

117 का. पाण्डित्य परम्परा-आ. ब. उपाध्याय, पृ. 603 प्र.सं. 1983

ग्रन्थरचनाः-

मीमांसकमहोदयेन बहवः मौलिकः शोधपरकाः ग्रन्थाः विरचिताः । यस्य सूची निम्नप्रकारेणास्ति-

1. संस्कृतव्याकरणशास्त्रस्येतिह्यम् (भागः एकं द्वयञ्च)
2. वैदिक स्वरमीमांसा।
3. वैदिक छन्दोमीमांसा
4. काश्कृत्स्न-धातु व्याख्यानम्
5. माध्यन्दिन-पद-पाठ
6. महाभाष्यस्य हिन्दी व्याख्या (भाग त्रयम्)
7. ऋग्वेदभाष्य स्वामी दयानन्द सरस्वती कृत भागद्वयोः
8. ऋग्वेदस्य ऋक्संख्या
9. निरुक्तसमुच्चयः
10. मीमांसा शाबरभाष्य (हिन्द्यामनुवादो व्याख्याञ्च)

उपर्युक्तेषु शोधपूर्णग्रन्थेषु त्रयः प्रमुखाः सन्ति-

1. संस्कृतव्याकरणशास्त्रस्येतिह्यम्'- ग्रन्थोऽयं त्रिषु वृहद्भागेषु प्रकाशितः । प्रथमभागे त्रयविंशति (23) प्राचीन वैयाकरणानामितिहासः, पाणिने पञ्चदशप्रमुखोत्तरवर्ती व्याकरणस्य प्रवक्तानामशीति (80) व्याख्यातृणामितिवृत्तं महता विद्वतया निबद्धम्। अनेनैव द्वितीयतृतीयभागयोः व्याकरणसम्बन्ध्युपयोगि विवरणं संकलितम् ।

द्वितीयग्रन्थे तु भगवान् पतञ्जलेः 'व्याकरणमहाभाष्यस्य' कतिचिदंशानां हिन्यामुनवादोऽस्ति । मीमांसकमहोदयेनास्य हिन्द्यामनुवादो भागद्वये प्रस्तुत्य स्वप्रकाण्ड विद्वत्तायाः परिचयं प्रदत्तम् ।[118]

तृतीये ग्रन्थेषु 'मीमांसा शाबरभाष्यस्य प्रथमाध्यायस्य' चतुर्णा पदानां हिन्द्यामनुवादः विस्तृता व्याख्या चास्ति ।

पुरस्कारः-

पं. मीमांसकमहोदयं भारत सर्वकारः 1977 ख्रिस्ताब्दे राष्ट्रपतेः पुरस्कारेणालंकृतवान् । राजस्थानराज्यस्य संस्कृत-शिक्षाविभागेन वेदस्य संस्कृतव्याकरणस्य च शोधकार्यायायं सहस्रमुद्राया अनुदानं 1963 ख्रिस्ताब्दे प्राप्तवान्। उत्तरप्रदेशस्य राज्यसर्वकारेण मीमांसकाय प्रत्येकस्मिन् ग्रन्थे सहस्ररूप्यकाणां पुरस्कारं प्रदत्तम् ।

3. पं. रामप्रसाद त्रिपाठी

(कालः- 1920 ईशवीयतः विंशशतकख्रिस्ताब्दपर्यन्तम्)

जीवनपरिचयः-

महोदयस्यास्योत्तरप्रदेशस्य जौनपुरमण्डले 'बोलछा' इत्याख्ये ग्रामे लालगंज पत्रालये पण्डितरामस्वरूपत्रिपाठिनो गृहे 1920 ख्रिस्ताब्दे दिसम्बरमासस्य द्वादशदिनांके जन्म अभवत्। सरयूपारीणब्राह्मणकुलोत्पन्नः साधुस्वभाववान् निश्छलव्यवहारसम्पन्न आसीत्।

---

118 काशी की. पा. परम्परा आ. ब. उपाध्याय पृ.-602-605 प्र.सं. 1983

अध्ययनकालः-

अयं पण्डितदेवनारायणत्रिपाठिनः (हरिनारायणतिवारी' महोदयस्य) शिष्यः तस्यान्तिमेषु दिनेषु व्याकरणशास्त्रे सुशिक्षितः प्रतिभाशाली विद्वानासीत् ।

अध्यापनकालः-

यथाऽयं प्रकृष्टो विद्वान् तथैवाऽस्ति सफलोऽध्यापकोऽपि। अस्य व्याकरणशास्त्रस्य प्रक्रियापरिष्कारयोरुभयोरंशयोः वैदुष्यं प्रशंसनीयमस्ति। अनेकेषु शास्त्रार्थेषु विजयप्राप्तेर्गौरवमस्यास्ति। अयं कतिचिद् वर्षाणि यावत् काशीहिन्दूविश्वविद्यालयान्तर्गतसंस्कृतमहाविद्यालये व्याकरणप्राध्यापक आसीत्। तदनन्तरं (वाराणसेय) सम्पूर्णानन्दसंस्कृतविश्वविद्यालये सन् 1965 ईशवीये प्राचीनव्याकरणदर्शनागम-विभागाध्यक्षपदे कार्यमकुर्वन्। अयं प्रौढ़ाध्यापनेन सुव्यवस्थितग्रन्थलेखनेन च विशिष्टाकीर्तिं प्राप्तवान्। सेवानिवृत्त्यनन्तरमस्मिन्नेव विश्वविद्यालये सम्मानितप्राध्यापक आसीत्। अयं 1987 ख्रिस्ताब्दे सागरविश्वविद्यालये 'अतिथि-आचार्यः (विजिटिंग प्रोफेसर) आसीत् । इतः पूर्वमयमुत्तरप्रदेशसंस्कृत-अकादम्योपाध्यक्षपदे कार्यमकरोत् ।

कृतिपरिचयः-

अस्याऽनेके निबन्धाः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य सारस्वती-सुषमा इत्याख्यशोधपत्रिकायां प्रकाशिताः भवन्ति । अस्य मौलिकगवेष-णामूलकः शोधप्रबन्धोऽस्ति - 'पाणिनीयव्याकरणे प्रमाण समीक्षा'। अयमस्मिन् शोधप्रबन्धे सम्पूर्णानन्दसंस्कृतविश्वविद्यालयात् श्रेष्ठां 'वाचस्पति' इत्युपाधिमवाप्तवान् ।

'पाणिनीयव्याकरणे प्रमाणसमीक्षा' इत्याख्यः शोधप्रबन्धस्य महत्त्वम् -

व्याकरणशास्त्रं न केवलमेकं शास्त्रमपितु दर्शनमस्ति। अतोऽस्मिन् प्रमेयप्रमाणयोः विवेचनं क्रमानुसारं कृतम्। महर्षिपतञ्जलेरारभ्यो महावैयाकरणनागेशभट्टपर्यन्ताचार्याणां स्वमौलिकग्रन्थे अनयोः प्रमेयप्रमाणयोः विवेचनाः स्थाने-स्थाने कृताः। तथापि सम्पूर्णसिद्धान्तानामेकत्र व्यवस्थितरूपप्रदानस्य प्रयासः प्रायः न्यून एवासीत्। अस्याभावस्य पूर्तिरनेन शोधप्रबन्धेन महत्या योग्यतया अभवत्। अस्याध्ययनमेकस्य नासीदपितु तुलनात्मकमासीत्। तत्तत् प्रमाणानां व्याकरणदिशास्वरूपस्य वैशिष्ट्यस्य च निरूपणात् पूर्व तेषां न्यायादिषु दर्शनेषु बहुशः विवेचितरूपस्य प्रमाणपुरः सरं स्पष्टं प्रतिपादनकृत्वा ग्रन्थकारः स्वविवेचनं तुलनात्मकं व्यापकं च विधाय श्लाध्यप्रयासमकरोत् ।

अनेन विरचिता अन्यग्रन्थाः[119] -

1. सिद्धान्तचिन्तामणिः (खण्डद्वयम् नियमसूत्रस्वरूपालोक, अपवादः सूत्रस्वरूपालोकश्च) ।
2. विविधनिबन्धसंग्रहः ।
3. वैयाकरणसिद्धान्तलघुमञ्जूषा-तात्पर्यनिरूपणान्ता कलाकुञ्जिका-टीकया सहिता हिन्दी टीका'।
4. शिक्षासंग्रहः - सम्पादनम्
5. रुद्रयामलम् सम्पादनम्
6. तन्त्रसंग्रहः सम्पादनम्

---

119 का. की. पा. परम्परा-आ. ब. उपाध्याय, पृ. 472, सं. 1983

7. गौरवाभिसन्धिप्रकाशः सन् 1953

8. वैयाकरणभूषणसारः सुबोधिनीटीका।

प्रमुखाः शिष्याः-

शिष्यसम्पद्दृष्ट्याऽप्याचार्यत्रिपाठिनो महान्तः सौभाग्यशालिनः। एतेषां शिष्या देशस्य विभिन्नेषु विश्वविद्यालयेषु विद्यापीठेषु चाचार्य-प्राचार्य-प्रभृति-पदेषु विराजमानाः संवर्द्धयन्ति प्राचीनां पाण्डित्यपरम्पराम् । तस्यानेकेषु शिष्येषु डॉ. रामयत्नशुक्लः, पं. देवस्वरुपमिश्रः, डॉ. रामकिशोरशुक्ल, (पूर्व प्रा.रा.सं. सं. जयपुरम्) स्व. डॉ. हिन्दकेसरी आर्य (पूर्व प्रा.रा.सं.सं. जयपुरम्) प्रभृतयः प्रमुखाः सन्ति।

पुरस्कार उपाधिश्च-

यथा संस्कृतं संस्कृतिश्च वाराणसीं विना तथैव वाराणस्यापि आचार्यत्रिपाठिमहोदयं विना विद्यायाः क्षेत्रे न प्राप्नोति परिपूर्णतामिति सर्वसम्मतं सत्यम्। भारतराष्ट्रपतिना स संस्कृतवैदुष्यक्षेत्रे आजीवनं विंशतिसहस्ररुपप्यकमितेन वार्षिकेण मानदेयेन सह सम्मानप्रमाणपत्रेण 1983 ख्रिस्ताब्दे सम्मानितः, पुरस्कृतश्च, उत्तरप्रदेशसंस्कृताकादम्या 1986 ख्रिस्ताब्दे एकलक्षरुप्यकमितेन 'विश्व-संस्कृत-भारती' पुरस्कारेण, नवदेहलीस्थ श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृत-विद्यापीठेन च 'महामहोपाध्याय' इति सम्मानोपाधिना विभूषितः। अस्यां सम्मानपरम्परायां श्रद्धेयः श्रीत्रिपाठि-महोदय रामकृष्णडालमियाश्रीवाणीन्यासेन प्रवर्तितेन द्विलक्षरुप्यक-मितेनाखिलभारतीयपुरस्कारेणापि सम्मानितः।[120]

---

120 भूमिका पा. व्या. प्र. समीक्षा आ. रामप्र. त्रि. 1997 ख्रि. द्वि. सं. वाराणसी

4. पं. मणिनाथ झा

(कालः - 1928 तः-1988 ख्रिस्ताब्दपर्यन्तम्)

जीवनपरिचयः-

अयं मैथिलक्षोत्रियब्राह्मणानां 'पलिवार महिषी' संज्ञके वंशे 24.12.1928 ख्रिस्ताब्दे मिथिलावयव सरिसव-ग्रामैकदेशे 'पाहीटोल' संज्ञकस्थाने स्वगृहे जन्म गृहीतवान्। अस्य वंशावली मैथिलपञ्जी-प्रबन्धानुसारेण प्रस्तूयते-

वंशस्यास्य ज्ञातः प्राचीनतमः पुरुष नवमशताब्दीस्थः वत्सगोत्रीयः कपिलदेव आसीत्। तस्य पुत्रक्रमानुसारं पं मणिनाथमहोदयः सप्तदशो वंशधर आसीत्।

अस्मिन्नेव वंशे नवमपुरुषाद् अच्युतात् षष्ठः पुरुषो म. म. डॉ. गङ्गनाथ झा बभूव। अवकाशप्राप्त्यनन्तरमेव दुर्दैववशाद् पं. मणिनाथ झा महोदयः इहलोकलीलां समाप्य दिल्लीनगरे स्वर्वासाय 3-6-1988 तमे ख्रिस्ताब्दे 1. श्री वैद्यनाथ झा-प्राध्यापकः, लोहना सं. विद्यापीठे। 2. श्री प्रस्थानमकरोत्। अस्य सुयोग्यो द्वौ पुत्रौ स्तः जगन्नाथ झाः प्रा. लखनऊ के. वि. पीठे ।

अध्ययनम्-

पं. मणिनाथ झा शर्मणः शिक्षा 1934-1943 ख्रिस्ताब्दपर्यन्तं सरिसवस्थसंस्कृत-पाठशालायां मधुसूदनमिश्रात् महावैयाकरण पं. दीनबन्धुझा शर्मणश्च संजाता। तत्राय 1943 ख्रिस्ताब्दे विहारप्रदेशे व्याकरणाचार्ये स्वर्णपदक सत्यवान्। ततश्च सुलतानगंजे भागलपुरे 1943 ख्रिस्ताब्दतः 1948 ख्रिस्ताब्दपर्यन्तं नैयायिकमूर्धन्यात् पं. रूपनाथ झाशर्मणो नव्यन्यायमधीतवान्। तदनन्तरं 1948 ख्रिस्ताब्दे स्वग्राममागत्य शास्त्रार्थमहारथी पं. मार्कण्डेयमिश्रात् कविशेखर बदरीनाथझा शर्मणश्च विविधविद्यामधिगतवान्।

अध्यापनविवरणम् -

स विभिन्नेषु महाविद्यालयेष्वध्यापनकार्यमकरोत्। प्रथमतः प्रधानाध्यापकरूपे 1946 ख्रिस्ताब्दतः 1952 ख्रिस्ताब्दपर्यन्तं संस्कृतमहाविद्यालयः रैयामः कार्य कृत्वा देवधरस्थिते संस्कृतमहाविद्यालये व्याकरणप्राध्यापकरूपे 1952 ख्रिस्ताब्दतः 1955 ख्रिस्ताब्दपर्यन्तमध्यापयत्। ततश्च 1955 ख्रिस्ताब्दतः 1960 ख्रिस्ताब्दपर्यन्तं रहीमपुरस्थीये संस्कृतमहाविद्यालये व्याकरणप्राध्यापकपदमलङ्कृतवान्। तदनन्तरं व्याकरण-प्राध्यापक (रीडर, प्रोफेसर) रूपे 1960 ख्रिस्ताब्दतः 1988 ख्रिस्ताब्दपर्यन्तं श्री ला.ब.शा.रा.सं. विद्यापीठे देहल्यां छात्रान् संपाठ्य व्याकरणशास्त्रे सुयोग्यान् कृतवान् ।

विशिष्टकार्यम्-

1 अखिल भारतीय संस्कृतसम्मेलनम्, दिल्ली द्वारा नियुक्तिं प्राप्य बिहारप्रदेशसंस्कृतशताब्दीग्रन्थं, (2000) द्विसहस्रपरिमितानि पृष्ठानि लिखितवान्।

2. राजलक्ष्मीकृत श्रीमद्भागवतप्रकाशग्रन्थोपरि विदुषां सम्मतीनां सम्पादनम्।

कृति-परिचयः -

1. ज्ञापकादर्शः -

ग्रन्थोऽयं पण्डित मणिनाथ झा महोदयस्य पाण्डित्यपराकाष्ठाया ज्ञापकोऽस्ति। सोऽयं ग्रन्थ कामेश्वरसिंह दरभङ्गासंस्कृत वि. विद्यालये विद्यावाचस्पतिः (डी. लिट्) शोधप्रबन्धरूपेण 1982 तमे ख्रिस्ताब्दे समर्पितवान् उपाधिञ्च प्राप्तवान्। अस्मिन् ग्रन्थे पूर्वाचार्याणां समालोचना वर्तते। इत्थं ज्ञापकविचारपरम्परा संक्षेपेणोदीरिता । प्रस्तुतोऽयं ग्रन्थः साङ्गोपाङ्गतया अतिविशालो जातः। झा महोदयोऽनेकान् संस्कृत-

ग्रन्थान् निबन्धान् च लिखितवान् । स मैथिली भाषायामपि स्वलेखनी चालितवान्। तद्यथा-

1. सौन्दर्यानुभूतिः (संस्कृतानुवादः)- मूल लेखकोऽस्ति डॉ. नगेन्द्रः दिल्लीप्रदेशीय।
2. भारतीयसंस्कृतिः शिक्षा च-भारतशिक्षा-उन्नयन समिति, पचही (मधुबनी)।
3. संस्कृति-संस्कृत-सेवकाः दरभंगाराजस्य महाराजाः, परिवारश्च' वैदेही कला केन्द्रम्, पटना।
4. महातीचार सिद्धान्तः (मैथिलीभाषायाम्) वैदेहीकला केन्द्रम्, दरभंगा-1963 ।

व्याकरणशास्त्रमधिकृत्य विरचिता बहवः निबन्धा सन्ति। तद्यथा-

1. व्यक्तिवादः (व्यजनासमीक्षा) म.म. उमेशमिश्र अभिनन्दनग्रन्थः प्रयागः।
2. लकाराणां कृतौ शक्तिः कर्तरि वा? - संस्कृत रत्नाकर, अप्रैल 1966।
3. शाब्दिकानां शब्दः संस्कृतरत्नाकरः दिल्ली-अप्रैल, 1967।
4. शब्दानां शब्दपरत्वमर्थपरत्वं वा बुलेटिन मिथिला विद्यापीठम्, दरभंगा-4,5-1968 ।
5. रप्रत्याहार विमर्शः डॉ. बी. आर. शर्मा अभिनन्दनग्रन्थः पूना ।

वैशिष्ट्यम्-

तस्य प्रौढ़ताः निर्भीकता, स्पष्टवादिता, निष्कपटता सर्वतोन्मुखी प्रतिमा च नितरां विशिष्टा आसीत्। दिल्लीराजधान्यां मैथिलानां सर्वथा अवलम्ब आसीत् ।

तन्माध्यमेन तत्र शतशश्छात्रा सौविध्येन् विद्यार्जनं कृतवन्तः । स्वायं सभायां स्वभाषणेन सर्वान् मुग्धान् कृतवान् तथैवाध्यापनशास्त्रार्थ-लेखनादिषु परमोच्चं स्थानमस्यासीदिति । दिल्लीस्थ विवेकविहारस्य विवेकानन्द महिला महाविद्यालये पं. मणिनाथ झा कृतमेकं पद्यं टेपरेकर्डरयन्त्रे सस्यैव स्वरे सुरक्षित विद्यते । प्रतिदिनं तस्य पाठानन्तरमेव तत्र कक्षा प्रारभ्यते। तद्यथा-

सिता शान्ताकारा शशिविजयहाराम्बरधरा,

रमारामा-राकारमणवदनाराधितकरा।

सती साध्वी दिव्या विदितरचनाचारुरुचिरा,

सदा सा नो भूयादभिमुखकरी कापि चतुरा ।। इति।।[121]

प्रमुखाः शिष्याः -

1. डॉ. कृष्णानन्द झा-व्याकरणविभागाध्यक्षचरः का.सि.द.सं.वि.वि. दरभङ्गा, बिहार,
2. डॉ. अर्कनाथ चौधरी, का. प्राचार्यः व्याकरणविभागाध्यक्षश्च जयपुरम्
3. डॉ. सतीश शर्मा- दिल्ली
4. डॉ. भवेन्द्र झा प्रोफेसर, श्री.लाल ब.शा.रा.सं.वि.वि. दिल्ली।
5. डॉ. सुधीर कुमार झा दिल्ली।
6. डॉ. सुरेन्द्र झा प्राचार्यः, रा.सं.सं., इलाहबाद
7. डॉ. शिवकान्त झा प्रोफेसर, रा.सं.सं., जयपुरम्
8. डॉ. विष्णुकान्त झा श्री ल.स.आ.सं.म.वि. देवघरम् ।

---

121 भूमिका - ज्ञापकादर्शनस्य - पं. श्री शशिनाथकृत सम्पादितः लेखः

5. पण्डितभागीरथप्रसादत्रिपाठी 'वागीशशास्त्री'

सन्-1934 ईशवीये वर्षे

जीवनपरिचयः-

मध्यप्रदेशस्य 'सागर' मण्डलान्तर्गते विलइया' इत्याख्ये ग्रामे कान्यकुब्जब्राह्मणपरिवारे 1934 ख्रिस्ताब्दे (संवत 1961 वैक्रमाब्दे वर्षे आषाढशुक्लत्रयोदस्यां) जन्म अभवत्। अस्य पिता श्री यमुनाप्रसादतिवारी कान्यकुब्जवंशावतंस तन्त्रज्योतिषायुर्वेदशास्त्राणां सुप्रसिद्धो धुरन्धरो विद्वानासीत्। अस्य माता पार्वतीदेवी' अतीव धर्मपरायणा महिला आसीत्।

अध्ययनकालः-

अयं प्राच्यप्रतीच्योभयविधानुसन्धानविद्यामर्मज्ञः नव्यमार्गदर्शको विद्वान् पण्डितभागीरथ-प्रसादत्रिपाठी 'वागीशः शास्त्री' महोदयः स्वकीयां संस्कृतस्य प्रारिम्भकी शिक्षां गृहे सागरनगरे च सम्पाद्य वृन्दावने माध्यमिकी-शिक्षां प्राप्तवान्। ततश्च पञ्च वर्षाणि यावद् आचार्यसीतारामशास्त्रिशर्म महाभागात् न्यायव्याकरणसाहित्य श्रीमद्भागवतपुराणवेदान्त-शास्त्राणा-मध्ययनमकरोत्, योगसाधनाभ्यासञ्च सम्पादयत्। तदनन्तरमयं वाराणस्यां पण्डितशुकदेव झा महाभागात् प्राच्यनव्यव्याकरणशास्त्रस्य सर्वान् ग्रन्थान् पठितवान्। वेददर्शनाऽयुर्वेदज्योतिषपुराण-धर्मशास्त्रसाहित्यसङ्गीतादयः विविधशास्त्राणि चामन्थयत्। चन्द्रचट्टोपाध्यायादयं नवीन पारम्परिकोभय-विधशास्त्रीयानुसन्धान-शिक्षणं प्राप्तवान् ।

अध्यापनकालः-

अयं बहुषु भाषासु निपुणो कुशलो चास्ति। काश्यामयं लालेश्वर पाठशाला-भारतीयसाहित्यमहाविद्यालय-टीकामणिसंस्कृतकॉलेजेषु च पञ्च वर्षाणि व्याकरणशास्त्रमध्यापयत्। ततः परं वाराणसीस्थ संस्कृतविश्व-विद्यालये सीनियररिसर्चफेलो-प्रकाशनाधिकारी अनुसन्धान सहायकपदेषु च कार्यमकरोत्। 1970 ख्रिस्ताब्दे विश्वविद्यालयीये गवेषणालये निदेशकपदे नियुक्तिं प्राप्तवान्। तस्मात्कालादेवायमनुसन्धानप्रधानायाः त्रैमासिक्याः 'सारस्वती सुषमा इत्याख्यायाः संस्कृतपत्रिकायाः सम्पादकोऽभवत्। अयं पाणिनीयधातूनां स्वरूपम्। अर्थविकासो लोकप्रसार इत्येतेषु विषयेषु गंभीरश्चिन्तको वैयाकरणो विद्वानस्ति।

श्रीवागीशशास्त्रीमहोदयः 1964 ईशवीये वर्षे 'पाणिनीयधातु-पाठसमीक्षा' इति शोधप्रबन्धे विद्यावारिधि (पीएच.डी.) इत्युपाधिं, 1966 ईशवीये वर्षेऽयं 'वाचस्पति' इत्युपाधिञ्च प्राप्नोत् ।

कृतिपरिचयः -

पण्डितभागीरथमहोदयः **1. 'धात्वर्थविज्ञानम्' 2. 'पाणिनीय-धातुपाठसमीक्षा'** चेति शोधप्रबन्धग्रन्थद्वयं व्यरचयत्। (अमेरिकादेशस्य प्रथमः प्रौढ़संस्कृतज्ञः डॉ. डी. हिटनीमहोदयोऽपि अद्यतः शताधिकवर्षेभ्यः पूर्व पाणिनीयव्याकरणतथ्यानि व्यवेचयत्। तथापि तस्य धातूनां विषये मतमस्ति यत् एतावतीनां धातूनां कल्पना व्यर्थाऽस्ति। 'विएना राष्ट्रस्य जर्मन संस्कृतज्ञः डॉ ब्यूलरमहोदयः तथ्यमिदं व्याख्यातवान् प्रादर्शयच्च-यदापाततः अप्रचलितानामनेक-धातूनां प्रयोगाः पालिभाषायां प्राकृतभाषायाञ्च मिलन्ति। श्री वागीशशास्त्री कार्यमिदमग्रेसारयन्

प्रदर्शितवान् यद् भारतस्य प्रादेशिकभाषासु धातूनां प्रचलनं मिलति। तस्मात् पाणिनीय धातुनां काल्पनिकत्वपक्षः स्वयमेव विनस्यति।

3. 'तद्धितान्तः केचन् शब्दाः'- इत्याख्य लघुकायोग्रन्थोऽस्यास्ति। अस्यां रचनायां शब्दपर्याय-लोचनविषये समधिकं दृष्टिपातः कृतम्। अत्र केचन तद्धितान्ताः शब्दाः विवेचिताः, परन्तु तेषां विवेचनशैली अत्यन्त चमत्कारयुक्ता, तुलनात्मक-भाषाविज्ञानाध्ययनभूमिका, प्राचीननवीनोभय-शास्त्रानुशीलनयुक्ता शब्दार्थविवेचन-निपुणानां वैयाकरणानां दृष्टिमवश्यमा-कर्षयति । 'जिप्सीभाषा' इत्यस्मिन ग्रन्थेऽयं प्रादर्शयत् यत् भारतदेशात एव प्राचीनकाले भ्रमतां यूरोपीयदेशेषु गतानां जिप्सीप्रदेशीयानां भाषायां संस्कृतमूलकाः शब्दा विद्यमानाः सन्ति। तेषां गीतेषु हिन्द्या सह भोजपुरी-भाषायाः शब्दा अपि प्राप्नुवन्ति । श्री राहुलसांकृत्यायनमहोदयः रूसदेशे निवस्य जिप्सीलोकानां गीतानि संकल्प हिन्दी-साहित्य-सम्मेलन-पत्रिकायां प्रकाशयत् ।

4. अनुसन्धानपद्धतिः 5. संस्कृतवाङ्मयमननञ्च' अस्याऽन्यत् प्रमुख ग्रन्थद्वयमस्ति । प्रथमतया संस्कृतभाषायाम् अनुसंधानदिग्दर्शनं निर्देशनञ्च 'अनुसन्धानपद्धतिः' ग्रन्थः करोति। अस्मिन् ग्रन्थे सूत्ररुपेणानुसन्धान-विधीनामुल्लेखपूर्वकं मौलिकविचाराणामावाहनार्थं मनोवैज्ञानिका उपायाः वर्णिताः।

एतदतिरिच्यऽनेनवागीशशास्त्रीमहोदयेन बहवो ग्रन्थाः लिखिता सम्पादिता च। अनेन संस्कृतशिक्षणस्य नूतनविधिराविष्कृतः । अस्य विवरणं वागीशमहोदयेन हिन्दी-भाषया लिखिते ग्रन्थे 'संस्कृतसीखने की वैज्ञानिक एवम् सरल विधि' इत्याख्ये द्रष्टुं शक्यते।

सम्मानोपाधिः -

1982 ईशवीये वर्षे काशीस्थ पण्डितपरिषद् 'महामहोपाध्याय' इत्युपाधिमयच्छत्। अयमुत्तरप्रदेश सर्वकारेण सन् 1966 ईशवीये कालिदासपुरस्कारेण, 1968, 1972 वर्षयोः संस्कृतविविधपुरस्कारेण, सम्मानितः। उत्तरप्रदेशसंस्कृत-अकादमी 1980,1984 वर्षयोः संस्कृत-साहित्यपुरस्कारमयच्छत् ।

प्रमुखः शिष्याः

अस्य शिष्येषु श्री भालचन्द्रपाण्डेय-प्राणमोहनकुमार-डॉ. तेजपाल-शर्मसदृशाः प्रमुखाः सन्ति ।

6. डॉ. सत्यव्रतशास्त्री

(कालः - 26.9.1930 ख्रिस्ताब्दतः संस्कृतसेवारतोऽस्ति)

जीवनपरिचयः-

अभिनवपाणिनि डॉ. चारुदेवशास्त्रिणः पुत्रः श्रीरामकृष्णमहोदयस्य पौत्रस्य डॉ. सत्यव्रतशास्त्रिणः मूलस्थानं होशियारपुरमण्डले टांडा उडमुड समीपस्थ 'अहियापुरं' ग्रामोऽस्ति । अस्य जन्म सितम्बरमासस्य एकोनत्रिंशत् तारिकायां (26.9.1930) 1930 ख्रिस्ताब्दे वर्षेऽभवत्। अस्य नामकरणमपि लाहौरे मॉडल टाउन गृहे हर्षोल्लासेनाभवत् । अस्य मातुर्नाम रामरक्खी आसीत् । अस्य भगिनी सप्तवर्षीया अग्रजा 'उषाकपूर आसीत । उभौ भ्रातरो प्रातःकाले पित्रा सह भ्रमणायागच्छतां तदा भ्रमणवेलायां पिताष्टाध्याय्याः सूत्राण्यगदत् ।

सत्यव्रतमहोदयस्य विवाहोऽष्टमदिनाङ्के मार्चमासे (8.3.1957) 1957 तमे ख्रिस्ताब्दे स्वातन्त्र्यात्परञ्च मूलतः लाहौरस्थ 'मच्छीहट्टा' स्थानस्य संस्कृतविदुष्या उषया सहाभवत्। ततश्चायं क्रमशः इन्दनाम्नी पुत्री शरदनामकं पुत्रं च लब्धवान्।

अध्ययनकालः-

तस्य शिक्षा-दीक्षा तस्य पितुः चारुदेवशास्त्रिणो मार्गदर्शनेऽभवत्। चारुदेवशास्त्रिणश्छत्रच्छायां निवसन् तस्मादेवाध्यापनं प्राप्य डॉ. सत्यव्रतः पंजाबविश्वविद्यालयात् 'प्राज्ञ' परीक्षां समुत्तीर्णवान्। ततश्च व्याकरण-विशारदस्थाने व्याकरणमध्यमायां परीक्षायां साफल्यं प्राप्य पंजाबविश्वविद्यालयादेव शास्त्री परीक्षां समुत्तीर्णवान्। ततश्च डी.ए.वी. स्कूल लाहौरे नवमकक्षायां विधिवत् प्रवेशं लब्धवान्। विद्यालयोऽयं पंजाबप्रान्तस्य कतिपयेषु विद्यालयेषु प्रमुख आसीत्। विद्यालयदिवसानां स्मृतिषु आंग्लविषयस्याध्यापकस्य विश्वनाथमहोदयस्य तस्य जीवने अतिमहत्त्वमस्ति । मास्टर विश्वनाथस्य स्मृतयोऽध्यापि आह्लादयन्ति सत्यव्रतशास्त्रिणम्।

सत्यव्रत इन्टरपरीक्षां बी. ए. परीक्षां च अम्बाला छावनीस्थ गान्धी मैमोरियल नैशनल कॉलजतः उत्तीर्णवान् । एम.ए. परीक्षां जालन्धरतः उत्तीर्णवान्। तत्रैव डॉ. वेदकुमारी अग्रिमकक्षायामध्ययनरता आसीत् या सत्यव्रताय भातृवत् स्निह्यति। सत्यव्रतः पीएच.डी. उपाधये बनारस सं. वि. विद्यालये प्रवेशं लब्धवान्। शोधकार्यार्थ 'शक्ति कल्ट इन संस्कृत लिटरेचर' इति स्वीकृतविषयं परित्यज्य पुनः नूतनं 'कॉन्सेप्ट ऑफ टाइम एण्ड स्पेस इन वाक्यपदीय' इति विषयं चित्वाकार्यं प्रारभत्। पण्डित रघुनाथमहोदयः सत्यव्रतस्य वाक्यपदीयाध्ययनस्य निवेदनं स्वीकर्तु तस्य परीक्षां नीत्या वाक्यपदीयाध्ययनं प्रत्येकनिष्ठां च समावलोक्य तमध्यापयत्। ततश्च बनारसनगरे एव पं. शुकदेवमहाभागात् व्याकरणाध्ययनस्य स्ववसरं प्राप्तवान्।

शुकदेवझामहोदयेन विरचितस्य 'भूषणसारप्रकाशः' नामकलघु-ग्रन्थस्य प्राक्कथनस्य लेखनस्य सौभाग्यमपि बाल्यावस्थायां प्राप्तवान्।

बनारसे एव पण्डित दुण्डिराजाद् न्यायमपठत्। डॉ. गोपीनाथकविराजात् तन्त्रशास्त्रमध्यैत । तस्यशोधकार्य द्वष्ट्वा वासुदेव-शरणोऽग्रवालस्तु एतावत् प्रसन्नोऽभूत् यत् स स्वीय पुस्तकस्य 'इण्डिया एज नोन टू पाणिनी इत्याख्यस्य एकं प्रतिं स्वीयहस्ताक्षरेण सह पारितोषिके दत्तवान्। एतादृशं पारितोषिकममूल्यनिधि मन्यते सत्यव्रतशास्त्री।[122]

अध्यापनकालः-

डॉ. सत्यव्रतशास्त्री स्वीये सेवाकालेऽनेकान्यतिमहत्त्वपूर्णानि पदानि सुशोभितवान्। हंसराजकॉलेजे देहल्याम् अध्यापनाय पूर्व चितस्य सत्यव्रतस्य शोधकार्यसम्पन्नात्परं पुनः नियुक्तये विश्वविद्यालयस्यानुमतिं स्वीकृत्य प्राचार्य जी. एल. दत्त 17.7.1955 तमे ख्रिस्ताब्दे नियुक्तिमयच्छत्। तत्रायं एकनवम्बरमास 1957 ख्रिस्ताब्दपर्यन्तं कार्यमकरोत्। 2 नवम्बर 1957 ख्रिस्ताब्दतः कुरुक्षेत्र विश्वविद्यालये प्रवराध्यापकपदे नियुक्तिं स्वीकृत्य 19 अगस्त 1956 ख्रिस्ताब्दपर्यन्तं कार्यमकरोत्। 19 अगस्त 1956 तमेवर्षेऽयं दिल्ली विश्वविद्यालयस्य विभागे प्राध्यापकोऽभूत्। ततश्च 1963 ख्रिस्ताब्दे तत्र रीडर पदं सुशोभितवान्। 13 अगस्त 1970 तमे वर्षे पं. मनमोहननाथ-घरपीठे प्रोफेसररूपे, संस्कृतविभागाध्यक्षरूपे च कार्यमकरोत् ।

दिल्ली-विश्वविद्यालये कला-संकाये डीन-पदं संस्कृत-विभागाध्यक्षपदं च सुशोभितवान् । 7 अक्टूबर 1977 ख्रिस्ताब्दतः 5 नवम्बर 1976 ख्रिस्ताब्दपर्यन्तं चुलालौकार्न यूनिवर्सिटी, बैंकाक, थाईलैण्डदेशे विजिटिंग प्रोफेसर आसीत् । मार्चमासे

---

122 पो. इन्डि. सं. लिट्रेः ए क्रिटि सर्वे. मनीभाई. के. प्रजापति पृ. 404-410 प्र.सं. 2005

1980 ख्रिस्ताब्दे जोधपुरविश्वविद्यालये यू.जी.सी. संस्थाया विजिटिंग प्रोफेसर आसीत् । ततश्च 1983 ख्रिस्ताब्धस्य फरवरीमासस्य त्रयोविंशतिदिनाङ्कतः 1985 ख्रिस्ताब्दे अप्रैलमासस्य त्रिंशतदिनांकपर्यन्तं श्रीजगन्नाथ सं. वि.वि. पुर्याम् उपकुलपति-पदमलङ्करोत्। 1 फरवरीमासतः 31 मई 1985 ख्रिस्ताब्दपर्यन्तम् कैथोलिक यूनिवर्सिटी, ल्यूवननगरे, बैल्जियमदेशे विजिटिंग प्रोफेसर आसीत । तत परं 1982-83 ख्रिस्ताब्दस्य कार्यकाले यू.जी.सी. संस्था राष्ट्रीयव्याख्यात (नैशनल लेक्चरर) पदेऽपि नियुक्ति दत्तवती।

कृतिपरिचयः-

बहुमुखीप्रतिभासम्पनेन डॉ. सत्यव्रतेन व्याकरणशास्त्रे 'कॉन्सेप्ट ऑफ टाइम एण्ड स्पश इन वाक्यपदीयमिति' गवेषणात्मको दार्शनिकश्च शोधप्रबन्ध लिखितः। साहित्यशास्त्रविषयककृतिषु 'श्रीगोविन्दसिंहचरतिम् ग्रन्थस्य प्रकारानं पटियालास्थीयेन गुरुगोविन्दसिंह फाउण्डेशनेन 1967 तमे ख्रिस्ताब्दे कृतम्। अस्यां रचनायां डॉ. शास्त्रिमहोदयः साहित्याकादमी पुरस्कारेण सम्मानितः। ततश्च शर्मण्यदेशः सुतरां विभाति' रचनायाः प्रकाशनम् अखिल भारतीय संस्कृतपरिषदेन लखनऊस्थीतेन 1976 ख्रिस्ताब्दे कृतम्। तत परं इन्दिरागान्धीचरतिम्' इत्यस्य प्रकाशनं भारतीय विद्याप्रकाशनेन दिल्लीनगरस्थेन 1973 तमे ख्रिस्ताब्दे कृतम्। अनन्तरं 'थाइदेशविलासम् रचनाया प्रकाशनं ईष्टर्न बुक लिंकर्स दिल्लीनगरस्थेन 1976 ख्रिस्ताब्दे कृतम्। तदनन्तरं श्रीरामकीर्तिमहाकाव्य इत्यस्य प्रकाशनम् आंग्ल-थाई अनुवादेन मूलामलसचदेव-प्रतिष्ठानेन अमरनाथ सचदेव प्रतिष्ठानेन च

बैंकाकस्थितेन (थाईलैण्ड) अप्रैल 1960 ख्रिस्ताब्दे कृतम्। यस्य प्राक्कथनं थाइदेशस्य महाराज्ञ्या महाचक्री सिरिन्थौर्नमहोदया लिखितम् ।[123]

मानवीयभावनाभिः संपूरिता धाराप्रवाहयुक्तशैल्यां विरचिता तस्य कृतयः महाकाव्य, खण्डकाव्य, यात्राविवरणम्, पत्रकाव्यम्, लघुकवीनाम् लघुरूपकविधां च प्रस्तौति। सार्वभौमिक प्रवृत्ति युगानुरूपता च एतासां रचनानां विशिष्टलक्षणमस्ति यत् बोधतत्त्वे भावतत्त्वे शिवतत्त्वे चानुस्यूतमस्ति।

क्रमेण रचनायाः परिचयः-

1 बृहत्तरं भारतम् 2. श्रीबोधिसत्त्वचरितम् 3. श्रीगुरुगोविन्द-सिंहचरितम् 4. शर्मण्यदेशः सुतरां विभाति 5. इन्दिरागान्धीचरितम् । 6. थाईदेशविलासम् 7. श्रीरामकीर्ति महाकाव्यम् 8. पत्रकाव्यम् 6. षड्ऋतुवर्णनम् 10. जयदेवि स्वतन्त्रे 11. कोऽहम् 12. महाकविकालि-दाससाष्टकम्, 13. नपुंसकलिङ्गस्य मोक्षप्राप्ति।

सर्वप्रथमं इण्डोलोजिकल स्टडीज' नामकी शोध-पत्रिकायाः शुभारम्भं कृतवान्। कविर्मनीषी 1960 ख्रिस्ताब्दे 'श्रीबोधिसत्त्व चरितम्' नामकं महाकाव्यं विरच्य प्रमाणितमकरोत् यत् एको वैयाकरणोऽपि महाकविर्भवितुं शक्नोति ।

अस्य निर्देशने व्याकरणविषयकसम्बन्धानां शोध-प्रबन्धानां सूची प्रकाशिता अभवत् । तद्यथा-1 पतञ्जलि एज ए किटिक ऑफ कात्यायन एण्ड पाणिनि । 2. अनपाणिनियन सन्धि एण्ड सिन्टैक्स इन दि महाभारत 3. ए स्टडी ऑफ न्यास।

अस्यालोचनात्मककृतयरपि सन्ति । तद्यथा- 'एसेज आन इण्डोलोजी' 'स्टडीज इन संस्कृत एण्ड इण्डियन कल्चर इन थाईलैण्ड' आदयः। अनेन बहवः समीक्षात्मककतय विभिन्नविषयेषु प्रणीता। सत्यव्रतोषयोर्ग्रहे सरस्वती महती

---

123 पञ्जाब का सं. काव्य का योगदान महेशचन्द्र शर्मा 'गौतम् पृ. 28-29, सं. 2002, परिमल प्र. दिल्ली

स्वातन्त्र्येण नृत्यं करोति । तस्य गृहस्य संस्कृतमयस्य परिवेशस्य शोभनं चित्रणं तु वाराणसेय श्री वासुदेव द्विवेदिविरचिते पद्ये अङ्कितमस्ति । तद्यथा-

वाणी गुञ्जति मञ्जु संस्कृतमयी येषां कुटुम्बे सदा,

वाणी नृत्यति वक्तृसु रसनामन्ये च येषां सदा।।

वाणी गायति गीतमद्यकविता छन्दांसि येषां हृदा,

श्री सत्यव्रतशास्त्रिणां गृहमहो वाग्ङ्गशालयितम् ।।

पुरस्कारः-

सत्यव्रतशास्त्रिणे द्वाचत्वारिंशत्तमं "ज्ञानपीठ-पुरस्कार" थाइलैण्डस्य महाराज्ञी महाचक्री सिरिन्धौर्नमहोदया 19.8.2009 ख्रिस्ताब्दे नवदेहल्यां प्रदत्तवती।

3. स्वातन्त्र्यात्परं संस्कृतभाषायां संस्कृतेतरभाषायाश्च प्रणीतानां प्रमुखानां शोधप्रबन्धानामकारादिक्रमेण विकासनिरूपणम् (परिचयो वैशिष्ट्यञ्च)।

1. 'कॉन्सेप्ट ऑफ टाइम एण्ड स्पेश इन वाक्यपदीय'

प्रणेता-डॉ. सत्यव्रत शास्त्री

(प्रकाशनवर्षः - 1950 ख्रिस्ताब्दः)

बहुमुखीप्रतिभासम्पनेन डॉ. सत्यममहोदयेन 'कॉन्सेप्ट ऑफ टाइम एण्ड स्पेश इन वाक्यपदीयमिति गवेषणात्मको शोधप्रबन्धोऽयम् आङ्ग्लभाषायां प्रणीतः। शोधप्रबन्धेऽस्मिन् भर्तृहरिर्विरचिते वाक्यपदीये ये विषयाः प्रतिपादिताः तेषु सूक्ष्मातिसूक्ष्मविषयस्यापि स्पष्टीकरणं महता परिश्रमेण सरलरीत्या च प्रदत्तमत्र सत्यव्रतशास्त्रिमहाभागेन।

शास्त्रिमहोदयस्य लेखनशैली न केवलं संस्कृतभाषायामपितु आङ्ग्लभाषायामपि सरला सरसा हृदयगम्या भावपूर्णा चास्ति। अस्याङ्ग्लभाषायामपि गति विशिष्टैवेति वक्तुं शक्नोमि ।

2. 'दि फिलासफी ऑफ वर्ड एण्ड मीनिंग' (शब्दार्थ-मीमांसाः)

प्रणेता-डॉ. गौरीनाथ शास्त्री

(द्वितीय सं. प्रकाशनवर्षः 1992 ख्रिस्ताब्दः)

शब्दार्थ मीमांसानामकोऽयं ग्रन्थः डॉ. गौरीनाथशास्त्रिण दि फिलासफी ऑफ वर्ड एण्ड मीनिंग इत्याख्यस्य शोधप्रबन्धस्यानुवादमात्रमस्ति। यद्यप्यस्य प्रकाशनं शास्त्रिणः निधनात्परं 1992 ख्रिस्ताब्दे सं. सं. वि. विद्यालयः वाराणसीतोऽभवत् तथापि शास्त्रिणा शोधप्रबन्धस्यास्य सकलानि प्रूफ-पत्राणि परलोकवासात् पूर्व दृष्टानि।

शास्त्रिणाऽस्मिन् ग्रन्थे ये सिद्धान्ताः प्रतिपादिताः तेऽद्यापि प्रासङ्गिकाः सन्ति। शोधप्रबन्धेऽस्मिन्नष्टोन्मेषाः सन्ति येषु व्याकरणशास्त्रस्य दार्शनिकग्रन्थस्य वाक्यपदीयस्य सूक्ष्मतत्त्वानि न्याय-मीमांसा-वैदान्तैः सह शास्त्रिणा मन्थनं कृत्वा स्पष्टितानि। प्रत्येकस्मिन् उन्मेषे एकं विषयमधिकृत्य स्वीयविचारानलिखत्। तद्यथा-

प्रथमोन्मेषे -

'परमतत्त्व' इत्याख्ये प्रथमोन्मेषे शब्दब्रह्मणः स्वरूपम् लोकातीततत्त्वानि, सच्चिद्रस्वातन्त्र्यादयो गुणाः, किं शब्दब्रहा वेदान्तिनां ब्रह्मवानन्दस्वरूपमस्ति? कालशक्तिरूपे वर्णितस्य शब्दब्रह्मणः स्वातन्त्र्यम्. शब्दब्रह्म-कालशक्ति-कलानां च सम्बन्धः, किं भर्तृहरेः शक्तिः अद्वैतवाद इव शब्दब्रह्मणः सर्वशक्तिमत्ता, शब्दब्रह्मण एकतत्त्वम्, अपरिवत्त्वम्: नित्यत्वमित्यादयः विषयाः सन्ति।

द्वितीयोन्मेषे -

परमशक्तिनामके द्वितीयोन्मेषे वस्तुनिष्ठं जगत् शब्दब्रह्मणः शक्त्या अभिव्यक्तिः, कालः दिक् च अतिमहत्त्वपूर्ण शक्ती परमशक्ति वा कालशक्तिः परमशक्ति वा कालशक्ति-अविद्या प्रपञ्चबहुत्वस्य प्रदर्शनं करोतिः कालशक्ति जगतः सृष्टिस्थितिविनाशस्य नियामिका अस्तिः काले त्रीणिमतानि सन्ति ये इमं शक्तिः, आत्मा देवतारूपे पश्यन्तिः भर्तृहरेर्सिद्धान्ताश्च ।

तृतीयोन्मेषे-

कलाशक्त्या व्यापारनामके तृतीयोन्मेषे-कालशक्तेः रूपे शब्दब्रह्म जगतः निमित्तकारणं कलारूपे जगतः उपादानकारणञ्च कारणतायारूपे पञ्चसिद्धान्ता-आरम्भवादः संघातवादः परिणामवादः विवर्तवादः आभासवादश्चः, शब्दस्वरूपे त्रयाणां मतानामुल्लेखः शब्द अन्तर्वन्ती वायुरूपे, परमाणुरूपे आभ्यन्तरचैतन्यरूपे च परिणामवादेन विवर्तवादेन सह शब्दब्रह्मवादस्य तादाम्यस्वीकरणे काठिन्यमस्तिः इत्यादयः सिद्धान्ताः प्रतिपादिताः।

चतुर्थोन्मेषे-

नामार्थसम्बन्धः नामके चतुर्थोन्मेषे सृष्टेर्द्ध धारे शब्दोऽर्थश्चः पश्यन्ती वा परा भर्तृहरेश्वरमोसिद्धान्तः? भर्तृहरिणा परायाः उल्लेखो न कृतः परवर्तिवैयाकरणैः आगमप्रभावान् परायाः स्वीकृतिः प्राचीनतर च त्रिपुरा साहित्ये वाचः निरूपणं विकासश्च, नागेशभट्टस्य मतम् तस्य समीक्षा च।

पञ्चमोन्मेषे-

सत्ता व्यावहारिकजगतः वर्णः पदं वाक्यं नामकेऽस्मिन् उन्मेषे पाणिनिपतञ्जलिभ्यां वाक्यस्याखण्डतायाः स्वीकृतिः वाक्यस्य स्वरूपविषये अष्टौ मतानि तेषु त्रीणि अखण्डपक्षे पञ्चखण्डपक्षे च।

षष्ठोन्मेषे-

'स्फोटशब्द' नामके षष्ठोन्मेषे प्रत्येकं अर्थवति शब्दे द्वे तत्त्वे ध्वनिः स्फोटश्च, पंतञ्जलिना शब्दस्य परिभाषाः कुमारिलस्याक्षेपः तस्य मण्डनमिश्रेण समाधानं दत्तम्। वैयाकरणानामप्यदृष्टसंस्कारपरिकल्पना आवश्यकी; व्याकरणस्योत्तरं कुमारिलपक्षे परिकल्पनानां बहवः संख्याः सन्तिः स्फोटः वा निरवयवः शब्दः एका परिकल्पना नास्ति, अपितु प्रत्यक्षतथ्यम्, कुमारिलस्यान्याक्षेपाणां समाधानम्, स्फोटस्य ग्रहणम्, अस्य क्रमिक अभिव्यक्तिः बौद्धमतं तस्य समालोचनाः स्फोट-सिद्धान्तस्य श्रेष्ठता।

सप्तमोन्मेषे-

शब्दार्थनामके सप्तमोन्मेषे-आकृत्तिवादः व्यक्तिवादः जातिवादश्च, जात्याकृतिव्यक्तिवादः, जातिविशिष्ट-व्यक्तिवादः, अपोहवादः, वैयाकरणस्य मतं महाभारतोक्तं वाजप्यायनव्याड्योः मतम्, पतञ्जलेर्मतम्, कौणभट्टस्य मतम्ः भर्तृहरेर्मतमित्यादयो विषयाः समाविष्टाः सन्ति ।

अष्टमोन्मेषे -

वाक्यार्थ नामकेऽस्मिन् उन्मेषे-अनेका विषयाः समालोचिताः सन्ति। तद्यथा-अन्विताभिधानवादः वाक्यमेकम् अस्तिः सावयवोऽस्तिः पदानाम् अर्था असम्बद्धा सन्ति अपितु अवयविकरूपे सम्बद्धा सन्ति, अन्वय पदार्थानाम-निवार्यमङ्गम्-

आपत्तयः, अन्योन्याश्रयदोषः द्विविधवाचकशक्ते कल्पना; वाक्यस्य सम्पूणार्थेन सह पदसम्बन्धस्य पूर्वज्ञानमसम्भवमस्ति, अन्योन्याश्रयदोषस्य द्विविधायावाचकशक्तेः आरोपाणां समाधनम्। शब्दार्थ विषये कुमारिल-प्रभाकरमतयोरूपस्थापनं समालोचनश्च कृतम्।

अभिहितान्वयवादः पदं यदि व्यक्ति वदेच्चेत तदनियतमस्तिः कुमारिलः स्वीकरोति यत् समग्रवाक्यमेव वाक्यार्थस्य निमित्तमस्तिः किन्तु वाक्यार्थ पदानां करणत्वेन योजयितुं न शक्यते, अर्थानां स्मृति एकाभिन्ना अस्तिः आकांक्षा-सन्निधि-योग्यताभिः पुष्टपदानां स्मृतिरन्वयबुद्धिं जनयतिः पदेन स्वाभाविकशक्तेः अर्थस्याभिव्यक्तिः अभिधाशक्त्या अन्वयज्ञानं स्वीकर्तु प्रभाकरस्य मतस्यालोचना, प्रभाकरः तथ्यवर्णपरकक्रियापरकयोः वाक्ययोः भेद स्वीकरोति कुमारिलमते व्यक्तेः प्रतीति आक्षेपेण वा लक्षणयाः कुमारिलस्य स्पष्टीकरणं पार्थसारथेः निष्कर्षश्च: शबरमहोदयस्य विचाराणिः लक्षणातात्पर्यो चित्सुखटिकया समन्वयः, भर्तृहरिर्यथार्थवादिनां मतान् स्वीकरोति शब्दः चैतन्यमस्तिः चैतन्यस्यैकत्वं तर्कमूलकचिन्तनस्य पूर्वमान्यताऽस्ति वाक्यस्य चरमार्थोऽपि प्रतिभा अस्तिः प्रतिमा अर्थोऽस्ति । वैयाकरणानां पक्षः नैयायिकमतस्य पदवाक्ययोः वाक्यार्थः सम्बन्धश्च सन्तोषप्रदो नास्तिः भर्तृहरेः पक्ष एकत्वस्य बहुत्वस्य परिणामो नास्ति स तु प्रारम्भादेवास्तिः व्यावहारिक वाक्यार्थः विषयरहिता-प्रतिमा; क्रियाकलाप एकान्तप्रज्ञात्मकावबोधनस्य परिणामोऽस्ति। वेदान्तमतस्य वैयाकरणमते साम्यम् अखण्डार्थस्य सामर्थ्य केवलं वेदेष्वेव न अपितु लौकिकवाक्येष्वपि दृश्यते इत्यादयः विषयाः समालोचिताः सन्ति।

3. धात्वर्थविज्ञानम्

प्रणेता डॉ. भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

(प्रकाशनवर्षः 1980 तमे ख्रिस्ताब्दः, सं.सं. वि.वि., वाराणसी)

ग्रन्थोऽयं मुख्यतो धातुप्रयोगानधिकृत्य प्रणीत आसीत्। यथाप्रसङ्ग क्वचित् क्वचिदेव तत्रार्थाः प्रदर्शिताः सन्ति । केषाञ्चन धातूनां बहवोऽर्था पाणिनिना स्वयं प्रतिपादिता धातुपाठे। संस्कृतवाङ्मये तेषामपि धातूनां बहवोऽर्था निर्दिश्यन्ते येषामेक एवार्थः पाणिनिना पठितः। तेषामर्थत्वे कारणानि न प्रस्तूयन्ते।

यथासम्भवं संस्कृतवाङ्मयं निर्मथ्य निरुपसर्गाणां सप्तपञ्चाशद्धातूना-मिहार्थविवेचना कृता त्रिपाठिना भागीरथप्रसादेन। तुलनार्थमार्यवर्गीयाणां विविधानां भाषाणां धात्वर्था अपीह यथास्थलमुपन्यस्य विवेचिताः। केषु देशेषु ता भाषा भाष्यन्ते, भाष्यन्ते स्म वेति जिज्ञासूनां ज्ञानार्थमार्यभाषाचक्र-पत्रमप्युपोद्घातानन्तरं संयोजितमस्ति । गवेषणाप्रबन्धे विवेचिता अर्थाः समुद्धताः श्लोकाः, धातवः व्याकरणादिशास्त्रवचनानि, उद्धृता भाषाशब्दा, विशिष्टशब्दाः, धात्वर्थबोधकानि-प्रयोगोदाहरणानि, वेदोपनिषदादिवचनानि, उद्धृतश्लोकानां चरणाश्चेह परिशिष्टेषु वर्णक्रमेण तथा व्यवस्थापिताः यथा ग्रन्थगतविषयास्तत्र दर्पण इव प्रतिबिम्बताः स्युः।

अस्मिन् शोधप्रबन्धे समुपलब्धानां पाणिनीयापाणिनीयानां सर्वेषां धातुपाठानां धात्वर्था यथा प्रसङ्गमुपन्यस्ताः। वैदिकं वाङ्मयं तस्योपजीवनमनुजीवकं तस्यायजीपकदम् पर्यजीवकं विपुलं संस्कृतवाङ्मयं च मिर्मथ्यं श्रीत्रिपाठिना धात्वर्था गवेषिताः। उपसर्गमन्तरा धातोरनेकार्थाः प्रस्तुताः। पवनार्थकस्य पूञ्धातोर्विनाशरूपोऽर्थः कथं भवति, पुञो विनाशे इति वार्तिके धातोरस्य विनाशरूपोऽर्थो ज्ञायते। किन्तु संस्कृतवाङ्मये तादृशः प्रयोगः क्वोपलभ्यते, अत्र हि

पवित्रीकरणात् सर्वथा भिन्नस्य तस्यार्थस्य विपर्यस्ततायां को हेतुरिति सर्वमस्मिन् ग्रन्थे प्रतिपादितं ग्रन्थकारेण। लक्षणादिना धातोरर्थाः कथं परिवर्तन्त इति अर्थतौल्ये 'तृ' धातुर्विलोकनीयः। प्रायः सर्वत्र भारोपीयभाषाणां धात्वर्था निरूपिता वागीश-शास्त्रिणा।

4. निपातार्थनिर्णयः

प्रणेता डॉ. हरिश्चन्द्रमणि त्रिपाठी

(प्रकाशनवर्षः 1960 ख्रिस्ताब्दः, 2046 वैक्रमाब्दः)

व्याकरणशास्त्रस्रहस्यविदा डॉ. हरिश्चन्द्रमणित्रिपाठिना निपातविष-विणीमिमामेयोक्तामर्थसंख्याविषयकामनुपत्तिं पर्यालोच्य 'निपातार्थनिर्णयः' इति विषयमाधृत्य विषयेण गभीरो भाषया च स्पृहणीयो महनीयो ग्रन्थो महता परिश्रमेण विरचितः। महोदयेनानेनऽस्मिन् ग्रन्थे भाषाशास्त्रविषयिणी या चर्चा कृताऽस्ति, तत्सम्बन्धे यानि चोदाहरणानि समुपस्था-पितानि, तत्पर्यालोचनेन वयं निश्चयेन जानीमः यत्तदीयमध्ययनमेतदविषयेऽपि, तदीयोरसाधारणोऽधिकारोऽप्यत्र वर्तते।

अस्मिन् ग्रन्थे पञ्चाध्यायाः सन्ति । तेषु तेष्यध्यायेषु वर्णितं गूढविषयं ग्रन्थकारेण। उपसर्गानां विशेषेणात्र न केवलमर्थाः स्फोरिताः, तेषां सहचारिणो धातवोऽपि सङ्गृहीताः अनेनास्य ग्रन्थस्य महिमोपचीयते। तद्यथा-प्रथमेऽध्याये-ऐतिहासिको भाषाशास्त्रीयश्च निपातार्थविकासः, पदानां चातुर्विध्यम्, क्रोध-विषाद-विस्मय-दैन्य-प्रलाप-जिज्ञासु-स्तुति-सश्रम-समादरादीनामतिशयमभिव्यञ्जयतां

निपातानामुदाह्-रणानि मन्त्र-श्लोकप्रदर्शनपुरः सराणि निरूपितानि। यथा दैन्यातिशयव्यञ्जने-[124]

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो,

न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः ।

न जाने मुद्रास्ते तदपि च न जाने विलपनं,

परं जाने मातस्त्वदनुसरणं क्लेशहरणम् ।। (दुर्गासप्तशती)

अस्मिन् पद्ये पठिता 'न', 'नो', 'अहो' निपाता दैन्यातिरेकं व्यञ्जयन्ति, ततश्च भक्तिभावमुद्भावयन्ति। प्रमाणानां निरूपणे व्याख्याने च साधु प्रयतितम्। तथा हि-

इयन्त इति संख्यानं निपातानां न विद्यते।

प्रयोजनवशा ह्येते निपात्यन्ते पदे पदे ।। इति।

बृहद्देवताग्रन्थे शौनकाचार्यवचनमिदमुद्धृतम्। एवमेव निपातानां विषये संस्कृतभाषाऽर्णवस्य मन्थनाद् बहूनि सिद्धान्तानि समागतानि। बहुत्र संस्कृतवाङ्मये सिद्धान्तोऽयं सिद्धान्तितो वर्तते यत्-'उपसर्गविभक्तिस्वर-प्रतिरूपकाश्च निपाता भवन्ति' इति। अर्थात् उपसर्गप्रतिरूपकाः विभक्तिप्रतिरूपकाः स्वरप्रतिरूपकाश्च निपाता भवन्ति । तत्र उपसर्गप्रतिरूपकाः यथा- अवस्तात, परस्तात्, परितः अभितः, अभिकः चादयः। विभक्ति प्रतिरूपकाः यथा- अहम्, शुभम्, चिरेण, चिरात्, प्रायेण, आरात्, स्थाने, अस्ति, नास्ति, विद्यते, असि, अस्मि, स्यात् चादयः। स्वरप्रतिरूपका अ, आ, इ, ई, उ, ऊ, ए, ऐ, ओ, औ-चादयः। एतानि सम्बोधने-विस्मय-

---

124 भूमिका-निपातार्थनिर्णयः, डॉ. हरिशचन्द्रमणित्रिपाठी, 1990

वितर्काद्यसत्वार्थवचनानि। विहितसन्धिकार्या निपाताः स्वतन्त्रा एव निपातत्वेन गण्यन्ते। यथा-इह+उ- इहो, आ+उ – ओ, न+इत् - नेत्, कत्+चन - कच्चन चादयः ।

एवं च निपातयोर्निपातानां वा संश्लेषेण या नूतनाऽऽकृतिरूदेति, तस्या निपाताभिख्या स्वाभाविक्येय. यतो हि सवर्गीयः स संश्लेषः। विवर्गीयस्य सन्धेः क्वचिदधातु संज्ञाऽपि दृश्यते। यथा-संग्राम युद्धे। सम्+ ग्राम- संग्रामयते। वीर विक्रान्तौ, वि+ईर - वीरयते। स्वद आस्वादने । सु+अद् - स्वदते चेत्यादयः।

अस्मिन् ग्रन्थे संस्कृतवाङ्मये लब्धप्रसराः केचनानुकरणमूलका अपि निपाताः विमृष्टाः। यथा 'अक्खली' इति निपातो मण्डूकानामव्यक्तशब्दार्थे । 'अलला' इति नदीप्रपतनजन्यशब्दानुकरणेऽर्थे। 'किकिरा' जर्जरीभूतपाव-कध्यवन्यनुकरणे' एवं 'जञ्ञना', 'मस्मसा', सीत्, 'हिङ', 'फूत' प्रभृतयो निपातास्तादृशा बोध्याः।

ग्रन्थकारः कतिपयनिपातघटितानामुदाहरणानामतिशयितं महत्त्वं ग्रन्थगौरवं च प्रकाशयति। यथा सना-सनत्' निपाताभ्यां 'सनातनः', 'सनत्कुमारः' इति नामद्वयं साक्षाद् ब्रह्मर्षिवाचकम्, 'सनक-सनन्दन' इत्यस्मिन् नामद्वयेऽपि सनशब्द आदेशात्मना साक्षाद्वा निपातपदबोध्यतां भजत एव।

द्वितीयेऽध्याये-सत्त्वगन्ध्यसत्त्वगन्धिभेदेन निपातानां द्वैविध्यं भोजराजसम्मत्या निरूपितम्। तत्र द्रव्य-गुण-- क्रिया-जाति-संज्ञा-सम्बन्धिभेदमूलकाः षड्विधा उभयेऽपि निपाता उक्ताः। तत्र सत्त्वपराः स्वः शश्वत्, नमः सायम्, ओम्, अन्तः, इत्यादयः क्रमेणोदाहृताः। एवमेवात्सत्त्वत्परा अपि षोढा भवन्ति। तथा हि- क्रियापेक्षाः, क्रियाद्रव्यापेक्षाः, क्रिया-विशेषणभूताः, क्रियाद्रव्यविषेणभूताः, क्रियाविशिष्टरूपाः, क्रियाद्रव्याविष्टरूपा इति। मिथः, साकम्, अभीक्ष्णम्, अलम्,

सपदि, प्रादु इत्यादयः। एते लिङ्गसंख्याभ्यामनन्विता भवन्ति। सत्वगन्धिनस्तु लिङ्गसंख्याभ्यामन्विता अपि भवन्ति।

तृतीयेऽध्याये - 'निपातानां द्योतकत्वं वाचकत्वं या' अस्मिन् विषये सप्रमाणं सुबहु विचारितम्। 'सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु' इति कारिकामुद्दिश्याऽपि संयुक्तिकं विमर्शः कृतो ग्रन्थकारेण।

चतुर्थेऽध्याये - उपसर्गशब्दस्य व्युत्पत्तिस्तल्लभ्योऽर्थश्च सङ्केतितवान् ग्रन्थकारेण। यास्कपाणिनि-शौनकसम्मत उपसर्गक्रमो निर्दिष्टः। कतिपयसर्गाणामर्थविकासो दर्शितः ।

पञ्चमेऽध्याये - निपातानामर्थविकासः उपसर्ग-विभक्ति-स्वरप्रतिरूपका निपाता निरूपिताः। गणपाठेष्वनुक्ता अपि 'अर्थ', 'अन', अन्तिके, अन्यतरस्याम्' इत्यादीनामर्थऽनिर्दिष्टाः। अनुकरणप्रतिरूपका अपि 'अक्खली', 'अलला', 'किकिरा', 'जञ्जना', 'फूत', मस्मसा', 'मुट्मुट्ः 'सीत्' 'हिङ्' इत्यादीनामर्थाः प्रकाशिताः।

त्रिपाठिमहोदय ग्रन्थस्य प्रणयने स्वीयप्रतिभायाः सामर्थ्यन् विषयस्य परीक्षणं निरीक्षणं विमर्शनं च सुष्ठु विहितवान्। तेन ग्रन्थोऽयं भाषाविज्ञानविदां कृतेऽपि महते उपकाराय भविष्यतीति चिन्तयाम्यहम्।

5. पदपदार्थ-विभागपरिशीलनम्

प्रणेता श्री जगदीश चतुर्वेदी

(प्रकाशनवर्षः - 1980, किशोर विद्या निकेतन, वाराणसी)

श्रीजगदीशचतुर्वेदेन, विरचितोऽयं शोधप्रबन्धो विषय-विवेचनदृष्ट्या गहनो-गम्भीरश्च। सर्वोऽप्यत्र विमर्शस्तस्य नानाशास्त्रपाण्डित्यं सूक्ष्मेक्षिकाञ्च व्यनक्ति।

आचार्याणां मतानां समुल्लेखनमुखेन चतुर्विधपदार्थानां समर्थने येषां वैदिक-सिद्धान्तानां दार्शनिकतत्त्वानाञ्च विचारोऽस्मिन् ग्रन्थे विहितः, स च सर्वथा महत्त्वपूर्णो नूतनोश्च ।

शोधकर्त्रा जगदीश महोदयेन पूर्व पदस्वरूपविमर्शस्तदनन्तरं च पदार्थविमर्शः प्रवर्तितः। अथ कतिविधं पदमिति प्रश्ने द्विधा कैश्चित्पदं भिन्नं चतुर्धा पञ्चधापि वे' ति भर्तृहरिकारिकामुद्धत्य विविधानि मतानि स्पष्टीतानि सुप्तिङन्तं पदमिति द्विविधं पदम् नामाख्यातोपसर्गनिपातात्मकं चतुर्विधं पदम्, तत्रैव कर्मप्रवचनीयमुपसंगृह्य पञ्चविधं पदमिति मतत्रयस्यास्य सम्यङ्निरूपणं कृतवान्। तत्र नामाख्यातोपसर्गनिपातात्मकं चतुर्विधपदमिति पक्षः प्रामाणिको युक्तिसङ्गतश्चेति निर्णितवान् स । ततश्च प्रत्येकं नामाख्यातोपसर्ग निपातानां भेदाः सप्रपञ्चं निरूपिताः। उपसर्गा एवं कर्मप्रवचनीया इति च मतं व्याख्यातम्।

पदार्थविभागखण्डे वाच्यता व्यङ्गत्यरूपेण सुप्रसिद्धः पदार्थो निरूपितः। शोधग्रन्थकारेण व्यक्तिपदार्थः जातिविशिष्टव्यक्तिर्वा पदार्थ इति मतत्रयं यथादर्शनं समालोचितम्। एवमेव तेन जातिव्यक्तिपदार्थद्वये विशेषण-विशेष्यभावसम्बन्धोः निरूपितः। अत्र स पदार्थज्ञानाय अपेक्षिताः व्याकरणोपमानकोशाप्ताष्टविधोपायाः सम्यग् व्याख्यातवान्। ततश्च पदार्थविभागं निरूप्य तदाधारभूतो वाक्यार्थोऽपि तेन निरूपितः। अन्ते तेन सिद्धान्तितं यद् वाक्यादेव सिद्धपदानि, वाक्यार्थाच्च सिद्धपदार्थाः पृथक्कृत्य निरूप्यते इति। पदार्थविभागे सरलया, शैल्या बौद्धार्थपरिशीलनं चातीव सुलभं सम्पन्नम्। सर्वथा परिपूर्णः शोध-प्रबन्धोऽयं विद्यार्थिनां विदुषाञ्च कृते लाभकारी अस्ति।

6. 'पाणिनीयव्याकरणे प्रमाणसमीक्षा'

प्रणेता-आचार्य श्रीरामप्रसादत्रिपाठी

(प्रकाशनवर्षः - 1992 ख्रिस्ताब्दः द्वि.सं. 1997, सं.सं.वि., वाराणसी)

आचार्यश्रीरामप्रसादत्रिपाठिविरचितस्यास्य शोधप्रबन्धस्य प्रस्तावना डॉ. मण्डनमिश्रेण समलङ्कृता अस्ति। ग्रन्थरत्नस्यास्य चिरात् प्रतीक्ष्यमाणस्य द्वितीयसंस्करणस्य प्रकाशनं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेनाभवत् । अदसीय भूमिकाभागे संस्कृतभाषाया वैदिकलौकिकभेदाभ्यां द्वैविध्यम्, लौकिक्या अपि तस्या द्वैविध्यम्, पाणिनीयव्याकरणस्य वैशिष्टयम्, पाणिनेः प्राक्तनानां वैयाकरणानां संक्षिप्तः परिचयः पाणिनिप्रणीतग्रन्थानां नामोल्लेखः पाणिनीयव्याकरणस्य दार्शनिकत्वपोषकः शब्दब्रह्मवादः प्रसङ्गत्तः परमेश्वराद्वयवादः शङ्कराद्वयवादश्च शब्दब्रह्मणो विवर्तभूताया वैखर्य्या वाच उत्पत्तिविषये मतत्रयम्, व्याकरणशास्त्रस्य लक्षणम्, श्रीमद्भागवतीयं स्फोटश्रुत्या परमात्मपरिचयश्चादयः विषया वर्णिताः सन्ति।

षड्भागात्मकस्यास्य ग्रन्थस्य वैशिष्ट्यम् -

न्याय-मीमांसा-वेदान्तशास्त्रेष्याकरग्रन्थानालोड्य तत्रत्यां प्रमाण-परिपाटीं च समूलं विमृश्य प्राक्तनपद्धतिमनुसृत्य पाणिनि कात्यायन पतञ्जलि-भर्तृहरि-कैयट-भट्टोजिदीक्षित-कौण्डभट्ट-नागेशमहाप्रभृतीनां शाब्दिकमूर्द्ध-न्यानां प्रमाणप्रमेय-पद्धतिं सम्यक् परिशील्यैषा समीक्षा षट्सु भागेषु आचार्यरामप्रसादेन विरचिताऽस्ति । समीक्षाग्रन्थेऽस्मिन् व्याकरण-शास्त्रस्य प्राचीनदर्शनशास्त्रत्वस्य दर्शनं भवति।

प्रथमे भागे

व्याकरणदर्शनपद्धत्या प्रमाणसामान्यस्य प्रत्यक्षप्रमाणस्य च लक्षण-मव्याप्त्यतिव्याप्त्यसम्भवाख्यदोषत्रयरहितं परिष्कृतमस्ति। एकस्येन्द्रियस्य स्वविषयकप्रत्यक्षकरणेऽन्येषामिन्द्रियाणां सहकारित्वरूपं कर्तृत्वम्। 'अहं पश्यामि', 'वयं पश्यामः' इत्यनयोर्याक्ययोर्वाचनव्यवस्थाविषये उपपत्तिप्रकार, इन्द्रियान्त-रेणेन्द्रियान्तरस्यापि विषयस्य सामान्यज्ञानं भवत्येव, अत एव आम्रफलादौ दृष्टे रसविशेषस्य जिज्ञासा भवति, विशेषजिज्ञासां प्रति सामान्यज्ञानस्य हेतुत्वात्। न्यायदर्शनाचार्यस्तु तत्रानुमानप्रमाणेन रसविशेषस्यानुमितिं प्रकल्पयन्ति। तत्तु गौरवदोषदूषितमनमानस्वरूपम्।

द्वितीये भागे

बौद्धप्रदार्थवादिनां शाब्दिकाचार्याणां पद्धतिमभ्युपगम्य अनुमान पक्ष-पक्षता-व्याप्ति-परामर्शादीनां निर्दुष्टानि लक्षणानि, अनुमानभेदाः, प्रतिज्ञाहेत्वोर्लक्षणं, वाक्यपदीयानुसारं द्विविधमनुमानम्, तर्क-आत्माश्रय-अन्योन्याश्रय-चक्रक-अनवस्थादिस्वरूपम्, हेत्वाभासानां स्वरूपनिरूपणम्, सर्व चैतत् व्याकरणशास्त्र-दृष्ट्या समालोचितं ग्रन्थकारेण ।

तृतीये भागे

वाक्यस्य स्फोटरूपता, शक्तिसम्बन्धस्य लक्षणम्, शक्तिभेदाः, शक्ति-संयोग-विप्रयोगादयः, लक्षणा-व्यञ्जन-योर्लक्षणम्, आसत्ति-योग्यता-तात्पर्य-ज्ञानादिशाब्द-बोधकारणानां सोपपत्तिकं निरुपणन्, शब्दप्रमाया नानुभवत्वमपितु ज्ञानत्वमेव इति निरूपितम्।

चतुर्थे भागे

अर्थापत्तिप्रमाणसमर्थको वृद्धकुमारीतिवृत्तगर्भः 'नमुने' इति सूत्रीय महाभाष्यसंवादः, श्रुतार्थापत्ति-दृष्टार्थापत्ति-भेदाभ्यामर्थापत्तेर्द्वैविध्यकथनम्, तयोर्लक्षणस्य परिष्कृतं स्वरूपं च सम्यक्तयाऽस्मिन् ग्रन्थे दरीदृश्यते ।

पञ्चमे भागे

चोपमानस्य प्रमाणत्वप्रत्याख्यानं महाभाष्याभितम्, अनुमानप्रमाणे-ऽस्यान्तर्भावनिरूपणम्, प्रायेण प्रत्यक्षेऽस्या अन्तर्भावः, परन्तु धर्मादिविषये न प्रत्यक्षस्य योग्यता, अतस्तत्र श्रुति-स्मृत्यादिशब्दस्य प्रमाणत्वम् अत्यन्ता-भावप्रत्यक्षे प्रतियोगिनो योग्यता, अन्योन्याभावप्रत्यक्षेऽधिकरणस्य योग्यताऽ-पेक्ष्यते। क्वचिदनुमानेऽप्यन्तर्भावः क्वचिच्चार्थपत्तौ, क्वचिदागमे चान्तर्भावो विशदरूपेण विवेचितोऽस्मिन् ग्रन्थे।

पष्ठे भागे

शकले प्रत्यभिज्ञायाः क्वचिदनुमाने क्वचिच्च शब्दादावन्तर्निवेशः, संस्कारेन्द्रियसन्निकर्षाभ्यां सहकृताभ्यां प्रत्यक्षेऽप्यन्तर्भावो वक्तुं शक्यते। अभ्यासस्य अदृष्टस्य, प्रतिभायाश्च क्लृप्तेषु प्रत्यक्षादिप्रमाणेष्वेवान्तर्भावः स्वीकृतोऽस्ति ग्रन्थकारेण । एवमेव लोकस्य, कोशस्य चेष्टायाश्चापि तत्तत्प्रमाणेषु समावेशो द्रष्टव्यः ।

प्रमेय समीक्षायां शब्द-अर्थ-सम्बन्ध-प्रयोजनानां द्वैविध्येनाष्टौ प्रमेयाः प्रदर्शिताः गुण-क्रिया-लिङ्ग-संख्या-कारणानि च निरूपितानि, स्फोटानामष्टविधत्वमेव भूषणादिग्रन्थेषु प्रोक्तमस्तिः परन्त्वत्र द्वात्रिंशत्संख्याकाः

स्फोटाः सप्रमाणं निरूपिताः सन्ति । अनया रीत्याऽत्र ग्रन्थे प्रत्यक्षादिप्रमाणचतुष्टयी विमृष्टाः प्रमेयविषयेऽपि प्रसङ्गत् ईषद् विवेचनं कृतम् ।

परिशिष्टभागे

वाक्यस्यस्वरूपविन्यासविवेचने उद्देश्यविधेयवाचकयोः प्रकृतिविकृति-वाचकयोः समभिव्याहारे उददेश्याद्य-नुगुणमाख्यातवचनम् अथवा विधेयाद्यनुगुणं यदिवेदाः प्रमाणं सन्ति अस्ति वा वृक्षः पञ्चनौका भवति, भवन्ति वा. मैथिली रामचन्द्रस्य द्वारा अस्ति सन्ति वा इत्येवं जिज्ञासायां सप्रमाणं निर्णयो प्रदत्तः ग्रन्थकारेण।

'तन्त्रागमशास्त्रदृष्ट्या बौद्धपदार्थविमर्शः'

तत्र शब्दब्रह्मण उभयात्मक रूपम् शब्दब्रह्म, अर्थब्रह्म च। अपरप्रणवात्मकं शब्दब्रह्म, परप्रणवात्मकमर्थब्रह्म। एतन्नये सृष्टिः परब्रह्मणः परिणाभूता, परिणतेऽपि ब्रह्मणि विकाराभावः मूलतः सृष्टेर्द्वौ भागौ शब्दमयी अर्थमयी च सृष्टिः। अनयोः सृष्टयोः युगपत्प्रवृत्तिः बीजाङ्कुरच्छाययोरिव। वाचकात्मा शक्यात्मा च शब्दः वाच्यात्मकः शिवात्मकश्चार्थः उभयोरभेदः सम्बन्धो अन्तः संकल्परूपायां संविदि अनयोर्द्धयोः समस्फुरणम् । एतत्सर्व विस्तरेण ग्रन्थकारेण निर्दिष्टम् ।

प्रमाणसमीक्षायां प्रमात्वस्य स्वतः परतो वा उभयथा वा ग्राह्यत्वमित्यत्र नैयायिक बौद्धमीमांसक-जैन-विशिष्ट ब्रह्माद्वैतवादि-नकुलीश-पाशुपत शैवाद्यागमिक सत्कार्यवादि-विद्याविद्ययोर्ब्रह्मशक्तिवादि-अहं ब्रह्मास्मीति अपरोक्ष-साक्षा-त्कारवादि-ब्रह्मात्मवादि-कथाकार-नाटकीयपात्र-आगमिक-स्फोटवादि-अस्फोटवादि-आभिचारिक-आलंकारिक-शिवाद्वय-वादि-वीरशैव-प्रत्यभिज्ञावादि-क्रमवादिप्रभृतीनां तत्तत्साम्प्रदायिकानां मतान्यनुसृत्य प्रमात्वं स्वतो ग्रह्यं परतो वा ? इत्यादिकं सम्यग् चिन्तितमस्ति ग्रन्थकारेण।

प्रमात्वस्य परतो ग्राह्यत्वे बीजम्-

प्रमात्वं यदि स्वतो ग्राह्यं स्यात्तदा अनभ्यस्तप्राथमिकस्फटि-कादिज्ञानोत्तरदशायां दूरादवलोकिते स्फटिके, स्फटिकज्ञानं प्रमा न वा? इत्यनुभवसिद्धप्रमात्वसंशयो नोपपद्येत, तत्र स्फटिकज्ञानप्रामाण्यस्या-नुव्यवसायेन निश्चितत्वात् । तस्माज्ज्ञान प्रामाण्यमनुमेयम्। स्फटिक इति ज्ञानं प्रमा संवादि प्रवृत्तिजनकत्वात्। शुक्तौ रजतज्ञानम् अप्रमा, विसंवादिप्रवृत्तिजनकत्वात् इत्येवमनुमिति ग्राह्यत्वं प्रमात्वाप्रमात्ययोः। एवमेव समेषां दर्शनानां पक्षतो भूयान् विचारः कृतो ग्रन्थकारेण ।[125]

7. 'पाणिनीय और सारस्वतीय परिभाषिक संज्ञाओं का तुलनात्मक अध्ययन'

प्रणेता - डॉ. कमलाप्रसादपाण्डेयः

(प्रकाशनकालः 1999 ख्रिस्ताब्दः)

डॉ. कमलाप्रसादपाण्डेय महोदयस्य जन्म मध्यप्रदेशेऽभवत्। मध्यप्रदेशे विलासपुरस्थस्य सी.एम.दुबे स्नातकोत्तरमहाविद्यालयस्य संस्कृतविभागाध्य-क्षेणाचार्येण डॉ. कमलाप्रसाद पाण्डेयेन 'पाणिनीय और सारस्वतीय पारिभाषिक संज्ञाओं का तुलनात्मक अध्ययन' इति नामाख्यो हिन्द्यां ग्रन्थः लिखितः। ग्रन्थस्यास्य प्रकाशनं भारतीय विद्याप्रकाशनं दिल्लीतोऽभवत् ।

अस्मिन् ग्रन्थे भूमिकोपसंहाराभ्यां सह चत्वारोऽध्यायाः सन्ति। 'समानपूर्वीक संज्ञाएँ' इत्याख्ये प्रथमाध्याये द्विषष्टि (62) सज्ञानां तथा 'च 'पर्यायवाची संज्ञाएँ' इत्याख्ये द्वितीयध्याये द्वयोः (02) संज्ञयोस्तुलनात्म-कध्ययनं वर्तते। 'केवल

---

125 पाणिनीय व्या प्रमाण समीक्षा- रामप्रसाद त्रिपाठी 1967 ख्रिस्ताब्दे सं. सं. वि. वि. वाराणसी

सारस्वतीय संज्ञाएँ' इत्याख्ये चतुर्थेऽध्याये, याः सज्ञाः सारस्वतव्याकरणे न प्राप्यन्तेऽपितु केवलं पाणिनीयव्याकरणे प्राप्यन्ते, तासां विवेचनं कृतम्। आहत्यस्मिन् ग्रन्थे नवनवति (99) संज्ञानां विवेचनं कृतमस्ति । एतासां सर्वासां संज्ञानां तत्र व्युत्पत्ति, अन्वर्थता, इतिवृतञ्च वर्णितमस्ति। सारस्वतीय पाणिनीय चोभये व्याकरणेऽधिकृत्य प्रतिसंज्ञं स्वरूपमौचित्यञ्चापि ग्रन्थेऽस्मिन् प्रतिपादितमस्ति।[126]

व्याकरणविषयमधिकृत्य डॉ. पाण्डेयमहोदयोः बहवो लेखा अपि लिखितवान्, तेषु केचिदित्थं प्रकारेण सन्ति-

1. द्विरूपदिष्ट हकार के नौ प्रयोजन।
2. कश्मीर की व्याकरण शास्त्र को देन।
3. राष्ट्रीयता-पाणिनीय व्याकरण के सन्दर्भ में।

एते लेखा गवेषणापूणाः सन्तीति वक्तुं शक्यते।

8. भूषणसार-परमलघुमञ्जूषयोः सिद्धान्तानां समीक्षाः

प्रणेता डॉ. राममनोहरमिश्रः (प्रा.व्या.वि.सं.सं.वि.वि.)

(प्रकाशनकालः - 1983 ख्रिस्ताब्दः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी)

डॉ. राममनोहरमिश्रमहोदयेनऽस्मिन् निबन्धे स्फोटात्मकस्य शब्दस्य वाचकत्वं तस्य भेदाश्चोपदर्शिताः। एवञ्च न्यायसिद्धान्तानुसारिभिः कृतस्यैतत्सिद्धान्तखण्डनस्य खण्डनमपि लेखकेन कृतम्। अस्य शोधप्रबन्धस्य विषयो नितान्तोगूढो विस्तृतश्चास्ति। अखिलनामकारणीभूतस्य धातोरर्थविषयेऽपि सर्वेषां नैयायिकमीमांसकप्राचीननवीन परम्परानुसारिणां वैयाकरणानां मतञ्चोपन्यस्य सिद्धान्तपक्षो निरूपितो ग्रन्थकारेण।

---

126 स्वातन्त्र्योत्तरकाले मध्यप्रदेशे सं. व्या. पुष्पा दीक्षिता, सं. राइ. इन इन्डि, इण्डिया-पृ. 119

तत्र हि 'भाव एव हि धात्वर्थ इत्यवच्छिन आगमः' इति भर्तृहर्युक्तिमभिलक्ष्य, फलस्य धात्वर्थत्वं नास्ति, इत्याशयके निबन्धे प्रकाशिते तत्र ग्रन्थकर्त्रा मिश्रमहोदयेन व्याकरणशास्त्रानभिज्ञता एव प्रतिपादिता।

एवमेव शब्दार्थयोः सम्बन्धरूपायाः शक्तेः स्वरूपविषये विभिन्नसिद्धान्त-प्रतिपादका लेखाः प्रकाशिताः तत्तद्यत्रपत्रिकादिषु । तेषु प्रतिपादितान् विषयान् सम्यगवलोक्य वैयाकरणसिद्धान्तविरूद्धानि मतानि यथामति खण्डितानि निबन्धेऽस्मिन् ।'

अस्मिन् शोध प्रबन्धग्रन्थेऽष्टौ अध्यायाः सन्ति । तेष्वध्यायेषु विमर्शितो विषयो निम्न प्रकारेणास्ति-प्रथमेऽध्याये धात्वर्थो विमृष्टोऽस्ति । तत्रादौ मीमांसापक्षतः श्रीमण्डनमिश्रस्य फलमात्रं धात्वर्थ इति मतमुपस्थापितम् । मिश्रमहोदयेन। तद्यथा-गम्यर्थवान् ग्रामः' इत्यनिष्टप्रयोगपत्त्यादिदूषणजातेन तद्वारितम् । पुनश्चावार्य-खण्डदेवस्य विक्लित्तिजनकव्यापार-समूहरूपपाक-पदार्थे विद्यमानपाकादि-सामान्यमेव धात्वर्थः' इति मतमुपस्थाप्य सामान्यतो धातोः कोऽर्थ इत्यत्र विचारो न प्रकटित इत्यादिना खण्डितम्। पुनश्च नैयायिकानां व्यापारमात्र धात्वर्थः फलावच्छिन्नव्यापारो वा धात्वर्थ इति मतद्वयं दर्शितम। तत्र- त्यजति, गच्छति इत्यादौ समानबोधापत्त्या प्रथममतस्य निरासः।

द्वितीये तु मञ्जूषाकृतामभिमतिरेवेति न कोऽपि विरोधः। पुनश्च प्रङ्गसतः कृतेराख्यातार्थत्वादिखण्डनं प्रथमान्तार्थमुख्यविशेष्यकबोधखण्डनञ्च विधाय सोपष्टम्भं वैयाकरणाभिमतं धात्वर्थ निरूपयता ग्रन्थकृता फले व्यापारे च खण्डशः शक्तिरिति भूषणसारमतम्, फलविशिष्टे व्यापारे व्यापारविशिष्टे फले वा धातोः शक्तिरिति मञ्जूषामतं चोपस्थापयता खण्डशः शक्तिवाद एव युक्तिभिः स्थापितः।

शाब्दबोधविषये तु सुप आत्मनः क्यच् इति सूत्रस्थं भाष्यं प्रमाणयतानागेशाभिमतसिद्धान्त एव युक्ततर इति समीक्षितम्।

द्वितीयेऽध्याये- लङादिलकाराणामर्था निरूपिताः। तत्र लादेशानां तिङां कृतौ शक्तिरिति नैयायिकमतं प्रदर्श्य युक्तिभिर्निराकृत्य च तद्विषये मुनित्रयसम्मतिं श्रीभर्तृहरिसम्मतिं च प्रदर्थ्य कर्तरि कर्मणि च शक्तिर्व्यवस्थापिता । पुनश्च लडर्थगतं वर्तमानत्वं लिडर्थगतं परोक्षत्वं च परिष्कुर्वता लृङ्लोटामर्था विमृष्टाः । ग्रन्थकारेणान्ते लादेशानामेव वाचकतेति पक्षः श्रीनागेशस्य, लकाराणां लत्वेन वाचकतेति पक्षः कौण्डभट्टस्येति स्थिरीकृतम् ।

तृतीयोऽध्याये - 'एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा। नामार्था इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः ।।[127] इति कारिकां नानामतप्रदर्शनपुरसरं व्याचक्षाणेन, श्रीनागेशमते प्रवृत्तिनिमित्ततदाश्रययोरेव नानार्थत्वं युक्तिभिः व्यवस्थापितम्। अन्ते च शब्दस्यापि नामार्थत्वे भाष्यकैयटकौण्डभट्ट-नागेशादीनां सम्मतिं परिष्कुर्वता षोढा प्रातिपदिकार्थ इति सिद्धान्तितम्।

चतुर्थेऽध्याये – सुबर्थनिर्णयप्रसङ्गे पूर्व कारकविचारः क्रियाविचारश्च प्रस्तुतः। तत्र नानामतानि दर्शयित्वा भाष्याभिमतं दर्शितम्। पुनश्च कर्तृभेदविषये भूषणकृता त्रयो भेदाः संकेतिताः। अग्रे च प्रथमाविभक्त्यर्थविषये कात्यायनमतं निरूप्य, नैयायिकमतं प्रदर्श्य प्रत्याख्यातम्। द्वितीयाविभक्त्यर्थविषये भूषणमञ्जूषयोर्मतं लाघवगौरव-दृष्ट्या समत्वेन व्यवस्थापितम्। तृतीयाविभक्तेरर्थविषये करणस्वरूपमुद्दिश्य नानामतानि दर्शितानि । चतुर्थीविभक्त्यर्थविषये कौण्डभट्ट-नागेशयोर्मते उद्धृत्य नागेशमतमेव श्रेष्ठं भाष्यसम्मतत्यादित्युक्तम्। पञ्चम्यर्थविषये-ऽपादानभेदाविषयेऽपि भूयान् विचारः कृतोऽस्ति । तत्रापादानभेदविषये

---

127 भूषणकार-परमलघुमञ्जूषयोः सिद्धान्तानां समीक्षा डॉ. मनोहरमिश्रः 1983 सं. सं. वि. वि. वाराणसी

तद्भेदस्वरूपविषये च प्रायो मतैक्यमेवाचार्याणामिति उपसंहृतम् । अन्ते च सप्तम्यर्थाधिकरणस्य स्वरूपं विमृष्टम्। शक्तिः शक्तिमद् वा कारकमिति पक्षद्वयमपि भाष्याभिमतमिति सिद्धान्तितम् ।

पञ्चमेऽध्याये- निपातार्थनिर्णये विधीयते। तत्र च सन्ति त्रयः पक्षाः। एषु पक्षेषु प्रमाणान्यपि दर्शितानि । निपातानां वाचकत्वस्वीकारे फलं तु घटं पटं च पश्य इत्यादौ घटसमुच्चयादिमतिघटादीनां लक्षणाया अकरणमेव बोध्यम् । अतश्च निपातानां वाचकत्वपक्षोऽपि युक्ततर इत्यन्ते सिद्धान्तितं राममनोहरमिश्रेण ।

षष्ठेऽध्याये- समासशक्तिविचारोऽस्ति । तत्र व्यपेक्षायादिनां नैयायिकानां मीमांसकानाञ्च मतमुपस्थापयता निराकुर्वता च एकार्थीभावरूपविशिष्टशक्तिवादः सिद्धान्तितः ।

सप्तमेऽध्याये- शक्तिस्वरूपं विमृष्टम्। तत्र शक्तिस्वरूपविषये नानामतानि दर्शितानि प्रत्याख्यातानि च। सम्बन्धशब्दे सम्बन्धो योग्यतां प्रति योग्यता- इति हरिकारिका स्वगते प्रमाणतयोपन्यस्ता । तत्र योग्यतापदस्य जनकतारूप एवार्थ उचित । जन्यतानिरूपिता जनकता एवं प्रसिद्धान् तु तदवच्छेदको धर्मः सम्बन्धो वा । तस्माद बोधजनकतैव शक्तिरिति निर्दुष्टः पक्षः।

अष्टमेऽध्याये - स्फोट निरूपणं कृतमस्ति । तत्र वर्णानां वर्णसमूहरूपपदानां, पदसमूहरूपवाक्यानां या वाचकत्व-मिति युक्ति विचारे नैयायिकादि-समस्तदार्शनिकानां गतानि उपस्थाप्य विशिष्टयुक्तिभिर्निरा-कृतानि। शाब्दिकमतेन वर्णादिव्यतिरिक्तस्य स्फोटस्य वाचकत्वं सिद्धान्तितम्। स्फोटविस्फोटाख्य-निबन्धेकृतस्य स्फोटखण्डनस्य युक्तिभिः खण्डनं चान्ते कृतम्। सर्वान्ते च ग्रन्थोपसंहारप्रकरणे समेऽपि विषया संक्षिप्य निरूपिताः।

अस्य शोधनिबन्धस्य तत्तदध्यायानां विषयान् विचारयितुं दत्तानां शीर्षकाणां सूच्यप्यग्रे निदर्शिता विद्यते। अनन्तरं ग्रन्थानां सूची चापि प्रदत्ताऽस्ति राममनोहरमहाभागेन।

9. 'वाक्यपदीयानुसारेण दर्शनान्तरीयतत्त्वानां तुलनात्मकं समीक्षणम्'

प्रणेता - डॉ. सुशीलचन्द्रो मिश्रः (मध्यप्रदेशीयः)

मध्यप्रदेशीय डॉ. सुशील चन्द्रमहोदयेन 'वाक्यपदीयानुसारेण दर्शनान्तरीयतत्त्वानां तुलनात्मकं सनीक्षणम्' इति ग्रन्थ विरचितः। ग्रन्थेऽस्मिन् सप्त प्रकरणानि सन्ति।

1. मूलतत्त्वसमीक्षणम् 2. शक्तिसमीक्षणम् 3. प्रदार्थसमीक्षणम् 4. प्रमाणसमीक्षणम् 5. शब्दतत्त्वसमीक्षणम् 6. वाचकत्वसमीक्षणम् 7. वाच्यत्वसमीक्षणञ्च ।

प्रकरणानुसारं ग्रन्थस्य वैशिष्ट्यमधोलिखितप्रकारेणास्ति -

1. मूलतत्त्वसमीक्षणम् - इत्याख्ये प्रथमे प्रकरणे आदावात्मनैरात्मावादपरिचयपूर्वकमभिन्नात्मसच्चित्स्वरूपस्य सूक्ष्मस्य शब्दब्रह्मणोऽद्वयत्वं जगन्मूलकारणत्वञ्च प्रतिपादितम्। तदनन्तरं स्थूलशब्दस्य वैखरीवारूपस्य लौकिके व्यवहारे महत्त्वं प्रदर्शितम्। ततश्च जीवेश्वरौ अविद्यां च शाब्दिकरीत्या प्रतिपाद्यान्ते शब्दद्वैतस्य दर्शनान्तरीयमतेवसाङ्कार्यञ्चं निरूपितम्।

2. शक्तिसमीक्षणम्- इत्याख्ये द्वितीयप्रकरणे आदौ शक्तीनां ब्रह्मणस्तवान्यत्वाभ्यामनिर्वचनीयतां प्रदर्श्य कालशक्तेरविद्याशक्तेश्च परस्परं भिन्नाभिन्नत्वं मुख्यामुख्यत्वं च प्रतिपादितम्। तदनन्तरं दिक्साधनक्रियाकालेति चतसृषु शक्तिष्वादौ दिवशक्तेवैशेषिकरीत्या लक्षणं स्वभावतः तस्या एकत्वमौपाधिकञ्च नानात्वमुपरण्याय वैयाकरणरीत्या तल्लक्षणं तस्या

व्यवहारदशायां नानात्वमेव न केवलं नापि तस्याः पारमार्थिकी स्थितिश्चेति विषया निरूपिता । दिक्शक्तेर्वर्णनान्तरं साधनस्वरूपं निरूपितम्। ततः सत्कार्यवादसत्कार्यवादयोः मतसमन्वयपूर्वकं कर्तृकर्मकारकप्रतिपादनं कृत्वा कारकान्तराणि प्रतिपादितानि । ततश्च साधनविषये मतान्तराणि प्रदर्श्य शक्तिरेव साधनं न तु द्रव्यमिति निरूपितम्। अन्ते च कालविषये त्रयो दर्शनभेदानां निरूपणं कृतवान् शोधप्रबन्धकारो डॉ. सुशील चन्द्रमहोदयः ।

3. प्रदार्थसमीक्षणम्- इत्याख्ये तृतीये प्रकरणे डॉ. सुशीलचन्द्रो मिश्रः महोदयः वैशेषिकाभिमतानां जातिद्रव्यगुणादिपदार्थेष्वादौ जाते सामान्येन लक्षणं प्रदर्श्याकाशादीनाममूर्तानामपि जातित्त्वं प्रतिपादितवान्। ततश्च जातेराश्रयाणां व्यक्तीनां प्रलयकाले विनाशेऽथि जातेर्नित्यत्वं प्रतिपादितम्। अनन्तरं शब्दार्थज्ञानानां परस्परमौपाधिक्यं विचारितवान् तदनन्तरं भावाभावत्वं सामान्यविशेषत्वं क्रमयौगपद्यं च विद्यार्यन्ते वैशेषिकाभिमतायां पदार्थव्यवस्थायामनुपपत्तिः प्रदर्शिता।

4. प्रमाणसमीक्षणम्- इत्याख्ये चतुर्थप्रकरणे प्रथमं वैयाकरणानां मते सर्वेषु प्रमाणेषु शब्दप्रमाणस्य श्रेष्ठत्वं प्रतिपाद्य प्रत्यक्षानुमानमत्र। प्रमाणस्वी-कारेऽनुपपत्तिप्रदर्शनपूर्वकं ताभ्यमतिरिक्तस्य शब्दस्य प्रमाणत्वं प्रतिपादितम्। ततो वेदानां पौरुषेयापौरुषेयत्वं प्रदर्श्य वेदमूलत्वात् स्मृतीनामपि प्रामाण्यं समर्थितम्। अनन्तरं नैयायिकमतं निराकृत्यान्ते व्याकरणस्य स्मृतित्वं पुण्यजनकत्वं च साधितवान् मिश्रमहोदयः ।

5. शब्दतत्त्वसमीक्षणम् - इत्याख्ये पञ्चमे प्रकरणे आदौ मीमांसान्यायरीत्या विस्तरेण शब्दस्य नित्यानित्यत्वमुपवर्ण्य दर्शनान्तरीयाणाञ्च मतमुपस्थाप्य तस्य पारमार्थिकं व्यावहारिकं च नित्यत्वं विस्तरेण निरूपितवान्। तत ध्वनिस्फोटो मतभेदेन सविस्तरं समीक्षितौ। ततो दर्शनभेदेन वायोरणूनां ज्ञानस्य शब्दभावत्वं विचारितवान्। तदनन्तरं प्रत्तङ्गाद् विवर्तपरिणामौ विचार्यान्ते वाण्या भेदा विचारिताः।

6. वाचकत्वसमीक्षणम् - इत्याख्ये षष्ठे प्रकरणे आदौ दर्शनभेदेन वर्णपदवाक्यानां जातिव्यक्तयोश्च वाचकत्वं विचारितवान्। ततः सखण्डाखण्डवादिना प्रचलिता अष्टौ वाक्यविकल्पाः प्रादर्शयत्। ततः पदवाक्यवादिनोः पक्षप्रतिपक्षतया मतमुपस्थाप्य निरवयवस्य वाक्यस्यैव पारमार्थिकं वाचकत्वं समर्थितवान्। ततश्चान्तेऽपोद्धरबुद्धया नामाख्यातोपसर्गनिपातकर्मप्रवचनीयेति पञ्च पदानि विचारितानि।

7. वाच्यत्वसमीक्षणम् - इत्याख्ये सप्तमे प्रकरणे प्रारम्भे दर्शनभेदेन षड्वाक्यार्थविकल्पा समुपस्थापितवान्। सम्भाव्यानामन्येषां च वाक्यार्थानामेतेषु षट्ष्वेवान्तर्भावश्च प्रतिपादितवान्। ततोऽपोद्धारबुद्ध्या पदार्थविचारे आदौ दर्शनान्तरीयाणां वैयाकरणानां च रीत्या जात्याकृतिव्यक्तिरूपाः पदार्था विचारिता अन्यानि च मतान्तरीयाण्यु-पस्थापितानि । ततश्चान्ते वैयाकरणरीत्या लिङ्गसंख्यादीनां च सविस्तरं पदार्थत्व समीक्षितम्। संक्षेपेण च पुनरपि तत्तददर्शने स्वीकृतः सम्बन्धो निर्दिष्टः।[128]

10. वैयाकरणानामन्येषां च मतेन शब्दस्वरूपच्छक्तिविचारः

प्रणेता डॉ. कालिकाप्रसादशुक्लः

(प्रकाशनवर्षः 1979 ख्रिस्ताब्दः)

शाब्दबोधप्रकारेषु प्रथमं शब्दस्वरूपनिर्धारणम्, ततस्तेषामर्थ-सम्बन्ध-निर्धारणम् ततः सम्बन्धस्वरूपनिर्धारणं विधेयम्। शुक्लमहोदयेन विरचितेऽस्मिन् शोधप्रबन्धे केवलं शब्दस्वरूपनिर्धारणम्, तच्छक्तिस्वरूप-निर्धारणञ्चैव विवेचनी-यत्वेनाङ्गीकृतम्। तदेव यथामति यथाशक्ति ग्रन्थकारेण रपष्टीकृतम्। तन्निर्धारणप्रसङ्गेन अनपेक्षितानि तर्कानि रुढानि दर्शनान्तरीयाणि मतान्यपि

---

128 स्वातन्त्र्योत्तरकाले म. प्र. सं. व्या. पुष्पा दीक्षिताः सं. राइ इन इन्डि इंडिया, पृ. 119

शुक्लमहोदयेन प्रत्याख्यातानीति 'अनवसरापठिता वाणी' न्यायो न मन्तव्यो भविष्यति।

अस्मिन् शोधप्रबन्धे शास्त्रकाराणां मतानि सम्यक् समीक्ष्य प्रतिपादितानि। तत्र गुणदोषावपि प्रदर्शितौ, तयोः समर्थननिराकरणेऽपि विहिते। तत्र चानेकानि प्रमाणानि पुरस्कृतानि। शाब्दबोधप्रकारस्य च महान् राजमार्गः परिष्कृतो निर्मितश्च ग्रन्थकारेण। प्रकृतशोधप्रबन्धनिबद्धविषयेण न केवलं छात्राणामपितु विदुषानपि शाब्दबोधविषये महान् उपकारो भविष्यति इति वक्तुं शक्नोमि ।

अस्य शोधप्रन्धस्य विषये लिखितम् आचार्य भागीरथप्रसादत्रिपाठिना -

एवं तावदिह् शब्दनित्यानित्यत्वशब्दार्थसंबन्ध-शब्दार्थसंबन्धनित्यत्व देववाणीप्राचीनतमत्वादिविधै-विंचारत-रङ्गैर्गवेषणाप्रबन्धे पूर्ववर्तिनां सर्वेषां दार्शनिकानां मतानमालोचनपूर्वकं भाषाविज्ञानमतस्यापि युक्तायुक्तत्वं निर्धारितं वागम्बुधिमन्थनञ्च विहितमिति नूनमग्रेसारिता पूर्वविचारधा-रापरम्परा स्वकीयानुसन्धानकार्येणानेन । परीक्षकाणामा-वेदनेन गवेषणा-प्रबन्धस्य च पर्यालोचनेन बहिष्ठां समज्ञां विदन्ति श्रीशुक्लमहोदयः ।[129]

11. शाब्दबोधमीमांसाः

प्रणेता डॉ. श्रीरामानुजाताताचार्याः

प्रकाशकः - संस्कृतवर्षस्मृतिग्रन्थमाला, रा.सं.सं. दिल्ली

(प्रकाशनवर्षः 2005, 2006, 2007, 2008 ख्रिस्ताब्दः क्रमशः चत्वारो भागाः)

शाब्दबोधमीमांसा नामाख्यो ग्रन्थो श्रीरामानुजताताचार्यैः प्रणीतः। ग्रन्थेऽस्मिन् चत्वारः भागाः सन्ति। तत्र प्रथमो भागः वाक्यवाक्यार्थ-विचारात्मको

---

129 भागीरथप्रसाद त्रिपाठी, निदेशक अनु. संस्थानस्य सं.सं.वि.वि. 4.10,1976

भवति। द्वितीयो भागः सुबर्थविचारात्मकः। तृतीयो भागः सुबन्तपदार्थविचारात्मकः। चतुर्थोभागः धात्वाख्यातार्थविचाररूपोऽस्ति।

तत्र वाक्यार्थविचाररूपस्य प्रथमभागस्य 2005 ख्रिस्ताब्दे वर्षे प्रकाशनमभवत्। ततश्च क्रमशः सुबर्थविचार-रूपस्य द्वितीयमागस्य अगस्तमासे 2006 ख्रिस्ताब्दे, सुबन्तपदार्थविचाररूपस्य तृतीयभागस्य चागस्तमासे 2007 ख्रिस्ताब्दे प्रकाशनमभवत्। अन्तिमचतुर्थभागस्य प्रकाशनम् अगस्त 2008 ख्रिस्ताब्देऽभवत्।

अस्मिन् ग्रन्थे ग्रन्थकारेण प्रकृतीनां प्रत्यानां च अर्थाः तेषां परस्परमन्वयप्रकारश्चेति सर्व शाब्दबोधमीमांसा-ग्रन्थे निरूपितम्। व्याकरणशास्त्रे वाक्यपदीय-भूषणसार-लघुमञ्जूषाग्रन्थेभ्यः न्यायशास्त्रे मणिग्रन्थस्थशब्दखण्ड-शब्दशक्ति-प्रकाशिका-न्यायकौस्तुभ-व्युत्पत्तिवाद-पद-वाक्य-रत्नाकर-विभक्त्यर्थनिर्णयेभ्य, मीमांसायां-भाट्टचिन्तामणि-श्लोक-वार्तिक-शास्त्रदीपिका-मीमांसाकौस्तुभादयेभ्यः ग्रन्थेभ्यः तत्तच्छास्त्रप्राचीन-ग्रन्थेभ्यश्च विषयसङ्कलनं कृत्वा विमर्शपूर्णः शाब्दबोध-मीमांसात्मकोऽयं ग्रन्थो विरचितः। धात्वाख्यातार्थविचारात्मके शाब्दबोधमीमांसायाः चतुर्थे भागे धात्वर्थविचारः धातूत्तरतिङर्थविचारश्च क्रियते ग्रन्थकारेण। खण्डेऽस्मिन् नैयायिकानां नव्यमीमांसकानां वैयाकरणानां च मतानि सर्वाणि समालोचितानि दृश्यन्ते। एवं धात्वाख्यातार्थ विषये पार्थसार-मिश्रादयानामन्येषाञ्च विदुषां मतान् सम्यग् विमृश्य अकर्मकधात्वर्थः व्यापारमात्रम् इत्यादिकमत्र प्रस्तूयते ग्रन्थकारेण रामानुजताताचार्य-महाभागेन।[130]

12. सिद्धान्तचिन्तामणिः

प्रणेता आ. श्रीरामप्रसादत्रिपाठी

(प्रकाशनर्षः - 1987 ख्रिस्ताब्दः सम्पूर्णानन्द सं. वि. वि. वाराणसी)

सम्पूर्णानन्दसंस्कृतविश्वविद्यालीयप्राध्यापकेन श्रीरामप्रसादत्रिपाठिना सिद्धान्तचिन्तामणि' इत्याख्यो ग्रन्थोविरचितः। ग्रन्थेऽस्मिन् पाणिनीय अष्टाध्यायां

---

130 शाब्दयोगमीमांसा-सं. ताताचार्यः, रा.सं. सं. दिल्ली. चतुर्थखण्ड, 2008

समुपलब्धमानेषु नियमसूत्रेषु चापवादसूत्रेषु क्रमशः सांङ्गोपाङ्ग दृष्टिपातः कृतः। साम्प्रतिकेऽस्मिन् समये गहनतमे व्याकरणशास्त्रे नव्यन्यायशास्त्रशैल्या नियमपवादसूत्रयोरीदृशं स्वरूपपर्यालोचनं सर्वथा व्याकरणशास्त्रं नूतनया कौशेयशाट्या परिधाप्य सत्करोति ग्रन्थकारः। नियमपवादसूत्राणां च सूक्ष्मतमं परिष्कृतं स्वरूपं जिज्ञासवः शाब्दिका विद्वांस एतदध्ययनेन प्राप्यस्यन्ति नात्र संशयः।

नियमसूत्रस्वरूपालोके प्रथमभागे प्रायेण समेषां नियमसूत्राणां स्वरूपं साकल्येन प्रतिपादितमस्ति त्रिपाठिम-होदयेन। एवमेव अपवादस्वरूपा-लोकविषयेऽपि प्रायशः समस्तानामपवादसूत्राणां च स्वरूपं सविधि पर्यालोचिमस्ति। यथा-'नाज्झलौ इत्यपवादसूत्रम्। तदुत्सर्गसूत्रं चास्ति तुल्यास्यप्रयत्नं सवर्णम्' इति।

तत्र नाज्झलाविति सूत्रं विशेषधर्माऽवच्छिन्नोद्देश्यकतया अपवादशास्त्रम् । तदीयो विशेषधर्मश्च तुल्यास्य-प्रयत्नस्संबन्धेन आकारसहिताज्वि-शिष्टहल्वृत्तिहल्त्वरूपः। तुल्यास्य इति उत्सर्गसूत्रं सामान्य-धर्माश्चच्छिन्नोद्देश्यताकम्। तदीयः सामान्यधर्मश्च तुल्यास्यप्रयत्नत्वसंबन्धेन वर्णविशिष्टवर्णवृत्तिवर्णत्वरूपः । अनयोरेव धर्मयोः क्रमेणोक्तसूत्र-द्वयोद्देश्यताऽवच्छेदकत्वं बोद्धव्यम्।

एवं चापवादशास्त्रेण (विशेषशास्त्रेण) नाज्झलावित्यनेन उत्सर्गशात्रस्य (सामान्यशास्त्रस्य) बाधो भवति ।

ततश्च-विशेषधर्मावच्छिन्नातिरिक्तत्वेन सामान्यधर्मावच्छिने उत्सर्ग-शास्त्रीयोद्देश्यताऽवच्छेदकावच्छि-न्ने संकोचो भवति। अतश्च अज्भिन्नमज्भिन्नेन तुल्यास्यप्रयत्नेन सह सवर्णसंज्ञं भवतु। हल्भिन्नं हल्भिन्नेन तुल्यास्यप्रयत्नेन सह सवर्णसंज्ञं भवतु। इति फलितोऽर्थ उत्सर्गसूत्रस्य ज्ञातव्यः ।

एवमेव 'न विभक्तौ तुस्मा' इत्यपवादशास्त्रीयोद्देश्याता-ऽवच्छेदविशेषधर्माऽवच्छिन्नातिरिक्तत्वेन हलन्त्यमित्युत्सर्ग-शास्त्रीयोद्देश्यता-

ऽवच्छेदकसामान्यधर्माऽवच्छिन्ने संकोचेन विभक्तिघटकेषु तवर्गसकारमकारेषु हलन्त्यमिति सूत्रेणेत्संज्ञायाः प्रवृतिर्न भवति। अथ च अपवादशास्त्री-योद्देश्यतावच्छेदको धर्मः विशेषधर्मतया व्याप्यधर्मः, उत्सर्गशास्त्रीयोद्देश्यता-ऽवच्छेदको धर्मः सामान्यधर्मत्वेन व्यापकधर्मःयत्र यत्र व्याप्यधर्म तत्र तत्र व्यापकधर्मः इत्येवं व्याप्तिरपि प्रदर्शिता ग्रन्थेऽस्मिन ग्रन्थकारेण आचार्य श्रीरामप्रसादत्रिपाठिमहाभागेन ।

4. अकारादिक्रमेण प्रमुखशोधप्रबन्धकर्तृणां शोधप्रबन्धैः सह प्रणीता सूची

शोधप्रबन्धकाराः	**शोधप्रबन्धग्रन्थाः**	**प्रकाशकाः/ सम्पादकसंस्था**	रचनाकालः प्रकाशनकालः
अनन्तः के	'माधवीय धातुवृत्ति-सिद्धान्तकौमुद्योः तुलनात्मकमध्ययनम्'	श्री लाल. ब.शा.सं. वि.वि. दिल्ली, पृ 226/00/ab/Tvy	1992
आचार्य, पाठकपूर्णिमा	'पाणिनीयाष्टाध्याय्या परिभाषा-सूत्राणां समीक्षणम्	रायपुर, मध्यप्रदेश	-
आर्य, पद्मसिंहः	'पाणिनीयपद्धतिमा-श्रित्य व्याकरणशास्त्रीय भरतपुरमण्डलस्य रूपवासोपखण्डलोक-भाषायाः समीक्षात्मकमध्यनम्	रा.सं. सं. जयपुरम्	2002

आर्या, सरोजिनी	'काशिकादृष्ट्यापरिभाषासूत्राणां काशिकास्थ परिभाषाणां समीक्षात्मकमध्ययनम्	श्री. ला.ब.शा.सं. वि. वि. दिल्ली 345 पृ.	2000
ओझा, डॉ. हृषिकेश	'ए क्रिटिकल स्टडी ऑफ कात्यायन न्स वार्तिक कैनिटि ऑफ पाणिनिज कारक एण्ड समसूत्र	झरिया, मध्यप्रदेश	-
आयंगार, डॉ. वी. कृष्णास्वामी	'पाणिनीयव्याकरण की भूमिका' (हिन्द्याम्)	रूपाभ प्रिंटर्स, दिल्ली	प्र. सं. 1983
कटारा, नरेशगोपालः	'परिभाषेन्दुशेखरस्य श्रीब्रह्मानन्दसरस्वती प्रणीतायाः चिठाभा टीकाया, सम्पादनम्'	रा.सं. सं. जयपुर,	2006
काण्डपाल, नवीनचन्द्रः	'परिभाषाव्याख्याने नीलकण्ठदीक्षित नागेशभट्टयोर्मतभेदवि मर्शः'	श्री. ला. शा. सं. वि.पी. दिल्ली, पृ.सं.-481	1962
कुमार, अरविन्दः	'कारक चक्र-एक अध्ययन' (हिन्द्याम्)	निर्मल बुक एजेन्सी, कुरुक्षेत्र,	

	(व्याकरणशास्त्र एवं नव्यन्यायशास्त्र के आलोक)		
कुमार, नरेन्द्र	'ज्ञापकसंग्रहस्य समीक्षात्मकमध्ययनम्'	श्री ला.ब.शा.सं.वि.पी. दिल्ली, 357 पृ. 019/00/abc/Tvy	1964
कृष्णा	"मिताक्षरावृत्तेः समीक्षात्मकमध्ययनम्'	श्री ला.ब.शा.सं.वि.पी. दिल्ली, 221 पृष्ठ, 005 OBC/TVY	2001
गर्ग, डॉ. नमिता	वररुचि एवं हैमचन्द्रविरचित-प्राकृतव्याकरणम्' (हिन्द्याम्)	नाग प्रकाशन, दिल्ली	प्र.सं. 2004
गुप्ता, निर्मलः	शब्दशक्तिविमर्शः	श्री ला.व.शा.सं.वि.पी. दिल्ली, 206 पृष्ठ, 006 abc/TVY	1999
गोस्वामी, सञ्जयः	'सिद्धान्तरत्नस्य पाठभेदादि-समीक्षा सहितं सम्पादनम्'	रा.सं.सं. जयपुर	2002

चन्द्र, महेशः	'रूपमाला प्रक्रिया कौमुद्योस्तुलनात्मकम ध्यनम्	श्री ला.व.शा.सं.वि.पी. दिल्ली, 270 पृष्ट, 025 ab/TVY	1963
चन्द्रः डॉ. अविनाशः	'शब्दवृत्तिविमर्शः (अभिधा और लक्षणा शब्दवृत्तियों का गवेष-णात्मक कालक्रमिक एवं तुलनात्मक अध्ययन) (हिन्द्याम्)	वाणी-विनायक प्रकाशन, इलाहबाद	प्र.सं. 2002
चैनानी, डॉ. माया ए.	'धातुपाठों मे अर्थनिर्देश	विधाप्रकाशन, दिल्ली	1962
चौधरी, डॉ. अर्कनाथः	मध्यमनोरमायाः पाठभेदादि समीक्षासहितं सम्पादनम्	आयु. हि. सं. पु. भण्डार, जयपुरम्	1966, 2002 2005
जैन, डॉ. मंजू	'धात्वर्थ विचारः' (हिन्द्याम्)	संजय प्रकाशन, दिल्ली	प्र.सं. 1967
जोयिस् सदानन्द चिदम्बरः	'ऐन्द्र ऋग्विधानस्य संपादनं समीक्षात्मकमध्ययनञ्च'	श्री ला.ब.शा.सं.वि. दिल्ली 330 पृष्ठ, 004 ab/TVY	1996

जागिंड, कृष्णगोपालः	परिभाषेन्दुशेखरस्य गदाभूतिटीकयोस्तुलना पूर्वकं समीक्षात्म-कमध्ययनमिति'	रा.सं.सं., जयपुर,	2002
जाटु, जगदीशप्रसादः	श्रीशेषनारायण प्रणीत-स्य महाभाष्य सूक्ति-रत्नाकरस्य समीक्षा,	रा.सं.सं., जयपुर	2008
जोशी, अरविन्द कुमारः	'शब्दकोत्स्तुभस्य विषमपदीटीकाया समीक्षासहितं सम्पादनम्'	रा.सं.सं. जयपुर.	2005
झा. उदयचन्द्रः	'धात्वर्थाख्यातार्थल-कारार्थ सुबर्थानाम-र्थानां विषये कौण्डभट्ट नागेशभट्टयोः सिद्धा-न्तानां तुलनात्मक-मध्ययनम्'	श्री ला.ब.शा.सं.वि. दिल्ली 194 पृ.. 007, ab/TVY	2001
झा, डॉ. उदयकान्तः	'परिभाषेन्दुशेखरविज याभूत्योः समीक्षा'	विश्वमनीषा, दरभंगा	1985
झा, डॉ. भोला	'भाषावृत्ते समीक्षात्मकमध्ययनम्'	-	-

झा, डॉ. सुरेन्द्र	'भट्टोजिदीक्षितेन नागेशभट्टेन च प्रतिपादितानां केषाञ्चन वैयाकरणसिद्धान्तानां तुलनात्मकमध्ययनम्	नाग प्रकाशन, दिल्ली	-
झा, देवकान्तः	'अभिनवसंस्कृतव्याकरणम्'	पटना	1994
झा, देवनारायणः	'महाकवि श्रीहर्षस्या-पाणिनीय प्रयोगः'	अहमदाबाद	1985
झा. नागेन्द्र कुमारः	'वैयाकरणभूषणसारे समागतानां विभिन्नदार्शनिक सिद्धान्तानाम् समीक्षात्मकमध्ययनम्'	श्री. ला.ब.शा.सं.वि. दिल्ली 2001 पृष्ट, 008, abc/TVY	1998
झा, नारायण जी	'परिभाषेन्दुशेखरे गदाभूतिटीक-योस्तुलनात्मकध्ययनम्'	श्री.ला.ब.शा.सं.वि, दिल्ली 300 पृष्ठ, 006, ab/TVY	1989
झा, पं. कृष्णकान्तः	'सन्धिप्रभा'	वाराणसी	1992

झा.पं. तुलाकृष्णः	'ऋग्वेदीयो नामधातुः'	दरभंगा	1989
झा, बालगोविन्दः	'समासदर्शिका'	पटना	1981
झा, बिकाउ	'नियमविचारः'	दरभंगा	1994
झा. विनोदकुमारः	'तृतीयाध्यायस्थसूत्राणां महाभाष्य दृष्ट्याविवेचनम्'	श्री. ला.ब.शा.सं.वि. दिल्ली 207 पृष्ठ 011/TVY.	1999
झा. विनोनानन्दः	'श्रीमद्भट्टोजिदीक्षितकृतायाः सिद्धान्त-कौमुद्याः पञ्चसन्धिपर्यन्त योस्तत्त्वबोधिनीलक्ष्मी टीकयो समीक्षात्मकमध्यनम्'	श्री. ला.व.शा.रा.सं. वि.पी... दिल्ली, 304 पृष्ठ 012 ab/TVY	1993
झा. वीरेन्द्रकुमारः	'वैयाकरणनये वृत्तिविमर्श'	श्री. ला.ब.शा.रा.सं. वि.पी.. दिल्ली, 285 पृष्ठ 013 abc/TVY	1999
झा, वेदानन्दः	'शब्दब्रह्मवादस्योद्गमो विकासश्च'		1982

झा. रघुनाथः	'हलन्तलिङ्गत्रयस्य तत्त्वबोधिनी' लघुशब्देन्दुशेखरयोः तुलनात्मकमध्ययनम्	श्री. ला.ब.शा.रा.सं. वि.पी.. दिल्ली	1993
झा, रामनारायणः	'सिद्धान्तकौमुदीतद्धित प्रकरणस्थ तत्त्वोधिनीबालमनोर माटीकयो- स्तुलनात्मकमध्ययनम्'	श्री. ला.ब.शा.रा.सं. वि.पी., दिल्ली, 317 पृष्ठ	1993
झा. सदानन्दः	'सिद्धान्तकौमुद्या बालमनोरमा- तत्त्वबोधिन्योर्वैमत्यम्'	वेंकटेशः प्रकाशन, दिल्ली	
झा. सुरेन्द्रः	भट्टोजिदीक्षितेन नागेशभट्टेन च प्रतिपादितानां केषाञ्चन वैयाकरण सिद्धान्तानां तुलनात्मकमध्ययनम्	नाग पबिलशर्स,	प्र.सं. 1968
झोपाख्य, प्रमोद कुमारः	'मम्मटनागेशभट्टयोः शब्दशक्ति विषयकं विवेचनात्मकमध्ययनम्	श्री. ला.ब.शा.रा.सं. वि.पी., दिल्ली, 205 पृष्ठ 015 abc/TVY	1997

ठक्कुर, ध्रुवकान्तः	'व्याकरणशास्त्रीयपरिभाषा	दरभंगा	1986
ठक्कुर, रमाकान्तः	'प्रबन्धामृतम्' (ग्रन्थः)	----	1955
ठक्कुर, सुधीनारायणः	'प्रौढमनोरमाशब्दरत्न योर्विचार-भेदानां युक्तायुक्तत्वसमीक्षा	स्वयमेव लेखकेन प्रकाशितः 5/48, त्रिपुराभैरवी, वाराणसी	1977
डॉ. मंगलारामः	'संस्कृत व्याकरण की दार्शनिक मीमांसा' (हिन्द्याम्)	राजस्थानी ग्रन्थागार, जोधपुर	प्र.सं. 14 अगस्त 1995
त्रिपाठी, गीतारामः	'व्याकरणशास्त्रीय-पद-पदार्थ संबंध विमर्श'	श्री. ला.ब.शा.सं.वि.पी. दिल्ली, 315 पृष्ठ 019 ab/TVY	1993
त्रिपाठी, डॉ. विजय प्रसादः	'समासवृत्तिविमर्शः'	सं.सं.वि.वि. वाराणसी	1991
त्रिपाठी डॉ. विद्याकान्तः	'वाल्मीकि रामायण के आर्ष प्रयोगो का अध्ययन'	सामरवार, मध्यप्रदेश	

त्रिपाठी भागीरथ प्रसादः	1. धात्वर्थ-विज्ञानम् 2. संस्कृतवाङ्मयमन्थनम् (शोधनिबन्ध-संग्रहः) 3. पाणिनीय धातुपाठसमीक्षा	वाग्योग चेतनापीठम्, वाराणसी वाराणसी	1990 प्र. का. 1985 द्वि. भा. 1986
त्रिपाठी, राजनाथः	'नागेशकृतिषु तन्त्रस्य प्रभावः	सम्पू.सं.वि.वि. वाराणसी	1988
त्रिपाठी, रामप्रसादः	'पाणिनीयव्याकरणे प्रमाणसमीक्षा' (द्वितीयसंस्करणम्)	सं.सं.वि.वि., वाराणसी	1997
त्रिपाठी, सुदर्शनः	'वृत्तिविमर्शः'	श्री ला.ब.शा.सं.वि.वि.. दिल्ली, 245 पृष्ठ, 017ab/lVY	1992
त्रिपाठी, हरिश्चन्द्रमणिः	'निपातार्थनिर्णयः'	सम्पू.सं.वि.वि., वाराणसी	1990
दयालु, विश्वम्भरः	पाणिनिप्रोक्तसंज्ञाविषये भट्टोजिदीक्षित नागेशभट्टयोर्मतभेदविमर्शः	श्री ला.ब.शा.सं.वि.पी. दिल्ली, 256 पृष्ठ, 018 abc/TVY	1999

द्विवेदी, जानकी प्रसादः	'कातन्त्रव्याकरणविमर्शः'	सम्पू. सं.वि.वि., वाराणसी	1995
पाठक, गिराकान्तः	श्रीहरिनामामृत व्याकरणस्य समीक्षात्मकमध्ययनम्'	श्री ला.ब.शा.सं.वि.वि., दिल्ली, 194 पृष्ठ	1980
पाठक, राजीव कुमारः	'नामार्थसुबर्थयोर्विषयोः कौण्डभट्टनागेशभट्टयोर्मतभेदविमर्शः'	श्री ला.ब.शा.सं.वि.वि., दिल्ली, 02/abc/TVY	1996
पाठक, डॉ. उमा	'पाणिनिज एटीयेस ऑफ पूर्वकृदन्त ए क्रिटिकल इस्टडी'	राँची	-
पाठक, डॉ पुरुषोत्तमप्रसादः	नागेशमते परिभाषाणां विवेचनम्'	ईस्टर्न बुक लिंकर्स, दिल्ली	प्र.सं. 1965
पाठक, डॉ. मधुकरः	'पाणिनीय शिक्षायाः शिक्षान्तरैः सह समीक्षा' समीक्षात्मकग्रन्थः'	वाराणसी	प्र.सं. 1972
पाठक, डॉ. मनीषा	'पाणिनीयाष्टाध्याय्या तद्धित-सूत्राणां समीक्षणम्'	रायपुरस्थ संस्कृत महाविद्यालयः	-

पाठक, डॉ. नन्हकूराम	'शाकटायन व्याकरण (अभिनव) में प्रयुक्त पारिभाषिक संज्ञाओं का आलोचनात्मक अध्ययन'	बिलासपुर, मध्यप्रदेशः	
पाण्डेयः किशोरचन्द्रः	पाणिनीय व्याकरणेयोगविभागविमर्शः	वाराणसी	2001
पाण्डेय, डॉ. कमला प्रसादः	'पाणिनीय और सारस्वतीय पारिभाषिक संज्ञाओं का तुलनात्मक अध्ययन' (हिन्द्याम्)	भारतीय विद्याप्रकाशन	प्र.सं. 1966
पाण्डेय, डॉ. देवशरणः	'सारस्वत व्याकरण में पारिभाषिक संज्ञाओं का उद्भव और विकास'	बिलासपुर, मध्यप्रदेश	-
पाण्डेयः, श्रीकान्तः	'व्याकरणशास्त्रदृष्ट्या संबन्ध-स्वरूपपर्यालोचनम्'	विद्यानिधि प्रकाशनम्, दिल्ली	1984

पाण्डेय, श्रीप्रेमकुमारः	'लघुत्रयी में प्रयुक्त कृदन्तपदों का समीक्षात्मक अध्ययन'	हजारीबाग	-
पावटे म. देव.	'पाणिनीय अष्टाध्याय्यामधिकृत्य - शोधकार्यम्'	महाराष्ट्र,	-
प्रज्ञाचक्षुः, शीतलाप्रसादो जायसवालः	वैयाकरणसिद्धान्त लघुमञ्जूषायाः स्फोटान्तभागीयरत्नप्र भाटीकायाः समालोचनात्मकमध्ययनम्	परमलपब्लिकेशन्स, दिल्ली	1994
बादाम, श्यामलालः	'दीक्षितनागेशयोर्मतेन स्फोटनामार्थ योस्तुल-नात्मकमध्ययनम्'	श्री. ला.ब.शा.सं.वि.पी दिल्ली, 246 पृष्ठ 022/bbc/TVY	1996
बाला, डॉ. शशि	'भट्टिकाव्य एवं पाणिनीय व्याकरण का तुलनात्मक अध्ययन'	विद्यानिधि प्रका. दिल्ली	प्र.सं. 1964
बैरवा, प्रभुदयालः	'पाणिनीय व्या. शा. पद्धतिमाश्रित्य	रा.सं.सं. जयपुरम्	2004

	लालसोटलोकभाषाया समीक्षात्मकमध्ययनम्'		
भारद्वाज, रामवकीलशर्मा	'सारस्वतचन्द्रिका लघुसिद्धान्त कौमुद्योतिङन्तकृदन्तर हितयोः तुलनात्मक अध्ययन'	श्री. ला.ब.शा.सं.वि.पी दिल्ली, 202 पृष्ठ 023/abc/Tvy	1994
महाजन, शकुन्तला	पाणिनीय व्याकरणे आगमानुशासनानां समीक्षात्मकमध्ययनम्	श्री. ला.ब.शा.सं.वि.पी. दिल्ली. 287 पृष्ठ024/TVY	1988
मिश्रः आचार्य लक्ष्मीकान्तः	'पाणिनीयाष्टाध्याया विभाषासूत्राणां समीक्षणम्	जबलपुर, मध्यप्रदेशीय	-
मिश्र, आद्याप्रसादः	'प्रक्रियाकौमुदीविमर्शः'	सम्पू. सं.वि.वि. वाराणसी	1966
मिश्रः, उमेशचन्द्रः	'काव्यशास्त्राध्ययने शब्दशास्त्रव्युत्पत्ते रूपयोगस्य समीक्षात्मकमध्ययनम्	श्री. ला.ब.शा.सं.वि.पी. दिल्ली. 307 पृष्ठ026,0b/TVY	
मिश्रः डॉ. गोपालः	'व्युत्पत्तिवाद का समीक्षात्मकमध्यनम्'	राज. ग्र. जोधुपरम्	1996

मिश्रः, डॉ. रामनारायणः	'पुराणों में उल्लिखित व्याकरण शास्त्रीय सामग्री का समीक्षात्मक अध्ययनम् (अग्निपुराण व नारदपुराण के विशेष आलोक में)	विलासपुर मध्यप्रदेशीय	-
मिश्र, डॉ. सुशीलचन्द्रः	'वाक्यपदीयानुसारेण दर्शनान्तरीय तत्त्वानां तुलनात्मकं समीक्षणम्'	मध्यप्रदेश	-
मिश्रः, डॉ. हर्षनाथः	'चान्द्रव्याकरणवृत्ते समालोचनात्मक-मध्ययनम्'	श्री लाल. ब.शा.सं. वि.पी. दिल्ली	24 अक्टूबर, 1974
मिश्रः देवस्वरूपः	'महाभाष्यनिगूढाकूतयः '	सम्पू. सं.वि.वि., वाराणसी	1978
मिश्रः परमानन्दः	महाभाष्यवर्त्तिनवाह्निकपर्यन्तदार्शनिक तत्त्वानां समीक्षणम्'	श्री. ला.ब.शा.सं.वि.पी. दिल्ली. 480 पृष्ठ027,abc/ TVY	
मिश्र, मोहनलालः	'महाभाष्यस्य प्रथमाध्यायस्य	श्री. ला.ब.शा.सं.वि.वि. दिल्ली. 262 पृष्ठ 02	1993

	चतुर्थाद्धिकपर्यन्तयोः प्रदीपविमलाटीकयोस्समीक्षात्मकमध्ययनम्'	B/TVY	
मिश्रः, राजधरः	'पुरुषोत्तमदेवकृत परिभाषावृत्ति-नागेशभट्टकृतपरिभाषेन्दुशेखरयोः तुलनात्मकमध्ययनम्'	श्री. ला.ब.शा.सं.वि.वि. दिल्ली. 235 पृष्ठ 026.abc/TVY	1995
मिश्र, राधेश्यामः	व्याकरणशास्त्रदृष्ट्या जातिस्वरूप विमर्श' सं सं वि. वि. विद्यावारिधीत्युपाधये प्रस्तुतः शोधप्रबन्धः)	शिव संकटहरणार्द संस्कृत महा.वि.सकाहा, हरदोई	2027 वै.क्र.
मिश्र, रामनारायणः	स्फोटमीमांसा'	सम्पू.सं.वि.वि., वाराणसी	1991
मिश्र, राममनोहरः	'भूषणसार-परमलघुमञ्जूषयोः सिद्धान्तानां समीक्षा'	सम्पू.सं.वि.वि. वाराणसी	1983
मिश्र, श्रीधरः	'अजन्तलिङ्गाश्रयस्य	श्री लाल.	1992

	तत्त्वबोधिनी लघुशब्देन्दुशेखरयोः तुलनात्मकमध्ययनम्'	व.शा.सं.वि.पी. दिल्ली, 226 पृष्ठ, 03006/TVY	
मिश्रः, (हर्षनाथ मिश्रः निर्देशकः)	व्याकरणमहाभाष्यस्य तृतीयाध्यायस्य प्रथमपादस्यानुवादः समीक्षा च'	श्री ला. ब.शा.सं.वि.वि. दिल्ली. 664 पृष्ठ, 036/TVY	1980
मिश्रः शेषनाथः	'शब्दानुशासने उत्सर्गापवादविमर्शः'	सम्पू, सं.वि.वि. वाराणसी	-
योगी, कमलचन्द्रः	'व्याडिकृतस्य परिभाषासूचनस्य समीक्षात्मकमध्ययनम्'	श्री ला. ब.शा.सं.वि.वि. दिल्ली, 122 पृष्ठ	1993
वेदालंकार, डॉ. रघुवीरः	काशिका का समालोचनात्मक अध्ययन' (हिन्द्याम्)	नाग प्रकाशन, दिल्ली,	प्र.सं. 1977
राय, केशवकुमारः	'व्याकरण मीमांसान्यायदर्शनाऽभिम-तसुबर्थानां सर्वेक्षणम्'	श्री ला. ब.शा.सं.वि.वि. दिल्ली, 264 पृष्ठ 031/abc/TVY	1991

शर्मा, अनिलकुमारः	'उज्जवलदत्तजाजलिकृत पत्र पाद्युणादिसूत्रवृतेः समीक्षा सहितं सम्पादनम्'	रा.सं.सं. जयपुरम्	2008
शर्मा, ईश्वरः	'सिद्धान्तकौमुदी की वैदिक प्रक्रिया- एक समीक्षात्मक अध्ययन' (हिन्द्याम्)	परिमल पब्लिकेशन्स, दिल्ली	प्र.सं. 1983
शर्मा, कुमार मुकेशः	'पाणिनीयपद्धतौ संङ्गणकोपयोगः समीक्षा'	रा.सं.सं. जयपुरम्	2003
शर्मा, कीर्तिकान्तः	'व्याकरणमहाभाष्ये समुदाहृतवैदिक - प्रतीकानां समीक्षात्मकमध्ययनम्'	श्री.लाल.ब.शा. स. वि. दिल्ली 406 पृष्ठ	1991
शर्मा, गजानन्दः	पं. काशीनाथ विरचिताया धातुमञ्जर्याः समीक्षासहितं सम्पादनमध्ययनं च	रा.सं.सं., जयपुर	2005

शर्मा, जवाहरलालः	'काशिकावृत्ति भाषावृत्तयोरतुलनात्मक - मध्ययनम्'	श्री.ला.व.शा.स.वि.दिल्ली 301 पृष्ठ	1993
शर्मा, ज्ञानेन्द्रः	तृतीयाह्निकयावन्महाभाष्य विमलाद्योतटीकयोस्तुलनात्मक- मध्ययनम्	श्री.ला.ब.शा.स.वि.दिल्ली 253 पृष्ठ, 034 ab/TVY	1993
शर्मा, डॉ. लेखराजः	'पुरुषोत्तमदेवकृत-'भाषावृत्ति' का विवेचनात्मक एवं तुलनात्मक अध्ययन' (हिन्द्याम्)	ज्ञानशीष प्रकाशन हिमाचल प्रदेश	प्र.सं. 1997
शर्मा, डॉ. दीप्तिः	'व्याकरणिक कोटियों का विश्लेषणणात्मक अध्ययन (हिन्द्याम्)	बिहार हिन्दी ग्रन्थ अकादमी	प्र.सं. 1975
शर्मा, द्वारकाप्रसादः	'परिभाषेन्दुशेखरपरिभाषाप्रदीपार्चिषोः तुलनात्मकध्ययनम्'	रा.सं.सं. जयपुर	2007
शर्मा, मनीषः	'परिभाषेन्दुशेखरस्य परिभाषार्थमञ्जरी	रा.सं.सं., जयपुर	2008

	टीकायाः समीक्षात्मकमध्ययनम्'		
शर्मा, वैकुण्ठनाथः	'धातुगतानामित् संज्ञकवर्णानां फल समीक्षा'	श्री ला.ब.सं.वि. पी. दिल्ली 2/4 पृष्ठ	2001
शर्मा, रघुनाथः	1. वाक्यपदीय पाठभेदनिर्णयः (प्रथमोभागः) 2. वाक्यपदीय पाठभेदनिर्णयः (द्वितीयोभागः) (सहायकसम्पादक : नरेन्द्रनाथ पाण्डेय)	सं.वि.वि. वाराणसी 1980	1991
शर्मा, राजेन्द्रकुमारः	'धात्वर्थविमर्शः'	श्री ला.ब.शा.सं.वि. दिल्ली 400 पृष्ठ	1984
शर्मा, रामबाबू	वैयाकरणभूषणसारशब्दशक्ति प्रकाशिकयोस्तुलनात्मकमध्ययनम्	रा.सं.सं., जयपुर	2007
शास्त्री, डॉ.	संस्कृत व्याकरण में गणपाठ की भूमिका	भारतीय प्राच्य विद्या,	प्र.सं. 2018 वैक्र.

कपिलदेवः	और आचार्य पाणिनि (गणपाठानामेकं तुलनात्मकमध्ययनं)	प्रतिष्ठान, अजमेर	
शास्त्री, डॉ. श्रीवन्स	'हेलराज का व्याकरण दर्शन को योगदान' (हिन्द्याम्)	विद्यानिधि प्रकाशन, दिल्ली	-
शुक्लः, आचार्य रामपालः	पाणिनीयाष्टाध्याया अधिकार-सूत्राणां समीक्षणम्	जबलपुर, मध्यप्रदेशः	-
शुक्लः, कालिका प्रसादः	'वैयाकरणानाम् अन्येषां च मतेन शब्दस्वरूपवच्छक्तिविचारः'	सम्पू. सं.वि.वि., वाराणसी	1976
शुक्ल, गणेशकुमारः	परिभाषेन्दुशेखरस्य भूतिविजया टीकयोः कतिपयविशिष्टस्थलानां तुलनात्मकमध्ययनम्	श्री.ला.ब.शा.स.वि., दिल्ली 226 पृष्ठ, 036 abc/lVY	1994
शुक्ल डॉ नरेन्द्रप्रसादः	'पाणिनीय व्याकरण में प्रयुक्त प्रत्याहारों का आलोचनात्मक अध्ययनं'	बिलासपुर, मध्यप्रदेश	-

शुक्ल, डॉ. भगवतशरण	परिभाषार्थ चन्द्रिका	इलाहबाद	2004
शुक्ल, रजनीकान्तः	'कारकप्रकरणस्थ सूत्रव्याख्याने भट्टोजिदीक्षितनागेशभट्टयोर्मतभेद विमर्शः	श्री.लाल.व.शा.स.वि.दिल्ली 505 पृष्ठ, 040 ab/TVY	1991
शुक्ल, रामकिशोरः	'व्याकरणशास्त्रे लौकिकन्यायानामुपयोगः'	सम्पू सं. वि. वि. वाराणसी	1992
शुक्ल, श्रीप्रकाशः	'पाणिनीय व्याकरण एवं अग्निपुराण में निरूपित व्याकरण' (हिन्द्याम्)	जे.पी. पब्लिशिंग हाउस, दिल्ली	प्र.सं. 1990
श्रीमति, बिन्दुः	'सिद्धान्तचन्द्रिकायाः पाठभेदसमीक्षा सहितसम्पादनम्'	रा.सं.सं., जयपुर	2002
सिंह, कुमरः	'व्याकरणाभिमतवाक्तत्त्वस्य मधुसूदन ओझाभिमतवाक्तत्त्वेन सह समीक्षणम्'	रा.सं.सं., जयपुरम्	2008

सिंह, कौशलेन्द्रकुमारः	'पाणिनीयसूत्रेषु नार्थसमीक्षा'	श्री.लाल.ब.शा.स.वि.दिल्ली 318 पृष्ठ, 041 abc/TVY	1999
सिंहः, डॉ. पर्णदत्तः	'व्याकरणशास्त्रीय परिभाषाएँ' एक अनुशीलन- 'परिभाषेन्दुशेखर के आधार पर' (हिन्द्याम्)	कला प्रकाशन, वाराणसी	प्र.सं. 1999
सिंहः, डॉ. सुधाः	'महाभाष्य व्याकरणदर्शन का स्रोतग्रन्थः' (हिन्द्याम्)	इमेज ग्राफिक्स इंडिया	प्र.सं. 2001
सिंहः बदरीनाथः	'शाब्दबोधविमर्शः'	लेखकेन प्रकाशितः डी-43/20 गोदौनिया वाराणसी	-
सैनि, कुमार राजेन्द्रः	'परिभाषेन्दुशेखरस्यत्रिपथगाटीकायाः समीक्षात्मकमध्ययनम्'	रा.सं.सं., जयपुरम्	2002
सैनि, कैलाश चन्द्रः	'श्री हरिभास्कराग्निहेतृ प्रणीतस्य परिभाषाभास्करस्य समीक्षासहित-सम्पादनम्'	रा.सं.सं., जयपुरम्	2004

5. अकारादिक्रमेण लघुशोधप्रवन्धकर्तृणां लघुशोधप्रवन्धैः सह प्रणीता सूची

प्रणेता	लघुशोधप्रवन्धग्रन्थाः	प्रकाशकाः/रचनाकालः
1. अग्निमित्रः	'परम्परागत विद्यालयों के स्नातकस्तरीय व्याकरणिक एवं व्याकरणेतर छात्रों के संस्कृत अभिज्ञान का तुलनात्मक अध्ययन'	श्री ला.व.शा.सं. वि.वि. दिल्ली 2002-03
2. उपाध्याय, महेन्द्रः	'संस्कृतव्याकरणस्य प्रमुखग्रन्थेषु शिक्षणाधिगमप्रक्रिया-सम्बद्ध सिद्धान्तानां शिक्षाशास्त्रदृष्ट्या अनुशीलनम्'	श्री ला. ब.शा.सं.वि. वि. दिल्ली-1976-68
3. कुमार, अनिलः	'संस्कृतभाषायाः व्यवहारिकीभाषाभवितुमागतानां समस्या-नामन्वेषणं तथा च तासामन्वेषणात्मकानि समाधनानि'	श्री ला. य.शा.सं.वि. वि. दिल्ली-2003-04
4. चौधरी सोहन	'संस्कृत के प्रमुख व्याकरण ग्रन्थों में भाषा-शिक्षण के विविध उपागमों का समीक्षात्मक अध्ययन'	श्री ला. ब.शा.सं.वि. वि. दिल्ली-1967-68
5. मिश्रा सजू	'संस्कृतव्याकरण अधिगम हेतु संगणक आधारित अनुदेशनः स्वरसन्धि के विशेष संदर्भ में'	श्री लाल ब.शा.सं.वि. वि. दिल्ली-2002-03

(इति चतुर्थोऽध्यायः)

❖ ❖ ❖

पञ्चमोध्यायः

1. भारतस्य स्वातन्त्र्यलाभात् परं ये प्रमुखाः वैयाकरणाचार्याः समुद्भूताः, तेषां जीवनचरितं रचनावैभवञ्च ।
2. सम्पूर्णशोधप्रबन्धस्य सम्पूर्णसामग्री वेब्-साइट् (Website) निर्माय अन्तर्जालस्य उपरि प्रकाशनम् ।
3. जीवितैः वैयाकरणाचार्यैः सह साक्षात्करान् विधाय तेषां विवरणं वेब्-जालके प्रकाशितम् ।

अथ पञ्चमोऽध्यायः

भारतस्य स्वातन्त्र्यलाभात् परं ये वैयाकरणाचार्याः समुद्भूताः तेषां जीवनचरितं वैभवञ्च

1. श्रीकृष्णचन्द्रशर्मा

व्यक्तित्वम् (जीवन परिचयः)

1.	व्याकरणाचार्यस्य नाम	-	श्रीकृष्णचन्द्र शर्मा[131]
2.	पितुर्नाम	-	स्व. पण्डित नानूराम शर्मा
3.	मातुर्नाम	-	श्रीमती भँवरी देवी शर्मा
4.	जन्मदिनांक:	-	6/5/1952
5.	जन्मस्थानम्	-	किशोरपुरा (सीकर-राजस्थानम्)
6.	पत्नीर्नाम	-	श्रीमती कान्ता शर्मा
7.	वर्तमाननिवासस्थानम्	-	75, छत्रशालनगरम्, मालवीयनगरम् (जयपुरम्)
8.	चलदूरवाणीसंख्या	-	94610888761

[131] श्रीकृष्णचन्द्रशर्मा महोदयस्य साक्षाद्दर्शनमाशीर्वादञ्च प्राप्य मुखारविन्देन विश्रुत्य लिखितम्।

शिक्षा (उत्तीर्णपरीक्षाविवरणम्)

1.	(एम.ए) (आचार्यः)	साहित्याचार्यः, व्याकरणाचार्यः, न्यायदर्शनाचार्यः
2.	विद्यानिधिः (M.Phil)...	सर्वप्रथमः

अध्यापनानुभवः

क्र.सं.	**अवधिः**	**पदनाम**	**नियोक्त्री संस्था**
1.	1/9/1974 तः 20/02/1978 पर्यन्तम्	सहायकाचार्यः	राजकीयमहाराजाचार्य संस्कृत-महाविद्यालयः जयपुरम्
2.	21/2/1978 तः 12/02/1986 पर्यन्तम् ।	सहायकाचार्यः	राजस्थानविश्वविद्यालयः जयपुरम्।
3.	13/02/1986 तः 31/05/2012 पर्यन्तम्	आचार्यः	जयनारायण व्यास विश्वविद्यालयः जोधपुरम्
4.	29/3/2016 तः 16/7/2017 पर्यन्तम्	विजिटिंग प्रोफेसर	विजिटिंग प्रोफेसर, संस्कृतविधा एवं धर्मविज्ञान-संकाय- व्याकरणविभागः काशीहिन्दूविश्वविद्यालयः वाराणसी (उ.प्र)

5.	17/07/2017 तः 16/7/2019 पर्यन्तम्	व्याकरण पीठाध्यक्षः	जगद्गुरुरामानन्दाचार्य संस्कृतविश्वविद्यालयः मदाऊ, जयपुरम्

संपादितपुस्तकानि

क्र. स.	**ग्रन्थाः**	**प्रकाशकः।**
1.	व्याकरण - साहित्य-न्यायशास्त्रानुसारिणी 'वृत्तिमीमांसा'।	राजस्थानी ग्रन्थागारः जोधपुरम् (1991)
2.	सरलसंस्कृतव्याकरणम्	यूनिक ट्रेडर्स, जयपुरम्
3.	कारकसम्बन्धोद्द्योतः ('कातन्त्रव्याकरणे' हिन्दी टीका)।	राजस्थानी ग्रन्थागारः जोधपुरम् (2008)
4.	सिद्धान्तलक्षणतत्वालोकप्रकाशः (प्रथमो भागः)	एस. ए. पी. दर्शनशास्त्र विभागः, राजस्थानम्
5.	सिद्धान्त-------- (द्वितीयो भाग:)	एस. ए. पी. दर्शनशास्त्र विभागः, राजस्थानम् (1997)
6.	सिद्धान्त ---------- (तृतीयो भाग :)	एस. ए. पी. दर्शनशास्त्र विभागः, राजस्थानम् (2003)

7.	लघुसिद्धान्तकौमुदी (सटिप्पण)	राजस्थान माध्यमिक शिक्षा बोर्ड अजमेरम्, 2004
8.	'हमारे व्यञ्जनों का लोकवेदः ।	राजस्थानी ग्रन्थागारः जोधपुरम्
9.	'मानव जीवन' और स्मृतिशास्त्र' विस्तृत भूमिका सहित सम्यादनम् ।	राजस्थानी ग्रन्थागारः जोधपुरम्
10.	शिखरिणीमाला (शिवतत्त्वविवेकव्याख्यानसमन्विता)।	राजस्थानसंस्कृत अकादमी जयपुरम् (2007)
11.	हिन्द भारती विविध भारती।	त्रिवेणी पब्लिकेशन जोधपुरम् (2009)
12.	संस्कृत, संस्कृति एवं प्रशासनञ्च ।	राजगंगा चैरिटेबल ट्रस्ट जयपुरंम् (2011)
13.	"स्वरमंगला" शोधपत्रिका	-
14.	'वयम्' संस्कृत शोधपत्रिका	सम्पादकः
15.	'भारती' संस्कृत-मास पत्रिका	सम्पादक:
16.	संस्कृत-वैभवम् " पत्रिकायाः भूमिकासहितसम्पादनम्	सम्पादकः

पुरस्कारः

क्र. स.	पुरस्कार :	संस्था
1.	विज्ञान पुरस्कारः	राजस्थान संस्कृत अकादमी जयपुरम्
2.	अखिलभारतीयव्याकरणशास्त्रार्थ प्रतियोगिता	अखिलभारतवर्षीय शास्त्रार्थसंजीवन परिषद्, प्रयागः
3.	विशिष्ट विद्वान्	पं० मक्खनलाल शान्ति देवी धर्मार्थ ट्रस्ट (नई दिल्ली)
4.	संस्कृतदिवससमारोहे 'विशिष्ट विद्वान्' सम्मानम्	-
5.	वीरेश्वर शास्त्री द्राविड़ व्याकरणशास्त्र सम्मानम्	राजस्थान संस्कृत अकादमी जयपुरम्
6.	माहेश्वर पुरस्कारः	व्यास वालावक्ष शोधसंस्थानम् जयपुरम्।
7.	"महर्षि पं. खड्गनाथ मिश्रः "पुरस्कारः	हरिशेवा निम्बार्क संस्कृत-समिति
8.	"दर्शन केसरी"	अखिलभारतीयविद्वत् परिषद्
9.	व्याकरण शिरोमणी	राजकीयमहाराज आचार्य संस्कृत महाविद्यालय, जयपुरम्।
10.	"आचार्य शिवकुमार शास्त्री"	"उत्तरप्रदेशः नागकूपशास्त्रार्थ समितिः"

11.	"आजीवन - सेवालङ्करणसम्मानः"	"राजस्थान - संस्कृत -अकादमी, 2022"
12.	"संस्कृत - साधना - सम्मानः"	"संस्कृत - शिक्षा, राजस्थान सरकार सर्वकारः"
13.	पं. श्री नवलकिशोर काङ्कर - स्मृति-सम्मानम्" ।	-

2. डॉ. शशिनाथ झा

व्यक्तित्वम् (जीवनपरिचयः)

1.	व्याकरणाचार्यस्य नाम	-	डॉ. शशिनाथ झा[132]
2.	पितुर्नाम	-	स्व. पं. गङ्गानाथ झा
3.	जन्मदिनांकः	-	15/02/1954
4.	जन्मस्थानम्	-	ग्रा. + पो. - दीप जि०- मधुबनी (बिहारः)
5.	वर्तमाननिवासस्थानम्	-	शुभङ्करपुरम्, दरभङ्गा, (बिहारः)
6.	चलदूरवाणीसंख्या	-	9199475909

[132] श्रीशशिनाथझा महोदयस्य साक्षाद्दर्शनमाशीर्वादञ्च प्राप्य मुखारविन्देन विश्रुत्य लिखितम्।

शिक्षा (उत्तीर्णपरीक्षाविवरणम्)

क्र. स.	कक्षा	वर्षम्	विषयः	संस्था
1.	मध्यमा	1968	नव्यव्याकरणम्	कामेश्वरसिंह दरभङ्गासंस्कृत-विश्वविद्यालयः दरभङ्गा (बिहारः)
3.	शास्त्री	1971	‘’	‘’
4.	आचार्यः	1973	‘’	‘’
5.	विद्यावारिधिः (Ph.D).	1977	‘’	‘’
6.	विद्यावाचस्पतिः (D. Lit)..	1985	‘’	‘’

अध्यापनानुभवः

क्र.सं.	अवधिः	पदनाम	नियोक्त्री संस्था
1.	17/9/1979 तः 25/7/1985 पर्यन्तम्	व्याख्याता	कामेश्वरसिंहदरभङ्गा संस्कृत विश्वविद्यालयः दरभङ्गा (बिहारः)
2.	26/7/85 तः 2/10/94 पर्यन्तम्	प्रधानाचार्यः	ज.ना.ब्र. आदर्श सं. महाविद्यालयः लगमा

3.	3/10/94 तः 16/9/95 पर्यन्तम्	उपाचार्यः	कामेश्वरसिंहदरभङ्गासंस्कृत विश्वविद्यालयः, दरभङ्गा (बिहारः)
4.	17/9/25 तः 28/2/95 पर्यन्तम्	प्राचार्यः	"
5.	2009 तः 2012, 2015 तः 2019 पर्यन्तम्	विभागाध्यक्षः	"
6.	20/9/2020 तः 31/1/2024 पर्यन्तम्	कुलपतिः	कामेश्वरसिंहदरभङ्गासंस्कृत विश्वविद्यालयः, दरभङ्गा (बिहारः)

लिखितमौलिकसम्पादितपुस्तकानि

क्र. स.	**पुस्तकं**	**मौलिक/ सम्पादितम्**	**विषयः**	**प्रकाशकः**	**प्रकाशन-वर्षम्**
1.	शुद्धिकौमुदी	मौलिकम्	धर्मशास्त्रम्	सं०वि०वि०, दरभङ्गा	1985
2.	एकावली (गोकुलनाथकृत)	संस्कृतव्याख्या	धर्मशास्त्रम्	सं०वि०वि०, दरभङ्गा	1985
3.	पञ्चीप्रबन्धनाटकम्	मौलिकम्	नाटकम्	सं०वि०वि०, दरभङ्गा	1986

4.	पार्वतीपरिणयनाटकम् (बाणकृतम्)	मौलिक (मैथिली)	नाटकम्	सं०वि०वि०, दरभङ्गा	1986
5.	मदालसानाटक	स्वरचितम्	नाटकम्	भारती पुस्तक केन्द्र, दरभङ्गा	1988
6.	कृषिफलम् (रेडियोरूपकम्)	मौलिकम्	नाटकम्	अजसा, लखनऊ	1996
7.	'सम्मान्य विद्वानों का परिचय	मौलिकम्	परिचयः	सरिसवपाही	1999
8.	*हरिश्चन्द्रचरित (चम्पूकाव्य)	मौलिकम्	मैथली-काव्य	दीप मधुबनी	2003
9.	मधुधारा (संस्कृत कविता)	मौलिकम्	काव्यम्	नाग प्रकाशक, दिल्ली	2004
10.	*हनुमान् पचीसी	मौलिकम्	मैथली-काव्य	दरभङ्गा	2005
11.	*निबन्धमन्दार-मंजरी (मैथिली)	स्वाचित	निबन्धम्	दीप, मधुबनी	2009
12.	*वार बाबूक गप्प (मैथिली)	मौलिकम्	हास्यकथा	दरभंगा	2014

13.	व्याकरणशास्त्रीय-द्वित्वविधिसमीक्षा	मौलिकम्	व्याकरणम्	दरभंगा	2015
14.	लघुरूपकसमुच्चयः	मौलिकम्	नाटकम्	दिल्ली	2016
15.	व्याकरणविनोदकी भाषाशास्त्रीय समीक्षा	मौलिकम्	समीक्षा	श्रीशंकरशिक्षायतन, दिल्ली	2016
16.	उदयनाचार्य – डॉ. शशिनाथ झा	स्वचरितम्		मैत्रेयी प्रकाशन, दिल्ली	2024
17.	'अपभ्रंसकाव्य में सौन्दर्य वर्णन	डॉ. शशिनाथ झा	स्वरचित	मैत्रेयी प्रकाशन, दिल्ली	2024
18.	जानकी पूजाविधि डॉ. शशिनाथ झा	स्वचित		मैत्रेयी प्रकाशन, दिल्ली	2024
(ख)	**अनुदित ग्रन्थ-**				
19.	*बालशिक्षासोपानम् (दीनबन्धु झा)	हिन्दी अनुवाद	शिक्षा	कृष्णदास अकादमी, वाराणसी	1981
20.	**रागतरङ्गिणी (लोचनकृता)	मैथिली अनुवाद	संगीत	मैथिली अकादमी, पटना	1981

21.	*प्रभावतीहरणनाटक (भानुनाथकृत)	मैथिली अनुवाद	नाटक	इसहपुर, मधुबनी	1983
22.	*वातावाणनाटकम् (मूल पं० गोविन्द झा)	मैथिली से संस्कृत अनुवाद	नाटक	सं०वि०वि०, दरभङ्गा	1984
23.	*मिथिलापरम्परागत- नाटकसंग्रहः (16 कीर्त्तनिया नाटक 1300-1900)	मैथिली अनुवाद 1-7 भाग	नाटक	सं०वि०वि०, दरभङ्गा	1985
24.	**कीर्त्तिपताका (विद्यापतिकृता)	सं०-हिन्दी अनुवाद	काव्य	नाग प्रकाशक, दिल्ली	1993
25.	*रसिकमनोरञ्जिनी (दीनबन्धुझा)	हिन्दी अनुवाद	काव्य	नाग प्रकाशक, दिल्ली	1995
26.	*अलङ्कारसमुद्रः (इन्द्रपतिकृतः)	हिन्दी अनुवाद	साहित्य	दरभङ्गा	1995
27.	**कीर्त्तिलता (विद्यापतिकृता)	सं०हि० अनुवाद	काव्य	दरभङ्गा	1995
28.	**रूपकसमुच्चयः	हि०-मै०अनुबाद	नाटक	सं०वि०वि०, दरभङ्गा	1998

29.	*निरोष्ठ्यरामचरित- महाकाव्यम्	हिन्दीअनुवाद	काव्य	नाग प्रकाशक, दिल्ली	1999
30.	*राजनीतिसारः (भवनाथोपाध्यायः)	मैथिलीअनुवाद	राजनीतिः	सं०वि०वि०, दरभङ्गा	2000
31.	*कामेश्वरप्रतापोदधम् (जीवनाथ झा)	हिन्दी अनुवाद	काव्य	मि.सं. शो. सं. दरभंगा	2010
32.	*अन्तिमप्रणामम् (मैथिली से संस्कृत)	अनुवाद	नाटक	संस्कृत भारती, नई दिल्ली	2011
33.	*छिवकाप्रहसनम् (मैथिली संस्कृत)	अनुवाद	नाटक	दरभंगा	2014
34.	*सांख्यकारिका (पं. दुर्गाधर झा)	अनुवाद	दर्शन	दिल्ली	2018
35.	*अलंकारशेखर (केशव मिश्र)	अनुवाद एवं सम्पादन	साहित्य	दिल्ली	2018
36.	*सिद्धांतशिखामणिः (शिवयोगी)	अनुवाद एवं सम्पादन	शैवदर्शन	वाराणसी	2018

(ग)	**सम्पादित ग्रन्थ-**				
37.	"दीनबन्धुस्मृति-ग्रन्थ	सम्पादितम्	स्मृति-ग्रन्थम्	इसहपुर, सरिसवपाही, मधुबनी	1976
38.	समासशक्ति-दीपिका (दीनबन्धु झा)	सम्पादितम्	व्याकरणम्	संस्कृति वि०वि०, दरभङ्गा	1977
39.	उपसृष्टधात्वर्थ-संग्रहः (दीनबन्धु झा)	सम्पादितम्	व्याकरणम्	संस्कृति वि०वि० दरभङ्गा	1981
40.	परमलघुमञ्जूषा (सरलाटीका)	सम्पादनम्	व्याकरणम्	संस्कृति वि०वि० दरभङ्गा	
41.	आचारचिन्तामणिः (वाचस्पतितिश्रः)	सम्पादनम्	व्याकरणम्	सं०वि०वि०, दरभङ्गा	1982
42.	हत्परिवर्त्तननाटकम् (पं. आनन्द झा)	सम्पादनम्	धर्मशास्त्रम्	सं०वि०वि०, दरभंगा	1983
43.	प्रयोगपल्लवः (म०म० भवनाथकृतः)	सम्पादनम्	व्याकरणम्	सं०वि०वि०, दरभङ्गा	1984

44.	प्रयोगमुखम् (धर्मकीर्तिः)	सम्पादनम्	व्याकरणम्	सं०वि०वि०, दरभङ्गा	1984
45.	प्रयोगदर्पणः (म० म० परमेश्वर झा)	सम्पादनम्	व्याकरणम्	सं०वि०वि०, दरभङ्गा	1984
46.	गूढार्थदीपिका (म०म० वामदेवः)	सम्पादनम्	धर्मशास्त्र	सं०वि०वि०, दरभङ्गा	1984
47.	व्यवहारचिन्तामणिः (वाचस्पतिमिश्रः)	सम्पादनम्	धर्मशास्त्रम्	सं०वि०वि०, दरभङ्गा	1984
48.	स्मृतितत्त्वसमुच्चयः (सचलमिश्रः)	सम्पादनम्	धर्मशास्त्रम्	सं०वि०वि०, दरभङ्गा	1985
49.	स्मृतिदीपिका (उमापतिकृता)	सम्पादनम्	धर्मशास्त्रम्	सं०वि०वि०, दरभङ्गा	1985
50.	शुद्धिनिर्णयः (उमापतिकृता)	सम्पादनम्	धर्मशास्त्रम्	सं०वि०वि०, दरभङ्गा	1985
51.	रत्नशतकम् (जीवेश्वरकृतम्)	सम्पादनम्	ज्योतिषम्	सं०वि०वि०, दरभङ्गा	1987
52.	तिथिनिर्णयः (शुभङ्करक्तः)	सम्पादनम्	धर्मशास्त्रम्	सं०वि०वि०, दरभङ्गा	1987

53.	रामजन्म (तेजनाथकृत)	सम्पादनम्	मैथिली-काव्य	पटना	1988
54.	शिक्षाप्रसूनम्	सम्पादनम्	स्मारिका	लगमा	1989
55.	दुर्गासप्तशती	सम्पादनम्	स्तोत्रम्	पटना	1992
56.	"शुद्रविवाहपद्धतिः	सम्पादनम्	कर्मकाण्डम्	पटना	1993
57.	मैथिलीकाव्यविवेक (बदरीनाथ झा)	सम्पादनम्	साहित्यम्	सरिसवपाही, मधुवनी	1994
58.	डाकवचनसंहिता	मैथिलीव्याख्या	ज्योतिषम्	राँटी (मधुबनी)	1996
59.	'रसगङ्गाधरः (प्रथमाननम्)	सं०हि० व्याख्या	साहित्यम्	चौखम्बा, वाराणसी	1996
60.	राधापरिणयमहाकाव्यम् (कविशेखरबदरीनाथझाक्तम्)	सम्पादनम्	काव्यम्	नाग प्रकाशन, दिल्ली	1998
61.	वर्षकृत्यम् (रुद्रधर-जगद्धरक्तम्)	सम्पादनम्	कर्मकाण्डम्	पटना	1998
62.	'समासशक्तिदीपिका (दीनबन्धुझा)	सम्पादनम्	व्याकरणम्	सं०वि०वि०, दरभङ्गा	2000

	(डॉ० सदानन्दझा-कृत हिन्दीभाष्य)				
63.	'प्रयोगदर्पणः (परमेश्वरझा) (डॉ० सदानन्दझा-कृत हिन्दीभाष्य)	सम्पादनम्	व्याकरणम्	सं०वि०वि०, दरभङ्गा	2000
64.	'याज्ञवल्क्यस्मृतिः (व्यवहाराध्यायमिताक्षरा की पं० दुर्गाधरझाकृत हिन्दीव्याख्या)	सम्पादनम्	धर्मशास्त्रम्	भारती विद्या प्रकाशन, वाराणसी,	2001
65.	'भाषावृत्तिपञ्जिका (विश्वरूपाचार्यः)	सम्पादनम्	व्याकरणम्	मि०सं०शोध संस्थान, दरभङ्गा	2001
66.	डाकवचनसंहिता (सम्पूर्ण)	सम्पादनम्	ज्योतिषम्	पटना	2001
67.	न्यायप्रकाश (म. म. डॉ. गङ्गानाथ झा)	सम्पादनम्	दर्शन (हिन्दी)	रत्ना प्रकाशन, वाराणसी	2002
68.	वेदान्तदीपक (म. म. डॉ. गङ्गानाथ झा)	सम्पादनम्	दर्शन (हिन्दी)	रत्ना प्रकाशन, वाराणसी	2002

69.	'संस्कृतशिक्षकः (पं. श्यामानन्दझा)	सम्पादनम्	व्याकरणम्	रत्ना प्रकाशन, वाराणसी	2002
70.	'षट्चक्रनिरूपणम् (पूर्णानन्दयतिः)	सम्पादनम्	तन्त्रम्	रत्ना प्रकाशन, वाराणसी	2002
71.	चक्रकौमुदी (बदरीनाथझा-कृत)	सम्पादनम्	तन्त्रम्	रत्ना प्रकाशन, वाराणसी	2002
72.	'दुर्गासप्तशती (गौरीनाथझाकृत व्याख्या)	सम्पादनम्	तन्त्रम्	पटना	2002
73.	वैयाकरणभूषणसारदीपिका (दीनबन्धुझाकृता)	सम्पादनम्	व्याकरणम्	दरभङ्गा	2002
74.	ज्ञापकादर्शः (पं०मणिनाथझा)	सम्पादनम्	व्याकरणम्	दरभङ्गा	2002
75.	चण्डीचरित (लालदासकृत)	सम्पादनम्	मैथिली-काव्यम्	चेतनासमिति, पटना	2003
76.	मैथिली-संस्कृत शब्दकोश (कविशेखर बदरीनाथझा)	सम्पादनम्	कोश	सरिसव-पाही, मधुवनी	2004

77.	मणिमञ्जरीनाटिका (विद्यापतिकृता) (डॉ० मनोजनाथझाकृत हिन्दी व्याख्या)	सम्पादनम्	नाटकम्	कलाप्रकाशन, वाराणसी	2005
78.	मिथिलाभाषा रामायण (कवीश्वर चन्दा झा)	सम्पादनम्	मैथिली-काव्यम्	दरभङ्गा	2005
79.	दुर्गासप्तशती (मैथिली व्याख्या)	सम्पादनम्	स्तोत्रम्	पटना	2006
80.	युगान्तरनाटकम् (मतिनाथमिश्र कृत)	सम्पादनम्	नाटकम्	मधुबनी	2007
81.	रत्नकलापः (विष्णुदेवकृत)	सम्पादनम्	ज्योतिषम्	मि.शो.स., दरभंगा	2008
82.	पुरुषपरीक्षा (विद्यापतिकृत्ता)	सम्पादनम्	कथा-काव्यम्	मि.शो.स., दरभंगा	2009
83.	रुक्मिणीस्वयंवरनाटीका (ब्रह्मदास-कृत)	सम्पादनम्	नाटकम्	कर्णगोष्ठी, कोलकाता	2009

84.	जल्पना (जीवनाथ झा कृत, मैथिली)	सम्पादनम्	काव्यम्	सरिसवपाही, मधुवनी	2004
85.	अमरकोषः (मुकुन्दस्त व्याख्या)	सम्पादनम्	कोषम्	मि.शो.स., दरभंगा	2010
86.	साहित्यरत्नाकर (बुद्धिनाथ झा)	सम्पादनम्	सहित्यम्	सरिसवपाही, मधुवनी	2010
87.	ध्वनिप्रतिविम्ब (बुद्धिनाथ झा)	सम्पादनम्	सहित्यम्	सरिसवपाही, मधुवनी	2010
88.	सामवत नाटक (अनुवादक माधव झा)	सम्पादनम्	नाटकम्	सरिसवपाही, मधुवनी	2010
89.	जीवनाथझाग्रन्थावली (मैथिली)	संशोधन	काव्य-नाटकम्	इसहपुर, मधुबनी	2011
90.	व्याकरणपाटलोद्यानम् (स्मारकम्)	सम्पादनम्	विभाग-परिचय	का. सिं.द.सं.वि. वि., दरभंगा	2012
91.	महाकविकालिदास विद्यावती (मैथिली)	सम्पादनम्	जीवनी	मधुरा, दीप, मधुबनी	2012

92.	ज्ञातव्यसारसमुच्चयः (संस्कृतम्)	संशोधन	धर्मशास्त्र	बिहार सं. अकादमी, पटना	2013
93.	शब्दप्रदीपः (संस्कृतम्)	सम्पादनम्	शब्दकोश:	बिहार सं. अकादमी, पटना	2013
94.	"भक्तसुदर्शननाटक (मैथिली)	सम्पादनम्		गंगौली, मध्वनी	2013
95.	गीतकाशीपति (मैथिली)	सम्पादनम्		गंगौली, मध्वनी	2013
96.	गुरुवाग्विलासः (शो.ज. स्मृति)	सम्पादनम्	स्मृतिग्रन्थ	दरभंगा	2014
97.	महनीयमणिमाला (मणिनाथझा-स्मृति)	सम्पादनम्	स्मृतिग्रन्थ	दरभंगा	2014
98.	'कविरहस्य- प.म. डॉ. गंगानाथ झा	सम्पादनम्	साहित्य	दरभंगा	2015
99.	कठोपनिषद् (संस्कृतपद्यमयौ व्याख्या)	-	उपनिषद्	दरभंगा	2016

100.	आचार्य रामचन्द्रमिश्र-रचनासंग्रहः	सम्पादनम्	साहित्य	वाराणसी	2016
101.	व्युत्पत्तिवाद-शक्तिवादविवृतिः मम विश्वनाथ झा	-	न्याय	दरभंगा	2017
102.	मैथिलकवीनां लघुकाव्यसंग्रहः	-	काव्य	दरभंगा	2017
103.	महावाक्यरत्नावलिः	-	उपनिषद्	दरभंगा	2017
104.	स्फोटविमर्शः (संगोष्ठीस्मारिका)	सम्पादनम्	व्याकरण	दरभंगा	2017
105.	वैद्यनाथशतकम् (पं. राजेन्द्र झा)	सम्पादनम्	काव्य	दरभंगा	2017
106.	अमृतभावप्रवाहः (पं. अमृतनाथ मिश्र)	सम्पादनम्	काव्य	दरभंगा	2018
107.	दुर्गापूजापद्धति - पं. ताराचरण झा - सम्पादन - सं. विश्वविद्यालय, दरभंगा				2018
108.	'साहित्यमीमांसा- कविशेखर बदरीनाथ झा - हिन्दी व्याख्या - सरिसव				2018

109.	"मिथिलामे दू गोट वाचस्पति (मैथिली) - डॉ. सुरेश्वर झा - संस्कृत विश्वविद्यालय, दरभंगा	2019
110.	गुणेश्वरचरितचम्पूः - कविशेखर बदरीनाथ झा - हिन्दी व्याख्या - नाग प्रकाशन, दिल्ली	2021
111.	विद्याकरसहस्रकम् विद्याकर मिश्र सम्पादन नाग प्रकाशन, दिल्ली	2021
112.	वनदुर्गापटलम् – सम्पादन - दीप (मधुबनी)	2021
113.	"खण्डवला राजवंश (मैथिली) - मुकुन्द झा बख्शी – सम्पादन - ई-समाद, दरभंगा	2021
114.	चन्द्रसंस्कृतरचनावली - चन्दा झा - संशोधन - संस्कृत विश्वविद्यालय, दरभंगा	2021
115.	प्रबोधकादम्बरी - म.म. गोकुलनाथ - संशोधन संस्कृत विश्वविद्यालय, दरभंगा	2021
116.	'महाभाष्यमन्थनी भाग- 1 - पं. सत्यव्रतशर्मा – सम्पादन - संस्कृत विश्वविद्यालय, दरभंगा	2021
117.	'महाभाष्यमन्थनी भाग-2 - पं. सत्यव्रतशर्मा – सम्पादन - संस्कृत विश्वविद्यालय, दरभंगा	2023
118.	विभिन्न दर्शनेषु शब्दस्वरूपविमर्शः - डॉ. रामसेवक झा - संस्कृत विश्वविद्यालय, दरभंगा	2023

119.	'मिथिलामाहात्म्यम् (तन्त्रोकाम्) - लालदासकृत हिन्दी टीका सहित - संस्कृत विश्वविद्यालय, रभंगा	2023
120.	विदेश्वर महादेव पं. सीतानाथ झा सम्पादन दोप (मधुबनी)	2023
121.	मैथिलीकवीनां लघुकाव्य संग्रहः भाग-2 – सम्पादन - संस्कृत विश्वविद्यालय, दरभंगा	2023
122.	"कृष्णजन्म (मैथिली) – मनबोध - व्याख्या सहित सम्पादन - मैत्रेयी प्रकाशन, दिल्ली	2024
123.	'वीरांगना - मैथिली अनुवादक - गोविन्द झा - सम्पादन सिद्धिरस्तु, दिल्ली	2024

पुरस्कारः

	सम्मानम्	**संस्था**
1.	'सम्मानपत्रम् ।	संस्कृत साहित्यपरिषद्, देवधरः, 1999 ई.
2.	'मिथिलाविभूति' उपाधि	विद्यापति सेवा संस्थानम् दरभंगा, 2007 ई.

3.	'भाषासम्मानम्"	साहित्य अकादमी नई दिल्ली 2007
4.	"साहित्यिकीसम्मानम्"	साहित्यिकी, सरिसवपाही मधुवनी -2009
5.	‘‘तन्त्रनाथ झा" जन्मशती सम्मानम्	साक्षर, दरभङ्गा 2009
6.	‘‘सुमन स्मृति सम्मानम्"	सुमन स्मृति समिति, दरभङ्गा-2010
7.	"विद्यासागर" उपाधि'	मन्दाकिनी संस्कृत परिषद् दिल्ली 2015
8.	"अमृतसम्मानम्	बनौली, नेपाल 2016
9.	शैव भारती पुरस्कारः	जंगमवाड़ी मठ, वाराणसी 2018
10.	मिथिलारत्नम्	अन्ताराष्ट्रिय मैथिली सम्मेलनम् अयोध्या 2021

3. प्रो. शिवकान्त झा

व्यक्तित्वम् (जीवनपरिचयः)

1.	व्याकरणाचार्यस्य नाम	-	प्रो. शिवकान्त झा ।[133]
2.	पितुर्नाम	-	स्व० भोलानाथ झा ।
3.	मातुर्नाम	-	स्व. बाबू दाई देवी ।
4.	जन्मदिनांकः		10/04/1959
5.	जन्मस्थानम्	-	ग्रामः पत्रालपुश्च - गोनौली,. मण्डलम्- मधुबनी, बिहारः ।
6.	पत्नीर्नाम	-	श्रीमती सरिता झा ।
7.	संततिनाम	-	वासुदेव झा, शितांशु झा ।
8.	वर्तमाननिवासस्थानम्	-	A-278, छत्रशालनगर, (जयपुरम्)
9.	चलदूरवाणीसंख्या	-	8952884643

शिक्षा (उत्तीर्णपरीक्षाविवरणम्)

क्र. स.		**वर्षम्**	**विषयः**	**संस्था**
1.	मध्यमा (दशमी कक्षा)	1975	नव्यव्याकरणम्,	उत्तरमध्यमाबिहार बोर्ड।

[133] प्रो. शिवकान्त झा महोदयस्य साक्षाद्दर्शनमाशीर्वादञ्च प्राप्य मुखारविन्देन विश्रुत्य लिखितम्।

2.	उपशास्त्री (द्वादशी कक्षा)	1977,	”	”
3.	शास्त्री	1980	”	राष्ट्रियसंस्कृत संस्थानम् नई दिल्ली।
4.	आचार्यः	1982,	”	राष्ट्रियसंस्कृतसंस्थानम् नई दिल्ली
5.	विद्यावारिधिः (Ph.D)	1986	पाणिनीयव्याकरणे स्त्रीप्रत्ययानामध्ययनम्	

अध्यापनानुभवः

क्र.सं.	**अवधिः**	**पदनाम**	**नियोक्त्री संस्था**
1.	1987	सहायकाचार्यः	राष्ट्रियसंस्कृतसंस्थानम् (जम्मूपरिसरः)
2.	-	कनिष्ठाचार्यः	राष्ट्रियसंस्कृतसंस्थानम् (जयपुरपरिसरः)
3.	-	उपाचार्यः	राष्ट्रियसंस्कृतसंस्थानम् (जयपुरपरिसरः)
4.	2012-13	आचार्यः	राष्ट्रियसंस्कृतसंस्थानम् (जयपुरपरिसरः)
5.	2018	वरिष्ठाचार्यः	राष्ट्रियसंस्कृतसंस्थानम् (जयपुरपरिसरः)

6 .	2016-19	व्याकरणविद्याशाखा विभागाध्यक्षः।	राष्ट्रियसंस्कृतसंस्थानम् (जयपुरपरिसरः)

संपादितपुस्तकानि

	ग्रन्थः	**प्रकाशकः**
1.	पाणिनीयव्याकरणे स्त्रीप्रत्ययानामध्ययनम्	हंसा प्रकाशनम् (जयपुरम्)
2.	स्फोटतत्त्वमीमांसा	हंसा प्रकाशनम् (जयपुरम्)
3.	व्याकरणतत्त्वादर्शः	हंसा प्रकाशनम् (जयपुरम्)
4.	व्याकरणविषयको विविधनिबन्ध, शोधपत्राणि च।	हंसा प्रकाशनम् (जयपुरम्)
5.	पाणिनिसूत्रार्थतत्त्वालोक:	हंसा प्रकाशनम् (जयपुरम्)

पाणिनिसूत्रार्थतत्त्वथालोकश्च वैशिष्ट्यम्

पुस्तकपरिचयम्

व्याकरणं नामअर्थविशेषमाश्रित्य - स्वरप्रकृतिप्रत्ययार्थादीन् विशेषेण-संस्कारविशेषेण आसमन्तात् वैदिकान् लौकिकांश्च शब्दान् करोतीति तथाभूतः पाणिन्यादिमहर्षिप्रणीतो ग्रन्थसमूहः । तच्च लक्ष्यलक्षणसमन्वितमिति भगवता पतञ्जलिना प्रतिपादितं लक्षणरुपं सूत्रं सूत्रात्मकमस्तीति जानन्त्येव विद्वांसः । तच्च सूत्रं किमाकारकं कतिविधञ्च तदिति विषये सन्ति बहवः पक्षा विचाराश्च । अल्पीयसि काले तेषां समेषामध्यनमशक्यमेवेति विचार्य स्थालीपुलाकन्यायेन सर्वविधविचार-विषयानङ्गीकृत्य पाणिनिसूत्रार्थतत्त्वालोक इति नामको ग्रन्थो मया विरचितः।

ग्रन्थेऽस्मिन् सूत्रतत्त्वविषयकः सर्वशास्त्रप्रथिताः सिद्धान्ताः षड्विध-सूत्रलक्षणपुरस्परं सोदाहरणं तद्भेदाश्च प्रतिपादिताः सन्ति। मन्ये नूनमेवायं ग्रन्थोः विदुषां तोषाय प्रमोदाय च स्यादिति ।

4. प्रो. दयानाथ झा

व्यक्तित्वम् (जीवनपरिचयः)

1.	व्याकरणाचार्यस्य	-	प्रो० दयानाथ झा[134]
2.	पितुर्नाम	-	स्व. वैदिक रमानाथ झा
3.	मातुर्नाम	-	स्व. - तारा देवी
4.	जन्मदिनांकः	-	01-02-1964 ई.
5.	जन्मस्थानम्	-	ग्रा. पत्रा- माऊँवे हट (भैरवस्थान) माया-पुतई जि० - दरभङ्गा (बिहारः)
6.	वर्तमाननिवासस्थानम्	-	श्यामा-सदन, रो० नं.-07 लक्ष्मीसागरः, दरभङ्गा बिहारः ।
7.	चलदूरवाणीसंख्या	-	9708944841

[134] प्रो० दयानाथ झा महोदयस्य साक्षाद्दर्शनमाशीर्वादञ्च प्राप्य मुखारविन्देन विश्रुत्य लिखितम्।

शिक्षा (उत्तीर्णपरीक्षाविवरणम्)

क्र. स.	कक्षा	विषयः	संस्था
1.	शास्त्री	नव्यव्याकरणम्	कामेश्वरसिंहदरभङ्गा संस्कृतविश्वविद्यालयः (बिहारः)
2.	आचार्यः	व्याकरणाचार्यः साहित्याचार्यः	कामेश्वरसिंहदरभङ्गा संस्कृतविश्वविद्यालयः (बिहारः)
3.	विद्यावारिधिः (Ph.D)..	-	का.सि.द. सं०. वि. बिहारः।

अध्यापनानुभवः

क्र.सं.	अवधिः	पदनाम	नियोक्त्री संस्था
1.	1/3/1987 तः 27/10/2009 पर्यन्तम्	व्याख्याता नव्यव्याकरणम्	सं. वि. संस्कृत महाविद्यालय शोकहरा, बरौनी, वेगुसरायः
2.	1-3-1987 तः अद्यतन अद्यतन	सहाचार्य, आचार्यः प्राचार्यः	कामेश्वरसिंहदरभङ्गासंस्कृत विश्वविद्यालयः बिहारः

संपादितपुस्तकानि

1. प्रश्नोत्तरसंग्रहः
2. गणदेवता (सङ्क्षिप्त-संस्कृतानुवादः)
3. शक्तिवाद - समीक्षणम्
4. प्रौढमनोरमा (अच्सन्धिः प्रकृतिभावश्च)
5. संस्कृत-व्याकरण-चन्द्रिका ।
6. महाभाष्यमन्थनी (प्रथमोभागः)
7. सचित्र विद्वत्परिचयः

पुरस्कारः

	सम्मानम्	**संस्था**
1.	विभूति सम्मान पत्रम्	चाणक्य विद्यापति सोसाइटी (मुजफ्फरपुरः)
2.	सनातन गौरव सम्मानम्	सनातन महाकुम्भ धर्मसंसद ।

5. प्रो. श्रीधरमिश्रः

व्यक्तित्वम् (जीवनपरिचयः)

1.	व्याकरणाचार्यस्य नाम	-	प्रो० श्रीधर मिश्रः[135]
2.	पितुर्नाम	-	पं. रामेश्वर मिश्रः
3.	मातुर्नाम	-	श्रीमती फूल देवी
4.	जन्मदिनांकः	-	12/12/1964
5.	जन्मस्थानम्	-	ग्रामः - पोस्ट - जयदेव पट्टी, जिला-दरभङ्गा बिहारः !
6.	पत्नीर्नाम	-	श्रीमती दुर्गा देवी
7.	वर्तमाननिवासस्थानम्	-	A-4 छत्रशालनगरं प्रगतिमार्गं मालवीयनगरम्
8.	चलदूरवाणीसंख्या	-	9214-664411

शिक्षा (उत्तीर्णपरीक्षाविवरणम्)

क्र. सं.	कक्षा	वर्षम्	विषयः	संस्था
1.	मध्यमा (दशमी	1979	नव्यव्याकरणम्	कामेश्वरसिंहदर-भङ्गा

[135] प्रो० श्रीधर मिश्रः महोदयस्य साक्षाद्दर्शनमाशीर्वादञ्च प्राप्य मुखारविन्देन विश्रुत्य लिखितम्।

	कक्षा)			विश्वविद्यालयः, बिहारः
2.	उपशास्त्री (द्वादशी कक्षा)	1980	”	”
3.	शास्त्री	1983	”	सम्पूर्णानन्द संस्कृतविश्व विद्यालयः वाराणसी ।
4.	शिक्षा-शास्त्री	1985		श्रीलालबहादुरशास्त्री संस्कृत विश्वविद्यालयः नई दिल्ली।
5.	आचार्यः	1987	नव्यव्याकरणम् ।	”
6.	विद्या-वारिधिः (Ph.D).	1992	अजन्तलिङ्गत्रयस्यतत्त्वबोधिनी लघुशब्देन्दुशेखरयोः तुलनात्मकमध्ययनम्।	श्री. लाल बहा. शा. सं. वि. दिल्ली
7.	विद्या-वाचस्पतिः (D. Lit)	2003	परमलघुमञ्जुषाशब्दशक्तिप्रकाशिका ग्रन्थयोः तुलनात्मक-मध्ययनम्	का०सि०द० सं. वि. बिहारः ।

अध्यापनानुभवः

क्र.सं.	अवधिः	पदनाम	नियोक्त्री संस्था
1.	1988 तः 1994 पर्यन्तम्	वरिष्ठाध्यापकः	राजस्थानलोकसेवाआयोगः
2.	1994 तः 2006 पर्यन्तम्	रिडर प्रवाचकः	राष्ट्रियसंस्कृतसंस्थान जयपुरम्
3.	2006 तः 2009 पर्यन्तम्	सह आचार्यः	”
4.	2009 तः 2019 2019 तः निरन्तरः ।	आचार्यः वरिष्ठाचार्यः	”

संपादितपुस्तकानि

क्र.सं.	ग्रन्थः	प्रकाशकः
1.	तत्त्वबोधिनीलघुशब्देन्दुशेखरयोः तुलनात्मकमध्ययनम् ।	आयुर्वेद-हिन्दी संस्कृत-ग्रन्थालयः जयपुरम्
2.	वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा- श्रीधरी हिन्दी व्याख्या सहितः)।	आ. हि. सं. ग्रन्थालयः जयपुरम्
3.	संस्कृतसाहित्येजलविज्ञानम्	
4.	परमलघुमञ्जुषाशब्दशक्तिप्रकाशिकाग्रन्थयोः तुलनात्मकमध्ययनम्	
5.	व्याकरणतत्वविमर्शः	

संपादित- पत्रिका

क्र.सं.	पत्रिका	पत्रिकाविवरणम्
1.	काश्मीरशैवदर्शनम्	शोधपत्रिका
2.	शिक्षामृतम्	शोधपत्रिका
3.	श्री वैष्णवी	”

पुरस्कारः

1. आचार्यशङ्करपुरस्कारः
2. महर्षिव्यास पुरस्कारः
3. व्याकरणशास्त्रार्थपुरस्कारः।

6. प्रो. बोधकुमार झा

व्यक्तित्वम् (जीवनपरिचयः)

1. व्याकरणाचार्यस्य नाम - प्रो. बोधकुमार झा[136]
2. पितुर्नाम - स्व. रामकृपालु झा
3. जन्मदिनांकः - 18/08/1968
4. जन्मस्थानम् - ग्राम - बैलोन, पत्रा. - नवादा, बाया-बहेडा, जिला-दरभङ्गा (बिहार:)
5. चलदूरवाणीसंख्या - 7666032480

---

[136] प्रो. बोधकुमार झा महोदयस्य साक्षाद्दर्शनमाशीर्वादञ्च प्राप्य मुखारविन्देन विश्रुत्य लिखितम्।

शिक्षा (उत्तीर्णपरीक्षाविवरणम्)

क्र.सं.	कक्षा	वर्षम्	विषयः	संस्था	प्रतिशतम्
1.	मध्यमा (दशमी कक्षा)	1984	समेकितः	बिहारसंस्कृतबोर्ड पटना	64.11
2.	उपशास्त्री (द्वादशी कक्षा)	1986	नव्यव्याकरणम्	का.सि.द.	67.62
3.	शास्त्री	1989	”	”	76.33
4.	आचार्यः	1991	”	”	69
5.	विद्यावारिधिः (Ph.D).	1995	शीर्षक – परिभाषेन्दु-शेखरस्य विजयाभूति – व्याख्ययोस्तुलनात्मकमध्ययनम् ।		

अध्यापनानुभवः

क्र.सं.	अवधिः	पदनाम	नियोक्त्री संस्था
1.	13/09/93 14/08/97 पर्यन्तम्	व्याख्याता	वनस्थली विद्यापीठ मानित विश्वविद्यालयः

2.	16/08/97 तः 19/06/2005 पर्यन्तम्	वरिष्ठव्याख्याता	राष्ट्रिय संस्कृतसंस्थानम् नईदिल्ली
3.	20/06/2005 तः 19/06/2008 पर्यन्तम्	उपाचार्य :	”
4.	20/6/2008 तः 19/06/2011 पर्यन्तम्	सहाचार्य:	”
5.	20/6/2011 तः निरन्तरम्	आचार्यः	”

6. प्रकाशित मौलिक पुस्तकानि

क्र.सं.	ग्रन्थ	ग्रन्थविवरणम्	वर्षम्	ISBN No.
1.	षोडश संस्कारः एक वैज्ञानिक विवेचना	अनुगम ग्रन्थः	1997	81-861-20-35-1
2.	ब्राह्मणविज्ञानसङ्ग्रहः	सन्दर्भ ग्रन्थः	1997	81-85234-50-7
3.	अद्भुतधातुरूपावलिः	रचनात्मक ग्रन्थः	2000	81-86120-69-6
4.	मध्यसिद्धान्तकौमुदी (प्रकरणचतुष्टयम्)	टीका ग्रन्थः	2002	81-86120-9-X

5.	परिभाषेन्दुशेखरस्य विजयाभूति-व्याख्यायोस्तुलनात्म-कमध्ययनम्	शोध ग्रन्थः	2007	978-81-88257-24-9
6.	वैयाकरणसिद्धान्तदिग्दर्शनम्	अनुगम ग्रन्थः	2007	978-81-89228-23-1
7.	वैयाकरणभूषणसारः	प्रश्नोत्तरी	2008	-
8.	व्युत्पत्तिवादः (अभेदान्वयपर्य्यन्तः)	प्रश्नोत्तरी	2008	-
9.	वाक्यपदीयम् (ब्रह्मकाण्डम्)	प्रश्नोत्तरी	2008	-
10.	परिभाषेन्दुशेखरः	प्रश्नोत्तरी	2008	-
11.	परमलघुमञ्जूषा	प्रश्नोत्तरी	2008	-
12.	समासस्तुदव्ययीभावश्च	विश्लेषण ग्रन्थः	2011	978-93-80651-28-6
13.	वैयाकरणसिद्धान्तकौमुदी, पाठ-5 (मुक्तस्वाध्यायपीठम्, राष्ट्रिय संस्कृत संस्थान)	पाठ्य ग्रन्थः	2013	978-93-82091-24-0

14.	परमलघुमञ्जूषा (टीकात्रयोपेता) सङ्गीता संस्कृत-हिन्दी व्याख्या, परितोषिणी व्याख्या च	पाठ्य ग्रन्थः पृ. 816	2018	978-93-81954-90-4

(7) सम्पादित पुस्तकानि

क्र.सं.	**ग्रन्थः**	**ग्रन्थविवरणम्**	**वर्षम्**	**प्रकाशकः**
15.	संस्कृतज्ञानम्, (1-5 भाग)	पाठ्यपुस्तकम्	2009	महर्षि विद्यामन्दिरम् भोपाल।
16.	पातञ्जलमहाभाष्यम्, (1-5 भाग)	पाठ्यपुस्तक, मुक्त स्वाध्याय पीठम्	2010	राष्ट्रिय संस्कृत संस्थानं, नई दिल्ली।
17.	परिभाषेन्दुशेखरः (1-7 भाग)	पाठ्यपुस्तक, मुक्त स्वाध्याय पीठम्	2010	राष्ट्रिय संस्कृत संस्थानं, नई दिल्ली।
18.	अतिदेशसूत्रव्याख्यानम् ISBN 978-923834-0-8	समीक्षाग्रन्थः	2011	राष्ट्रिय संस्कृत संस्थान, मानित-विश्वविद्यालय, क.जे. संस्कृतविद्यापीठ, सोमैया मुम्बई।

(8) पाठ्यग्रन्थ सहलेखनम्

क्र.सं.	पाठ्यग्रन्थः	प्रकाशकः
19.	संस्कृतस्वाध्यायः (द्वितीयदीक्षा), व्यवहारप्रदीपः (1-3 भाग)	राष्ट्रिय संस्कृत संस्थान, नई दिल्ली, 2004 (बेंगलुरु)

(9) सम्पादित पत्रिका

क्र.सं.	पत्रिका	ISSN NO.	पत्रिका विवरण	वर्षम्	प्रकाशक
1.	श्रीवैष्णवी	-	वार्षिकी	2001-2002	राष्ट्रिय संस्कृत संस्थानं, जम्मू परिसरः।
2.	श्रीवैष्णवी		वार्षिकी	2004-2005	राष्ट्रिय संस्कृत संस्थानं, जम्मू परिसरः
3.	राष्ट्री		वार्षिकी	2005-2006	राष्ट्रिय संस्कृत संस्थानं, भोपाल परिसरः
4.	आर्या		त्रैमासिकी	2007 सि.	मध्यप्रदेश संस्कृत बोर्ड, भोपाल।

5.	आर्या		त्रैमासिकी	2008 जन	मध्यप्रदेश संस्कृत बोर्ड, भोपाल।
6.	विद्यारश्मिः	2277-6443	वार्षिकी	2011	राष्ट्रिय संस्कृत संस्थानं, मुम्बई परिसरः
7.	विद्यारश्मिः	2277-6443	वार्षिकी	2012	राष्ट्रिय संस्कृत संस्थानं, मुम्बई परिसरः
8.	विद्यारश्मिः	2277-6443	वार्षिकी	2013	राष्ट्रिय संस्कृत संस्थानं, मुम्बई परिसरः
9.	वेदज्योतिष्मती	2349-310	अन्ताराष्ट्रिय मासिकी	2014	दरभङ्गा, लहेरियासराय।
10.	वेदज्योतिष्मती	2349-310	अन्ताराष्ट्रिय त्रैमासिकी	2014	दरभङ्गा, लहेरियासराय।
11.	वेदज्योतिष्मती	2349-310	अन्ताराष्ट्रिय त्रैमासिकी	2014	दरभङ्गा, लहेरियासराय।

12.	विद्यारश्मिः	2277-6443	वार्षिकी	2015	राष्ट्रिय संस्कृत संस्थानं, मुम्बई परिसरः।
13.	वेदज्योतिष्मती	2349-310	अन्ताराष्ट्रिय त्रैमासिकी	2015	दरभङ्गा, लहेरियासराय।
14.	वेदज्योतिष्मती	2349-310	अन्ताराष्ट्रिय त्रैमासिकी	2015	दरभङ्गा, लहेरियासराय।
15.	वेदज्योतिष्मती	2349-310	अन्ताराष्ट्रिय त्रैमासिकी	2015	दरभङ्गा, लहेरियासराय।
16.	विद्यारश्मिः	2277-6443	वार्षिकी	2016	राष्ट्रिय संस्कृत संस्थानं, मुम्बई परिसरः।
17.	शाब्दी		वार्षिकी	2016	व्याकरणविभाग, राष्ट्रिय संस्कृत संस्थान, मुम्बई परिसरः।
18.	वाग्वै ब्रह्म	2457-0729	वार्षिकी	2017	व्याकरणविभाग, राष्ट्रिय संस्कृत संस्थान, मुम्बई परिसरः ।

19.	वाग्वै ब्रह्म	2457-0729	वार्षिकी	2018	व्याकरणविभाग, राष्ट्रिय संस्कृत संस्थान, मुम्बई परिसरः।
20.	विद्यारश्मिः	2277-6443	वार्षिकी	2018	राष्ट्रिय संस्कृत संस्थान, मुम्बई परिसरः।
21.	विद्यारश्मिः	2277-6443	वार्षिकी	2022-23	केन्द्रीय संस्कृत विश्वविद्यालय, मुम्बई परिसरः।
22.	वाग्वै ब्रह्म व्याकरणविभागः केन्द्रीय	2457-0729	वार्षिकी	2022-23	संस्कृत विश्वविद्यालयः मुम्बई परिसरः।

पुरस्कारः

क्र.	**परीक्षा प्रतिस्पर्धा**	**स्थानम्**	**वर्षम्**
1.	सिद्धान्तकौमुदीशलाकापरीक्षा	संस्कृत विश्वविद्यालयः दरभङ्गा	1989
2.	संस्कृतवादविवादप्रतियोगिता	कालिदाससंस्कृत अकादमी, उज्जैन	1991

3.	अखिलभारतीयसंस्कृतवाक्प्रतिस्पर्धा	मानवसंसाधनविकासमन्त्रालय, भारत सरकारः	1990 - 1993
4.	संस्कृतभाषणप्रतियोगिता	संस्कृतविश्वविद्यालयः दरभङ्गा	1991
5.	अखिलभारतीयसंस्कृतनिबन्धप्रतियोगिता	संस्कृतकल्याणपरिषद, भोपाल	29-03-2007

7. प्रो० विनोद कुमार झा

व्यक्तित्वम् (जीवनपरिचयः)

1. व्याकरणाचार्यस्य नाम - प्रो० विनोद कुमार झा[137]
2. पितुर्नाम - श्री प्रेम मुन्दर झा
3. जन्मदिनांकः - 15/06/1973
4. वर्तमाननिवासस्थानम् - आदित्य उद्यानम्, वेरावलं, जनपद-गिर- सोमनाथः ।
5. चलदूरवाणीसंख्या - 8320072271

---

[137] प्रो० विनोद कुमार झा महोदयस्य साक्षाद्दर्शनमाशीर्वादञ्च प्राप्य मुखारविन्देन विश्रुत्य लिखितम्।

शिक्षा (उत्तीर्णपरीक्षाविवरणम्)

क्र.स.		वर्षम्	विषयः	संस्था
1.	मध्यमा (दशमी कक्षा)	1987,	नव्यव्याकरणम्	सम्पूर्णानन्द संस्कृत विश्वविद्यालयः वाराणसी
2.	उपशास्त्री (द्वादशी कक्षा)	1989,	नव्यव्याकरणम्,	”
3.	शास्त्री	1992	नव्यव्याकरणम्,	”
4.	शिक्षाशास्त्री	1997,	संस्कृतम्	”
5.	आचार्यः	1994,	नव्यव्याकरणम्,	”
6.	विद्यावारिधिः (Ph.D).	1999	पञ्चसन्ध्यन्तशेखरकारोपज्ञ विचाराणां पर्यालोचनम्।	सम्पूर्णानन्दसंस्कृत विश्वविद्यालयः, वाराणसी।

अध्यापनानुभवः

क्र.सं.	अवधिः	पदनाम	नियोक्त्री संस्था
1.	13/7/1998 तः 30/09/2011 पर्यन्तम्	सहायकाचार्यः	वनस्थली विद्यापीठम्

2.	1/10/2011 तः 2/3/2014 पर्यन्तम्।	आचार्यः	वनस्थलीविद्यापीठः
3.	5/3/2014 तः अद्यावधिः	आचार्यः	श्री सोमनाथसंस्कृत विश्वविद्यालयः वेरावल गुजरात।

संपादितपुस्तकानि

क्र.सं.	**ग्रन्थः**	**प्रकाशकः**
1.	नागेशभट्टस्यमौलिक विचाराः।	नारायणप्रकाशनम् (जयपुरम्)
2.	लघुसिद्धान्तकौमुदी गीतावृत्तिव्याख्या सहित। (भाग-प्रक्रिया)	कल्पना प्रकाशनम् (दिल्ली)
3.	लघुसिद्धान्तकौमुदी गीतावृत्तिव्याख्या सहित। (भाग-सन्धि)	निर्मल प्रकाशनम्
4.	लघुसिद्धान्तकौमुदी गीतावृत्तिव्याख्या सहित। (स्त्रीप्रत्ययभाग)	कल्पना प्रकाशनम्

8. डॉ. दयाराम दासः

व्यक्तित्वम् (जीवनपरिचयः)

1. व्याकरणाचार्यस्य नाम - डॉ. दयाराम दासः[138]
2. पितुर्नाम - श्री नृत्यगोपाल दासः
3. मातुर्नाम - श्रीमती जानकी देवी
4. जन्मदिनांकः - 20/08/1974
5. जन्मस्थानम् - अयोध्या
6. वर्तमाननिवासस्थानम् – हरवंशपुरा, जयपुरम्
7. चलदूरवाणीसंख्या - 9928295878

शिक्षा (उत्तीर्णपरीक्षाविवरणम्)

क्र.सं.	कक्षा	वर्षम्	विषयः	संस्था
1.	मध्यमा (दशमी कक्षा)	1999	नव्यव्याकरणम्	सं. सं. वि. वाराणसी
2.	उपशास्त्री (द्वादशी कक्षा)	2001	नव्यव्याकरणम्	संम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

[138] डॉ. दयाराम दासः महोदयस्य साक्षाद्दर्शनमाशीर्वादञ्च प्राप्य मुखारविन्देन विश्रुत्य लिखितम्।

3.	शास्त्री	2004	”	
4.	आचार्यः	2006	”	
5.	विद्यावारिधिः (Ph.D).. संस्कृत	2012	”	जगद्गुरुरामानन्दाचार्य विश्वविद्यालयः, जयपुरम्
6.	विद्यावारिधिः (Ph.D)		”	राष्ट्रिय संस्कृत संस्थानं जयपुर परिसरः

अध्यापनानुभवः

क्र.सं.	अवधिः	पदनाम	नियोक्त्री संस्था
1.	21/03/2012 तः निरन्तरः	सहायकाचार्यः	जगद्गुरुरामानन्दाचार्यः, जयपुरम्

संपादितपुस्तकानि

	ग्रन्थः	वर्षम्	प्रकाशकः
1.	सुगमसंस्कृतव्याकरणप्रवेशिका	2009	ब्रह्मपीठधाम शाहपुरा जयपुरम्

2.	संस्कृतवक्तव्यम्	2012	हंसाप्रकाशनम् जयपुरम्
3.	वैयाकरणसिद्धान्तकौमुदी बालमनोरमा विमर्शः		”

9. प्रो० विष्णुकान्त पाण्डेयः

व्यक्तित्वम् (जीवनपरिचयः)

1. व्याकरणाचार्यस्य नाम - प्रो० विष्णुकान्त पाण्डेयः[139]
2. पितुर्नाम - श्री चन्द्रकान्तपाण्डेयः
3. मातुर्नाम - स्व. निर्मला देवी
4. जन्मदिनांकः - 01-06-1977
5. जन्मस्थानम् - ग्रा.पो.-बबुरा (छानबे) मीरजापुर उत्तरप्रदेश,
6. पत्नीर्नाम - श्रीमती रंजना पाण्डेयः
7. वर्तमाननिवासस्थानम् - प्लाट न. 80 गणेश-विहार : गोपालपुरा बाईपास जयपुरम्।
8. चलदूरवाणीसंख्या - 8560021688

---

[139] प्रो० विष्णुकान्त पाण्डेयः महोदयस्य साक्षाद्दर्शनमाशीर्वादञ्च प्राप्य मुखारविन्देन विश्रुत्य लिखितम्।

शिक्षा (उत्तीर्णपरीक्षाविवरणम्)

क्र. सं.	परीक्षा	वर्षम्	विषयः	संस्था श्रेणी	प्रतिशतम्
1.	मध्यमा (दशमी कक्षा)	1991	नव्यव्याकरणम्	स.स. वि. वाराणसी	43.4%
2.	उपशास्त्री (द्वादशी कक्षा)	1993	नव्यव्याकरणम्	"	58.8%
3.	शास्त्री	1996	नव्यव्याकरणम्	"	59%
4.	आचार्यः	1998	नव्यव्याकरणम्	"	89.8%
5.	विद्यावारिधिः (Ph.D)..	2002	वैभाकरणभूषणसारानुगत दार्शनिकतत्त्वानुशीलनम्		

अध्यापनानुभवः

क्र.सं.	अवधिः	पदनाम	नियोक्त्री संस्था
1.	2-12-1999 तः 23-08-2005 पर्यन्तम्	व्याख्याता	श्रीसीताराम वैदिकादर्शसंस्कृत महाविद्यालयः (कोलकाता)
2.	24-6-2005 तः 15-8-2011	सहायक आचार्यः	राष्ट्रियसंस्कृतसंस्थानम् जयपुर परिसरः।

3.	16-8-2011 तः 15-8-2014	सहाचार्यः	"
4.	16-8-2014 निरन्तरः	आचार्यः	"

सम्पादितपुस्तकपत्रिकाश्च

संस्कृतिशोधसन्देशः (त्रैमासिकशोधपत्रिका)	प्रधानसम्पादक: 2015 निरन्तर 1×4=4 प्रतिवर्षम्	ISSN-No. 239-4-10224-1022	प्रकाशकः- श्रीमतीमोहरीदेवी तापडिया शोधसंस्थानम् जसवन्तगढम् राजस्थानम्
जयन्ती (त्रयोदशं पुष्पम्)	सम्पादकः (2016 वर्षम्)	Issn-no.2248-9495	राष्ट्रियसंस्कृत संस्थानम् (मानितविश्वविद्यालयः) जयपुरपरिसरः वर्तमाने- केन्द्रियसंस्कृतविश्वविद्यालयः जयपुरपरिसरः
जयन्ती (चतुर्दशं पुष्पम्)	सम्पादकः (2017 वर्षम)	Issn-no.2248-9495	राष्ट्रियसंस्कृत संस्थानम् (मानितविश्वविद्यालयः

			) जयपुरपरिसरः वर्तमाने- केन्द्रियसंस्कृतविश्वविद्यालयः जयपुरपरिसरः
व्याकृतिः व्याकरण-विभागीयपत्रिका	सहसंपादकः		राष्ट्रियसंस्कृत संस्थानम् (मानितविश्वविद्यालयः) जयपुरपरिसरः वर्तमाने- केन्द्रियसंस्कृतविश्वविद्यालयः जयपुरपरिसरः
महाभाष्यस्य प्रथमद्वितीयाध्याय-स्थसिद्धान्तविमर्शः (व्याकरणविभागीयग्रन्थः)	सहसम्पादकः 2019-20	lsbn no.978-93-84708-04-7	राष्ट्रियसंस्कृत संस्थानम् (मानितविश्वविद्यालयः) जयपुरपरिसरः वर्तमाने- केन्द्रियसंस्कृतविश्वविद्यालयः जयपुरपरिसरः
वैयाकरणभूषणसार तत्त्वमीमांसा	सम्पादकः	वैयाकरणभूषण सार तत्त्वमीमांसा	प्रतिभाप्रकाशकः दिल्ली
लघुशब्देन्दुशेखरकारक प्रकरणम्	सम्पादकः	लघुशब्देन्दुशेखर कारकप्रकरणम्	मुक्तस्वाध्यायपीठम्

1. शोधपत्राणि

शब्दस्य प्रातिपदि-कार्थत्वविमर्श:	2015-16	व्याकृतिः व्याकरण-विभागीयपत्रिका	राष्ट्रियसंस्कृत संस्थानम् (मानितविश्वविद्यालयः) जयपुरपरिसरः वर्तमाने-केन्द्रियसंस्कृतविश्वविद्या लयः जयपुरपरिसरः
वेदस्य प्रतिपाद्यम्	2015-16	श्रुतिसुधा वेदविभागीयपत्रिका	राष्ट्रियसंस्कृत संस्थानम् (मानितविश्वविद्यालयः) जयपुरपरिसरः वर्तमाने-केन्द्रियसंस्कृतविश्वविद्या लयः जयपुरपरिसरः
समासग्रहणस्य-नियमार्थत्वविमर्श:	2015-16 issn-no.2394-1022	संस्कृतिशोधसन्देशः (त्रैमासिकशोधपत्रि का)	प्रकाशकः श्रीमतीमोहरीदेवी तापडिया शोधसंस्थानम् जसवन्तगढम् राजस्थानम्
शक्तिग्राहकोपायाः	2016	श्रावणी	निदेशालयः संस्कृतशिक्षा राजस्थानम्
लक्षणावृत्तेरन्यथा सिद्धिः	2017 issn-no.-2248-9495	जयन्ती (चतुर्दशं पुष्पम्)	राष्ट्रियसंस्कृत संस्थानम् (मानितविश्वविद्यालयः) जयपुरपरिसरः वर्तमाने-केन्द्रियसंस्कृतविश्वविद्या लयः जयपुरपरिसरः

धातोः किम्? हाहान् इति दीक्षितमतस्य नागेशदृष्ट्या समीक्षणम्	2018 issn-n0.2248-9495	जयन्ती (पञ्चदशं पुष्पम्)	राष्ट्रियसंस्कृत संस्थानम् (मानितविश्वविद्यालयः) जयपुरपरिसरः वर्तमाने-केन्द्रियसंस्कृतविश्वविद्यालयः जयपुरपरिसरः
'कृन्मेजन्तः' इति सूत्रविमर्शः	2019 isbn-no-978-93-84708-04-7	व्याकरणविभागीयग्रन्थः	राष्ट्रियसंस्कृत संस्थानम् (मानितविश्वविद्यालयः) जयपुरपरिसरः वर्तमाने-केन्द्रियसंस्कृतविश्वविद्यालयः जयपुरपरिसरः
व्यापारस्य धात्वर्थत्वे प्रमाणम्	2019-20 lssn-no-2248-9495	जयन्ती षोडशं पुष्पम्	राष्ट्रियसंस्कृत संस्थानम् (मानितविश्वविद्यालयः) जयपुरपरिसरः वर्तमाने-केन्द्रियसंस्कृतविश्वविद्यालयः जयपुरपरिसरः
कतिपयपाणिनीयसूत्र- स्थपदानाम् विवक्षि-तत्त्वाविवक्षि-तत्त्वत्विमर्शः	2015-16 issn-no-2394-1022	संस्कृतिशोधसन्देशः (त्रैमासिकशोधपत्रिका)	प्रकाशकः- श्रीमतीमोहरीदेवी तापडिया शोधसंस्थानम् जसवन्तगढम् राजस्थानम्

लघुशब्देन्दुशेखरः (कर्मकरण-संप्रदानकारकाणि) 5 पाठ	Isbn-978-93-82091-42-42015-16	मुक्तस्वाध्यायपीठम् आचार्य द्वितीय वर्ष व द्वितीय पत्र मे पाच पाठ प्रकाशित	मुक्तस्वाध्यायपीठम् राष्ट्रिय संस्कृत संस्थानम् (मानित विश्वविद्यालयः) नव देहली वर्तमाने-केन्द्रियसंस्कृत-विश्वविद्यालयः जयपुरपरिसरः

पुरस्कारः

1.	महर्षिबादरायणपुरस्कार:	राष्ट्रपति महोदयेन
2.	केन्द्रियविश्वविद्यालयशिक्षाभूषणम्	कुलपतिमहोदयेन प्रदत्तम्
3.	पण्डितराजः उपाधिः	पाणिनीय शोध संस्थानम् (छतरपुरम्)

10. प्रो. ब्रजभूषण ओझा

व्यक्तित्वम् (जीवनपरिचयः)

1.	व्याकरणाचार्यस्य नाम	-	प्रो. ब्रजभूषण ओझा[140]
2.	पितुर्नाम	-	श्री रामेश्वर ओझा
3.	मातुर्नाम	-	श्रीमती शान्ति देवी
4.	जन्मदिनांकः	-	03/02/1978
5.	जन्मस्थानम्	-	ग्रामः-सिसई, जनपदः – गोपालगंजः बिहार:
8.	वर्तमाननिवासस्थानम्	-	व्याकरणविभागः, सं. सं.वि. वाराणसी उत्तरप्रदेश:
9.	चलदूरवाणीसंख्या	-	9479584256

शिक्षा (उत्तीर्णपरीक्षाविवरणम्)

क्र. स.	कक्षा	वर्षम्	विषयः	संस्था
1.	मध्यमा (दशमी कक्षा)	1993	नव्यव्याकरणम्	सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः वाराणसी।

[140] प्रो. ब्रजभूषण ओझा महोदयस्य साक्षाद्दर्शनमाशीर्वादञ्च प्राप्य मुखारविन्देन विश्रुत्य लिखितम्।

2.	उपशास्त्री (द्वादशी कक्षा)	1995	”	”
3.	शास्त्री	1998	”	”
4.	आचार्यः	2000	”	”
5.	विद्यावारिधिः (Ph.D)	2007		
6.	विद्यावाचस्पतिः (D. Lit)..	“दर्शनान्तरमता-लोचनपूर्वकं शब्द-शास्त्रानुगतविभक्त्यर्थानुशीलनम्"।		

अध्यापनानुभवः

क्र.सं.	**अवधिः**	**पदनाम**	**नियोक्त्री संस्था**
1.	23/3/2003 तः 31/05/2003 पर्यन्तम्	अतिथि अध्यापकः।	सम्पूर्णानन्द संस्कृत विश्वविद्यालयः वाराणसी। (उत्तरप्रदेशः)
2.	24/07/2003 17/06/2005 पर्यन्तम्	व्याख्याता संस्कृत	केन्द्रिय सांस्कृतिकसंस्थानम् (अरुणाचलप्रदेशः)
3.	20/6/05 तः 25/8/2017	सहायकाचार्यः एवं सहाचार्यः	राष्ट्रियसंस्कृतसंस्थानम्

4.	26/8/2017 तः 2/03/2020 पर्यन्तम्	सहाचार्यः	बनारसहिन्दूविश्वविद्यालयः (वाराणसी) उत्तरप्रदेशः

संपादितपुस्तकानि

	ग्रन्थः	**प्रकाशकः**
1.	वैयाकरणसिद्धान्तकौमुदी (स्त्री प्रत्ययप्रकरणम्)	राष्ट्रियसंस्कृतसंस्थानम् (नई दिल्ली)
2.	वैयाकरण सिद्धान्तकौमुदी (कारकप्रकरणम्)	”
3.	शिक्षणप्रशिक्षणं सन्दर्शिका	”
4.	शब्दशास्त्रीयनिबन्धमणिमाला।	प्रभाकरप्रकाशनम् (नई दिल्ली)।
5.	वैयाकरणभूषणतत्त्वमीमांसा (व्याकरणदर्शनांशमाश्रित्य)	ज्ञान भारती पब्लिकेशन्स

संपादित- पत्रिका

	पत्रिका	**वर्षम्**	**प्रकाशकः**
1.	राष्ट्री	2007	रा. सं. सं. भोपालपरिसरः भोपालः

2.	राष्ट्री	2008	”
3.	राष्ट्री	2011	”
4.	राष्ट्री	2014	”
5.	राष्ट्री	2015	”
6.	शास्त्रमीमांसा	2016	”
7.	व्याकरणमीमांसा	2016	”
8.	पौष्पी नव्यसिद्धान्तकौमुदी		प्रतिभाप्रकाशनम् (दिल्ली)
9.	पदगंगा	2017	रा.सं. स. वेदव्यासपरिसरः (हिमाचलप्रदेशः)
10.	शोधसारांशविवरणिका	2017	व्याकरणविभागः। (S.V.D.V.B.H.U.)
11.	सर्वशास्त्रोपकारकं पाणिनीयशास्त्रम्	2019	
12.	वाग्भोगवैभवम्	2020	काशी ग्राफिक्स वाराणसी।

पुरस्कारः

	नाम	संस्था
1.	महर्षि बादरायणव्यासम्मानम्।	राष्ट्रपति, भारत सर्वकारः।
2.	श्री मरकतवल्लीसम्भावनापुरस्कारः	अखिलभारतीयप्राच्य विद्यासम्मेलनम्।
3.	शास्त्रकलानिधिः	श्री सद्गुरुवासुदेवान्त सरस्वती तथा श्रीबाबामहाराज समाधिमन्दिरम् पुणे।
4.	संस्कृतभूषणम्	राष्ट्रियसंस्कृतसंस्थानम् (भोपालपरिसरः)
5.	वैभाकरणभूषणम्	आर्ष गुरुकुलमहाविद्यालयः नर्मदापुरम् होशंगाबाद (म. प्र.)
6.	अभिनवपतञ्जलिः	वाराणस्याः ध्वनिः, राष्ट्रिय हिन्दी चैनल
7.	राष्ट्रीयगौरवरत्नसम्मानम्	वाराणस्याः ध्वनिः, राष्ट्रिय हिन्दी चैनल
8.	काशीविद्वद्भूषणम्	बी. ए. पी. एस. स्वामी नारायण शोध संस्थानम्

		अक्षरधाम (नई दिल्ली)
9.	शास्त्रकलानिधिः	राज्यपालमहोदयः (म०प्र०)
10.	राष्ट्रगौरवः	वाग्योगचेतनापीठम्, वाराणसी

इति पञ्चमोऽध्यायः

❖ ❖ ❖

षष्ठोऽध्यायः

1. स्वातन्त्र्योत्तरकाले चर्चितानामभिनवसिद्धान्तानां समीक्षणम्।

(i) 'स्वातन्त्र्योत्तरकाले पाणिनीयव्याकरणे प्रमाणसमीक्षणम्' ।

(ii) 'स्फोटसिद्धान्तस्य विकासे स्वातन्त्र्योत्तरकालीनशाब्दिकमतानां विमर्शः'।

(iii) स्वातन्त्र्यात्परं व्याकरणशास्त्रदृष्ट्या मोक्षनिरूपणम्।

(iv) "पाणिनीयव्याकरणदृष्ट्या आधुनिकभाषासिद्धान्तानाम् उत स्वातन्त्र्यात्परं भाषाविषयक-सिद्धान्तानां व्याकरणगम्यता न वेति पर्यालोचनम्"

2. स्वातन्त्र्यात्परं व्याकरणशास्त्रमधिकृत्य संस्कृतभाषायां वा संस्कृतेतरभाषायां विरचितानां प्रमुखग्रन्थानाम् (धातु-शिक्षा-उणादि-सूत्र-समास-लिङ्गग्रन्थानाम्) अकारादिक्रमेण संक्षिप्तपरिचयः वैशिष्ट्यञ्च ।

3. स्वातन्त्र्यात्परं व्याकरणशास्त्रमधिकृत्य प्रमुखानां संस्कृतग्रन्थप्रणेतृणां ग्रन्थैः सह अकारादिक्रमेण प्रणीता सूची।

4. उपसंहारः

* शोधग्रन्थसहायकग्रन्थानां सूची

अथ षष्ठोऽध्यायः

1. स्वातन्त्र्योत्तरकाले चर्चितानामभिनवसिद्धान्तानां समीक्षणम्

(i) स्वातन्त्र्योत्तरकाले पाणिनीयव्याकरणे प्रमाणसमीक्षणम्-

प्रमाणादेव प्रमेयसिद्धिः। अत एव शास्त्रकारैः प्रथमं प्रमाणान्येव व्यवस्थाप्यन्ते। शाब्दिकशिरोमणिभिश्च कुत्रापि नैतत् प्रतिपादितं यत् तैः कियन्ति कीदृशानि च प्रमाणानि स्वीक्रियन्ते, प्रत्युत तत्र तत्र पदार्थानां विवेचनावसरे कदाचित् तार्किकाः कदाचित् मीमांसकाः कदाचिच्च वेदान्तिनोऽनुस्रियन्ते।

पाणिनीयव्याकरणाभिमतप्रमाणव्यवस्था महाभाष्याद्याकरग्रन्थेषु विकीर्णैवासीत्। यद्यपि शाब्दिकसम्मतानि प्रमाणानि इयत्तया इदमाकारकत्वेन च स्पष्टयितुं कठिनानि तथापि महाभाष्यवाक्य-पदीयादिग्रन्थानामवलोकनेन प्रत्यक्षानुमानार्थापत्तिशब्दानुपलब्धिः प्रभृतयः प्रमाणत्वेन वैयाकरणनिकायेऽपि निर्धारिताः शाब्दिकैः।

प्रमाणस्य भेदविषये विभिन्नदर्शनाचार्याणां नानामतानि[141] -

1. चार्वाकमतानुयायिनः -

तत्र प्रत्यक्षमेवैकं प्रमाणम्, अनुमानं तु प्रमाणपदीं नाधिरोढुमर्हति यतश्चानुमानं व्याप्तिज्ञानम्। तच्च 'यत्र यत्र धूमस्तत्र तत्राग्निः, इति सार्वदेशिकं धूममग्निं च

---

141 पा. व्या. प्र. समीक्षा प्रस्तावना, पृष्ठ-9-10

विषयकरोति। तादृशस्य धूमादेश्च ज्ञानं प्रत्यक्षात्मकमसम्भवमेव । आनुमानिकं स्वीक्रियते चेदनवस्थादोष आपतति ।[142]

आप्तवाक्यमपि प्रमाणकोटौ प्रवेष्टुं नार्हति। श्रवणेन्द्रियेण गृह्यमाणं तद् वाक्यं वस्तुभूत नाम। परन्तु आप्तवाक्येनोपस्थितोऽर्थो न श्रद्धास्पदम्। एवमेवार्थापत्तादि-प्रमाणेनाप्युपस्थापितोऽर्थो स्वीकर्तुं न शक्यतेश्रद्धेयत्वादेव । ततः प्रवृत्तौ सत्यामर्थोप-लब्धिस्तु काकतालीयन्यायेनैवेति सिद्धान्तयन्ति प्रत्यक्षवादिनः चार्वाकमतानुयायिनः।

2. बौद्ध-वैशेषिकदर्शनाचार्यानुसारम् -

मा भूत् सकलधूमाग्न्योः प्रत्यक्षादिकम्, भूयोदर्शनेनैव व्याप्तिज्ञानं सुकरम्। न च व्यभिचारसंशयः, धूमाग्न्योः कार्यकारणाभावस्य प्रत्यक्षेण तदुच्छेदस्य सुसाधत्वात्। अतश्चानुमानमपि स्वतन्त्रं प्रमाणम्। शब्दस्तु प्रत्यक्षानुमानसिद्धार्थबोधक इति न स्वतन्त्रं प्रमाणम्, अपि त्वनुमान् विधयैव बोधकत्वात्। आप्तोच्चरित एव शब्दस्तद्रूपतयापि प्रमाणम्, न तून्मत्ताद्युच्चरितः। अत्र वक्तृप्रामाण्येन तदुक्तस्य शब्दस्य प्रामाण्यमनुमेयमित्यनुमानाधीनत्वं शब्दस्येति प्रतिपादयन्ति सिद्धान्तरूपेण बौद्धवैशेषिकदर्शनमतानुयायिनः ।[143]

3. सांख्ययोगदर्शनाचार्यानुसारम् –

प्रत्यक्षानुमानागोचरधर्माधर्मादिनिर्णययार्थ मन्त्रब्राह्मणात्मकवेदाना-माप्तोक्तानां समेषां चापि स्वतन्त्रमेव प्रामाण्यमिति कथयन्ति प्रत्यक्षानुमान-शब्दाख्यप्रमाणत्रियवादिनः सांख्ययोगदर्शनाचार्याः ।[144]

---

142 प्रत्यक्षमेवैकं प्रमाणिति चार्वाका, (न्यायम, पू. भा. पू. 26. स.द.स. चार्वाकदर्शनम्)

143 प्रत्यक्षानुमानागमाः प्रमाणमिति वैशेषिकाः (प्र.मा.पू. 7

144 दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात्। त्रिविधं प्रमाणमिष्टम्, प्रमेयसिद्धिः प्रमाणाद्धि ।। (सां.त.कौः का-4)

4. न्यायदर्शनाचार्यानुसारम् -

गोसादृश्यज्ञानेन गवयपदार्थे गवयपदीयशक्तिग्रहार्थमुपमानपि प्रमाण-मिति। एते प्रत्यक्षानुमानोपमानशब्दाश्चत्वारि[145] प्रमाणानीति स्वीकुर्वन्ति।

5. मीमांसकप्राभाकरानुसारम् -

दिवाऽभुञ्जानं देवदत्त स्थूलं दृष्ट्वा रात्रिभोजनवानयमवश्यमस्ति इत्युपपाद्य स्थौल्यज्ञानेनोपपादकं रात्रिभोजनं कल्पयन्तोऽर्थापत्तिमपि पञ्चमं प्रमाणमुपस्थापयन्ति चाङ्गीकुर्वन्ति मीमांसकविशेषाः प्राभाकराः।[146]

6. मीमांसका भट्टपादानुयायिनः, अद्वैतवेदान्तिनोऽध्यात्मवित्तमाश्च

प्रत्यक्षादीनां अभावस्य ज्ञानं भवितुं नार्हति। अपि तु यथा यक्षस्तथा बलिः' इति न्यायेन तज्ज्ञानार्थमनुपलब्धिरपि षष्ठ प्रमाणमिति[147] स्वीकुर्वन्ति।

7. जैनदर्शनाचार्यानुसारम् -

प्रत्यक्ष परोक्षमिति द्विविधं प्रमाणम्। तत्र स्मृतिप्रत्यभिज्ञानो-हानुमानागमभेदात् पञ्चविधं परोक्षमिति कथयन्ति जैनदर्शनमतावलम्बिनः।

8. पुराणविद्यावित्तमानुसारं तान्त्रिकसत्तमानुसारञ्च -

प्रत्यक्षमनुमानमुपमानं शब्दोऽर्थापत्तिरनुपलब्धिः सम्भव ऐतिह्यं चेत्यष्टौ प्रमाणानि इति पुराणविद्यावित्तमाः स्वीकुर्वन्ति । चेष्टासहितान्येतानिनव इति तान्त्रिकसत्तमाः कथयन्ति।

---

145 प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि। (न्या.सू. 1/1/3)

146 तत्र पञ्चविधं मानम् इति गुरोर्मतम्। (प्रकरण-प. पू. 144)

147 अतः षडेव प्रमाणानि, तथा च भगवद्रामायणे-राम षडयुक्तो लोके याभिः सर्वोऽनुदृश्यते इति (शा.दी.प्र.पा.सू.अ.5, पृ. 344)

पाणिनीयव्याकरणानुसारं प्रमाणस्वरूपं तद्भेदाः -

पाणिनीयव्याकरणे प्रत्यक्षानुनानशब्दार्थापत्तिरूपाणि चत्वारि प्रमाणानि प्रमासाधनानीति। अनुपलब्धिरपि प्रमाणमिति स्वीकृतं तस्यभावस्त्वतलौ इति सूत्रभाष्यव्याख्यावसरे उद्योते नागेशेन व्याकरणनिकाये भर्तृहरिणा अभ्यासादृष्टप्रतिमाश्चेति प्रमाणत्वेनाङ्गीकृतं वाक्यपदीये। केचित् सम्भवमेतिह्यञ्च प्रमाणत्वेनाङ्गीकुर्वन्ति तन्न समीचीनम्। प्रमाणानां संख्या विषये वैयाकरणनिकाये वैमत्यमेव पश्याम्यहं तथापि श्रीरामाज्ञापाण्डेयेन प्रत्यक्षानुमानार्थापत्तिशब्दा-नुपलब्धयः पञ्च प्रमाणानि लिखितानि व्याकरणदर्शनभूमिकायां तद्समीचीनमेवास्ति । महाभाष्ये प्रसङ्गात् क्वचित् प्रमायाः क्वचिच्च प्रमाणस्य चर्चाकृता। तथा च लिखितं महाभाष्ये- 'मानं हि नाम अनिर्ज्ञातज्ञानार्थमुपादीयते, अनिज्ञातमर्थ ज्ञास्यामि'। अथ चैतदेवानुवदन् हरिरप्याह-

अनिर्ज्ञातस्य निर्ज्ञानं येन तन्मानमुच्यते।

प्रस्थादि तेन मेयात्मा साकल्येनावधार्यते।।

स्वातन्त्र्यात्परं पाणिनीयव्याकरणे प्रमाणसमीक्षणम् -

स्वातन्त्र्यात्परं पाणिनीयव्याकरणानुसारि शाब्दिकाभिमतप्रमाणानि प्रथमतो श्रीरामाज्ञापाण्डेयमहोदयेन व्यवस्थापितानि। तत्र तत्र ग्रन्थेषु विकीर्णानि प्रमाणव्यवस्थोपयोगितत्त्वानि सङ्कलय्य श्रीरामाज्ञापाण्डेय-महोदयेन शाब्दिकानां संक्षिप्तप्रमाणविधिः व्याकरणदर्शनभूमिकायां प्रदर्शितः। ततश्च पाणिनिकल्पविदुषां रामप्रसादत्रिपाठिना शब्दशास्त्रानुसारि प्रमाण-व्यवस्था'[148] प्रदर्शिता। अत्र अनयोर्विमर्शितानां प्रमाणानां चर्चा मया प्रस्तूयते।

---

148 स्वातन्त्र्योत्तरव्याकरणशास्त्रे वारणस्याः योगदानम् रमाकान्तपाण्डेय, "Sanskrit writings in Independent India, पृ 126, 2003

प्रमाणस्य सामान्यलक्षणम्, भेदविषये नानामतानि च -

न्याययोगमीमांसाप्रभृतिदर्शनेषु प्रमाणस्य लक्षणं, तद् भेदाश्च प्रदत्ताः तथैव व्याकरणदर्शनेऽपि लक्षणभेदादि प्रदत्तम्। तत्र लक्ष्यमधिकृत्य लिखितम् तत्प्रकारकोऽनुभवः प्रमा, तत्करणं प्रमाणम् इति न्यायदर्शनानुसारम्, अनधिगतबाधितार्थविषयकं ज्ञानं प्रमा, तत्करणं प्रमाणम्' इति मीमांसादर्शनसम्मतम्, अनिज्ञातार्थविषयक सम्भावितसकलधर्मप्रकारकं ज्ञानं प्रमा, तत्करणं प्रमाणमिति व्याकरणदर्शनविदामभिमतिरस्ति ।

अनिर्ज्ञातेत्यादिभाष्यकृदुक्तिमाश्रित्य श्रीरामप्रसादत्रिपाठिमहोदयेन अनिर्ज्ञातार्थस्य साकल्येन ज्ञानं प्रमा, तत्करणं प्रमाणम् इति प्रमालक्षणोपस्थापनपुरस्सरं प्रमाणसामान्यलक्षणमुपन्यस्तम्। स्वातन्त्र्योत्तरकाले पाणिनीयव्याकरणे प्रमाणसमीक्षा इत्याख्ये ग्रन्थे श्रीत्रिपाठिमहोदयेन तार्किकादीनां पूर्वपक्षिणां मतनिरसनपूर्वकमिह प्रत्यक्षमनुमानमर्थापत्तिः शब्दश्चेति चत्वारि शाब्दिकसम्मतानि प्रमाणानि साधितानि। तथा चोक्तग्रन्थे उपर्युक्तं प्रमाणसामान्यलक्षणं लिखितम् ।

तद्यथा मूले-

'साकल्येनेत्यनेन प्रमाया अबाधितार्थविषयकत्वं गम्यते। बाधितार्थ-विषयक हि ज्ञानं नानिर्ज्ञातमर्थ साकल्येन परिच्छिनन्ति, विशेषधर्मा-विषयकत्वात्। साधारणधर्मदर्शने हि विपर्ययः संशयो वा, विशेषदर्शने तु तद्बाधः। यथा इदं रजतम्

इत्यत्र इदन्त्वं चाकचिक्यादिकं च साधारणो धर्मः, प्रतीयते, न तु शुक्तित्वादिको विशेषः ।[149]

तथा च साकल्येनेत्यस्य सामान्यरूपेण विशेषरूपेण चेत्यर्थः। अयं घटः' इति प्रत्यक्षप्रमायामिदन्त्वेन घटत्वेन च घटस्य भानम्। तत्रेदन्त्वं सामान्यधर्म, घटत्वं विशेषधर्मः। केवले घट इत्याकारकप्रत्यक्षे तु घटत्वं सामान्यरूपम्, आकृतिविशेषो विशेषरूपम्। पर्वतो वह्निमान् इत्याद्यनुमितावपि वह्निनत्वेन पर्वतीयत्वेन च वह्नेर्मानम् । तत्र वह्नेः पर्वतसम्बन्धरूपं पर्वतीयत्वं विशेषो बोध्यः। एवं शाब्दप्रमायामपि पदात् पदार्थस्य सामान्यरूपेण भानम्. पदार्थान्तरसम्बन्धास्तु विशेषरूपेणेति साकल्योपपत्तिः।

शाब्दिकनये प्रत्यक्षादिसर्वप्रमासु प्रमेयावयवजातिगुणक्रियादीनां शब्दरूपस्य च भानमिति दर्शनान्तराद् विशेषः। साकल्येनेत्यत्र स्वार्थे ष्यञ् प्रत्ययः तृतीयार्थः प्रकारत्वम्। अनिर्ज्ञातार्थस्येत्यत्र षष्ठ्यर्थो विशेष्यत्वमिति । अनिर्ज्ञातार्थविशेष्यकं सामान्यविशेषधर्मादिरूपसम्भावितसकलधर्मप्रकारकं ज्ञानं प्रमा, तत्करणं प्रमाणमिति प्रमाणसामान्यलक्षणम् पर्यवसन्नम्। अत्र अनिर्ज्ञातपदं स्मृतौ प्रमाणलक्षणस्य अतिव्याप्तिवारणार्थ प्रयुक्तम् । इत्थं आचार्य रामप्रसादत्रिपाठिना प्रमाणलक्षणं विमृष्टम्।

1. शाब्दिकानां मते कस्य प्रमाणस्य प्राधान्यम् -

प्रत्यक्षानुमानार्थापत्तिशब्दानुपलब्धयः प्रमाणानि शाब्दिकसम्मतानि सन्ति। परन्तु वैयाकरणानां मते शब्द एवं प्रमाणानां मूर्धन्यः। तथा चोक्तः महाभाष्ये शब्दप्रमाणकावयम्, यच्छब्द आह तदस्माकं प्रमाणम्। शब्दश्च शब्दज्ञाने धर्ममाह

---

149 पाणिनीयव्याकरणे प्रमाणसमीक्षा-श्री. रा. प्र. त्रि. पू. 2. दि.स. 1997. सं. सं. वि. वि. वाराणसी

इत्यादि। यद्यपि शब्दप्रमाणकावयम् इति भाष्यकारस्याद् वाक्यपदीयपर्यालोचनाच्च शब्दप्रामाण्ये एव वैयाकरणानां पक्षपातः प्रतीयते, नानुमानादिषु प्रमाणेषु। तथापि इतरप्रमाणापेक्षया शब्दप्रमाणस्य बलवत्त्वबोधनं एव महाभाष्यदिग्रन्थानां तात्पर्यावसानम् न तु तेषां प्रत्याख्याने। अत्र श्रीरामाज्ञापाण्डेयमहोदयेन लिखितम् । तद्यथा प्रोक्तं मूले तथापि केवल शब्दाप्रामाण्येन नास्माकं (शाब्दिकानां) सकलेष्टसिद्धिः। प्रत्यक्षप्रमाणमन्तरा शब्दस्य श्रवणप्रत्यक्षाभावे मूलोच्छेदः। अनुमानं विनाऽपि अनुमानेनैव सिद्धानां बह्वीनां परिभाषाणां विलयापत्तिः। किञ्च वैयाकरणैर्व्यवहारपथान्न स्खलनीयम्। प्रत्यक्षानुमानप्रामाण्यमन्तरा पदे पदेऽन्धकूपे पातः। इत्थं शब्दप्रामाण्यस्य प्रामुख्येन सह अन्येषामपि प्रत्यक्षानुमानादीनां प्रामाण्यं शाब्दिकैः स्वीकृतमिति प्रतिपादितं श्रीरामाज्ञामहाभागेनात्र।

व्याकरणनिकाये शब्दप्रामाण्ये को हेतु -

मीमांसाशास्त्रे शब्दस्य प्रामाण्यसमर्थने शब्द श्रवणोत्तरमर्थ-प्रतिपत्तिर्लिङ्गत्वेनोक्ता। अस्मिन् प्रसङ्गे न्यायदर्शनेऽपि प्रत्यक्षानुमानोप-मानशब्दाः प्रमाणानि इति शब्दस्य प्रामाण्यमभ्युपगच्छन्न्यायदर्शनमेव मनुते 'यदत्यन्तादृष्टपूर्व स्वर्गापूर्वदेवतादि, तद् वाक्यार्थरूपमेव, नास्मदादि-प्रत्यक्षगोचरम् न चागृहीतं लिङ्गमस्मिन् प्रवर्तितुमर्हति।

श्रीरामप्रसादत्रिपाठिना पाणिनीयव्याकरणे प्रमाणसमीक्षा ग्रन्थे लिखितम् शब्दप्रमाणविषये उक्त च भगवता पाणिनिना 'अर्थवदधातुः'[150] इति। अत्रार्थविषयकबोधजनकत्वघटितमेवार्थवत्त्वं सर्वसम्मतमस्ति।[151] तत्र बोधः शाब्दबोध एव, प्रत्यासन्नत्वाल्लाघवाच्चेति शब्दप्रमाणमन्तरा कथमिदं गच्छेत्।

---

150 पा. सू. 1/2/45

151 ल.श.शे.टीका च वरवर्णिनी अर्थवत्सूत्रे

किञ्च तदशिष्यं संज्ञाप्रमाणत्वात्[152] इति सूत्रे तु संज्ञाशब्दानां प्रामाण्यमुपस्थापयतः सूत्रकारस्याभ्युपगतमेव शब्दानां प्रमाणत्वम् 'लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते[153] इत्युक्ता वार्तिककारोऽप्यत्र सम्मत एव।[154]

कस्य शब्दस्य प्रामाण्यमभ्युपगम्यते भवता इति प्रश्नं समुद्भाव्य समाधानं यच्छति श्रीरामाज्ञापाण्डेयः । तद्यथा मूले- शिष्टोच्चारितस्यैवेत्येव प्रतिवचनमुपस्थापनीयम्। तावता तु नहि शब्दस्य प्रामाण्यं व्यवस्थापयितुं शक्यते। यतो हि त एव शिष्टा, ये हि ययार्थ वस्तु प्रत्यक्षमकार्षुः। एतेन तु प्रत्यक्षमेव मुख्यं प्रमाणं भवेत्, न तु शब्दः ।[155]

अस्य प्रश्नस्योत्तरं प्रदत्तं पाण्डेयेन तद्यथा मूले न हि अस्माभिः प्रत्यक्ष प्रमाणमुपलभ्य शाब्दं प्रामाण्यं स्थिरीक्रियते, किन्तु व्यवहारकाले तादृशानां शिष्टानामभावादस्माकीनपरम्परानुसारं तत्तद वाक्येषु प्रामाण्यनिश्चयाद् व्यवहारः क्रियते। भवेन्नाम् तत्रापि भ्रान्तिः परमन्यस्य निर्दुष्टस्य मार्गस्यानुपलब्धेरयमेव पन्था अनुसरणीयः।

महाभाष्योक्तस्य शब्दप्रमाणका वयमित्यस्य' नायमर्थो कदापि यत् सर्वत्रैवास्माभिः शब्दप्रमाणेनैव व्यवहर्तव्यम्, किन्तु यो हि धर्माधर्मादि-रूपोऽर्थः प्रत्यक्षेणावबोद्धुं न शक्यते, सोऽर्थस्तु, शब्दप्रमाणेनैव निश्चेतुं शक्यते।[156] अर्थात्

---

152 पा.सू. 1/2/53

153 म. भा. नवाः 1/1/1/5. 55

154 पाणिनीये व्या. प्र.सं. पृ.201 द्वि.सं. 1997, वाराणसी

155 व्या. द. प्रतिमा. पृ. 31. 1979. वाराणसी

156 व्या. द. प्रतिमा पृ. 32. 1979, वाराणसी

सूक्ष्मातिसूक्ष्मपदार्थस्य ईश्वरस्य (धर्माधर्मादेर्वा) ज्ञापने शब्दस्यैवास्ति सामर्थ्यम्, न तत्र प्रत्यक्षस्य नाप्यनुमानस्येति।

उक्तं च शब्दतत्त्वविद्भिः शिष्टैः-

प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।

एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता।। ऋग्वेद.भा.भू.

इदं पुण्यमिदं पापमित्येतस्मिन् पदद्वये।

आचाण्डालं मनुष्याणां समं शास्त्रप्रयोजनम् ।। वा. प. 1/40

वस्तुतः व्याकरणं शब्दशास्त्रमस्ति। अत्र शब्दप्रमाणस्य प्राधान्यमस्ति यद् वाक्यपदीयावलोकनेऽपि ज्ञायते । भर्तृहरिणाऽनुमानस्यापेक्षया शब्दस्यागमस्य वा महत्त्वं प्रतिपादितम्। तद्यथा-

न चागमादृते धर्मस्तर्केण व्यवतिष्ठते।

ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम् ।। वा. 1.30

आगमं वाक्यपदीयकारः प्रत्यक्षवद् स्वीकरोति-

यो यस्य स्वमिव ज्ञानं दर्शनं नाभिशङ्कते।

स्थितं प्रत्यक्षपक्षे तं कथमन्यो निवर्तयेत् ।।

शब्दस्य मुख्यं प्रामाण्यं लोके जागर्ति। प्रायो हि शब्दस्यैव प्रामाण्य मधिकमधुनाऽपि अनुभूयतेऽस्माभिः । मन्त्रायुर्वेदादिविषये तु फलसिद्धया लोकेऽपि स्पष्ट शब्दस्य प्रामाण्यं सर्वदा स्वीकृतमेवेति नाविदितं विदुषाम् ।

2. शाब्दिकानां मते प्रत्यक्षप्रमाणम् -

इन्द्रियार्थसन्निकर्षजन्या या बुद्धिवृत्तिः (चित्तवृत्तिः) सा. तत्प्रतिबिम्बितं चैतन्य वा प्रत्यक्षप्रमा, तत्करणं प्रत्यक्षं प्रमाणमित्युच्यते शब्दशास्त्रज्ञैः तत्राद्यमते इन्द्रियम्, द्वितीयमते वृत्तिः प्रत्यक्षप्रमाणमिति भावः।

अत्र श्रीरामप्रसादत्रिपाठिना पाणिनीयव्याकरणे प्रमाणसमीक्षा ग्रन्थे लिखितम्-

बाह्यविषयस्थले तत्तादात्म्यापन्नबौद्धविषयस्य, अन्यत्र तु बौद्धस्यैव बुद्धौ समारोपात्मकः परिमाणो वृत्तिः सैव प्रत्यक्षप्रमा, तत्करणमिन्द्रियम्, इन्द्रियस्य विषयेण सह संयोगादिः सन्निकर्षो व्यापार इति।[157]

वस्तुतस्तु एतां वृत्तिं द्वारीकृत्य घटादिविषयस्य साक्षिरूपे चेतने प्रतिबिम्बनमेव वृत्तिजन्यं फलम्। एतदेव शाब्दिकनये मुख्या प्रत्यक्षप्रमा उद्गीयते। एतदेव पूर्वमीमांसायां प्रकटता इत्युच्यते। एतत्कल्पे एषा वृत्तिरेव प्रमाणम्, अविद्यानिवृत्तिरूप आवरकाज्ञानध्वसं एव व्यापारः।

इयं च वृत्तिर्जायमाना सती स्वविषयघटादिविषयकमज्ञानं निर्वर्त्य स्वविषयं प्रकाशयन्ती आत्मानमपि प्रकाशयति, न तु तत्प्रत्यक्षाय वृत्त्यन्तरं कल्प्यते, अनवस्थाप्रसङ्गादिति वृत्तेरपि प्रत्यक्षविषयता बोध्या।[158]

---

157 पाणिनीय व्या. प्र. समीक्षा, पृ. 32. 1997. वाराणसी

158 ल.म. टीकाद्वय पृ. 327-328

वैयाकरणनिकाये प्रत्यक्षज्ञानोत्पत्तिप्रकारः -

आत्मना बुद्धिः संयुज्यते, बुद्धया सहाहङ्कारः ततस्तेन मनः, तेन च सहेन्द्रियाणि तैश्च सह विषय इति पञ्चमक्षणे प्रत्यक्षात्मकज्ञानोत्पत्तिः । प्रत्यक्षमप्रमाणविषये महाभाष्यकारस्य सम्मतिः-

मनसा युक्तानीन्द्रियाण्युपलब्धौ कारणानि भवन्ति भगवता पतञ्जलिना मनः संयुक्तेन्द्रियार्थसंनिकर्षोत्पन्नज्ञानस्य प्रत्यक्षत्वं प्रदर्शितम्। अस्मिन् विषये उद्योतकारेण मनसेति प्रतीकमादाय लिखितं तद्यथा यद्यपि पातञ्जलानामन्तः-करणं व्यापकम्, तथापि तत्परिणामविशेषो मनश्चिरस्थायि मध्यमपरिमाणं संकोचविकासशालि ज्ञानकरणमिति भावः। अत एव सदा न ज्ञानयौगपद्यं कदाचिद् यौगपद्यमपि इत्यनेन वैयाकरणानां नयै एकस्मिन्नपि काले ज्ञानयौगपद्य भवतीति सूच्यते ।[159]

श्रीरामाज्ञापाण्डेयमहाभागेन व्याकरणदर्शनप्रतिमाख्ये ग्रन्थे प्रत्यक्षप्रमाणस्यार्ष लौकिक चेति भेदौ कृतौ। तत्र आर्षप्रत्यक्षे विशेषाभावादेकरूपत्वाच्च न हि तद् वितन्यते। परन्तु लौकिकं प्रत्यक्षम् श्रावणं, त्वाचम्, चाक्षुषं, रासनं, घ्राणजे, मानसं चेति षड्विधम् ।

श्रीमता भट्टोजिदीक्षितेन शब्दकौस्तुभे आरम्भ एव घटादिचाक्षुषेऽपि घटादिशब्दानां विषयता उक्ता।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।

अनुविद्धमिव ज्ञानं सर्व शब्देन भासते ।। (वा.ब्र. 123)

---

159 व्याकरण दर्शन भूमिका, पृ. 66 1982. वाराणसी

इति भर्तृहरिप्रणिता कारिका प्रमाणत्वेन चोक्ता। वस्तुतस्तु शाब्दिकानां शुद्ध चाक्षुषं प्रत्यक्षं नैव भवति, किन्तु तदनुमानेन संसृष्टम्।[160] अत एव भर्तृहरिणा लिखितम्-

दुर्लभं कस्यचिल्लोके सर्वावयवदर्शनम्।

कैश्चित् त्ववयवैर्दृष्टैः कृत्स्नोऽप्यर्थोऽनुमीयते।। (वाक्यप, ब्र. 1.58)

अत्र लिखितं रामाज्ञापाण्डेयेन तथा युगपत्सर्वावयवदर्शनस्यासम्भवात्। कतिपयावयवदर्शनेन सकलार्थपरिच्छेदस्त्वानुमानिक एवेति प्रत्यक्षमपि नैव सकलमर्थस्वरूपं परिच्छिनत्ति इति। निष्कर्षतो वक्तुं शक्नोमि यत् परस्परं सापेक्षे प्रत्यक्षानुमाने।

3. अनुमानप्रमाणं वैयाकरणनिकाये -

शाब्दिका अनुमानप्रमाणं स्वीकुर्वन्ति। सूत्रकारो ब्रवीति 'इन्द्रियमिन्द्रलिङ्गम्'[161] इत्यादि। अत्रेन्द्रस्यात्मनो लिङ्गमिन्द्रियमुक्तम्। अत्र लिङ्शब्दस्यानुमानपरत्वमेव स्वीकृतं व्याख्यातृभिरिति[162] अनुमानं प्रमाणतया स्वीकृतमेव । एवमेव द्वितीये चानुपाख्ये इति सूत्रतयाऽपि[163] तत् स्वीकृतमेव। सूत्रे 'अनुपाख्ये इत्यस्य अनुमेये इत्यर्थकरणात् ।[164]

अनुमानसामान्यलक्षणे शाब्दिकमतम् -

अनुमानप्रमाणस्य लक्षणस्य जिज्ञासायामुच्यते प्रत्यक्षपूर्वकत्वं तल्लक्षणम् इति। उक्तं च सरूपाणामिति सूत्रे भाष्ये तस्यैवोपोद्वलकम् इति। अस्य व्याख्यावसरे

---

160 व्याकरणदर्शन प्रतिमा, पृ. 44. 1979, वाराणसी

161 पा.सू-5/2/63

162 सि. की पूर्वार्धे पाञ्चमिकप्र., सू. 5/2/63

163 पा.सू. 6/3/301

164 पा. व्या. प्र. समीक्षा, पृ. 103, 1997 वाराणसी

प्रदीपकारेणाऽपि लिखितम् उपोद्बलकमिति 'उद्भूतं बलं प्रत्यक्ष तत्पूर्वकत्वादनुमानस्य। उद्बलस्य समीपमनुमानमित्यर्थः" इति।[165]

अयं भावः अनु (पश्चात्) मीयतेऽनेनेति अनुमानम्। तच्चेदं लिङ्गज्ञानात्मकं व्याप्तिज्ञानात्मकं वाऽनुमानं द्विविधम्। स्वार्थम् (स्वस्मै इदम्) 2. परार्थ (परस्मै इदम्) चेति। अनुमानप्रमाणस्य व्याख्यावसरे श्रीरामप्रसादत्रिपाठिमहोदयेन प्रत्यक्षानुमानयोः प्रमाणयोर्यौगपद्येन प्राप्तौ सत्यां कतरत् प्रबलं कतरच्च दुर्बलमिति सम्यक् प्रत्यक्षस्यैव प्राबल्यं सिद्धम्। परन्तु श्रीरामाज्ञापाण्डेयेन परस्परं सापेक्षे प्रत्यक्षानुमाने इति कथितमत्र व्याख्यावसरे। तद्यथा प्रोक्तं मूले दुर्लभं क्स्यचिल्लोके सर्वावयवदर्शनम् इति कारिकायामेव कृत्स्नस्याप्यर्थस्य अनुमानेनैव बौद्धव्यत्वप्रतिपादनात् एवं च परस्परं सापेक्षे प्रत्यक्षानुमाने।[166]

व्याकरणनिकाये उपमानस्यप्रामाण्यम्

प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानमः[167] इति लक्षणं प्रतिपादितम्। महाभाष्ये उपमानानि सामान्यवचनैः (पा 2.155) इति सूत्रस्य व्याख्यावसरे मानं हि नाम अनिज्ञानार्थमुपादीयते, अनिर्ज्ञातमर्थ ज्ञास्यामीति तत्समीपे यत्रात्यन्ताय मिमीते तदुपमानं गौरिव गवय इति। गौर्निर्ज्ञातः। गवयोऽनिर्ज्ञातः। अत्रः उद्योतः मानं हीति। अनिर्ज्ञातार्थस्य साकल्येन ज्ञापकत्वं हि तत्त्वम्। गौर्हि गवयं कतिभिश्चिद् धर्मैरेव तद्गतैर्ज्ञापयति, न साकल्येन ज्ञायते। इति भाष्योक्तकथनेन शाब्दिकैरूपमानस्य प्रमाणान्तरत्वं नाङ्गीक्रियते। भाष्योक्तकथनमिव वाक्यपदीयकारेणापि लिखितम्-

अनिर्ज्ञातस्य निर्ज्ञानं येन तन्मानमुच्यते।

प्रस्थादिकेन मेयात्मा साकल्येनाभिधीयते ।।

---

165 म. भा. प्र. 3/2/124

166 व्या. द. प्रतिमा पू. 45 1979, वाराणसी

167 न्या. सू 10.110

अनिर्ज्ञातं प्रसिद्धेन येन तद्धर्म गम्यते।

साकल्येनापरिज्ञानादुपमानं तदुच्यते ।।

(वा.का. 3 वृत्ति समु. श्लो. 359-360)

उपरितनश्लोकव्याख्यावसरे श्रीहेलाराजेनोपमानस्यानुमानगतार्थताऽपि स्पष्टमुक्ता। अतः व्याकरणनिकाये उपमानं न पृथक् प्रमाणमिति। अत्र लिखितं रामाज्ञापाण्डेयेन- अस्यां स्थितौ भाष्यादिपर्यालोचनया यथा प्रत्याक्षादीनां प्रामाण्यं सिध्यति, न तथोपमानस्य। कण्ठरवेणैव भगवता भाष्यकारेण मानसामीप्यमेवोपमानस्य प्रतिपादितम्। अतोऽस्माभिरुपमानस्य प्रमाणान्त-रत्वं नाङ्गीक्रियते।[168]

4. अनुपलब्धिरपि प्रमाणं व्याकरणनिकाये -

अनुपलब्धेर्लक्षणं किमिति चेदुच्यते वेदान्तदर्शने ज्ञानकरणाजन्या-भावानुभवासाधारणकारणत्वमिति। अत्र 'तस्य भावस्त्वतलौ' इति सूत्रभाष्यव्याख्यानतोऽनुपलधेरपि न स्पष्टतया प्रमाणत्वेनाङ्गीक्रियते। तथापि सूत्रस्यास्य व्याख्यावसरे परवर्तिभिः व्याख्यातृभिः स्पष्टतयाऽनुपलब्धिः प्रमाणत्वेनाङ्गीकृतम्। अत्र भाष्ये लिखितम् तद्यथा- 'अनन्यच्छब्दादिभ्यो द्रव्यम्, न ह्यन्यदुपलभ्यते। पशोः खल्वपि विशसितस्य पर्णशते न्यस्तस्य नान्यच्छब्दादिभ्य उपलभ्यते इति भाष्यम्। अत्र प्रदीपकारेणोक्तम् पशोः खल्वपीति। उपलब्धिलक्षणप्राप्तस्य द्रव्यस्यानुपलम्भादसत्त्वनिश्चयो युक्त इति भावः। अत्रोद्योतकारः अनुपलब्धिं प्रमाणत्वेन द्रढयति तद्यथा-तद्व्याचष्टे उपलब्धीति। एवं च विविक्ततया ग्रहणाभावादसत्त्वनिश्चय इत्यर्थः।

उद्योतमतस्य व्याख्याकुर्वन् श्रीरामप्रसादत्रिपाठि एवं लिखति

---

168 व्या. द. भूमिका-पृ.64. द्वि.सं.

प्राप्तसत्त्वनिश्चययोग्यस्येत्यनेन तर्कितप्रतियोगिसत्त्वप्रसञ्जितप्रतियोगि-कत्वरूपा योग्यताऽप्यनुपलब्धौ विशेषणमिति सूच्यते।[169] स्त्रियाम् इत्यादिसूत्रीयभाष्यादिपर्यालोचनेन प्रत्यक्षगतार्थतैवानुपलब्धे प्रमाणस्य लभ्यते। न पृथक् प्रामाण्यमिति विमर्शितः भाष्योदाहरणैः पाणिनीयव्याकरणे प्रमाणसमीक्षा ग्रन्थे। परन्तु रामाज्ञापाण्डेयेन लिखितम् । तद्यथा- एवञ्चानुपलब्धिप्रमाणेनान्यत्वाभावनिश्चय इत्यर्थः । इति कैयटाच्च उपलब्धि-लक्षणं प्रमाणमेव सत्त्वनिश्चायकम्। उपलब्धिलक्षणात्प्रमाणात्प्राप्तसत्त्व-निश्चययोग्य-स्यानुपलम्भाद्सत्त्वनिश्चय इत्यर्थः। एवञ्च वैयाकरणानां मतेऽनुपलब्धिरपि प्रमाणान्तरम्। अत्र निष्कर्षरूपेणाचार्य रामप्रसादत्रिपाठि लिखति यत्- 'एवं चानुपलब्धिर्न प्रमाणम्, अपि तु प्रमाणसहकारिण्येवेत्येव शाब्दिकानां सिद्धान्त इति दिक्।[170]

5. अर्थापत्तिः प्रमाणं व्याकरणनिकाये

अर्थापत्तिप्रमाणस्य लक्षणं किमिति चेदुच्यते उपपाद्यज्ञानेनोप-पादककल्पनमर्थापत्तिरूपं प्रमाणम्। तत्करणञ्च उपपाद्यज्ञानमिति "उपपाद्यज्ञानत्वम्" अर्थापत्तिप्रमाणस्य लक्षणम्। अर्थात् केनचिद् विना यदनुपपन्नं तत्तत्रोपपाद्यम् । यस्याभावे कस्यचिदनुपपत्तिस्तत्तत्रोपपादकमिति। अत्र श्रीरामप्रसादत्रिपाठिना स्पष्टीकृतम् यदा रात्रि भोजनेन विना दिवा भुञ्जानस्य पीनत्वमनुपपन्नम् इति तादृशपीनत्वमुपपाद्यम्, रात्रिभोजनं च तदुपपादकम्।[171]

---

169 पा. व्या. प्र. समीक्षा-आ. श्री श्रीरामप्रसादत्रिपाठी, पृ. 310, द्वि.सं. 1997, वाराणसी

170 पा. व्या. प्र. समीक्षा-आ. श्रीरामप्रसाद त्रिपाठी, प्र. 315 द्वि सं. 1997, वाराणसी

171 पा. व्या. प्र. समीक्षा आ. श्रीरा. प्र. त्रिपाठी, पृ. 297. प्र.दि.सं. 1997. वाराणसी

नागेशभट्टेनापि 'अदर्शनं लोपः इति सूत्रभाष्येप्रदीपव्याख्यावसरे लिखितम्। तद्यथा- किञ्चानुपपद्यमानेन स्वोपपादकमाक्षिप्यते, यथा पीनत्वेन रात्रिभोजनम् इति। सूत्रकारेण श्रीपाणिनिना अपि 'उपात् प्रतियत्नवैकृतवाक्याध्याहारेषु च' इति सूत्रे वाक्याध्याहारपदं गृहीतवता स्फुटमेवास्याभ्युपगमः कृतोऽस्ति ।

भाष्यकारः पतञ्जलिरपि बहुत्रास्य प्रमाणस्य सङ्केतं कुर्वन् प्रमाणमेतत् सुष्ठु सम्मन्यते। तद्यथा- "अच परस्मिन् इति सूत्रे कल्प्यो हि वाक्यशेषो वाक्यं वक्तुर्यधीनं हि' इति ब्रुवाणो वाक्यशेषकल्पनं सूत्रकारवत् प्रतिपादयत्येव । अर्थापतिः प्रमाणस्य दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति भेदौ शबरस्वामिना प्रतिपादितौ तौ वार्तिकारेणापि अनुमोदितौ। अत्र दृष्टार्थापत्तिश्च पुनः पञ्चविधा प्रोक्ता।

6. अभ्यासप्रमाणम् व्याकरणनिकाये

शाब्दिकेषु अभ्यासस्य प्रामाण्ये भर्तृहरेः सम्मतिः। तद्यथा-

परेषामसमाख्येयमभ्यासादेव जायते।

मणिरूप्यादिविज्ञानं तद्विदां वानुमानिकम् ।। (वा. ब्र. 1.35)

अर्थात् परेषाम् अन्येषां, असमाख्येयं समाख्यातुमशक्यं, मणिरूप्यादि-विज्ञान मणीनां हीरकादीनां रूप्यस्य रजतस्य (अन्येषाञ्च रत्नधातूनां) विज्ञानं शुद्धयशुद्धयोरनुपातस्य विशिष्टं ज्ञानं, तद्विदां मणिरूप्यादिविज्ञानस्य ज्ञातृणाम्, अभ्यासादेव पुनः पुनः परीक्षणपरीक्षणाभ्यामेव जायते। आनुमानिकं न भवति अनुमिति पूर्वकं साधितं न भवति।[172]

---

172 पा. सू. 6/10/139

अयमाशयः कारिकायाः -

स्वर्णकारादयो रूपतर्काः स्वर्णादिधातूनां मणीनां मूल्यनिर्धारणं रत्न धातुखण्डं च हस्तेन प्रतीत्य दृष्ट्या निरीक्ष्यैव कुर्वन्ति। तेषां कृतं मूल्यनिर्धारणं भारनिर्धारणं च शुद्धमेव भवति। संगीते प्रयोगे षड्जादिस्वरभेद- सम्बोधेऽनुमानस्य गतिरेव नास्ति। तत्र कः हेतु इति चेद् अभ्यास एवेति भर्तृहरिणा प्रतिपादितम्। अतः भर्तृहरिणा स्वीकृतमभ्यासस्यापि प्रामाण्यम्।[173]

7. अदृष्टप्रमाणं व्याकरणपरिषदि -

भर्तृहरिः अदृष्टमपि पृथक् प्रमाणत्वेनाङ्गीकरोति। प्रोक्त वाक्यपदीये -

प्रत्यक्षमनुमानं च व्यतिक्रम्य व्यवस्थितः।

रक्षः पितृपिशाचानां कर्मणा एव सिद्धयः ।। वा.1/36

अत्रायमभिप्रायो भर्तृहरेः - बहुभिरद्याप्यनुभूयन्ते यत् रक्षः पितृपिशाचानां प्रत्यक्षानुमानातिक्रान्ता सिद्धयः ताश्च कर्मजाः राक्षसादिरूपेण स्थितानां तेषां पूर्वयोनिकृतसुकृदुष्कृतानां कर्मणां फलभूतः। एतेन ज्ञायते यद् अस्ति किञ्चित्कारणं येन राक्षसादयः तादृशसिद्धिमन्तः। तच्चकारणमदृष्ट-मेवास्ति, न तु प्रत्यक्षम्, नानुमानमिति भर्तृहरेरभिप्रायोऽस्ति ।[174]

8. प्रतिभाऽपि प्रमाणम् -

प्रतिभायाः प्रामाण्यं स्वीकुर्वन्ता भर्तृहरिणा वाक्यपदीये लिखितम् -

विच्छेदग्रहणेऽर्थानां प्रतिभाऽन्यैव जायते।

वाक्यार्थ इति तामाहुः पदार्थैरूपपादिताम्।।

---

173 वाक्यपदीयम् ब्रह्मकाण्ड-35 पृ.-56. 1997. कृष्णदास अकादमी

174 वाक्यपदीयम्, ब्र.-36. पृ. 57. 1997 कृ.दा. अकादमी

प्रमाणत्वेन तां लोकः सर्वः समनुपश्यति।

समारम्भाः प्रतीयन्ते तिरश्चामपि तद्वशात् ।।

(वा. पं. 2/143, 147)

अयमाशयः - सर्वोऽपि लोकव्यवहारो ज्ञानाधीनः, तच्च ज्ञानं प्रतिभा-धीनमिति, प्रतिभाया (बुद्धिविशेषस्य) अपि प्रामाण्यभ्युपेयमिति भावः।

9. सम्भवस्यप्रामाण्यं व्याकरणनिकाये -

कैश्चिद् विदुषैः समुदायेन समुदायिनोऽवगमः सम्भवप्रमेत्युच्यते तदर्थ सम्भवोऽपिं प्रमाणमिति कथ्यते । खारीद्रोणादयः परिमाणविशेषाः। खार्याख्ये महति परिमाणे द्रोणादयोऽल्पपरिमाणभूता अन्तः सम्भवन्ति, इत्थं यो ज्ञान स सम्भवप्रमा। अनेन हि सम्भवप्रमाणेन खारीज्ञानेन यद् द्रोणादिज्ञानं तदेव सम्भवप्रमा इति।

तन्न समीचीनं शाब्दिकानां मते। शाब्दिकप्रभृतयो दर्शनतत्त्वविदो न सहन्ते, अनुमानेन क्लृप्तेन प्रमाणेन गतार्थत्वात् । महाभाष्यकृदादयः केऽपि आचार्या नैनं प्रमाणत्वेन व्यवहरन्ति।[175]

10. ऐतिह्यस्यप्रमाण्यं व्याकरणनिकाये -

केचन स्वीकुर्वन्ति ऐतिह्यं प्रमाणत्वेन, यथा इह वटे यक्षः प्रतिवसति' इति। अत्र हि वटे यक्षनिवासप्रमा ऐतिह्यप्रमाणजन्येति। तदपि न समीचीनम् ऐतिह्यस्य निर्णायकत्वाभावाद् सन्धिग्धत्वाच्चेति ।

---

175 पा. व्या. प्र. समीक्षा आ. श्रीरा. प्र. त्रि. पू. 322. द्वि.सं. 1997, वाराणसी

यत्र तूपदेष्टुराप्तत्वनिश्चयो भवति तत्र शब्दप्रमाणं स्वीकरणीयम्, अन्यत्र तु तज्जन्यः भ्रम एव। प्रशस्तपादभाष्येपि ऐतिह्यमवितथमाप्तोपदेश एवं[176] इति। अतः सूत्रभाष्याद्यनुक्तमेतिह्यं न स्वतन्त्रप्रमाणत्वेनाङ्गीकृतं व्याकरणनिकाये।

समासतः - वक्तुं शक्नोमि यत् शाब्दिकैः प्रामुख्येण शब्दप्रमाणं स्वीकृतं ततश्च प्रत्यक्षानुमानमिति प्रमाणद्वयमपि। अनुपलब्धिमपि कैय्यटः नागेशः च स्वीकृतवन्तौ। परन्त्वत्र पाणिनीये व्याकरणे प्रमाणसमीक्षा इत्याख्ये ग्रन्थे त्रिपाठिना प्रत्यक्षानुमानशब्दार्थापत्तिरूपाणि चत्वारि प्रमाणानि पाणिनीयव्याकरणे प्रमासाधनानीति लिखितम् । श्रीरामाज्ञापाण्डेयमहाभागेन प्रत्यक्षानुमानार्थापत्तिशब्दानुपलब्धयः पञ्च प्रमाणानि शाब्दिकमतानि स्वीकृतानि। परन्तु भर्तृहरिणा उक्तानि अभ्यासादृष्टप्रतिमाख्यादीनि प्रमाणानि शाब्दिकैः स्वीकृतानि। शब्दप्रत्यक्षानुमानार्थापत्तिरनुपलब्धयः प्रमुखानि प्रमाणानि.. अभ्यासप्रभृतयः सहकारीणि प्रमाणानि वैयाकरणसम्मतानि सन्तीति वक्तुं शक्नोम्यहम्।

(ii) 'स्फोटसिद्धान्तस्य विकासे स्वातन्त्र्योत्तरकालीनशाब्दिकमतानां विमर्शः'

स्वातन्त्र्योत्तरकाले व्याकरणविषये स्फोटविषयः कश्चन नूतनो वाऽधुनिको वा नास्ति, तथापि शाब्दिकानां भाषावैज्ञानिकानाञ्च कृते अतीव रोचकोऽस्ति। तस्मादेव स्फोटविषये महर्षिपाणिनिकालाद् स्वातन्त्र्योत्तरपर्यन्तं काले काले बहुलिखितं विमर्शितः विचारितश्च शाब्दिकैः। व्याकरणशास्त्रस्य दार्शनिकपरम्परायां प्राधान्यं भजते स्फोटविषयः । स्वातन्त्र्योत्तरकालेऽपि श्रीरामाज्ञापाण्डेय श्रीरामप्रसादत्रिपाठि-प्रभृतिभिः शाब्दिकैरत्र काचिद् नवीना संकल्पना प्रस्तुता। यस्या चर्चात्रऽग्रे करिष्यामि।

---

176 प्रशस्त. भा. अनु नि. पृ. 230

स्फोटशब्दस्य व्युत्पत्तिः स्वरूपञ्च

स्फुट्यते ध्वनिना अभिव्यज्यत इति कर्मव्युतपत्त्या, स्फुटत्यर्थोऽनेनेति करणव्युत्पत्त्या च स्फुट् विकसने धातोः घञ् प्रत्यये सति निष्पन्नोऽयं स्फोटशब्दो विकासस्य वृद्धे च वाचकोऽस्ति । अतश्च ध्वनिव्यङ्ग्यत्वे सत्यर्थविषयकबोधजनकत्वं स्फोटस्य लक्षणं पर्यवसन्नम्। वस्तुतः लक्षणमिदं तटस्थमेव न तु स्वरूपम्।[177]

अयं स्फोटः किं स्वरूपः? कुतोऽस्य वा प्रारम्भः जातः? इत्यस्य विषये इतिवृत्तं मौनमाश्रयते। सम्भवतः स्फोट इति शब्दस्य प्रथम प्रयोगो महाभारते ऽभवत्। उक्तञ्च तत्र 'वायुस्फोटः संनिर्धाताः (महाभारत-3437) अत्र स्फोटशब्दस्यार्थः हिन्द्यां 'बिखरना 'फटना' वेत्यर्थेऽस्ति।[178] स्फोटस्य सम्बन्धे महाभाष्ये 'स्फोटः शब्दः ध्वनिः शब्दगुणः (महभा.) इति बहुधा उद्धृतमस्ति तदपि महाभाष्योक्तमिदं वाक्यं स्फोटस्वरूपावबोधनं न तथा करोति यथा पश्चाद्वर्तिभिः शाब्दिकैः स्थापितमस्ति । अष्टाध्याय्यां 'अवङ स्फोटायनस्य इति सूत्रे महर्षिस्कोटायनस्य स्मृतिः स्फोटवादं दृढं स्मारयत्येव।[179] वार्तिककारेण श्रीकात्यायनेनापि 'सिद्धे शब्दार्थसम्बन्धेः इति वार्तिके शब्दस्य सिद्धत्वं (नित्यत्वं) ब्रुवता स्फोटात्मा शब्दः सुष्ठु स्वीकृत एव। शब्दशब्दः स्फोटरूपेऽर्थ एवं अन्यथा शब्दस्य नित्यत्वरूपं सिद्धत्वं कथमुक्तं स्यात् ।

पाणिनीयव्याकरणे भाष्यादितः प्रारभ्यः नागेशपर्यन्तं विरचितेषु लाक्षणिकग्रन्थेषु स्फोटस्वरूपविषये विचारिते सति एतानि स्वरूपाणि दृष्टिपटले समागच्छन्ति। तद्यथा- स्फोटः ध्वनिरूपः, स्फोटः शब्दरूपः, स्फोट नित्यशब्दरूपः, स्फोटः जातिरूपः स्फोटः वाग्रूपः, स्फोट शब्दब्रह्मरूपश्चेति ।

---

177 पा. व्या. प्र. समीक्षा पृ0 268. द्वि.सं. 1997 वाराणसी

178 वाक्यपदीयम् भूमिका पृ. 25, द्वि.सं. 1967, कु.दा. अका., वाराणसी

179 स्फोट सि. की अर्वाचीन पुनः रचना रमाकान्त पाण्डेय, दर्शन के 50 वर्ष, पृ. 271. प्र.सं. 2006, सागर

उपर्युक्तानां भेदानामवलोकनेनाभिन्नोऽयं स्फोटः भिन्न इव दृश्यते। परन्वेतानि स्फोटस्य भेदानि न भूत्वा तस्य विकासस्य क्रममात्रमेवास्तीति वक्तुं शक्यते। रश्रुतेः लश्रुतिः भवतीति महाभाष्यवचसा स्फोटस्य ध्वनिरूपत्वं संकेतितं भवति। यद्यपि भर्तृहरिः 'अध्वनिकः स्फोटः' इति अत्रैव महाभाष्यदीपिकायामुदतरत् तथाऽपि स्फोटरूपविभागनेन ध्वनेर्ग्रहणं भवतीति प्रोच्य तयोः भेदं प्रदर्शितवान्।[180] तद्यथा-

"स्फोटरूपविभागेन ध्वनेर्ग्रहणमिष्यते।

कैश्चिद् ध्वनिरसंवेद्यः स्वतन्त्रोऽन्यैः कल्पितः ।।" (वा.प. 1/81)

अत्रैव हरिवृतौ उक्तम् - इह केचिदाचार्या व्यक्तं स्फोटं सहजेन ध्वनिना सर्वतो दूरव्यापिना प्रकाशस्थानीयेन गन्धेन युक्तं द्रव्यविशेषमिवाविर्भावकाले एव सम्बद्धं मन्यन्ते ध्वनिना। एवं प्रकारेण ध्वनिस्फोटयोरत्यन्तसामीप्येऽपि व्यञ्जकव्यङ्ग्यत्वं प्रसाधितं भवति। किन्तु प्रतीतपदार्थकोलोके ध्वनिः शब्दः इति भाष्यवचसा अर्थज्ञापको ध्वनि एव शब्दरूपः स्फोटो विद्यते इति प्रतिभाति। अयं (शब्द) स्फोटस्य व्यञ्जक इत्यप्युच्यते। उक्तं च भाष्ये-ध्वनिः शब्दगुणः" इति। अत्र गुणपदस्य व्यञ्जकत्वेनोपकारक इत्यर्थः प्रतिपादितः प्रदीपे। अयमेव वैखरी-मध्यमा इत्युभयशब्दाभ्यां प्रतिपाद्यते ।

अत्र नागेशभट्टस्य सम्मतयः -

अभिधा लक्षणाव्यञ्जना इति तिस्रः शब्द शक्तयः, आसां वृत्तीनामाश्रयः कः? इत्याकांक्षायां नागेशभट्टेनपरमलघुमञ्जूषायां स्फोटस्योपस्थापनं कृत्वा नैयायिकानां मीमांसकानां चाक्षेपान् निराकृत्य वर्णातिरिक्तोऽनुभूतिविशेषः कोऽप्यन्यैव 'स्फोटः'

---

180 स्फोटसिद्धान्तः डॉ. अर्कनाथ चौधरी, स्वरमङ्गला, जयपुरम्

इत्युक्तम्। प्रोक्तमूले[181] - 'ननु कस्तर्हि वृत्त्याश्रयः शब्दः ? स स्फोटात्मक इति गृहाण। ननु कोऽयं स्फोट उच्यते। चतुर्विधा हि वागस्ति-परा पश्यन्ति मध्यमा वैखरी च अत्र परा-एषा हि निरवयवा व्यवहारायोग्या योगिनामप्यगम्या सर्वविधविकाररहितप्रकृतिरूपा। परा हि अत्यन्तसूक्ष्मत्वेनाग् ग्राह्यत्वात्सूक्ष्मा इत्यप्युच्यते। उक्तमेव-

'स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी।'

पश्यन्ती - मूलाधारोत्थितेन पवनेन प्रकटीकृता नाडीमार्गेण नाभि-प्रदेशपर्यन्तमागच्छता मनोगोचरीभूता पश्यन्ती वाक्कथ्यते। उभेऽप्येते व्यवहारतीते तत्राप्याद्या तु न कस्यापि गम्या द्वितीया हि योगिनां समाधौ गम्या।

मध्यमा - हृत्प्रदेशसम्बद्धा मध्यमा यत्र शब्दो विशीष्टक्रममाश्रित्य बुद्धौ प्रत्यवभासते। एषैव स्फोटात्मिका स्फोटव्यञ्जिका च। एषाऽपि परश्रोत्र-ग्रहणायोग्यत्वेन सूक्ष्मा। अत्रैव बुद्धिरर्थस्य कृते शब्दनिश्चयं करोति।

वैखरी - कण्ठदेशगा सा वैखरी। एषा व्यक्तवर्णसमुच्चारणा प्रसिद्धसाधुभावा भ्रष्टसंस्कारा चाप्युक्ता अपरिमितभेदा च। एषा परश्रोत-ग्राह्या। तदाहहरिः-

परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।

हृदिस्थामध्यमा ज्ञेया वैखरी कण्ठदेशा।। (तन्त्रागम)

वैखर्या हि कृतो नादः परश्रवणगोचरः ।

मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते ।।

अयमाशयः - युगपदेव मध्यमावैखरीभ्यां नाद उत्पद्यते। मध्यमया हि वाण्योत्पन्नो नादो हि स्फोटाख्यार्थावबोधक-शब्दस्याभिव्यञ्जको वैखरीनादस्तु

---

181 परमलघुमञ्जूषा-पृ. 91. द्वि.सं. 1998. चौ. सु. प्र. वाराणसी

निरर्थकः। मध्यमानादो हि सूक्ष्मः स्वश्रोतमात्रग्राह्यः किन्तु वैखरीनादस्तु स्थूलः परश्रोत्रेणाऽपि ग्राह्यः। मध्यमानादेनार्थाभिव्यञ्जकशब्दोऽभिव्यज्यते, वैखरीनादेन तु स एव परश्रोत्रविषयी क्रियते इति।

इयमेवसरणिः श्रीभर्तृहरिकैयटभट्टोजिदीक्षितप्रभृतीनाम् आचार्यणा-मासीत्। श्रीकौण्डभट्टेन भूषणसारे वायुसंयोगस्य व्यञ्जकता दर्शिता, सा तु ध्वनिना अन्यथासिद्धत्वात् भाष्यविरुद्धत्वाच्च न सम्मान्यते। अत्र भट्टोजिदीक्षितेन शब्दकौस्तुभे लिखितं तद्यथा "वस्तुतस्तु सर्वकाराणानामपि कारणभूतोऽनादिनिधनो विमुः प्रपञ्चात्मकविवर्तोपादानस्वरूपः स्फोट-पदाभिधेयः, पदार्थस्तु न द्रव्यादिरूपः, गुणक्रियादिशून्यत्वात्, अपि तु भावात्मैव केवलं वक्तुं कथञ्चिच्छक्यते" इति।

भर्तृहरिनागेशकैयटप्रभृतिभिः शाब्दिकैः स्फोटस्य जातिरूपत्वं, वाग्रूपत्वं शब्दब्रह्मरूपत्वञ्च स्वरूपं प्रतिपादितम् । विस्तरभयादत्र भर्तृहरिणोक्तं स्फोटस्य शब्दब्रहारूपत्वं प्रदर्शयामि-

अनादिनिधनं ब्रह्म शब्दत्तत्त्वं यदक्षरम् ।

विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।। (वा.1.1.)

इति कारिकया भर्तृहरिः स्फोटस्य शब्दब्रह्मत्वं शब्दतत्त्वनाम्ना स्फुटं प्रतिपादयति। सर्व जगदस्यैव शब्दतत्त्वस्य विवर्तभूतम्। नैके शाब्दिका इदमेव शब्दतत्त्वं स्फोटमाहुः। अयमेवस्फोटः अर्थप्रत्यायकत्वात् शाब्दबोधजनकः ।

अयमाशयोऽत्र - क्रमशून्यो नित्यो निरवयवः स्फोटो वर्णातिरिक्त एव वाचकः, यश्च शब्दत्तत्त्वनाम्ना वाक्यपदीये उक्तः शब्दब्रह्माऽपरनामधेयो जगत उपादानकारणत्वेन व्यवस्थितः। यावन्तोऽपि अर्थाः वाच्याः, ते शब्दात्-वाचकात्

पृथग्भूता न सन्ति। अतः शब्दरूपाद् ब्रह्मणो जगत आविर्भाव उच्यते- 'अनादिनिधनमिति कारिकया। उच्चार्यमाणस्य ध्वनिरूपस्यानित्यत्वात् वाचकत्वं तत्र नापेक्ष्यते। सर्वज्ञानं वाग्रूपतानुगतम्। यदि ज्ञानस्य वाग्रूपता उद्गच्छेत् तदा ज्ञानरूपः प्रकाशो न प्रकाशेत। वागेव चैतन्यम्, प्रयोजनवतीषु क्रियासु सर्वान् देहिनः वाग् एव चेष्टयति। उक्तं वाक्यपदीये-

अर्थक्रियासु वाक् सर्वान् समीहयति देहिनः।

तदुत्क्रान्तौ विसंज्ञोऽयं दृश्यते काष्ठकुड्यवत्।।[182]

शब्दब्रह्मापरनामधेयं वाक्तत्त्वं चिरूपम्। उक्तं भर्तृहरिणा-

भेदोद्ग्राहविवर्तेन लब्धाकारपरिग्रहा।

आम्नाता सर्वविद्यासु वागेव प्रकृतिः परा।।[183]

इयं पराकृतिः वागेव वैयाकरणानां स्फोटः। निराकाराऽपि सा परा वाक् आकारं प्राप्ता प्रकृतिपदेन सर्वविद्यासु उपनिषत्सु चोक्ता।

अत्र नागेशभट्टस्य मतं भिन्नं दरीदृश्यते। तथा हि अपरिपक्वावस्थायां प्राणिनां कर्म फलप्रदानाय अनुन्मुखं प्रलयावस्थायां तिष्ठति । ततः परिपक्वावस्थायां फलोत्पत्तये मायोपाधियुक्ते ब्रह्मण सर्जनात्मिका वृत्तिरूदैति। ततः शक्तितत्त्वं समुद्भवति। तस्य त्रयो भेदाः बीजम्, नादः बिन्दुश्चेति। अचिदंशो बीजम्। चिदंशो बिन्दुः। चिदचिदंशौ नादः। अस्मादेव चिदंशरूपाद् बिन्दोः ज्ञानप्रधानः अवयवरहित सृष्ट्यनुकूल अवस्थाविशेषसहितः चिदंशमिश्रितो नादो प्रादुर्भवति। स च शब्दब्रह्मरवो नादः परा वाक् स्फोट इत्यादिपदैरुच्यते। अयं नादो व्यापकोऽपि मूलाधारचक्रे निविशते। अर्थबोधाय कृतेन प्रयत्नेन प्रेरितः संस्कृतश्च वायुः नादं गतिमन्तं करोति। स

---

182 वाक्यपदीयम्-स्वोपज्ञटीकायाम् ब्र. 126

183 वाक्यपदीयम्, स्वोपज्ञटीकायाः ब्र. 126

नादः क्रमशः नाभि-हृद मुखकण्ठादिस्थानेषु पश्यन्ती-मध्यमा वैखरीपदेन लोके प्रसिद्धिं गच्छति। उक्तम्-

बिन्दोस्तस्माद् भिद्यमानाद् रवोऽव्यक्तात्मकोऽभवत्।

स एव श्रुतिसम्पन्नैः शब्दब्रह्मेति गीयते।।

मध्यमावाग्रूपः स्फोटः कण्ठदेशस्थेन वायुना अभिव्यक्तेन वैखरीनादेन वीचितरङ्गन्यायमन्यं वा कमपि विधमनुसृत्य श्रोतुः श्रवणेन्द्रियप्रविष्टेन प्राप्तवर्णपरिग्रहः हृद्देशस्थः स्फोटः वक्तुः श्रोतुश्चाभिव्यज्यते। अत एव स्फुटत्यर्थोऽस्माद' इति व्युत्पत्त्या स्फोट इत्युच्यते। इदमेव तत्त्वं लघुमञ्जूषायां नागेशेनोक्तं - "केनचिद् घटमानय इति वैखरीनादः प्रयुक्तः । स नादः इन्द्रियद्वारा बुद्धिहृदगतः सन् अर्थबोधकं शब्दं स्वनिष्ठकत्वादिना व्यञ्जयति तस्मादर्थबोधः।[184] अतः शाब्दिकैः स्फोटस्यैव अर्थबोधकत्वं स्वीक्रियते इति वक्तुं शक्यते।

शाब्दिकानां मते स्फोट-भेदाः

वस्तुतः शाब्दिकानां स्फोटस्यैकताऽखण्डता चाभीष्टाः तथापि व्यंजकोपाधिभेदात् तत्र भेदवत् प्रतीति-र्भवति। भाषायां वर्णपदवाक्यानि स्फोटस्य व्यञ्जकतत्त्वानि स्वीक्रियन्ते अस्मादेव कौण्डभट्टः स्फोटस्याष्टभेदान् प्रोक्तवान्। तदाह मूले वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, अखण्डपदवाक्यस्फोटौः, वर्णपदवाक्यभेदेन त्रयो जातिस्फोटा इत्यष्टौ पक्षाः सिद्धान्तसिद्धा इति। अर्थात् -

1. वर्णव्यक्तिस्फोटः
2. वर्णजातिस्फोटः
3. सखण्डपदव्यक्तिस्फोटः
4. अखण्डपदव्यक्तिस्फोटः
5. सखण्डवाक्यव्यक्तिस्फोटः
6. अखण्डवाक्यव्यक्तिस्फोटः
7. पदजातिस्फोटः
8. वाक्यजातिस्फोटश्चेति।

---

184 परमलघुमञ्जूषा पृ. 103. द्वि.स. 1998 चौ. वि. भ, वाराणसी

एतेऽष्टभेदास्तु वाक्यस्फोटस्य बोधार्थे स्वोपायभूताः प्रदर्शिताः। पारमार्थिकस्य स्फोटात्मकशब्दब्रह्मस्य ज्ञानाय उपर्युक्ताः। वर्णव्यक्तिस्फोट-प्रभृतयानामष्टानाम् अपारमार्थिकस्फोटानां प्रतिपादनमुपायरूपे एव कृतम्। अत्रापि वास्तविकस्फोटतत्त्वस्यज्ञानाय पूर्वपूर्वयोः बहिरंगता तथा चोत्तरोत्तरस्यान्तरंगता ज्ञातव्यम्। प्रोक्तं भूषणसारे-

"पञ्चकोशादिवत्तस्मात् कल्पनैषा समाश्रिता।

उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः ।।"[185]

स्वातन्त्र्योत्तरकाले स्फोटभेदसंकल्पना

कौण्डभट्टकृता अष्टस्फोटभेदाः भाष्यादिग्रन्थेषु प्रमाणिता आसन्। तस्मादेव तैः कृता स्फोटभेदा एव शाब्दिकैः स्वीकृता न तदधिका न्यूना या। परन्तु स्वातन्त्र्योत्तरकाले मूर्धन्यशाब्दिकैः श्रीरामाज्ञापाण्डैः व्याकरणदर्शन भूमिकाख्ये ग्रन्थे षोडशस्फोटा निर्दिष्टाः। श्रीरामाज्ञापाण्डेय वैयाकरण-भूषणसारस्य प्रभाटीकामाश्रित्य वर्णस्फोटस्य खण्डनमकरोत्। तत्र वर्णस्फोटं स्पष्टयनाह प्रभाकर तथा पचति इत्यत्र पच् इति प्रकृक्तिव्यङ्ग्यः ति इति प्रत्ययव्यङ्ग्यः स्फोटः वर्णस्फोटः । तार्किकाणां मते यच्छक्तं पदमिति तद् व्यङ्ग्यस्फोटस्यैव, शाब्दिकनये वर्णस्फोटशब्देन व्यहवारः ।[186]

अत्र प्रभाकरस्याशयस्त्वेतावदेव यत् नैयायिकाः प्रकृतिप्रत्ययमिश्रितं पदांशं शक्तं मत्वा पद उच्यते, तेनेव शाब्दिका व्यंग्यस्फोटं वर्णस्फोटः प्रोच्यते। एतत्तु शाब्दिकसम्मतमस्ति। परन्तु श्रीरामाज्ञापाण्डेयः मन्ये नैयायिकानां शक्तं पदं श्रुत्वा प्रभाकरमतस्य खण्डनमकरोत्। तद्यथा मूले अस्यां स्थितौ वाक्यार्थज्ञानमस्माकं कृते

---

185 वै. भू. सार का-69. पू. 382. द्वि.सं. 1999 चौ. सुभा.प्र. वाराणसी

186 प्रभा. टीका-वै. भू, सार, पृ. 451

वाक्यस्फोटस्य विलय एव स्यात्। नापि 'पचति इत्यादौ पदस्फोटव्यवहारः तथा चायं विभागो नहि युक्तियुक्तः ।[187]

अत्र पाण्डयेमहोदयस्याभिप्रायस्त्वयमेवास्ति यत् वैयाकरणानां निष्कर्षभूतस्यवाक्यस्फोटस्य नैयायिकानां पदे विलये सति तस्य लोपो भविष्यतीति। परन्तु प्रभाकरेण यदुक्तं तत्तु वर्णस्फोटस्वरूपं स्पष्टायैवेति, यतो हि प्रकृतिप्रत्ययौ नैयायिकमते शक्ते स्तः न तु वैयाकरणिकाये। अतः पदे वाक्यविलयस्य संशयवशादेव प्रभाकरमतं खण्डितवान् श्रीरामाज्ञापाण्डेयः तन्नसमीचीनम्। यथा चन्द्रेणोपमित मुख चन्द्रो न भवति तथैव नैयायिकानामवधारणयोपमितं भूत्वाऽपि वर्णस्फोटः पदस्फोटो न भविष्यति। अतः पाण्डेयमहोदयस्य धारणा पूर्णतः निर्मूला अस्ति।[188] तथापि इमां विषमतां दूरीकरणार्थ नागेशनिर्दिष्टं स्फोटस्य 'आभ्यन्तर' बाह्यश्चेति रूपद्वयं स्वीकृतवान् श्रीपाण्डेयः। तत्र बाह्यस्फोटस्य व्यक्तिः जातिः चेति भेदी स्वीकृत्याग्रे कथयति यत् जातिव्यक्तिभेदाभ्यामतिरिक्तभेदनामाग्रहोऽस्ति चेत् कल्पितपदं तत्र कल्पितप्रकृतिप्रत्ययौ स्वीकृत्य व्याडिवाजप्यायनयोः व्यक्तिरूपं जातिरूपं चार्थ गृहीत्वा षोडशस्फोटभेदाः कर्तुं शक्यते। तद्यथा मूले प्रोक्तम्-

'नागेशभट्टो नहि अष्टौ स्फोटान् मञ्जूषायां निरदिक्षत, किन्तु केवलम् आन्तरबाह्यभेदेन द्वौ स्फोटौ प्रदर्श्य बाह्यस्फोटस्य जातिव्यक्तिभेदेन द्वावेव भेदौ प्रादर्शयत्। तथा च व्यवहारदृष्ट्या बाह्यस्फोटप्रदर्शने प्राप्ते वक्ष्यमाणरीतिरेवास्माभिरवलम्बनीया। तथा हि- व्यक्तिः पदार्थ इति व्याडिमते व्यक्तिस्फोटः। जातिपदार्थवादिनो वाजप्यायनस्य मते जातिस्फोट इत्येव रूपेण द्वौ स्फोटावभ्युगन्तव्यौ। यदि चावान्तरस्फोटप्रतिपादने आग्रह, तर्हि कल्पितानि पदानि,

---

187 व्या. द. मू. पू. 23. द्वि.सं. 1982, वाराणसी

188 स्फोट सि. की अर्वा, परम्परा रमाकान्त पाण्डेय, भा. द. के 50 वर्ष, पृ. 274, 2006, सागर

कल्पितपदेषु कल्पितौ प्रकृतिप्रत्ययावादाय वक्ष्यमाणपद्धत्या स्फोटः स्वीकार्यः।[189] एवं सति षोडशस्फोटाः सम्पद्यन्ते। श्रीपाण्डेयप्रोक्ता षोडशस्फोटभेदा निम्नप्रकारेण सन्ति-

1. प्रकृतिस्फोटः	2. प्रत्ययस्फोटः
3. प्रकृतिजातिस्फोटः	4. प्रत्ययजातिस्फोटः
5. अखण्डप्रकृतिस्फोटः	6. अखण्डप्रत्ययस्फोटः
7. वर्णस्फोटः	8. वर्णजातिस्फोट:
9. पदस्फोटः	10. पदजातिस्फोटः
11. अखण्डपदस्फोटः	12. अखण्डपदजातिस्फोटः
13. वाक्यस्फोट	14. वाक्यजातिस्फोटः
15. अखण्डवाक्यस्फोटः	16. अखण्डवाक्यजातिस्फोटश्चेति ।

श्रीकोण्डभट्टकृतैः श्रीपाण्डेयकृतैः चोपर्युक्तभेदैः इदं स्पष्टं भवति। यत् कौण्डभट्टः स्फोटव्यंजकभेदेन स्फोटाभेदानां स्थापनामकरोत् । पाण्डेय-महोदयस्तु स्फोट-बोध्यार्थभेदेन स्फोटभेदानां प्रतिपादनमकरोत्। अत्र पाण्डेयमहोदयः कौण्डभट्टोक्तं वर्णस्फोटं प्रकृतिप्रत्ययरूपे पृथक् कृत्वा षड्भेदेषु विभक्तवान्। कौण्डभट्टस्तु व्यक्तिस्फोटं सखण्डममखण्डं च भेदेन विभक्तयति। परन्तु श्रीपाण्डेयमहोदयस्तु जातिमपि सखण्डभेदेनाखण्डभेदेन च विभक्तवान्। इत्थं पाण्डेयमहोदयस्य मतेऽष्टभेदा अधिका जाता। पाण्डेयमहोदयोऽत्र व्यक्तिपदार्थवादिनः दृष्ट्या जातिं जातिपदार्थवादिनः दृष्ट्या व्यक्तिं व्यग्यं मत्यैव स्फोटभेदानां संकल्पनां प्रस्तुतवान् ।

पाण्डेयमहोदयस्योपर्युक्तानां षोडशभेदान् समीक्षयन्नाचार्यो बदरीनाथ-शुक्लमहोदयः कथयति यत् श्रीपाण्डेयकृद्स्फोटविभागाः केवलं व्यञ्जकगतभेददृष्ट्या सन्ति, यदि जातिगतदृष्ट्या विभागाः स्युः तर्हि तेषां स्फोटभेदविवेचने न्यूनता

---

189 व्या. द. भू. पृ. 24. द्वि.सं. 1982, वाराणसी

समागच्छति। यतो हि जातिपदार्थवादिनः मते व्यक्तेः तथा च व्यक्तिपदार्थवादिनः मते जात्याः च पूर्वोक्तस्फोटभेदाद् अवाच्यताकारणात् तेन प्रयुक्तस्फोटभेदाः दुर्घटिता भवन्ति।

श्रीपाण्डेयेन प्रकृतिप्रत्ययोः सखण्डमखण्डञ्च भेदौ उक्त्वा व्यक्तिस्फोटस्य जातिस्फोटस्य च ये षोडशभेदाः कथिताः तान् न्यूनं मत्त्वा श्रीशुक्लमहोदयस्तत्र अखण्डजातिस्फोटः अखण्डप्रत्ययजातिस्फोटश्चेति भेदद्वयं योजयित्वा अष्टादशस्फोटभेदा कृतवान्।[190]

सिद्धान्तमिमं गौरवास्पदमङ्गीकुर्वन् पं. बदरीनाथशुक्लमहोदयः कथयति यत् वाच्यव्यंजकाभ्यामुभाभ्यां दृष्ट्या स्फोटभेदानां कल्पनायामेको दोषोऽयं समागच्छति यद् वर्णवाचकतावादिनां मते वर्णादिभेदाद् अष्ट व्यक्तिस्फोटाः अष्टजातिस्फोटाश्च आहत्य षोडशभेदा भवन्ति। एवमेव अर्थगतजात्याः वाचकतेव वर्णादिगतजात्या एव वाचकतां स्वीकुर्वतां मते वर्णादिगत अष्टजाति-व्यंग्यस्फोटा चाष्टव्यक्तिस्फोटाः, आहत्य षोडशस्फोटा भवन्ति। एवमेव वर्णादिव्यंग्यभेदात् व्यक्तिजातिस्फोटानां द्वात्रिंशत् संख्या भविष्यति न तु षोडश एव। अतः वाच्यभेदेन स्फोटस्य भेदान् न मत्वा व्यञ्जकभेदेन कौण्डभट्टप्रतिपादितं भेदविधानमेव समीचीनमुक्तवान् शुक्लमहोदयः।[191]

आचार्यशुक्ल महोदयस्य समीक्षां दृष्ट्वा पाण्डेयमहोदयस्य रक्षार्थमत्र समागच्छति आचार्यरामप्रसादत्रिपाठिमहोदयो। अत्र महोदयः स्फोटभेदानां संख्यां द्वात्रिंशत्पर्यन्तं कृत्वा कथयति यद् व्याकरणदर्शनभूमिकायां स्फोटस्य षोडशभेदा संख्यानिर्धारणपरका न भूत्वा उपलक्षणमात्रमेवेति। तद्यथा लिखितं पाणिनीयव्याकरणे प्रमाणसमीक्षाख्ये ग्रन्थे- "व्याकरणदर्शनभूमिकायां षोडश

---

190 स्फोटपिस्फोट, पं. बदरीनाथ शुक्ल, सारस्वती सुषमा, 12.2, पृ. 34-36

191 स्फोट सि. की. अर्वा, पुनः रचना रमाकान्त पाण्डेयः, दर्शन के 50 वर्ष पृ-278, 2006 सागर

स्फोटा"[192] इति कथनं च न संख्यावधारणपरम्, अपि तूपलक्षणपरमिति विभाव्यतां सुधीभिः।[193] अत्र त्रिपाठिमहोदयानुसारं स्फोटस्य बाह्यान्तरयोः भेदयोः निम्नोक्ता षोडश षोडश भेदाः भवन्ति-

1. एकवर्णरूपप्रकृतिस्फोटः
2. एकवर्णरूप्रत्ययस्फोटः
3. अनेकवर्णवत्प्रकृतिस्फोटः
4. अनेकवर्णवत्प्रत्ययस्फोटः
5. अखण्डानेकवर्णवत्प्रकृतिस्फोटः
6. अखण्डानेकवर्णवत्प्रत्ययस्फोटः
7. एकवर्णरूपप्रकृतिजातिस्फोटः
8. एकवर्णरूपप्रत्ययजातिस्फोटः
9. अनेकवर्णवत्प्रकृतिजातिस्फोट
10. अनेकवर्णवत्प्रत्ययजातिस्फोटः
11. पदस्फोटः
12. अखण्डपदस्फोटः
13. वाक्यस्फोटः
14. अखण्डवाक्यस्फोटः
15. अखण्डपदजातिस्फोटः
16. अखण्डवाक्यजातिस्फोटश्चेति।

एतान् बाह्यस्फोटभेदान् आन्तरस्फोटपक्षे स्वीकृते सति द्वात्रिंशत्भेदा गच्छन्ति। लिखितश्चैतत् त्रिपाठिमहोदयेन पाणिनीयव्याकरणे प्रमाण-समीक्षाख्ये ग्रन्थे। तद्यथा मूले-वस्तुतो भेदानां विमर्श क्रियमाणे द्वात्रिंशत्संख्याकाः स्फोटाः प्रतीयन्ते। तथा हि- प्रकृतिप्रत्ययस्फोटी एकवर्णरूपौ द्विविधौ, अनेकवर्णघटितसमुदायरूपौ च द्विविधौ । एतौ पुनः प्रत्येक सखण्डाखण्डभेदाभ्यां द्विविधाविति चतुर्विधी। इत्थं व्यक्तिपक्षे मिलिताः सर्वे षड्विधा जाताः । जातिपक्षे पुनश्चत्वार एव। पदवाक्यस्फोटी च व्यक्तिपक्षे चतुर्विधौ, जातिपक्षे च द्विविधौ। एवं च व्यक्तिपक्षे - सङ्कलया

---

192 व्या. द. भू. पृ. 48-46

193 पा. व्या. प्र. समीक्षा, पृ. 286-287, द्वि.सं. 1967, वाराणसी

दशसंख्याका इमे सम्पन्नाः, जातिपक्षे तु षट् सङ्कलिताः षोडश। अन्तरबाह्यभेदाभ्यां पुनर्भेदैर्द्वात्रिंशत्संख्याका ज्ञातव्याः सूक्ष्मदर्शिभिः शाब्दशास्त्रनिष्णातैः" ।[194]

अत्र आचार्यपाण्डेयस्य आचार्यत्रिपाठिनश्च स्फोटभेदविवेचने मौलिकभेदोऽयमेव यत् पाण्डेयः प्रकृतिं प्रत्ययं च पृथक् परिगणयन्नपि वर्णस्फोटम् पुनः परिगणयति परन्तु आ. त्रिपाठी प्रकृतिं प्रत्ययं च स्फोटभेदेषु मत्वा वर्णस्फोटस्य पृथक् प्रतिपादन नैव करोति। अनेन ज्ञायते यत् त्रिपाठिमहोदयस्य मनसि भाष्यसम्मतसिद्धान्तान् प्रति आस्था आसीत्।

त्रिपाठिनः प्रतिपादितैः उक्तस्फोटभेदैः सुस्पष्टयति यत् स कौण्डभट्टस्यवर्णस्फोटस्य स्थाने प्रकृतिप्रत्ययरूपं भेद मत्वा तं मतमेव व्याख्यातवान्। प्रकृतिप्रत्ययोरपि एकवर्णात्मका नैकवर्णात्मकाश्च भेदान् दृष्ट्वा 'इ' इत्यादयः एकवर्णात्मिकान् सनाद्यन्तादिधातुरूपां नैकवर्णात्मकप्रकृतिनां तथा एतादृशानां प्रत्ययानां स्फोटरूपतां प्रतिपादितवान् । अनयोः जातिपक्षः व्यक्तिपक्ष च दृष्ट्या विभागो शास्त्रसम्मतमेव यतो हि "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्"[195] तथा च "सरूपाणाम् एकशेषएक-विभक्ती"[196] प्रभृतयैः सूत्रमाध्यमैः पाणिनि उभय पक्षी उल्लेखमकरोत्, ययोः सिद्धान्तानुसारी व्याख्यानं महाभाष्येऽपि मिलति। परन्तु आचार्यत्रिपाठिनः स्फोटभेदविषयकसंकल्पना तदा परम्परा विरुद्धा दृष्टिगता भवति यदा तेऽनेकवर्णात्मकेषु प्रकृतिप्रत्ययस्फोटेषु सखण्डत्वमखण्डत्वञ्च भेदः करोति। वस्तुतः प्रकृतिप्रत्ययौ एकवर्णात्मकौ वा नैकवर्णात्मकौ भवताम्, तत्र अर्थबोधकता सखण्डरूपे नैव भवतीति स्पष्टवान् प्रभाकरः। तद्यथा मूले प्रोक्तम्- 'वर्णस्फोटस्य सखण्डाखण्डभेदेन द्वैविध्यं तु न। सुबन्त-तिङन्त तदादिभिन्नस्य वाक्यभिन्नस्य च

---

194 पा. व्या. प्र. समीक्षा पृ. 286 द्वि.सं. 1967. वाराणसी

195 पा. तू 1/2/58

196 पा. सू. 1/2/64

प्रकृतिप्रत्ययसमुदायरूपस्य प्रकृतिरूपस्य प्रत्ययरूपस्य चैकवर्णमात्रवर्णस्फोटघटक-वर्णशब्देन ग्रहणात्" ।[197]

वस्तुतस्तु-प्रकृतिप्रत्ययोः सखण्डत्वस्य अखण्डत्वस्य चावधारणा आचार्य-त्रिपाठिनो मौलिकी न भूत्वा श्रीरामाज्ञापाण्डेयस्यावधारणाया विकसितस्वरूप-मस्ति। अत्र श्री बद्रीनाथशुक्लोऽपि श्रीपाण्डेयमतस्य समीक्षां कुर्वन् प्रकृतिप्रत्ययोः सखण्डताया अखण्डतायाश्च निर्देशं कृत्वा श्रीपाण्डेयेन प्रोक्तान् प्रकृतिप्रत्ययौ पक्षे षट्स्फोटभेदान् न्यूनं ज्ञात्वैवाधोलिखितानष्ट-स्फोटभेदान् प्रोक्तवान्-

1. सखण्डप्रकृतिस्फोटः
2. सखण्डप्रकृतिजातिस्फोटः
3. अखण्डप्रकृतिस्फोटः
4. अखण्डप्रकृतिजातिस्फोटः
5. सखण्डप्रत्ययस्फोटः
6. सखण्डप्रत्ययजातिस्फोटः
7. अखण्डप्रत्ययस्फोटः
8. अखण्डप्रत्ययजातिस्फोटः[198]

अयमाशयः - वर्णादय समस्तभाषाघटकतत्वानां स्फोटरूपतायाः संकेतो भाष्याद् गृहीत्वा भट्टोजिदीक्षितकौण्डभट्टप्रभृतयः शाब्दिका वर्ण-पद-वाक्यभेदेषु तं विभक्तवन्तः। सूत्रकारस्याभिमते जातिव्यक्तयोः पक्षे संकेतं प्राप्य नव्यवैयाकरणाः पतञ्जलिं भर्तृहरिञ्च प्रमाणं ज्ञात्वा जातिव्यक्तिभेदाभ्यां तथा च सखण्डाखण्डाभेदाभ्यां सम्पुष्ट्य सिद्धान्तमिमं स्थापितवन्तः । तेषां विरुद्धे स्वातन्त्र्योत्तरकालीनैः रामाज्ञापाण्डेय-रामप्रसादत्रिपाठि बदरीनाथशुक्लप्रभृतिभिः मूर्धन्यशाब्दिकैः कृतः प्रयासः परम्परा पूर्णतः न समावेशयति। इत्थं त्रयाणामाचार्याणां प्रकृतिप्रत्यययोः पक्षे अखण्डानां सखण्डानां भेदानां प्रतिपादनं पूर्णतः युक्तियुक्तं न भूत्वा पुनर्व्यवस्थापनस्यापेक्षां करोति।

---

197 प्रमाटीका, वै भू सा.पृ. 448

198 सारस्वती सुषमा, 12.2, पृ. 36

उपर्युक्तानां भेदानां समर्थने यदि परम्परायाः प्रमाणस्वरूपे प्रस्तुतिः सम्भवेत् तथा चात्र समागतानां विप्रतिपत्तिनां निवारणं कृत्वा उपस्थापना भवेच्चेदुपर्युक्तानामाचार्याणां स्फोटभेदविषयक प्रयासो स्वातन्त्र्योत्तरकाले व्याकरणशास्त्राय उपलब्धिः सेत्स्यति नात्र संशयः। इत्यलमत्र विस्तभयेन।

(iii) स्वातन्त्र्यात्परं व्याकरणशास्त्रदृष्ट्या मोक्षनिरूपणम्

मया बहुधा श्रुतं यत्-सा विद्या या विमुक्तये इति अर्थात् कस्यापि शास्त्रस्याध्ययनस्य प्रयोजनमुद्देश्यं या मुक्तिर्वा मोक्षं वेति भवति। भारतीयासु चतुर्दशविद्यासु व्याकरणशास्त्रस्य स्थानमन्यतमोऽस्ति। कथमत्र शब्दब्रह्मसमुपासकानां शाब्दिकानां मते मोक्षलाभो भवतीति विषयमधिकृत्य किञ्चिद् निवेदयामि।

मोक्षविषयः प्रायः सर्वेषु शास्त्रेषु सम्यक् विमर्शितः । व्याकरण-शास्त्रस्यैतिह्ये मोक्षव्यवस्थामदृष्ट्वेव सोमानन्देन तच्छिष्येण चोत्पलदेवेन व्याकरणशास्त्रत्वं निराकृतम् आसीत्। परन्तु तन्न समीचीनं तयो व्याकरण-शास्त्रस्य मोक्षविषयकस्याज्ञानत्वात् ।

स्वातन्त्र्यात्पूर्व मोक्षतत्वस्य स्वरूपम् -

शब्दस्य परेण ब्रह्मणा साम्यमिति भगवता पतञ्जलिना व्याख्यातम्। तद्यथा-

चत्वारि शृङ्गास्त्र्योऽस्यपादाः द्वेशीर्षे सप्तहस्तासोऽस्य।

त्रिधाबद्धो वृषभो रोरवीति महोदेवो मर्त्या आविवेश।।[199]

ऋग्वेदोक्तऋचाया अयमाशयः-

चत्वारि शृङ्गाणि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च त्रयोऽस्यपादाः लडादिविषयाः। त्रयो भूतभविष्यद्-वर्तमान-कालाः द्वेशीर्षे द्वौ

---

199 ऋग्वेद सं. 4.5.53

शब्दात्मानौ नित्यः कार्यश्च व्यंग्य-व्यञ्जक भेदात्। सप्तहस्तासोऽस्य तिङा सह सप्तसुब् विभक्तयः। त्रिधा बद्धः त्रिषु स्थानेषु उरसि कण्ठे शिरसि च बद्धः वृषभः इति वृषभत्वेन रूपणं क्रियते। वर्षणात् वर्षणश्चज्ञानपूर्वकानुष्ठानेन च फलप्रदत्त्वम्। रोरवीति शब्दं करोति। रौतिः शब्द कर्मा। महोदेवो मर्त्यानाविवेश। महान् देवः शब्दः मर्त्यान् मरणधर्माणः मनुष्यास्तानाविवेशः।[200] भर्तृहरिणाऽपि ब्रह्मकाण्डे लिखितं यत् जगन्निदानं स्फोटाख्योनिरवयवो नित्यः शब्दो ब्रह्मैवेति तद्यथा-

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।

विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः" ।।[201]

अस्यायमाशयः-

अनादिनिधनमुत्पादविनाशरहितमत एव नित्यम्। पूर्वापरीभावर-हितमत उपसंहृतक्रमश्च यदक्षरमविभक्तः ककारादि वर्णरूपाया वैखर्याः वाचोनिमित्तम् सद् बाह्यार्थवासनया अविद्यारूपया अर्थभावेन घटपटादिरूपेण विवर्तते प्रतीयते। यतः शब्दाख्यात् ब्रह्मणः जगतः विकारजातस्य प्रक्रिया उत्पत्तिर्व्यवहारो वा तत् शब्दतत्त्वं परावाग्रूपं ब्रह्मैवेति।

अर्थात् सर्वग्राह्यग्राहकाकारवर्जिता, अपरिच्छिन्ना सर्वतः संहृतक्रमा परावाग् ब्रह्म तदेवाविद्या लक्षणयान्तः पश्यदवस्थया भोक्तृतारूपया विशिष्टं ज्ञेयरूपशून्यं चैतन्यमात्रं जीव इत्यभिधीयते। लिखितमस्ति वाक्यपदीये यत् व्याकरणमेव मोक्षस्य सरलमार्गो। तद्यथा-

"इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।

इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः"।।[202]

---

200 महामाष्य, 12. 1999, मो. ब.दास, दिल्ली

201 वाक्यपदीयम्, ब्रह्मकाण्ड, का-1

महाभाष्यकारेणापि "एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवति इत्यादिना साधुशब्दप्रयोगेण कामपूर्तिः प्रतिपादिता। किञ्च-

"नाकमिष्टसुखं यान्ति चतुर्भिर्वाडपै रथैः।

अथ पत्काषिणो यान्ति येऽचीकमतभाषिणः"।।[203]

अनया कारिकयाऽत्र स्वर्गप्राप्तिरपि साधुशब्दप्रयोगेण परिदर्शिता, तथापि मोक्षप्राप्तिः कयारीत्या भवतीति प्रश्नस्य समाधानं भाष्याक्षर-समालोचनया न ज्ञायते। तत्र व्याकरणाध्यनस्य मुख्येषु पञ्चप्रयोगेषु आनुषङ्गिकेषु त्रयोदशप्रयोजनेष्वपि मोक्षप्राप्तिमार्गोऽपरिगणित एव।

वेदान्तकल्पलतिकायां मोक्षनिरूपणैकफलिकायाम् लिखितमस्ति- 'औपनिषदास्तु भगवता नीला चलनायकेन नारायणेनानुगृहीता निरतिशया-नन्दबोधरूप आत्मैवानाद्यविद्यानिवृत्त्युपलक्षितो मोक्ष इत्याचक्षते । एवमेवास्मिन् प्रसङ्गे पतञ्जलिना लिखितम् – 'शब्दप्रमाणका वयं यच्छब्दः आह तदस्माकं प्रमाणम्।'[204]

स्वातन्त्र्यात्परं शाब्दिकमते मोक्षनिरूपणम् -

स्वातन्त्र्यात्परं व्याकरणशास्त्रे श्रीरामाज्ञापाण्डेयमहोदयैर्मोक्षतत्त्व-स्वरूपस्य व्याख्यानं प्रथमतया कृतम्। तेनेदम् तत्त्वं व्याकरणदर्शनभूमिका' इत्याख्ये ग्रन्थे प्रतिपादितम्।

---

202 वाक्यपदीयम्, ब्रह्मकाण्ड, का. 16

203 महाभाष्ये, 3.1.28 उद्धृतम्

204 महाभाष्य-1. पृ. 366

अस्माकं वैयाकरणानां श्रुतेः प्रामाण्येन मोक्षक्रमः-

लिखितं व्याकरणदर्शनभूमिकायाम् श्रीरामाज्ञापाण्डेयमहोदयेन। तद्यथा "भाष्यसूचितानां श्रुतिप्रमाणकानामस्माकं मते श्रुतिरेव भगवती यदाह तत् प्रमाणम्। एवञ्च महाभाष्ये चत्वारि, उत त्वः सक्तुमिव इत्यादिश्रुति-भिनिर्दिष्टं मोक्षस्वरूपं दर्शयामि। तत्रासु अन्यतमामेव श्रुतिमवलम्ब्य हरिवृषभेण-

अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्।

प्राहुर्महान्तं वृषभं येन सायुज्यमिष्यते।।[205]

अस्या व्याख्या कृता रामाज्ञापाण्डेयेन, तद्यथामूले- एतेन सर्वेश्वरः सर्वशक्तिसम्पन्नो वृषभः तस्मिन् खलु वाग्योगवित् शास्त्रजशब्दज्ञानपूर्वक-प्रयोगेण क्षीणपापः पुरुषो विच्छिद्याहारग्रथीन् अत्यन्तं संसृज्यते ।

यद्वा त्रिषु स्थानेषु नाभादुरसि कण्ठे बद्धः पुरुषो यदा ज्ञातया त्रिविधया वाचा विशिष्टो भवति, तदा त्रिविधबन्धापगमे शुद्धो बन्धरहितोऽ-वतिष्ठते, स एव मोक्षपदेन व्यवह्रियते।

यद्वा 'शुङ्गेन सन् मूलमन्विच्छ सौम्य इति श्रुत्युक्तपद्धत्या साधको वैखरीमध्यमापश्यन्तीरूपान् ग्रन्थीन् भिनत्ति, तदा सा चिच्छक्तिः परा प्रकाशते इति सैव मोक्षावस्था।[206]

अयं भावोऽत्र यत् शाब्दिकानुसारेण पराख्यवाचः साक्षात्कारः एव मोक्षः कथितः। साधको गुरुणोपदिष्टमार्गेण पराख्यां वाचं साक्षात्करोति। अत्र

---

205 वाक्यपदीयम्, 1.131

206 व्या. द. भू. पृ. 66-70, द्वि.सं. 1982, वाराणसी

मोक्षावस्थायामपि नहि शक्तीनां विलयः स्वीक्रियते, तासां यथावज्ज्ञानव-स्थाया एव मोक्षशब्दवाच्यत्वात् ।

भर्तृहरिणा वाक्यपदीये प्रोक्तं नित्यशब्दविषये-

अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्।

प्राहुर्महान्तं वृषभं येन सायुज्यमिष्यते।।

तस्माद् यः शब्दसंस्कारः सा सिद्धिः परमात्मनः ।

तस्य प्रवृत्तितत्त्वज्ञस्तद्ब्रह्मामृतमश्नुते ।।[207]

अन्तिमकारिकया फलमपि प्रदर्शितं भवति। गौरीनाथशास्त्रिणाऽत्र लिखितं यत्-वैयाकरणमते मोक्षदशायां तादृशी एवं स्थितिर्भवति, यथा परस्परभिन्नानामपि कलानां कालशक्तिवृत्त्यसमाविष्टानां शब्दब्रह्मणि अभेदेनावस्थानं भवति ।

मोक्षप्राप्तौ रीतिः

अत्र लिखितं रामाज्ञापाण्डेयेन तद्यथा एवं च सैव विच्छिक्तिः परब्रह्मरूपा त्रिविधबन्धभेदनेन प्रकाशते । अनया पद्धत्या यदातेषां ग्रन्थीनां साक्षात्कारो भवति, समाधी तदा त्रिविधवाक्प्रलये ब्रह्मरूपा परावशिष्यते, सैव मोक्षः बन्धस्यच्छेदे तत्स्वरूपं विद्योतते। तत्र साधनक्रमश्च उद्वयम् इति मन्त्रेणोच्यते।[208]

स्वातन्त्र्योत्तरकाले गौरीनाथशास्त्रिमहाप्रभुलालगोस्वामिमहोदयाभ्या-मपि[209] श्रीमतः पाण्डेयस्य मोक्षविषयको सिद्धान्तोऽयं पल्लवितः ।

---

207 वाक्यपदीयतः 1-131-32

208 व्या. द. भूमिका. पू. 72. द्वि. सं. 1982. वाराणसी

209 ब्रह्मसायुज्यम् (वैयाकरणसम्मतम्) श्री गौरीनाथ शास्त्री, सासु 36.1-4. 33-41, 2038. वैक्रमाब्दे

(iv) "पाणिनीयव्याकरणदृष्ट्या आधुनिकभाषासिद्धान्तानाम् उत स्वातन्त्र्यात्परं भाषाविषयकसिद्धान्तानां व्याकरणगम्यता न वेति पर्यालोचनम्"

भाषाविषयक विशिष्टज्ञानं यत्र विद्यते तं भाषाविज्ञानं प्रोच्यते। प्रायेण सर्वेषां शिक्षितानां जनानां विचारो यद्- भाषाविज्ञानमिति प्रसिद्ध शास्त्रं तदाधुनिक किञ्चिच्छास्त्रमेव। यतो हि आधुनिकैः शाब्दिकैः संसारे तत्र तत्र पुराद्यत्वे च प्रचलितानां प्रसिद्धानां भाषाणां यादृशं सविस्तरमध्ययनं क्रियते न तथा प्राचीनैः शाब्दिकैर्भारतीयैः पाश्चात्यैर्वा कृतमध्ययनमवलोक्यते। पाणिनिकात्यायनपतञ्जलि-प्रभृतिभिः प्राचीनैर्भारतीयैः मूर्द्धन्यशाब्दिकैभारतीयानां भाषाणां विशेषत संस्कृत-भाषाया अध्ययने महान् प्रयत्नः कृतः न तु तस्मिन् काले प्रचलितानां प्राप्तविकासानां लेटिन ग्रीक्-आदिविदेशीयभाषाणामध्ययने। एवमेव सुकरात अरस्तूप्रभृतीनां प्राचीनयवनाचार्याणां तदानीं समावाप्ताश्चर्यजनकविकासायाः संस्कृतभाषाया लेशतोऽपि ज्ञानमासीदिति प्रमाणाभावात् वक्तुं न शक्यते।

स्वातन्त्र्यात्पूर्वभाषाशास्त्रस्य विकासः

अस्माकं मुनीनामृषीणाञ्च मनसि वाग्विषयकं शब्दविषयकञ्च महद् जिज्ञासा प्रादुरभवत्। अस्मिन् विषये तेषां त्रिविधा विचारशैली आसीत्। तद्यथा-

प्रथमस्तावदस्माकं चिरन्तनानामृषीणां मनुष्यस्वरूपविषये महती विचिकित्सासीत्। मनुष्यस्य किं स्वरूपम् । वाक् च मनुष्यस्याध्यात्मिकेषु तत्त्वेषु विशिष्टतममिति, तामप्यधिकृत्य तैः सुसूक्ष्मं विचारः कृतो दृश्यते। केयं वाक् तस्या मनुष्यसंबन्धिभिरितरैस्तव्यैः सह कः सम्बन्धः। इत्थं प्रश्नान् समुद्भाव्य तेषां बहुधा समाधानं कृतम्। ब्राह्मणग्रन्थेषूपनिषत्सु च वाकस्वरूपावेदकान्यसंख्यानि वाक्यानि समुपलभ्यन्ते येषु निपुणं विचार्यमाणेषु वाग्विषकाणां महद् वैचित्र्यं प्रतीयते। तद्यथा-

(i) सा या सा वागासीत् सोऽग्निरभवत्, यागिति पृथिवी, वागित्यन्तरिक्षम् इति जैमिनीयोपनिषद्ब्राह्मणो (2-2.1 4.22.11)

(ii) वाग् हि यज्ञः, वाग् वै ब्रह्म इत्यैतरेयब्राहाणे (4.23. 5.24)

(iii) वाग वै मतिः। इति यजुर्वेदे (13.45)

(iv) वाक् प्रजापति, सा या सा वागसौ स आदित्यः। इति शतपथ ब्राह्मणे (10.5. 14)

(v) वाग् वै वायुः। इति तैत्तिरीयब्राह्मणे चोपलभ्यमानानि तत्सदृशान्यन्यत्र च दृश्यमानानि वाक्स्वरूपबोधकानि वाक्यानि वाचः सकलतत्त्वान्तराभेदं द्योतयन्ति। इदं सर्वस्य वागात्मकत्वरूपं शब्दाद्वैतनाम्ना प्रसिद्ध तत्त्वमेव प्राचीनभारतीयभाषाविज्ञानस्य मूलतत्त्वं यदानागेशं सर्वैर्वैयाकरणैः वैशिष्ट्येन भर्तृहरिणा वाक्यपदीये विस्तरतोवर्णितमुपलभ्यते ।[210]

द्वितीयविचारशैली विशेषतो भारतीयदार्शनिकानामासीत्। तैः प्रमाणानि कति स्वीकर्तव्यानि, तेषां किं स्वरूपम्, तेषाञ्च परस्परं किं वैलक्षण्यमिति वैशिष्ट्येन समीक्षतम्। तत्र न्याय-सांख्य-बौद्ध-वैशेषिक-प्रभृतयैराचार्यैः शब्दप्रमाणस्य प्रमाणत्वविषये पक्षे विपक्षे च विमर्शः कृतः। येन दार्शनिकग्रन्थेषु शब्दविषयको महान् ज्ञानराशिः सञ्चितो दृश्यते। शाब्दिकैरपि शब्दस्वरूपावबोधनेऽर्थतत्त्वनिर्धारणे चास्य ज्ञानराशेराश्रयणं कृतमिति वाक्यपदीयावलोकनेन वक्तुं शक्यते।

या इयं तृतीया विचारशैली शब्दस्य स्वरूपायबोधने सा किल शाब्दिकानां प्रातिस्विकी शैली। भारतीयसंस्कृतौ भगवतो वेदस्य कीदृशं स्थानमिति जानन्त्येव विद्वांसः। यानीमानि वेदाङ्गानि तानि सर्वाण्यपि वेदरक्षाप्रयोजनकानीति

---

210 प्राचीनभारते भाषा विज्ञानं श्री को. अ. सुब्रह्मण्य अय्यर सारस्वती सुषमा, पृ. 57, पौष, सं.-2007

विदितमेवैतत् सर्वेषाम्। शिक्षासंज्ञकस्य वेदाङ्गस्यापि वेदरक्षैव प्रयोजनमिति सत्यमस्ति। तस्मिन् हि वेदाङ्गे वैदिकशब्दगतवर्णानां स्थानकरणप्रयत्नादि-निरूपणेनोच्चारणविधिः, सुष्ठु वर्णितो दृश्यते।

आधुनिककाले भाषाविज्ञानस्य त्रयो विभागाः स्वीक्रियन्ते, वर्णविज्ञानं रूपविज्ञानम् अर्थविज्ञानञ्चेति। यानि आङ्गलभाषायां Phonetices Morphology semantics इति नाम्ना प्रसिद्धानि ।[211] वर्णविज्ञानमेव प्राचीनशिक्षाग्रन्थानामेको विषयः। यद्यप्याधुनिकयुगे पाश्चात्यैर्विद्वद्भिर्न केवलं स्वान्तः परीक्षया, परन्तु यन्त्रादिप्रयोगेणापि वर्णस्वरूपावबोधने प्रयत्नः क्रियत इति वर्णस्वरूपस्य यथावदबोधनं तेषामधुना सुलभं तथापि वैदिकशब्दगतवर्णस्वरूपप्रतीतिः परम्परागतोच्चारणसम्प्रदायज्ञानसहितशास्त्र-ज्ञानाद् यादृशी भवति न तदधिका यन्त्रादिप्रयोगेणापि भवतीत्यपि कतिपयानां विदुषां चिन्तनम्। वस्तुतस्तु या शैली प्राचीनैः शिक्षाकारैः समादृता तामवलम्ब्य यन्त्रादिप्रयोगञ्च सम्प्रयुज्याधुनिकैः भाषाकोविदैर्जगति समुपलब्धानां सर्वासामपि भाषाणां वर्णस्वरूपावबोधने प्रयत्नः क्रियत इति प्राचीनभारतीयवर्णविज्ञानादेव प्राप्तवेगमाधुनिकं वर्णविज्ञानमिति वक्तुं शक्नोमि ।

भाषाविज्ञानस्य विकासेऽष्टाध्याय्या महत्त्वम्-

सर्वे विचक्षणा जानन्ति यत् ऊनविंशे ख्रिस्ताब्दे यदा पाश्चात्त्यैर्विद्वद्दि-भिर्भगवत्पाणिनिकृताष्टाध्याय्या इदम्प्रथमतया परिचयः कृतस्तदाप्रभृत्येवाधु-निकभाषाविज्ञानस्य पारमार्थिकी उन्नतिः प्रारभत इति वक्तु शक्नोम्यहम्। यतो हि तैरष्टाध्याय्यां केचिद् गुणा दृष्टा, कानिचित् तत्त्वानि समुपलब्धानि, येषां साहाय्येन

---

211 प्राचीनभारते भाषा विज्ञानम् श्री को. अ. सुब्रह्मण्य अय्यर, सा.सु. पृ. 56. पौष, स. 2007

तैः पृथिवीगतसर्वभाषाणामध्ययनं कृतम्। भाषाविज्ञाने मानुष्या वाचः किं स्वरूपम्, भाषागतानां रूपाणां कथमन्वाख्यानं कर्तव्यम्, प्रकृतिप्रत्ययविभागः कथं कर्तव्य, प्रत्ययवाच्यानामर्थानां कथं निरूपणं कर्तव्यम् भाषाणामुपभाषाणामुत्पत्तौ मूलं कारणान्वेषणम्, संसारे विद्यमानानां भाषाणां मूले का भाषा आसीत्, भाषाद्भाषोत्पत्तिः कथं सम्भवति, कियत्कालात्परं भाषायामूले स्वरूपे विकृतिर्भवितुमर्हति उत का भाषा विकृतिरहिता भवितुं शक्नोतीत्यादयो बहवो विषयाः समागच्छन्ति।[212]

उपर्युक्तेषु एतेषु विषयेषु कतिपयेषु विषयेषु भगवतः पाणिनेरपि, प्राचीनैर्यास्काचार्यैः स्वकीये निरुक्ते भाषाविषयकाः केचित् प्रश्नाः समुदभाविताः येऽत्यन्त सरसा महत्त्वपूर्णाश्च भवन्ति। तद्यथा संस्कृतभाषायां कतिविधानि पदानि सन्ति, किमाख्यातानीव नामान्यपि धातुजानि, उपसर्गाणां कः कोडर्थः इत्यादयः। शाब्दिकानां शब्दार्थमुखप्रेक्षिता अस्ति न तु वस्तुमुखप्रेक्षिता, तस्माद् वैयाकरणानां सिद्धान्तेषु वैशिष्ट्यमागच्छति । शब्दार्थमुखप्रेक्षितामाश्रित्यैव तैर्बहूनां प्रश्नानां समाधानं कृतम्। तद्यथा को नाम कालः, क्रियायाः किं लक्षणम्, सर्वेषां शब्दानां किं जातिरेवार्थोऽथवा द्रव्यम्, गुणस्य किं स्वरूपम्, द्रव्यस्य किं लक्षणमित्यादयः। तद्यथा-

वर्णागमो वर्णविपर्यश्च, द्वौ चापरौ वर्णविकारनाशौ।

धातोरतदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरूक्तम्।।

'चत्वारि पदजातानि नामाख्यातो चोपसर्गनिपाताश्च' ।[213]

---

212 भाषा-विज्ञान एवं भाषा शास्त्र डॉ. क. दे. द्विवेदी, पृ. 4.5. 18

213 निरुक्त-1.1

'अर्थनित्यः परीक्षेतः ।[214]

कालविषये वाक्यपदीये ग्रन्थे बहूनि मतानि सुस्पष्टीतानि। तत्र हेलराजेन लिखितम् नास्माभिर्दर्शनविवेकः, किन्तु शाब्दे व्यवहारे यदङ्ग तत् परीक्ष्यम्। अस्ति च भिन्नकालः शाब्दो व्यवहार, अभूत्, अस्ति, भविष्यति इति। तत्र यथायोगमविचारितरमणीयः कालोऽभ्युपगन्तव्य" इति।[215]

पाणिनीयव्याकरणे भाषाविज्ञानविषयकसिद्धान्तानां सोदाहृणेन स्पष्टीकरणम्-

आधुनिका उत स्वातन्त्र्योत्तरकालस्य भाषाविज्ञानविदो वर्णानां संख्याविषये स्थानप्रयत्नविषये कालविषये चात्र व्याकरणशास्त्रे तत्सहचरेषु शिक्षाशास्त्रेषु च बहुविधानाक्षेपान् कुर्वन्ति। अत्राहं क्रियमाणानामाक्षेपानां समाधानं पाणिनीयव्याकरणदृष्ट्या ददामि। तद्यथा-

1. **तत्र इमे संख्याविषयका आक्षेपा** यत् पाणिनीयव्याकरणे ऋ लृ इत्येतौ स्वतन्त्रौ वर्णौ स्वीकृतौ स्तः, तयोः स्वीकारो न युक्तः। रेफ एव इकारस्य मात्रां लकाररेफयोश्च स्वरस्य मात्रां मेलयित्वा एतयोः स्वरूपं निष्पद्यते । अत्र समाधानमस्ति यत्- 'ऋ लृ' विषयकमुच्चारणं यादृशं करणीय तादृशमुच्चारणं कर्तु ये न शक्नुवन्ति, न वा जानन्ति, नापि वैदिकानां सम्प्रदाये क्रियमाणं यथावदुच्चारणं शृण्वन्ति, स्वयं च रि-शब्दवद् ऋकारमुच्चार्य इत्थमाक्षिपन्ति । तैश्च महानुभावैर्ध्वनिपक्षे इदमानेयं यदयम् ऋवर्णः सम्पूर्णोऽपि मूर्धन्यः,

---

214 निरूक्त-2.1

215 वाक्यपदीयम् वाक्यकाण्ड कारिका-58

रिशब्दो न पूर्णतया मूर्धन्यः, अपि न मूर्धास्थानापेक्षया तालुस्थानस्याधिको व्यापार इति उभयोर्वैलक्षण्यं बोध्यम्।[216]

2. **आधुनिकभाषासु 'ङ, ज़-छ-ख़'** इत्यादीनामनेकेषां वर्णानां व्याकरणादावनिर्देशाद् निरूपणं न्यूनताया अपि तुच्छमेव। व्याकरणशास्त्रे शिक्षाशास्त्रे च यावन्तो वर्णा निर्दिष्टाः सन्ति, तावन्त एव साधवः वर्णाः सन्ति । यथैकस्यैव शब्दस्य बहवोऽपभ्रंशा भवन्ति तथैकस्यैव वर्णस्य वर्णान्तरप्रभावेण स्थानप्रयत्नादिषु तारतम्येन वा नानाभेदोपभेदा सम्भवन्ति। उपर्युक्ता ड़-ज' इत्यादयो वर्णा अपीदृशा सङ्करसृष्टिभूता एव सन्ति, परन्तु भाषाविज्ञानदृष्ट्या एतद् भाषायाः ह्रासो नास्त्यपितु विकासो एव।

3. **वर्णोच्चारणकालविषयेऽपि भाषाविज्ञानवादीनां बहव आक्षेपा तद्यथा-** वर्णानामुच्चारणे यावान् काल उपयुज्यते स एवं मात्रा इत्युच्यते। यन्त्रेषु परीक्षणे कृते यद्यपि तस्य कालस्यानेकधा विभागाः सम्भवन्ति, तथापि सामान्यतः पञ्चधाभ्युपेयते विभागाः ह्रस्वार्धम्, दीर्घः ईषद्दीर्घः, प्लुतश्चेति। व्याकरणशास्त्रादिषु त्वर्धमात्रा, ह्रस्वः, दीर्घः प्लुतश्चेति चतुर्विध एव स्वीकृता इति न्यूनता दर्शिता।[217] एवम् आधुनिकभाषावैज्ञानिकैः ह्रस्वस्योच्चारणे यावान् कालोऽपेक्ष्यते ततो द्विगुणो दीर्घोच्चारणे, त्रिगुणश्च प्लुतोच्चारणे इति यार्ध्वप्रणाली सा नाद्रियत एभिर्यन्त्रपरीक्षकैः । तेषां मतमस्ति यत् दीर्घ ह्रस्वापेक्षया न द्विगुण एव काल, अपि तु क्वचिद् न्यूनः, क्वचिदधिकोऽपि।

---

216 प्राचीनभारते भाषाविज्ञान-आ. रामप्रसाद त्रिपाठी, सासु. 2. 27 व. 1 अ. ज्येष्ठ 2026 वि.

217 भाषाविज्ञान-भोलानाथ तिवारी, पृ.-308. सं. 2000

अत एव ईषद्दीर्घं इत्यपि वर्णकालविभाग उक्तः। एवमेव प्लुतोच्चारणेऽपि न त्रिमात्राकालो निश्चितो दृश्यते यतो हि अतिदूरतः सम्बोधनेऽन्त्यस्वरस्य प्लुतस्य त्रिमात्राकालादधिक एव कालः प्रयोगेऽनुभूयते। अत्र तु व्यञ्जनं चार्धमात्रिकमिति सामान्येनार्धमात्राकाल एव समेषां व्यञ्जनानामिति समीचीनं नास्ति, इत्येवमाक्षेपा व्याकरणस्य शिक्षाशास्त्रस्य च रहस्यानवबोधमूलका एवेति निश्चितं वक्तुं शक्नोमि। यतो हि साधुत्वेन स्वीक्रियमाणानां वर्णानां कियान् काल इत्येव भारतीयशास्त्रेषु निर्णीतमस्ति, न कस्यां स्थितौ कस्य वर्णस्य (ध्वनेः) कियान् कालः सम्भवतीति ।

एतेषामाक्षेपाणां व्याकरणशास्त्रदृष्ट्या शिक्षाशास्त्रदृष्ट्या चेत्थं प्रकारेण समाधानानि सन्ति- यच्च भाषावैज्ञानिकैः पञ्चविधकालविभागेन शास्त्रीयकालविभागे न्यूनत्वं दर्शितम्, तदपि न समीचीनमस्ति। यतो हि अस्माकं शास्त्रे चत्वार एव वर्णकालाः न स्वीकृताः सन्ति, अपि तु 'परमाणु-अणु-पादमात्रा-अर्धमात्रा-सपादमात्रा-द्विमात्रा-त्रिमात्रा इत्येवं रूपेण नानाविधा वर्णकालाः स्वीकृताः सन्ति ।

व्यञ्जनवर्णविषयकं समाधानमित्थमस्ति यद्- अस्माकं शास्त्रविद्वद्भि-स्त्वर्धमात्राकाल उच्चारितानामेव तेषां साधुता (शास्त्रीयता) स्वीकृता, नान्यथेत्येव तात्पर्यम्। न ह्यस्य वर्णस्य (ध्वनेः) इत्येव काल उच्चारण भवतीति भारतीयशब्दशास्त्रज्ञैर्नियम्यते। तथापि यस्य वर्णस्य इयति काले उच्चारणम्, तस्यैव तच्छब्देन व्यपदेश इत्येव बोध्यते। यथा य एकमात्रिकः वर्णः स एव ह्रस्वपदेन प्रोच्य सन् व्याकरणादिशास्त्रेषु साधु, यश्च वर्ण, ततो न्यूनाधिकमात्र, सोऽपि आधुनिकभाषावैज्ञानिकदृष्ट्या स्वरो भवतु, परन्तु भारतीयशास्त्रे ह्रस्वपदेन तस्य व्यवहारो न भवति। एवमेव दीर्घादिभेदाः भाषावैज्ञानिकदृष्ट्या सन्ति परन्तु न ते

भारतीयशास्त्रे दीर्घादिभेदेन स्वीक्रियन्ते इति आशिंकोभेदो भूत्वाऽपि पाणिनीयव्याकरणस्य वैशिष्ट्यं विकासं च द्योतयति।

4. **पाश्चात्यभाषाशास्त्रिणामनुसारेण** - वर्गस्य द्वितीयचतुर्थी वर्णौ हकारे परिणन्तुं शक्येते, परञ्च हकारो द्वितीयचतुर्थयोर्वर्णयोर्न परिणन्तुं शक्तः। वस्तुतस्तु नियमोऽयमौत्सर्गिक एव, न तु पूर्णरूपेण सत्यम्। अनेकत्र हकारस्थाने द्वितीयचतुर्थवर्णी दृश्यते।[218] तद्यथा नियमस्यास्य बाधकानि कतिपयानि उदाहरणानि-

1. दाहशब्दः संस्कृतभाषीयः, तस्य प्राकृतभाषायां 'दाघः' इत्युच्चारणं क्रियत, एवम् इह शब्दस्य 'इघ' इति प्रयोगः।

2. 'नहुष' इति संस्कृतस्य पालिभाषायाम् नघुष इति प्रयोगो भवति।

3. चीनदेशीयभाषायां होम' शब्दस्यार्थे 'घोम' शब्दः प्रयुज्यते।

4. यथा संस्कृतस्य गुहा इति शब्दो हिन्दीभाषायां 'गुफा' इति रूपेण प्रयुज्यते।

5. पञ्जाबप्रान्ते सिंह शब्दस्य 'सिंध' इति प्रयोगो दृश्यते गुरुमुखीभाषायाः प्रभावात्।

अतो आधुनिकभाषावैज्ञानिकैः ये नियमा प्रतिपादिता न ते सर्वे व्याकरणशास्त्रदृष्ट्या गम्या। अत्रास्माकं शास्त्रे तु 'वाग्घरिः' इत्यादिप्रयोगेषु हकारस्य स्थाने चतुर्थ घकारादिमादिशन् स्वीयं प्राचीनभाषावित्त्वं सूचितं महर्षिपाणिनिना।

---

218 भाषाविज्ञान डॉ. मङ्गलदेव शास्त्री, पृ. 182

"अथातः सम्प्रवक्ष्यामि वाच उच्चारणे विधिम्" इति शिक्षावाक्येन इदं बोध्यते यदेतेन स्थानेन एतेन प्रयत्नेन चायं वर्ण उच्चारणीयः, तथैव तस्य साधुत्वं नान्यथा। भाषाविज्ञानानुसारं तु स्वस्वोच्चारणप्रकारेण यस्य वर्णस्य यादृशमुच्चारणं क्रियते तादृशमेवोच्चारणमनुसृत्य तत्तद्वर्णस्य स्थानादिकं यन्त्रपरीक्षया सम्यक्तया निर्णीयते तथा च देशकालादिभेदेन कण्ठताल्यादिभेदेन चैकस्यैव वर्णस्य नानाविधमुच्चारणं कथं जातमिति सर्वमनुभूयते । तदेव स्वैरमुच्चारणं यन्त्रेण परीक्ष्यते। व्याकरणेन शिक्षाशास्त्रेण तु तत्तद्वर्णस्य तत्तस्थान विधीयते अतोऽपि ज्ञायतां यत् स्वेच्छया सम्भावितमन्यथोच्चारणं यदि प्राप्तं न स्यात्, तदा वाच उच्चारणे विधि कथं सम्भवेत् ? इत्थं च द्वयोर्न कोऽपि विरोधो लक्ष्यते।[219]

समासतः-

भाषाविज्ञाने ध्वनि-विज्ञानस्य पद-विज्ञानस्य वाक्य-विज्ञानस्य अर्थ-विज्ञानस्य च मुख्यतया अध्ययनं क्रियते। एतेषु सर्वेषु विषयेषु भारते पाणिनीयव्याकरणे उत तमधिकृत्य विरचितेषु महाभाष्यवाक्यपदीयादिषु ग्रन्थेषु बहुकार्यं सञ्जातम्, तथापि व्याकरणशास्त्रे शब्दरूप साधन; वाक्य-विन्यास, वाक्य-प्रयोगश्चेति प्रमुखाः विषया सन्ति ।

भाषा-विज्ञानन्तु व्याकरणस्यापि व्याकरणमस्ति व्याकरणस्य दार्शनिकनियमानां को दार्शनिकाधारो वर्ततेऽस्य निरूपणं भाषाविज्ञानं करोति। शब्दार्थसम्बन्धः प्रकृति-प्रत्ययोः मौलिकोऽर्थः कः, पद-विभाजनस्याधारो क. प्रभृतीनां विषयाणां दार्शनिकदृष्ट्या विवेचनं भाषाविज्ञानमेव करोति।[220]

---

219 पाणिनीय व्या. भाषाविज्ञानं च डॉ. रामप्रसादत्रिपाठी, सासु, 27.1. पृ. 23. ज्येष्ठ पूर्णिमा, सं. 2026

220 पाणिनीयव्याकरणस्य भाषावैज्ञानिक व्याख्यानम्-डॉ. धनश्याम उनियालः अमरग्रन्थ पब्लिके-दिल्ली-2004

भाषाविज्ञाने व्याकरणे च विवेचनं विश्लेषणञ्चेति तत्त्वद्वयं प्रमुखमस्ति। उभयत्र भाषायाः सूक्ष्मतमस्यांशस्य प्रतिपादनं क्रियते। व्याकरणस्य क्षेत्र सीमितमस्ति भाषाविज्ञानस्य व्यापकं यतो हि तस्य सम्बन्धोऽनकासु भाषासु वर्तते। अतः पाणिनीय व्याकरणं यदिशरीमस्ति तर्हि भाषा-विज्ञानं नेत्रमिति वक्तुं शक्यते।[221] तथापि पाणिनीयव्याकरणे शिक्षाशास्त्रे च भाषाविषयका ये सिद्धान्ताः प्रतिपादिता तेषां सिद्धान्तानाम् ऊनविंशशतकस्य उत स्वातन्त्र्योत्तरकालस्य भारतीयै पाश्चात्यैः भाषावैज्ञानिकैः बहुधा चिन्तनं मन्थनं विमर्शञ्च कृत्वा पाणिनीयव्याकरणस्य भाषाविज्ञानदृष्ट्यापि महत्त्वमङ्गीकृतमिति मया उपर्युक्तविवेचनेन स्पष्टितम्। तथापि भाषाविषयका केचन सिद्धान्ताः आधुनिकभाषावैज्ञानिकैः प्रतिपादिताः तान् सिद्धान्तान् भाषाविज्ञानस्यमौलिकवैशिष्ट्येनाप्यङ्गीकरणे का हानि इत्यलं विस्तरेण।

2. स्वातन्त्र्यात्परं व्याकरणशास्त्रमधिकृत्य संस्कृतभाषायां वा संस्कृतेतरभाषायां विरचितानां प्रमुखग्रन्थानाम् (धातु-शिक्षा-उणादि-सूत्र-समास-लिङ्गग्रन्थानाम्)

अकारादिक्रमेण संक्षिप्तपरिचयः वैशिष्ट्यञ्च ।

1. 'अष्टाध्यायी पदानुक्रमकोशः

प्रणेता अवनीन्द्र कुमारः (हिन्दीभाषायाम्)

प्रकाशनम् 2003 ख्रिस्ताब्दे, परिमल. प्र. दिल्ली

अवनीन्द्रकुमारेण विरचितेऽस्मिन् कोशे वैशिष्ट्यं दरीदृश्यते। अस्मात् कोषात् पूर्वमपि कत्रेमहोदयेन सम्पादितः पाणिनिकोषो विद्यते तथा च अनुक्रमणिकाः विद्यन्ते। परन्तु कोषस्यास्य तिस्रो विशिष्टताः सन्ति । तद्यथा-

(i) अस्मिन् कोषे न केवलं पदानि (अपितु) प्रत्युत तस्य सर्वाणि व्याकृतानि रूपाणि सन्दर्भेण सह प्रदत्तानि सन्ति।

---

221 भाषाविज्ञान एवं भाषा शास्त्र डॉ. कपिलदेव द्विवेदी, वि.वि. प्रका. वाराणसी, 2002

(ii) प्रत्येकेन सन्दर्भेण सह सूत्रस्याखिलमर्थमपि प्रदत्तमस्ति ।

(iii) यत्र समासेऽपि किञ्चित् पदमायाति तर्हि तस्यापि अपोद्धारः कृतः। इत्थं कोषोऽयं बहुप्रामाणिक उपयोगी चास्ति ।

2. अष्टाध्यायी सूत्रार्थप्रकाशिता

एकविंशशतकस्याचार्यो डॉ. सुरेश्वर झा महोदयः कामेश्वरसिंह दरभंगा सं. विश्वविद्यालय-दरभंगा, बिहारराज्येऽध्यापनरतोऽस्ति वर्तमाने। अयं अष्टाध्यायीग्रन्थमाश्रित्य 'अष्टाध्यायी सूत्रार्थप्रकाशिका इत्याख्यं ग्रन्थं विरच्य तस्य सम्पादनकार्यमपि कृतवान्। अस्य प्रथमसंस्करणस्य प्रकाशनम् 2004 ख्रिस्ताब्देऽभवत्।

अष्टाध्यायी सूत्रार्थप्रकाशिका ग्रन्थस्य वैशिष्ट्यं महत्त्वञ्च-

महाभाष्यस्य पश्पशाह्निके पतञ्जलिना सूत्राणां व्याख्यानाय वृत्तिग्रन्थानाम् आवश्यकताविषये एवमुक्तम्-'न केवलानि चर्चापदानि व्याख्यानम् वृद्धिः, आत् ऐच इति। किं तर्हि ? उदाहरणम्, प्रत्युदाहरणम् वाक्याध्याहारः इत्येतत्समुदितं व्याख्यान भवति।[222] इति महाभाष्यानुसारेण सूत्राणामर्थबोधः केवलं पदच्छेदेनैव न भवति, अपितु उदाहरणेन, प्रत्युदाहरणेन, सूत्रान्तरे दृष्टानां पदानाम्, समुचितक्रियायाश्च तत्रानयनेन भवति। महाभाष्योक्त-वचनस्यपूर्तिः अष्टाध्यायीमधिकृत्य विरचितोऽयं ग्रन्थः करोति। अस्मिन् वृत्तिग्रन्थे मध्यभागे मूलसूत्रम्, तस्यावृत्तिः, उदाहरणं च विद्यते, सूत्रार्थबोधनाय अपेक्षामनुसृत्य सूत्रस्थपदानाम्, उदाहरणानां च विवरणमपि प्रस्तुतमस्ति। यत्र प्रत्युदाहरणेन सूत्रस्यार्थः स्फुटतरः भवति, तत्र प्रत्युदाहरणानि

---

222 महाभाष्य-पश्पशाह्निकः

प्रदर्शितं ग्रन्थकारेण। सूत्रार्थकरणे सहायकानाम्, प्रसिद्धप्रयोगसाधकानाञ्च वार्तिकानां समावेशमकरोत् ।

ग्रन्थाध्येतृणां सोविध्याय मूलसूत्राद् दक्षिणभागे कस्य कस्य पदस्यानुवृत्तिर्भवति, इत्यस्य निर्देशेन सहैव अनुवृत्तेरवधिश्च तत्र सूत्रसंख्यारूपेण निर्दिष्टोऽस्ति। वामभागे अनुवृत्तानां पदानां निर्देशेन सह यस्मात् सूत्रात् तानि पदानि अनुवर्त्यन्ते तेषां सूत्रसंख्याऽपि निर्दिष्टा विद्यते। ङ्याप्प्रातिपदिकात् प्रत्ययः परश्च, धातोः', 'तद्धिताः', असिद्धयदत्राभात्, पूर्वत्रासिद्धम् इत्यादीनामनुवृत्तानां दीर्घावधिकाधिकृतपदानां निर्देशः प्रकरणानुसारेणैव ग्रन्थकारेण विहितः। काशिकादिग्रन्थेषु कतिपयानि वार्तिकानि, गणसूत्राणि च मूलसूत्ररूपेण प्रक्षिप्तानि सन्ति तेषां समादेशो वार्तिकरूपेण, गणपाठस्य सूत्ररूपेण वा ग्रन्धकारेण कृतः। काशिकावृत्तेः यानि सूत्राणि अस्याम् अष्टाध्यायी सूत्रार्थ-प्रकाशिकायां मूलसूत्ररूपेण न समावेशितानि तानि निम्नलिखितानि सन्ति[223]-

1.	वृद्धश्च पूजायाम्	-	4.1.196
2.	यूनश्च कुत्सायाम्	-	4.1.197
3.	कौपिञ्जल-हस्तिपदादण्	-	4.3.132
4.	आथर्वणिकस्येक लोपश्च	-	4.3.133
5.	अधि शीर्षः	-	6.1.62
6.	नित्यमाम्रेडिते डाचि	-	6.1100

---

223 अष्टाध्यायीसूत्रार्थप्रकाशिकायां सम्पादकीय डॉ. सुरेश्वर झा विरचितो लेखः।

7.	अभ्यासव्यवायेऽपि	-	6.1.136
8.	कारस्करो वृक्षः	-	6.1.156
9.	आत्मनश्च पूरणे	-	6.3.6
10.	एति संज्ञायामगात्	-	8.3.99
11.	नक्षत्राद्वा	-	8.3.100

एषु 'कारस्करो वृक्षः' (6.1.156) इति वचनं पारस्करादिगणे (सूत्रसंख्या-6.1.153) पठित विद्यते, एति संज्ञायामगात् (8.3.99) नक्षत्राद्वा (8.3.100) इति वचनद्वयं च सुषामादिगणे (सूत्रसंत्र्या 8.3.68) पठितमस्ति । अन्यानि च वार्तिककारवचनानि सन्तीति तत्तत्सूत्राणां प्रदीपेन, पदमञ्जर्या, महाभाष्येण, अन्यैश्च प्रमाणिकैः ग्रन्थैः स्पष्टीभवति ।

अष्टाध्यायी सूत्रार्थप्रकाशिकायां सूत्रार्थप्रकाशनेऽपेक्षितानां काशिका पदमञ्जरी-न्यासादिग्रन्थेषूपलब्धानां वचनानामपि आवश्यकतानुसारं संग्रहो दृश्यते। क्वचित् तु तत्तदग्रन्थानां नामोल्लेखमपि ग्रन्थकारः डॉ. सुरेश्वर झा महोदयोऽकरोत् ।

अष्टाध्यायी जिज्ञासवोऽस्या वृत्त्याः साहाय्येनाल्पेन कालेन अष्टाध्याया आद्यन्तः सरलतया अर्थज्ञानपूर्वकमवगन्तुं शक्ष्यन्ति नात्र संशयः। तत्र तत्र अनुवृत्तानां पदानाम्, उदाहरणानाम्, यथापेक्ष प्रत्युदाहरणानां च निर्देशेन सूत्रस्थदुबोर्धपदानां, यथापक्षेम् उदाहरणानां विवरणेन च सूत्रार्थ सरलतया अवगन्तुं शक्यन्ति जिज्ञासवः इति मम विश्वासः ।

3. त्रियनयनभाष्यम्

प्रणेता आचार्य बच्चूलाल अवस्थी 'ज्ञान'

आचार्यबच्चूलालावस्थिमहाभागेन विरचितं भगवानपाणिनिकृत पाणिनीयशिक्षाया वृद्धपाठे त्रिनयनसज्ञकोऽयं प्रथमभाष्यमस्ति यतोहि त्रिनयनभाष्यात् पूर्व विलिखिता कापि टीका नैव समुपलभ्यते। भाष्यस्यास्य प्रकाशनं मध्यप्रदेशस्थ कालिदासाकादम्या अभवत्। पाणिनीय सूत्रपाठात्परं यावद्महत्त्व महाभाष्यस्यास्ति तथैव पाणिनीय शिक्षाया परं तावद्महत्त्वं त्रिनयनभाष्यस्यास्ति । अर्थात् भाष्यमिदं न तु टीकेति।

अस्य शैली तथैव शोभना यथा महाभाष्यस्यास्ति। यथा महाभाष्यकार आक्षेपभाष्ये प्रश्नं कृत्वा समाधानभाष्ये तस्योत्तरं यच्छति तद्वतात्र।[224] तद्यथा-

महाभाष्ये- केषां शब्दानाम् ? लौकिकानां वैदिकानाञ्च सिद्धशब्दस्य

तथैवात्र - कतिसंख्या वर्णाः? त्रिषष्टिश्चतुः षष्टिर्वा

कुत्र ते प्रयुज्यते ? प्राकृते संस्कृते चापि।

कास्ता गतयः ? ओभावो विवृतिः शकारो.

कदा? स्थितिविशेषेषु ।

केषु स्थितिविशेषेषु ? यदा 'औ' इत्युच्चार्यते।

कथं भूतः ? दन्तमूल्यः ।

के ते ? उदात्तश्चानुदात्ताश्च स्वरितश्चेति ।

---

224 सं. राइटिंग इन डिपेनडेन्ट इंडिया-पृ 119-117

आचार्येण नैषधस्य नारायणी टीकाया इव खण्डान्वयस्याधिकमा श्रयेणेताद्वशी रचना कृता यत्र प्रत्यक्षरं स्पष्टं भूत्वा स्वार्थ विवृतं करोति। पाणिनीयशिक्षाया वृद्धपाठे एकादशवर्गेषु विभक्तेषु षष्टिश्लोकेषु यत्रकुत्रापि पूर्वापरसम्बन्धाभावो दृश्यते तत्र बच्चूलालमहोदयः स्वीयावतरणिकया संयुक्तवान्। चतुर्दश पञ्चदश-श्लोकयोर्मध्ये स्पष्टसम्बन्धस्याभावे चतुर्दशश्लोकस्यान्ते अवतरणिकया पञ्चदशश्लोकेन सह तारतम्यं स्थापयति । तद्यथा- ननु गङ्गोदकमित्यादिषु विसर्गप्रसङ्ग विनापि सन्धौ भावो दृश्यते। कथं ज्ञायेतयदयमोकारो विसर्गस्येति। तदाह-

यद्योभावप्रसन्धानमुकारादि परं पदम्।

स्वरान्तं तादृशं विद्याद् यदन्यद् व्यक्तमूष्मणः ।।

तथैव प्रथम द्वितीय-श्लोकयोर्मध्येऽवतरणिकादृष्ट्या ननु लोके लोकिकैर्वेदे वैदिकैरासैर्यथा शब्दा उच्चार्यते तथा शिष्या अप्युच्चारयेयुः। शिक्षाप्रवचनस्य प्रयोजनं नैव लक्ष्यत इति प्रयोजनं मनसिकृत्याह-

प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः ।

पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम् ।।2।।[225]

भाष्येऽस्मिन् पदस्य वा पदांशस्य चिन्तनं कृतम्। तद्यथा प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा संस्कृतेन सह प्राकृतशब्दस्य प्रयोगः जनसामान्ये प्राकृतभाषायै व्यवहृतं परन्त्वस्मिन् भाष्ये- 'प्राकृतमिह खलु वैदिकवचः तत्र हि व्याकरणशास्त्रीयाः संस्काराः न प्रभवन्तीति कृत्या प्रकृत्यैव निष्पन्नम् इत्युक्तम्। अस्यैव श्लोके चापि पदस्य प्रयोजनं स्पष्टयति - **'यमाः संस्कृते न प्रयुज्यन्ते'** इति मनसिकृत्य चापीत्युक्तम्।

---

225 सारस्वत सङ्गम् (घाघरा से शिप्रा) सम्मान सुमनोञ्जलिं पृष्ठ-275 तः-281, संस्करण 2000 ख्रीष्ट, कालिदास अकादमी।

तथैवान्यानिपदानि - द्विरोष्ठयो तु विगृह्णीयाद्।

तदा 'ज्ञान' महोदयः - शब्दार्थमविज्ञातमबुद्धिभिः । ओष्ठ्य इति स्वार्थे य प्रत्ययः। औष्ठावित्यर्थः तथा प्रसिद्धमपि

शब्दार्थ स्पष्टयति - शब्दोऽर्थः प्रयोजनं यस्य स शब्दार्थः। वर्गाणां द्वितीय-चतुर्थ-पञ्चमवर्णाः मिश्रवर्णा भवन्ति इति स्पष्टं करोति भाष्यकारः। चतुर्थ व्यञ्जनेषु परश्रुति ह्कार भवति तद्यथा -

½ ग् + ½ ह् = घ्

½ ज् + ½ ह् = झ्

½ ड् + ½ ह् = ढ्

½ द् + ½ ह् = ध्

½ ब् + ½ ह् = भ्

अर्थात् वर्गाणां चतुर्थाक्षरा ह्वर्णस्य संयोगेन निष्पन्ना भवन्ति। परन्तु द्वितीयाक्षरेषु पूर्वाः पराश्च श्रुतयः इत्थं सन्ति -

½ क् + ½ क् = ख्

½ च् + ½ श् = छ्

½ ट् + ½ ष् = ठ्

½ त् + ½ स् = थ्

½ प् + ½ प् = फ्

व्यञ्जनं तु अर्धमात्रिकं भवति, अत्र पूर्वा श्रुतिः चतुर्थांशमात्राया भवति तथैव परा श्रुतिश्चापि चतुर्थांशमात्रा युक्ता भवति। ज-ब-ग-ड-द चेति तृतीयाक्षरेषु अनुस्वार-श्रुति-संयोगेन जमङणन वर्णा निष्पन्ना भवन्तीति ।

अस्मिन् भाष्येऽन्यान् शिक्षाग्रन्थान् विलोड्य पाणिनेः सर्व कथ्यं प्रकाशितम्। भाष्येणानेन व्याकरणवाङ्मयस्थ महती समृद्धिर्जाता। अस्य चिन्तामणिनाम हिन्दी भाष्यामपि श्रीबालकृष्णशर्मणा कृतम् यदस्मिन्नेव संलग्नं वर्तते ।

4. वृहद्धातुकुसुमाकरः

प्रणेता पं. हरेकान्त मिश्रः

मिथिलावयवजरिसो निवासि पं. हरेकान्तशर्म आधुनिक वैयाकरणेषु अन्यतमोऽस्ति। कामेश्वरसिंह दरभंगा सं.वि. विद्यालये, दरभंगा-बिहारमण्डलेऽध्यापनरतोऽयं बहद्धातुकुसुमाकरः नामाख्यो ग्रन्थो विलिखितवान्। ग्रन्थोऽयं टिप्पण्यादिविभूषित-ण्यन्त-सन्नन्त-यङन्त यङलुगन्तभावकर्म-कृदन्तरूपसहितार्थसकलधातुरूपाणां सङग्रहस्य रूपे नूतनोऽस्ति । अस्मिन् ग्रन्थे यानि धातुरूपाण्युपस्थापितानि स्थाने स्थाने विषमस्थलटिप्पणीमिश्र समलङ्कृतानि तानि धातुरूपावबोधाय पर्याप्तसहायकानि सन्ति नात्र संशयः। अनेन ग्रन्थेन पं. हरेकातमिश्रः संस्कृतवाङ्मयमित्तिनिर्माणे एकेष्टकासमुपस्थापितेति वक्तुं शक्यते।

बृहद्धातुकुसुमाकरस्य वैशिष्ट्यम् -

क्रियारहितवाक्यं नास्ति' इति जगदीशतर्कालंकारः शब्दशक्तिप्रकाशिकायमलिखत्। अतश्च धातुरूपज्ञानं सर्वेषां विशेषतः सुकुमारमतीनामतीवावश्यकमस्ति । परिशीलितव्याकरणागमानामपि विदुषां चेतसि सर्वदा सर्वसूत्राणामनिट्कत्वादिधर्मैः सुधीभिरपि अस्य धातोरस्मिन् प्रत्यये परे इदं रूपमिति तर्हि जिज्ञासोदैति यत्कथं ज्ञायेत। अतः जिज्ञासानां शान्तयेऽस्मिन् ग्रन्थे

सूत्रानुसारेण परिनिष्ठितानि पाणिनिनिर्दिष्टसकलधातूनां कृदन्तसहितानि रूपाणि प्रदर्शितानि तानि चावलोक्य यस्य धातोर्यस्मिन् प्रत्यये परे यथारूपं भवतीत्याल्पश्रमेन विज्ञातुं शक्यन्ते जिज्ञासवः ।

ग्रन्थकारेण हरेकान्तमिश्रेण सिद्धान्तकौमुद्यनुसारेणात्र लडादिषु रूपं प्रदर्शितम्। कृदन्तान्तु प्रसिद्धानामेव धातूनां रूपं प्रदर्शितम्। विपुलप्रमाणान्यनुसन्धाय प्राच्यनव्यग्रन्थकाराणामाशयमपि निरीक्ष्य परिशोधितमार्गेण टिप्पणादि-लेखनेन सह सकर्मकाकर्मकत्वमधिकृत्य अनुमोदितप्रकारमपि ग्रन्थकारोऽस्मिन् ग्रन्थे प्रदर्शितवान् ।

"धातोरर्थान्तरे वृत्तेः धात्वर्थेनोपसङ्ग्रहात्।

प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया।।"[226]

इति वाक्यपदीयोक्तदिशा सकर्मकस्यैव धातोरर्थान्तरे वर्तमानात् धात्वर्थे कर्मण उपसङ्ग्रहात्, प्रसिद्धेः कर्मणः अविवक्षातश्चाकर्मकत्वमुक्त-मनुसृत्य तत्र तत्र धात्वर्थाः लोके तेषां प्रयोगाणामालोडनपुरस्सरं ग्रन्थेऽस्मिन् ग्रन्थको प्रतिपादिताः । एवमेव फलव्यापारयोरेकनिष्ठतायामकर्मकः' इति कथनमालोच्य सकर्मकत्वमकर्मकत्वञ्च निरूपितम्। जनो लोके प्रतितिव्यवहार-निर्वाहायैव वाक्यं प्रयुङ्क्ते इति निश्चप्रचम्। वाक्यार्थबोधसम्पादनायैव महाविदुषा गदाधरभट्टाचार्येण प्रत्ययार्थविचारोऽतिप्रसिद्धो व्युत्पत्तिवादः प्रकृत्यर्थविचारपरः शक्तिवादश्च विरचितः । शास्त्रैकविचारनिपुणाः पक्षपातहीनाः पण्डितप्रवराः जानन्त्येव। एवञ्च कीदृशं वाक्यं भवेदिति यदा विचारपथमागच्छति तदा सुप्तिङन्तचयो वाक्यमिति स्मृतिगोचरं भवति। यदा वाक्यप्रयोगे यदि तिङन्तस्य प्रयोगो न भवति तदा तद्वाक्यं चमत्कृत्याधायकं न गण्यते। सनादिप्रत्ययवशान्निष्पन्नानि रूपाणि येषां झटिति संस्मरणारूढानि न भवन्ति तेषां कृते तु ग्रन्थे विशेष प्रयासो दरीदृश्यते।

---

226 वृहद्धातुकुसुमाकर-भूमिका पं. हरेकान्त मिश्र

भाषाणामैकाधिक-सुप्तिङोचयो वाक्यात्मा। तत्र वाक्येषु सुबन्तानां बाहुल्येन तत्पदज्ञानमेव प्रधानसम्पादनतामर्हति। तथापि तेष्वपि सुबन्तेषु धातुजशब्दानामेवाधिक्यात् प्रथमतो धातुरूपज्ञानं तदर्थज्ञानं तच्छशब्दज्ञानञ्च स्मरणीयम् ।

3. 'स्वातन्त्र्यात्परं व्याकरणशास्त्रमधिकृत्य प्रमुखानां संस्कृतग्रन्थप्रणेतॄणां ग्रन्थैः सह अकारादिक्रमेण प्रणीता सूची

ग्रन्थकाराः	ग्रन्थाः	प्रकाशकः	प्रकाशन -वर्षम्
अभ्यंकर, के.वी.	'द. वाक्यपदीय सम प्रोबलम्स'	भ.ओ.री. इन्स.. पूना,	1982
आचार्य, रामदयालु	हिन्दी-संस्कृतधातुकोषः	सं. सेवा सं. दिल्ली	प्र.स. 1985
अरोरा, डॉ. सुरेशः	अनुबन्धः विमर्शः (पाणिनीये व्याकरणे)	लक्ष्मीबाई महानिर्माण प्रकाशकः दिल्ली	प्र.स. 1985
अभ्यंकर, काशीनाथः	व्याकरणमहाभाष्य-कील्होर्न (जर्मनी) संदर्भग्रन्थनिदर्शनैः टिप्पणीभिश्च परिष्कृतम्'	भ. ओ. रि. इन्स्, पूना	तृ.सं. 1965 च.स. 1996
उप्रैती. पं. थानेशचन्द्रः	प्रवेशकः	परिमल प्रका, दिल्ली	1992

कुमारः, अवनेन्द्रः	'अष्टाध्यायी पदानुक्रमकोशः	परिमल प्र. दिल्ली	प्र.सं. 2003
क्रमदीश्वरः	संक्षिप्त-व्याकरणम्	भा.वि. प्रका., दिल्ली	प्र.स. 2003
काले, एम. आर.	'ए हायर संस्कृत व्याकरण	ओरि बुक सेन्टर, दिल्ली	प्र.स. 2004
गुप्त, सुरेन्द्रनाथदास,	द महाभाष्य ऑफ पतञ्जलि	मुन्शीराम मनोहरलाल, वाराणसी	प्र.स. 1991
चतुर्वेदी, चक्रवर्ती जगदीश	पदपदार्थ विभाग परिशीलनम्	किशोर विद्या निके. दिल्ली	प्र.स. 1980
चतुर्वेदी, चक्रवर्ती श्रीरामाधीन	'संस्कृत-भाषा-विज्ञानम्	चौख वि. भवन, वाराणसी	प्र.स. 1963
चौधरी, डॉ. अर्कनाथः	'मध्यकौमुदीमध्यमनोरमा पूरणी व्याख्या	जयपुरम्	1983
जोशी, एस. डी.	'अष्टाध्यायी ऑफ पाणिनि भाग-1 तः 10	सा. अकादमी	जोशी, एस. डी.

झा. डॉ. कालीकान्तः	मध्यकौमुदी-सीतासावित्री व्याख्या	वाराणसी	1986
झा. डॉ. नरेशः	अष्टाध्याय्या 'शान्ति' सं. हिन्दी व्याख्या	चौ.सु.भा.प्र. वाराणसी	प्र.स. 2006
झा. डॉ. बोधकुमारः	वैयाकरण सिद्धान्तदिग्दर्शनम् (षट्पटलात्मकम्)	रचना प्रकाशन, जयपुर	प्र.स. 2006
झा. डॉ. मुनीश्वरः	संस्कृत व्याकरण (डब्ल्यू, डी. ह्विटने महोदयेन विरचितस्यानुवादकः)	उ.प्र.हि.ग्र. अकादमी लखनऊ	प्र.स. 1971
झा. डॉ. वेद्यनाथः	'इन्दुकला' प्रौढमनोरमाया हिन्दी व्याख्या	रचना, प्रका. जयपुर	प्र.सं. 2005
झा, डॉ. सुरेश्वरः	'अष्टाध्यायी सूत्रार्थ प्रकाशिका' (अष्टाध्यायीमधिकृत्य विरचितो ग्रन्थः)	का. सि.द.सं.वि.वि. दरभंगा, बिहार	
झा, डॉ. हरिरः (रा.पु. सम्मानितः)	1. संस्कृत प्रवेशिका-प्रथमभागः 2. संस्कृत प्रवेशिका-द्वितीयभागः	पुरी	
झा. पं. मणिनाथः	ज्ञापकादर्शः (पाणिनीय व्याकरणे ज्ञापकानां परिशीलनम् ।)	का.सि.द.सं.वि.वि. दरभंगा बिहार	

झा. बि. एन.	संस्कृतव्याकरणस्य 'ए ग्लिमपस ऑफ द ऑफ संस्कृत (आंग्लभाषायाम्)	डिवाइन प्रका. वाराणसी	प्र.स. 1978
झा. रामचन्द्रः	1. लघुसिद्धान्तकौमुदी व्याख्या 2. मध्यसिद्धान्तकौमुदी व्याख्या 3. अनुवाद कौमुदी	दरभंगा वाराणसी वाराणसी	1982 1982 1982
झा. शशिनाथ	प्रयोग पल्लवः'	दरभङ्गा	1983
झा, शंकरजी,	व्याकरणतत्त्वमंजरी (ग्रन्थः)	इशदपुर, मधुबनी	1986
झा. सुरेन्द्रः	भट्टोजिदीक्षितेन नागेशभट्टेन च प्रतिपादितानां वैयाकरणसिद्धान्तानां तुलनात्मकमध्ययनम्	नाग पब्लिशर्स, दिल्ली	प्र.सं. 1998
डॉ. मंगलरामः	संस्कृत व्याकरण की दार्शनिक मीमांसा	राज. ग्रन्थागार, जोधपुर	प्र.स. 1995
नरसिंह्माचार्यः एम.एस.	'महाभाष्यप्रदीपव्याख्यानानी (प्रथमाध्यायस्य प्रथमपादे 8-6 आह्निके)		
त्रिपाठी आ. श्रीरामप्रसादः	1. शब्दशास्त्रीयवृत्तिविमर्शः (डॉ. प्रस्तावनया समलङ्कृतः) 2. सिद्धान्तचिन्तामणि	सं.सं.वि.वि., वाराणसी चौख वि.भ. वाराणसी	1997 प्रस 1991

त्रिपाठी, डॉ. तीर्थराज	'पदमञ्जर्याः पर्यालोचनम्'		
त्रिपाठी, डॉ. बनारसी	'ऋग्वेदीय सुबन्तपदों का व्युत्पत्ति चिन्तन	भावना प्रकाशन, दिल्ली मदास प्रिन्टर्स	प्र.स. 1981-1990
त्रिपाठी, डॉ. विजय	'समासवृत्तिः विमर्शः	सं.सं.वि.वि., वाराणसी	1991
त्रिपाठी, डॉ श्रीधरः	'लिङ्गवचनविचारः	म.वि.पी., दरभंगा, दिल्ली	1990
त्रिपाठी, डॉ. सुजाता	पाणिनीय धात्वधिकार समीक्षा'	नाग पब्लिशर्स, दिल्ली	प्र.सं 2005
त्रिपाठी, रामशरणः	'कौमुदीकथाकल्लोलिनी'	चौख.वि.भ वाराणसी	प्रेस 1961
पण्डितः ईश्वरचन्द्रः	1. अष्टाध्याय्या चन्द्रलेखा' हिन्दी व्याख्या 2. काशिकावृत्तेः सोमलेखा- हिन्दी व्याख्या	चौ.सं. प्रति. दिल्ली काशिकावृत्तेः सोमलेखा हिन्दी व्याख्या	प्र.स 2004 प्रस. 2005
पादी, डॉ. किशोरचन्द्रः	'पाणिनीयव्याकरणे योगविभाग विमर्शः	भा. बुक. कार्पो दिल्ली	

भट्टाचार्य पं. श्री मनुदेवः	व्याकरणमतोन्मज्ज व्याख्यात्मक वृहदवैयाकरणभूषणम् 'रूपाली' टिप्पणी परिशिष्टादिभिर्विभूष्य सम्पादितम्	चौ. अमर.भा. प्र. वाराणसीः	प्र.सं. 1985
भण्डारे, वी. एन.	'संस्कृतसभाषणस्य प्रवृत्तिः पाणिनि च' (संस्कृत स्पीच हेबिट एण्ड पाणिनि आंग्लभाषायाम्)		प्र.स. 1986
माधवाचार्य, सेतु	श्रीव्यासपाणिनिगावनिर्णय (डॉ. एन. एस. रामानुजताताचार्येण एवं लक्ष्मीन्नरसिंहेन च सम्पादितः)	रा. रु. वि., तिरूपतिः	प्र.स. 1992
मिश्र, डॉ. गोपबन्धुः	कृत्-प्रत्ययविश्लेषण	सं. प्रसार परि. आगरा	प्र.सं. 2005
मिश्र, डॉ. जयन्तः	1. संस्कृतव्याकरणोदयः 2. संस्कृतव्याकरणसार 3. निबन्धकुसुमाञ्जलिः	दरभंगा, बिहार	
मिश्र, डॉ. शोभाकान्तः	'शब्दार्थ तत्त्व' (हिन्दी भाषायाम्)	बि.हि.ग्र. अका. पटना	प्र.स. 1986
मिश्र, पं. हरेकान्तः	बृहद्धातुकुसुमाकरः	चौख.वि.वि. वाराणसी	-

मिश्रः श्रीमुरलीधरः	रश्मि टिप्पणी प्रक्रिया कौमुद्यायाः	सं.सं.वि. वाराणसी,	प्र.स. 1977
मुनि, लाव्यविजयसुरि	धातुरत्नाकर	परिमल प्रकाशन, दिल्ली	-
यज्यः श्रीनिवासः	स्वरसिद्धान्तचन्द्रिका	रा.सं.वि.पी तिरूपति, (प्र.सं. 1९36)	पुनर्मुद्रण 1983
वेदालङ्कार, प्रो. भीमसिंहः	'विद्यानिधि (नवाह्निक) हिन्दी व्याख्या व्याकरणमहाभाष्यस्य	चौ.सु.भा. वाराणसी	प्र.स. 1983
वेदालङ्कार, डॉ. रघुवीरः	'ज्योतिषमती' हिन्दीव्याख्या सहिता 'विशेष इत्यनेन च विभूषिता काशिका	प्राच्य विद्या प्रति. दिल्ली	प्र.सं. 1997
शर्मा, गोविन्दप्रसादः	श्रीधरमुखोल्लासिनी-लघुकौमुद्यायाः व्याख्या	चौ. सु.भा. वाराणसी	प्र.स. 2007
शर्मा, झा कृष्णकुमारः	'उपसर्गरहस्यम्'	रामबाग, कानपुर	प्र.स. 1983
शर्मा, डॉ. अमिता	ज्ञापकसमुच्चयः	नाग प्रकाशक	1995

शर्मा, डॉ. जयकान्तसिंह	कालिदासीया तद्धितान्तरमणीयता	अमर ग्र. पब्लि. दिल्ली	प्र.स. 2003
शर्मा, डॉ. महेशदत्तः	काशिकावृत्तिवैयाकरणसिद्धान्त-कौमुद्यो' तुलनात्मकमध्ययनम्	सं. प्रगताध्ययनकेन्द्रम , पुण्य पत्तनम्, बिहार	प्र.स. जून 1974
शर्मा, डॉ. रमणकुमारः	शब्दशक्तिविमर्शः	तरूण ऑफसेट प्रि	प्र.स. 2001
शर्मा, डॉ. श्रीकृष्णः	'वृत्तिः मीमांसा'	राज. ग्रन्था. जोधपुरम्	प्र.स. 1991
शर्मा पं. कृष्णकुमारः	'उपसर्ग रहस्यम्	रामबाग, कानपुर	1983
शर्मा, रामनाथः	द अष्टाध्यायी ऑफ पाणिनि	हावर्ड, यू.एस.ए.	1987
शास्त्री, चारूदेवः	1. ए आर्ट ऑफ संस्कृत ट्रांसलेशन (आंग्लभाषायाम्) 2. मिरर टू संस्कृत यूजेज' (आंग्लभाषायाम्)	मोती. बना. वाराणसी मोती बना. वाराणसी	प्र.स. 1970 प्र.स. 1970
शास्त्री, डॉ. नरदेवः	'पाणिनीयशब्दार्थसम्बन्धसिद्धान्तः	प्रा.वि. प्रति. दिल्ली	प्र.स. 1987

शास्त्री, डॉ. रामशरणः	'पाणिनीयव्याकरणशास्त्रे वैशेषिकतत्त्वमीमांसा'	दिल्ली विश्ववि. दिल्ली	प्र.स. 1976
शास्त्री, डॉ. ज्ञानप्रकाशः	पाणिनिप्रत्ययार्थकोशः तद्धित प्रक.	परि. प्र. दिल्ली.	प्र.स. 2004
शास्त्री, श्री गौरीनाथः	लिङ्गवृत्तिविचारः	वाराणसी	1982
शास्त्री श्री वैद्यभीमसेनः	1. लघुसिद्धान्तकौमुदी-भैमी व्याख्या (स्त्रीप्रत्ययपर्यन्त षड्भाग) 2. अव्यय-प्रकरणम्-भैमी व्याख्या 3. न्यास-पर्यालोचनम् काशिका की व्याख्या 4. वैयाकरणभूषणसार-भैमीव्याख्या (धात्वर्थप्रकाशः) 5. बालमनोरमा भ्रान्ति दिग्दर्शनम्	भैमी प्रकाशन, दिल्ली भैमी प्रकाशन, दिल्ली भैमी प्रकाशन, दिल्ली भैमी प्रकाशन, दिल्ली भैमी प्रकाशन, दिल्ली	
शुक्ल, आ. रामयत्न	व्याकरणदर्शने सृष्टिप्रक्रिया विमर्शः	शिवमुद्राणालयः. बनारस	प्र.स. 2004

शुक्ल, डॉ रामकिशोरः	व्याकरणशास्त्रे लौकिकन्यायामुपयोगः	सं.सं.वि.वि., वाराणसी	1992
शुक्ल, डॉ. श्रीप्रकाशः	पाणिनीय व्याकरणे एवं अग्निपुराणों में निरूपित व्याकरण	जे. पी. पब्लि. हाऊस	प्र.स. 1997
शुक्ल, पं. श्री सूर्यनारायणः	पाणिनीयव्याकरणे वादरत्नम्	चौ.सं.सी.औ., बनारस	प्र.स. 1986
सोमयाजुलु, के.वी.	वाक्यपदीयस्थसाधनसमुद्देशविमर्शः (ममालोचनात्मकमध्ययनम्)	अमर ग्र. पब्लि. दिल्ली	प्र.स. 2002

(इति षष्ठोऽध्यायः)

❖ ❖ ❖

उपसंहारः

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।

जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥

भारतीयसंस्कृतेः प्राणभूतं व्याकरणशास्त्रं सर्वासां विद्यानां केन्द्रबिन्दुः, अनुशासनस्य च मूलम् अस्ति, यस्य हि मूले भगवतो महेश्वरस्य डमरूकासमुद्भूतानि चतुर्दश सूत्राणि , पाणिनेः अष्टाध्यायी, कात्यायनस्य वार्तिकानि, तथा च भगवतः पतञ्जलेः महाभाष्यं विराजन्ते। स्वातन्त्र्योत्तरकाले (स्वातन्त्र्योत्तरयुगे) संस्कृतव्याकरणशास्त्रस्य संरक्षणाय, संवर्धनाय च भारतवर्षस्य विभिन्नप्रान्तेषु—विशेषतः मिथिला-काशी-गुजरात-राजस्थानप्रदेशेषु—यत् मनीषीभिः कार्यं कृतम्, तस्य समग्रं शास्त्रीयम् आकलनम् अस्मिन् शोधप्रबन्धे प्रस्तुतम् अस्ति।

अयं शोधप्रबन्धः स्वातन्त्र्योत्तरकालीनस्य व्याकरणवाङ्मयस्य विविधपक्षाणां समीक्षणार्थं षट्सु अध्यायेषु विभक्तः अस्तिः।

प्रथमोऽध्याये (ऐतिहासिक-दार्शनिकपार्श्वभूमिः):

वेदाङ्गेषु 'मुखं व्याकरणम्' इति उक्त्वा व्याकरणस्य परमप्राधान्यं प्रतिपादितम् अस्ति। अस्मिन् अध्याये मुनित्रयस्य सिद्धांतानाम् अनुसरणेन नागेशोत्तरकालीनव्याकरणशास्त्रस्य, नव्यन्यायशैल्याः च विकासक्रमः सम्यक् दर्शितः अस्ति।

द्वितीयोऽध्याये (मौलिकग्रन्थानां समीक्षा):-

स्वातन्त्र्योत्तरकाले प्रणीतानाम् आर्षग्रन्थानाम् अनुगामिनां मौलिकग्रन्थानाम् अध्ययनं कृतम् अस्ति। महामहोपाध्याय-दीनबन्धुझा-महोदयस्य 'पाणिनीय-व्याकरणतत्त्वप्रदीपः', श्रीमदमृतलालशास्त्रिणः 'परिभाषेन्दुप्रभा', पं. गोपालशास्त्रिणः 'पाणिनीयप्रबोधः', तथा च पं. रामाज्ञापाण्डेयस्य ग्रन्थाः पारम्परिकव्याकरणस्य पाण्डित्यम् अद्यापि दैदीप्यमानं कुर्वन्ति इति प्रतिपादितम् अस्ति।

तृतीयोऽध्याये (टीकाग्रन्थपरम्परा):-

व्याकरणस्य गुह्यातिगुह्यान् विषयान् सरलीकर्तुं विरचितानाम् नवीनटीकानाम् अध्ययनम् अत्र वर्तते। पं. सभापति उपाध्यायस्य 'रत्नप्रभा', पं. रघुनाथशर्माणां 'अम्बाकर्त्री', पेरि सूर्यनारायणशास्त्रिणः 'नागेशभावप्रकाशः' इत्यादयः टीकाग्रन्थाः व्याकरणं सुरभितानि कुर्वन्ति।

चतुर्थोऽध्याये (शोधप्रबन्धानां योगदानम्):-

आधुनिकविश्वविद्यालयीयशिक्षाप्रणाल्यां शोधकार्यस्य प्रतिष्ठापनम् अभवत्। पं. गौरीनाथशास्त्रिणः 'Philosophy of Word and Meaning', पं. युधिष्ठिरमीमांसकस्य 'संस्कृतव्याकरणशास्त्रस्येतिहासः', पं. श्रीरामप्रसादत्रिपाठिनः 'पाणिनीयव्याकरणे प्रमाणसमीक्षा' च व्याकरणवाङ्मयस्य क्षितिजे दीपस्तम्भसदृशाः सन्ति।

पञ्चमोऽध्याये (वैयाकरणानां व्यक्तित्वं कृतित्वञ्च):-

ये विद्वांसः स्वजीवनं व्याकरणाराधने समर्पितवन्तः (यथा श्रीकृष्णचन्द्रशर्मा, शशिनाथ झा, शिवकान्त झा इत्यादयः), तेषां जीवनवृत्तस्य परिचयः प्रदीयते यत् एतेषां गुरुपरम्परा एव अस्माकं सांस्कृतिकनिधिः अस्ति।

षष्ठोऽध्याये (शास्त्रीय-दार्शनिकविमर्शः):-

शब्दप्रमाणकमीमांसा: "शब्दप्रमाणका वयम्" इति सिद्धान्तेन शब्दस्य नित्यत्वं स्वतःप्रामाण्यञ्च साधितम्।

स्फोटसिद्धान्तः: वैयाकरणसिद्धान्ते स्फोट एव अर्थप्रत्ययस्य मूलकारणं वर्तते, यस्य दार्शनिकं रूपं पण्डितबद्रीनाथशुक्लादीनां विचारेण स्पष्टीकृतम्।

मोक्षनिरूपणम्:- वैखरी-मध्यमा-पश्यन्ती-परावाक् क्रमेण साधनां कुर्वन् साधकः शब्दब्रह्मोपासनाद्वारेण परां मुक्तिम् प्राप्नोति—इति वैयाकरणसिद्धान्तस्य आध्यात्मिकं स्वरूपं प्रतिपादितम् अस्ति।

"नहि ज्ञानेन सदृशं पवित्रमिह विद्यते।"

इदमेव निष्कर्षरूपेण वक्तुं शक्यते यत् स्वातन्त्र्योत्तरकालीनैः वैयाकरणैः प्राचीनवैदिकपरम्परायाः आधुनिकतर्कशास्त्रस्य च यो अद्भुत समन्वयः कृतः, तेन संस्कृतव्याकरणशास्त्रम् केवलं शब्दानाम् अनुशासनं न रहित्वा अखिलदर्शनसाररूपेण समुद्भूतम् अस्ति। एषः शोधप्रबन्धः आगामीनां शोधकर्तृणां कृते व्याकरणशास्त्रस्य गम्भीररहस्यानाम् उद्घाटने मार्गदर्शकः भविष्यति।

❖ ❖ ❖

शोधसहायकग्रन्थानां सूची

1.	काशी की पाण्डित्य परम्परा	-	आ. बलदेव उपाध्याय, सं.-1983. सं. सं. वि. वि. वाराणसी
2.	संस्कृत व्याकरण शास्त्र का इतिहास	-	आ. श्री युधिष्ठिर मीमांसकः, च. सं. 1998, चौ. प. वाराणसी
3.	संस्कृतवाङ्मय का वृहद् इतिहास पञ्चदशखण्ड-व्याकरण	-	प्र. सं. आ. बलदेव उपाध्याय, प्र.सं. 2001, उत्तरप्रदेश सं. संस्थान, लखनऊ
4.	संस्कृत साहित्य का अभिनव इतिहासः	-	डॉ. राधावल्लभत्रिपाठी, विश्ववि. प्रकाशन, वाराणसी
5.	भारत की संस्कृति साधना'	-	डॉ. रामजी उपाध्याय, 1967
6.	संस्कृत साहित्य का इतिहास	-	ए.बी. कीथ. अनुवादक-मंगलदेवशास्त्री, प्र. मो. ब., दिल्ली 1960
7.	संस्कृतव्याकरणस्योद्भ-ववविकासश्च	-	सत्यकामवर्माकृतः

8. संस्कृत शास्त्रों का इतिहास - बिहार हिन्दी ग्रन्थ अकादमी, पटना, प्रथम सं. 1973

9. व्याकरणस्य संक्षिप्तोतिहासः - रमाकान्तमिश्रकृतः

10. व्याकरणशास्त्रेतिहासः - ब्रह्मानन्दत्रिपाठिकृतः।

11. अमृतमन्दाकिनी - डॉ. जी.बी. पल्सुले अभि.ग्र. 1996 डॉ. जी. बी. पल्सुले सत्कारसमिति, पुणे

12. व्याकरणशास्त्र का इतिहास - आ. लोकमणि दाहाल

13. भाषा-विज्ञान एवं भाषा-शास्त्र - डॉ. कपिलदेव द्विवेदी, स. सं. 2002, विश्ववि. प्रकाशन, वाराणसी

14. वैयाकरणानामन्येषां च मतेन शब्द स्वरूपच्छ-क्तिविचारः' - डॉ. कालिका प्रसाद शुक्लः, सं.वि.वि., वाराणसी

15. 'धात्वर्थ विज्ञानम्' - डॉ. भागीरथप्रसादत्रिपाठी (वागीशशास्त्री) 1980 ख्रिस्ताब्दे स.सं.वि.वि., वाराणसी,

16. अर्थविज्ञान और व्याकरणदर्शन - डॉ. कपिलदेव द्विवेदी, 1951

17. प्रौढ़ रचनानुवाद कौमुदी - डॉ. कपिलदेव द्विवेदी, वि. प्र., वाराणसी, 1991

18. शिक्षाङ्क - गीताप्रेस गोरखपुर, उत्तरप्रदेशः

19. व्याकरणदर्शन भूमिका - श्री रामाज्ञा पाण्डेय, सं.सं.वि.वि., वाराणसी, द्वि.सं. 1982

20. व्याकरणदर्शन पीठिका - श्री रामाज्ञा पाण्डेय, सं.सं.वि.वि., वाराणसी

21. व्याकरणदर्शन प्रतिमा - श्री रामाज्ञा पाण्डेय, रां.रां.वि.वि. वाराणसी, प्र.सं. 1979,

22. पाणिनीये व्या. प्रमाणसमीक्षा - श्री रामप्रसाद त्रिपाठी, रां.सं.वि.वि., वाराणसी, द्वि.सं. 1997

23. संस्कृत राइटिंग इन इन्डिपेनडेन्ट इंडिया-

24. 'सारस्वत सङ्गम (घाघरा से शिप्रा) सम्मान सुमनोञ्जलि' -

25. 'नागेशभावप्रकाशः पेरि सूर्यनारायणशास्त्री, प्र.रां. 2004, पाणिनीय प्रकाशनम्, तिरूपतिः ।

26. भूषणसार-परमलघुमञ्जूषयोः सिद्धान्तानां समीक्षा' डॉ. राममनोहरमिश्र, सं. 1983. सं.सं. वि.वि. वाराणसी.

27. हायर संस्कृत ग्रामर - मोरेश्वर रामचन्द्र काले, अनुवादक कपिलदेव इलाहबाद, 2001

28. संस्कृत-संस्कृति साधना खण्ड-1 डॉ. सत्यव्रतशास्त्रिणोऽभिनन्द ग्रंथः 1996 ख्रिस्ताब्दे, दिल्ली।

29. संस्कृत-संस्कृति साधना-खण्ड-2 डॉ. सत्यव्रतशास्त्रिणोऽभिनन्दनग्रंथः 1996 ख्रिस्ताब्दे, दिल्ली।

30. वाक्यपदीयम् श्रीभर्तृहरि, द्वितीय सं. 1997, कृष्णदास अकादमी, वाराणसी

31. व्याकरणमहाभाष्य भगवत्पतञ्जलि, प्र.सं. दिल्ली-1998, मो. बना, दिल्ली, मुम्बई वाराणसी ।

32. व्याकरणमहाभाष्य अभिनवराजलक्ष्मी व्याख्या-गुरुप्रसादशास्त्रिकृता

33. वैयाकरणभूषणसारदीपिका महा. पं. दीनबन्धु झा, प्र.सं. 2002, मिथिला विद्यापीठम्, दरभंगा।

34. वैयाकरणभूषणसारः श्रीमत्कौण्डभट्ट, द्वि. सं. 1996. चौ. सुर. प्र. वाराणसी

35. वैयाकरणभूषणसारः प्रभाटीका बालकृष्णपञ्चोलीकृत्

36. वैयाकरणभूषणसारः दर्पण सुबोधिनी डॉ. घन्द्रिका प्रसाद द्विवेदीकृत

37. परमलघुमञ्जूषायाः सरलाव्याख्या शशिनाथ झा, प्र.सं. 1983 ई. का. द.सं.वि.वि., दरभंगा, बिहार

38. परमलघुमञ्जूषा आ. लोकमणि दहाल द्वि.सं. 1998 चौ. सं. प्र. वाराणसी

39. वैयाकरणसिद्धान्तलघुमञ्जूषारत्नप्रभाटीका सभापतिशर्मोपाध्या-यकृता

40. वैयाकरणसिद्धान्तलघुमञ्जूषा-स. आ. श्रीरामप्रसादत्रिपाठी, प्र.सं. 1997 ई. सं.सं. विश्ववि. वाराणसी

41. सिद्धान्तकौमुदी-दीपिका व्याख्या श्री गोपालदत्तणण्डेय कृता

42. वैयाकरणसिद्धान्तकौमुदी सुबोधिनी टीका श्री जयकृष्णविरचिता

43. वैयाकरणसिद्धान्त-किरणावलीटीका आ. लोकमणि दहालकृता

44. लघुशब्देन्दुशेखरः-श्रीनागेशभट्ट, प्र.सं. 1994, चौ. सुर. प्र. वाराणसी

45. लघुशब्देन्दुशेखरः चन्द्रकलाभैरवीटीका भैरवमिश्रकृता

46. लघुशब्देन्दुशेखरः शेखरदीपकटीका नित्यानन्दपर्वतीयकृता

47. परिभाषेन्दुशेखरः श्रीमन्नागेशभट्टः तृ.सं. 1997, चौ. सं. प्र. वाराणसी

48. परिभाषेन्दुप्रभा (भावप्रकाशिकाव्याख्यासंवलिता) श्रीगदमृत-लालशर्मा, प्र.सं. 1963, गीतवि, जामखभालिया, सौराष्ट्र।

49. परिभाषेन्दुशेखरः भूतिटीका - गहामहोपाध्यायताता शास्त्रिकृता

50. परिभाषेन्दुशेखरः गदाटीका - महामहोपाध्यायवैद्यनाथ पायगुण्डेकृता

51. परिभाषेन्दुशेखरः- सर्वमङ्गलाटीका- श्री शेषशर्मासूरिकृता

52. परिभाषेन्दुशेखरः सुबोधिनीटीका आचार्य विश्वनाथ कृता

53. परिभाषेन्दुशेखरः शास्त्रार्थकलाटीका बेनीमाधवशास्त्रीकृता

54. अष्टाध्यायी सहजबोध तृ. भाग, डॉ. पुष्पा दीक्षिता, प्र. सं. 2004

55. अष्टाध्यायी पदानुक्रमकोश-अवनीन्द्र कुमार, प्र.सं.-1996 रा.सं.सं., दिल्ली

56. वाक्यपदीयम् पाठभेदनिर्णयः डॉ. रामकिशोर त्रिपाठी, भा. वि. सं. वाराणसी, 1997

57. शब्दाद्वैतदर्शनबिन्दुः श्री ब्रह्मदत्तद्विवेदी, सं. सं. वि.वि., वाराणसी, 1981

58. पाणिनीयव्याकरणस्य भाषावैज्ञानिकं व्याख्यानम्-डॉ. धनश्याम उनियालः, अमरग्रन्थः प्रका. दिल्ली 2002

59. ज्ञापकादर्शः पं. मणिनाथ झा, का. सिं. द. सं. वि. वि. दरभंगा, बिहार

English Books

1. 'Recent Research in Paninian Studies' George cardona First edition Delhi-1999 Scond Revised Edition-Delhi-2004, motialal Banarsidass.

2. 'Panini A Survey of Research - George cardona'. First Published the Hague, 1976, First indian Edition Delhi 1980, Reprint-1997, Motilal Banarsidass Publishers, Delhi.

3. Bibliography of Syakarana B.A. Pataskar and Ganesh Prasad Panda, First edition 1997, Centre of Adwanced study in sanskrit, University of Pune.

4. The Philosophy of Bhartrhari - Gaurinath sastri Bharatiya Vidya Prakashan, Varanasi First Edition-1991.

5. A Study in the Dialecties of Sphota Gaurinath Shsti Motilal Banarsidass-Delhi, 1980

कोषग्रन्थानां सूची

1. 'संस्कृत अंग्रेजी कोपै' वामनशिवराम आप्टे, मोटीन्जन, दिल्ली-1986
2. 'अमरकोषः सम्पादक पं. हरगोविन्दशास्त्री
3. 'शब्दकल्पदुम- चौखम्बा वाराणसी
4. 'भारतीय साहित्यशास्त्रकोषः डॉ. राजवंश साहाय 'हीरा'
5. 'हिन्दी संस्कृत कोषः डॉ. रामसरूप 'रसिकेशः
6. 'अमरकोशः' महामहोपाध्याय पण्डितशिवदत्तदधिमथः, प्रका. संस्कृतभारती नईदिल्ली

पत्र-पत्रिका

1. 'शिक्षा सुधा' - त्रैमासिकी संस्कृत-शैक्षिकापत्रिका, शिक्षा सुधा स. समितिः पुरीः अप्रैल-जून-2005
2. 'शोधप्रभा'- त्रैमासिकी, श्रीलालबहादुरशास्त्री रा.सं. विद्यापीठम्, दिल्ली 2006,
3. 'वयम् - जगद्गुरुरा.आ. रा.सं.वि.वि. मदाऊ, जयपुर, त्रैमासिकी पाण्मासिकी पत्रिका, संयुक्तांक दिस. 2008
4. 'सागरिका' डॉ. हरिसिंह गौरविश्वविद्यालय संस्कृतविभाग, सागर
5. 'सास्वतीसुषमा' उत्तरप्रदेश
6. 'स्वरमङ्गला' (त्रैमासिकी) राजस्था संस्कृत अकादमी जयपुरम्, 2003
7. 'जयन्ती - राष्ट्रियसंस्कृतसंस्थानम् जयपुरपरिसर, जयपुरम्, वर्ष 2008-09

8. 'दूर्वा - त्रैमासिकी-संस्कृतापत्रिका, मध्यप्रदेशसंस्कृत अकादमी, भोपाल

9. 'संस्कतरत्नाकरः' मासिक पत्रिका

10. 'वैयजन्ती' त्रैमासिकी संस्कृत-पत्रिका

11. 'भारती'- मासिकसंस्कृतपत्रिका-जयपुरम्-राजस्थानम्

12. 'विश्व-संस्कृतम् (त्रैमासिकी) विश्वेश्वरानन्द वैदिक-शोध संस्थानम्, साधु आश्रम होश्यारपुर, पंजाब मार्च-जून 2006

13. 'संस्कृतवार्ता' राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकी वार्तापत्रम् जुलाई 2008

14. 'चिकितुषी विद्याश्री न्यास, दाऊदपुर, गोरखपुर द्वारा प्रकाशितः - 2006

15. 'शेमुषी' (मासिकी) राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपतिः, आन्ध्रप्रदेशः

16. 'जैनभारती' (मासिकी) प्रका. जैन श्वेताम्बर तेरापंथ महासभा, कलकत्ता

17. 'श्रमण'- (मासिकी) सम्पादक-डॉ. मोहनलाल मेहता, प्रकाशक, पार्श्वनाथ विद्याश्रम शोध संस्थान, चैन इन्स्टीट्यूट, वाराणसी

18. 'ज्ञानायनी' लखनऊ

19. 'दृक्' इलाहबाद

20. 'सम्भाषणसन्देशः संस्कृतभारती, बंगलौर, कर्नाटक

21. Journal of Bhandarkar oriental Research Insitute Pune.

22. Journal of Trivendram University Trivendram, Kerla.

❖ ❖ ❖

अन्तर्जालसूची

1) www.ashtadhyaayi.com

2) www.scribd.com

3) http://sanskritlibrary.org/

4) http://sanskritlibraries.nic.in/

7) www.archive.org

8) http://sanskritdocuments.org/bookstores.html

9) http://sanskritlibraries.nic.in

10) www.samskrit.nic

11) Wikipedia (Sanskrit & English)

12) वाचस्पत्यम् app. निर्माणम् – सृजन् झा। राष्ट्रियसंस्कृतसंस्थानम् – मुम्बई।

13) http://www.sanskritworld.in

14) http://avg-sanskrit.org/

15) http://www.sanskritjournal.com/

16) अष्टाध्यायी app. निर्माणम् – सृजन् झा। राष्ट्रियसंस्कृतसंस्थानम् – मुम्बई।

17) शब्दकल्पद्रुमः app. निर्माणम् – सृजन् झा। राष्ट्रियसंस्कृतसंस्थानम् – मुम्बई।

18) सिद्धान्तकौमुदी app. निर्माणम् – सृजन् झा। राष्ट्रियसंस्कृतसंस्थानम् – मुम्बई।

19) अमरकोशः app. निर्माणम् – सृजन् झा। राष्ट्रियसंस्कृतसंस्थानम् – मुम्बई।

शोधप्रबन्धसज्जीकरणाय उपयुक्ताः सङ्गणकतन्त्रांशाः -

Microsoft Word .....

Baraha 9.0

Fonts- Sanskrit 2003,

❖ ❖ ❖

सङ्केताक्षरसूची

सा.द.-साहित्यदर्पणम्।

पा.धा.पा.---पाणिनीयधातुपाठः।

पा.सू.--पाणिनीयसूत्रम्।

म.भा ----महाभाष्यम्।

उ.सू--उणादिसूत्रम्।

तै.उ--- तैत्तिरीयोपनिषत्

अ.को.---अमरकोषः।

सू.सं.---सूत्रसंख्या।

ऋ.वे--ऋग्वेद।

का.सू---काव्यालंकारसूत्रम्।

व.जी---वक्रोक्तिजीवितम्।

श्लो.सं--श्लोकसंख्या।

अ.पु---अग्निपुराणम्।

छा.उ---छन्दोग्योपनिषद्।

चा.नी---चाणक्यनीतिः।

भ.गी---भगवद्गीता।

यजु. - यजुर्वेदः

साम. - सामवेदः

अथर्व. - अथर्ववेदः

ऐत.ब्रा. - ऐतरेयब्राह्मणम्

शत.ब्रा. - शतपथब्राह्मणम् (

कठ.उ. - कठोपनिषद्

ईश.उ. - ईशोपनिषद्

पा. सू.-पाणिनीय सूत्र

अष्टा. -अष्टाध्यायी

वाक्यप.- वाक्यपदीय

वै.सि.कौ. - वैयाकरणसिद्धान्तकौमुदी

ल.सि .कौ.- लघुसिद्धान्तकौमुदी

म.सि.कौ.- मध्यसिद्धान्तकौमुदी

वै.भू. सार. वैयाकरणभूषणसार:

का.की.पा.परम्परा. - काशी की पाण्डित्य परम्परा

व्या. द. प्रतिमा.- व्याकरण दर्पण प्रतिमा

पा.व्या.प्र .समीक्षा.- पाणिनी व्याकरण प्रतिभा समीक्षा

वै.भू. दीपिका.- वैयाकरणभूषणसार दीपिका

सं.वाङ्मय.का. बृ. इतिहास .- संस्कृत वाङ्मय का बृहत् इतिहास

❖ ❖ ❖

निष्कर्षः

इत्थं षड्भिरध्यायैः समन्वितोऽयं शोधप्रबन्धः "स्वातन्त्र्योत्तर-प्रमुखवैयाकरणानां व्यक्तित्वकृतित्वयोरध्ययनम्" इति शीर्षकमाश्रित्य मया यथामति सम्यगनुशीलितः, समीक्षितश्च। अस्मिन् शोधप्रबन्धे भारतीयव्याकरणशास्त्रस्य गौरवशालिनी परम्परा, तस्य ऐतिहासिकः क्रमिकविकासः, मुनित्रयस्य च व्याकरणशास्त्रे अमोघं महत्त्वपूर्णं योगदानं यथासम्भवं सप्रमाणं प्रतिपादितम्। विशेषतश्च स्वातन्त्र्योत्तरकाले व्याकरणशास्त्रस्य संरक्षणे, संवर्धने, विकासे च प्रमुखवैयाकरणानां विशिष्टं योगदानं तेषां व्यक्तित्व-कृतित्वयोः समन्वितया दृष्ट्या विवेचितमस्ति।

अयं शोधप्रबन्धः केवलं स्वातन्त्र्योत्तरप्रमुखवैयाकरणानां जीवनकृतित्वयोः परिचायकः न, अपितु भारतीयव्याकरणपरम्परायाः सातत्यं, तस्याः विकासशीलतां, आधुनिकयुगेऽपि तस्याः प्रासङ्गिकतां च प्रकाशयन् एकः सम्यगनुसन्धानात्मकः प्रयासः इति मम विश्वासः। अत्र प्रतिपादिताः विचाराः, संगृहीताः तथ्यसमूहाः, विवेचितानि मतानि च भारतीयव्याकरणशास्त्रस्य अध्येतॄणां, शोधच्छात्राणां, अध्यापकानां तथा अस्य विषयस्य जिज्ञासूनां कृते किञ्चिदुपकारकाः फलप्रदाश्च भविष्यन्तीति मे दृढः प्रत्ययः।

अस्मिन् शोधकार्ये यत्किञ्चिद् यथार्थं, सारगर्भितं वा सौष्ठवं दृश्यते, तत्सर्वं मम पूज्यगुरूणां मार्गदर्शनस्य, प्रेरणायाः, कृपायाश्च फलम्। तेषां सततप्रोत्साहनं विना एतादृशस्य गहनस्य शोधकार्यस्य परिसमापनं मम कृते न सम्भवेत्। अतः कृतज्ञतापूर्वकं शोधप्रबन्धमिमं मम सद्गुरुचरणारविन्देषु सश्रद्धं सविनयं च समर्पयामि।

यदत्र सौष्ठवं किञ्चिद् यद्वा ज्ञानस्य गौरवम्।

तत्सर्वं गुरुकृपाजन्यं न मदीयं कदाचन॥

यदत्रासौष्ठवं किञ्चिद् दोषो वा दृश्यते क्वचित्।

तत्सर्वं मम दोषोऽयं न गुरोर्नात्र संशयः॥

गुरुचरणकमलेभ्यः कृतज्ञतापूर्वकं समर्पितोऽयं शोधप्रबन्धः भारतीयव्याकरण-शास्त्रस्य समृद्धपरम्परायै, तस्याः समुन्नतये च मम लघुतमः प्रयत्नः।

॥ इति समाप्तोऽयं शोधप्रबन्धः ॥

॥ इति श्रीः ॥

❖ ❖ ❖